Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीसीतापतये नमः

श्रीवाल्मीकिमहामुनिकृतशतकोटिरामचरितान्तर्गतं

आनन्दरामायणम्

'ज्योत्स्ना'ख्यया भाषाटीकयाऽऽटीकितम्

सारकाण्डम्

प्रथमः सर्गः

(दशरथ-कौसल्याविवाह तथा ऋष्यशृङ्ग द्वारा पुत्रेष्टि यज्ञ)

श्रीवाल्मीकिरुवाच

वामे भूमिसुता पुरस्तु हनुमान् पृष्ठे सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥ १ ॥

आदौ रावणमर्दनं द्विजगिरा तीर्थाटनं सीतया साकेते दशवाजिमेधकरणं पत्न्या विलासाटनम् ।
स्त्रीपुत्रग्रहणं स्नुषार्थमटनं पृथ्व्याश्च संरक्षणं रामार्चादिनिरूपणं दयितया स्वीयं स्थलारोहणम् ॥२॥
एकदा पार्वती देवी शंकरं प्राह हर्षिता । कैलासवासिनं नत्वा रामभक्त्यैकतत्परा ॥३॥

पार्वत्युवाच

शंभो त्वया पुराणानि कथितानि ममांतिके । रघुनाथस्य चरितं जन्मकर्मसमन्वितम् ॥ ४ ॥
कथयस्वाधुना देव मम प्रीतिविवर्द्धनम् । आनन्ददायकं कर्म रघुवीरेण यत्कृतम् ॥ ५ ॥

श्रीवाल्मीकि मुनि कहते हैं कि जिनके बाँयें भागमें सीताजी, सामने हनुमान, पीछे लक्ष्मण, दोनों बगल शत्रुघ्न और भरत, वायव्य ईशान अग्नि तथा नैर्ऋत्यकोणमें क्रमशः सुग्रीव, विभीषण, तारापुत्र युवराज अङ्गद और जाम्बवान् हैं, उनके बीच विराजमान श्याम कमलसदृश मनोहर कान्तिवाले परम पुरुषोत्तम भगवान् श्रीरामचन्द्रजीका मैं भजन करता हूँ॥ १॥ इस ग्रन्थके सारकांडमें ऋषिवाक्यसे दुष्ट रावणका हनन, दूसरे यात्राकांडमें सीताके साथ रामकी तीर्थयात्रा, तीसरे यागकांडमें अयोध्यामें दस अश्वमेध यज्ञ, चौथे विलासकांडमें पत्नीके साथ विलास, पाँचवें जन्मकांडमें लव-कुशकी उत्पत्ति तथा सीताकी पुनः स्वीकृति, छठें विवाहकांडमें लवकुशके विवाहके लिए प्रस्थान, सातवें राज्यकांडमें धर्मपूर्वक पृथ्वीका रक्षण, आठवें मनोहरकांडमें रामकी पूजा आदिका वर्णन और नवें पूर्णकांडमें सीतासहित भगवान् रामचन्द्रके स्वधाम पधारने आदिका सुन्दर चरित्र वर्णित है॥ २॥ एक समय रामचन्द्रजीकी भक्तिमें तत्पर देवी पार्वतीने कहा—हे शम्भो! आपने बहुतसे पुराणोंकी सुन्दर कथा मुझे सुनायी। हे देव! अब आप कृपा करके मेरी प्रीति बढ़ानेवाले रघुवीर रामचन्द्रके आनन्ददायक कर्म और उनके जन्म आदिकी मनोहर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्यक् पृष्टं त्वया कान्ते रामचन्द्रकथानकम् । कथयामि सविस्तारं महामंगलकारकम् ॥ ६ ॥
आदिनारायणाद्ब्रह्माऽभून्मरीचिर्विधेः सुतः । मरीचेः कश्यपः पुत्रस्तत्सुतः सूर्य उच्यते ॥ ७ ॥
सूर्यपुत्रः श्राद्धदेवो मनुर्वैवस्वतस्त्विति । स एव प्रोच्यते तस्येक्ष्वाकुः पुत्रः प्रतापवान् ॥ ८ ॥
इक्ष्वाकोस्तु विकुक्षिर्हि शशादश्च स एव हि । विकुक्षेस्तु ककुत्स्थश्च स एवात्र पुरञ्जयः ॥ ९ ॥
स एवोक्तश्चन्द्रवाहः ककुत्स्थनृपतेः सुतः । अनेनास्तस्य पुत्रोऽभूद्विश्वरन्धिश्च तत्सुतः ॥१०॥
चन्द्रश्चन्द्रस्य पुत्रोऽभूद्युवनाश्वः प्रतापवान् । शावस्तो युवनाश्वस्य शावस्तस्य सुतो महान् ॥११॥
बृहदश्व इति ख्यातस्तस्माज्जज्ञे नृपोत्तमः । कुवलयाश्वो नृपतिर्दृढाश्वस्तत्सुतः स्मृतः ॥१२॥
हर्यश्व इति तत्पुत्रो निकुम्भस्तत्सुतः स्मृतः । बर्हणाश्वो निकुम्भस्य बर्हणाश्वनृपोत्तमात् ॥१३॥
कृताश्वो नृपतिः प्रोक्तः श्येनजित्तत्सुतः स्मृतः । युवनाश्वः श्येनजितो युवनाश्वनृपोत्तमात् ॥१४॥
मान्धाता त्रसदस्युर्हि स एव कथितो भुवि । पुरुकुत्सश्च मान्धातुः पुरुकुत्सस्य वै पुनः ॥१५॥
त्रसदस्युरिति ख्यातोऽनरण्यश्चापि तत्सुतः । अनरण्यस्य हर्यश्वो हर्यश्वस्यारुणः सुतः ॥१६॥
त्रिबन्धनोऽरुणाज्जातस्त्रिबन्धनसुतो महान् । सत्यव्रतः स एवात्र त्रिशङ्कुरिति वै स्मृतः ॥१७॥
सत्यव्रतस्य पुत्रोऽभूद्धरिश्चन्द्रः प्रतापवान् । रोहितस्तत्सुतः प्रोक्तस्तस्माच्च हरितः स्मृतः ॥१८॥
हरितस्य सुतश्चम्पः सुदेवश्चम्पदेहजः । सुदेवाद्विजयः प्रोक्तस्तत्पुत्रो भरुकः स्मृतः ॥१९॥
भरुकस्य वृकः पुत्रो वृकपुत्रस्तु बाहुकः । बाहुकात्सगरो जज्ञेऽसमञ्जः सगरात्मजः ॥२०॥
असमञ्जसश्च पुत्रोऽभूदंशुमानिति नामतः । तस्य पुत्रो दिलीपस्तु दिलीपाच्च भगीरथः ॥२१॥
भगीरथाच्छ्रुतो जातः श्रुतान्नाभः प्रकीर्त्यते । नाभस्य सिन्धुद्वीपश्च ह्ययुतायुश्च तत्सुतः ॥२२॥
ऋतुपर्णस्त्वयुतायोः सुदासस्तस्य कीर्त्यते । मित्रसहः स एवात्र कल्माषांघ्रिः स एव हि ॥२३॥
सुदासस्याश्मकः पुत्रो मूलकोऽश्मकदेहजः । स एव नारीकवचो मूलकस्य सुतो महान् ॥२४॥
नाम्ना दशरथः प्रोक्तस्तस्य पुत्रः प्रतापवान् । नाम्ना त्वैडविडः प्रोक्तस्तस्य विश्वसहः स्मृतः॥२५॥
तस्य पुत्रस्य खट्वाङ्गः खट्वाङ्गाद्दीर्घबाहुकः । दिलीपश्च स एवात्र तस्य पुत्रो रघुः स्मृतः ॥२६॥

कथा सुनाइये ॥ ३–५ ॥ शिवजी बोले–हे कान्ते ! तुमने श्रीरामचन्द्रका कथाविषयक बड़ा अच्छा प्रश्न किया है। मैं उस मङ्गलकारिणी कथाको विस्तारपूर्वक कहता हूँ ॥ ६ ॥ आदि नारायण विष्णुसे ब्रह्माजी जायमान हुए। ब्रह्मासे मरीचि, मरीचिसे कश्यप, कश्यपसे सूर्य और सूर्यसे श्राद्धदेव हुए ॥७॥८॥ उन्हींको वैवस्वत मनु भी कहते हैं। उनके बड़े प्रतापी इक्ष्वाकु, इक्ष्वाकुसे विकुक्षि अथवा शशाद और विकुक्षिके ककुत्स्थ अर्थात् पुरञ्जय हुए। ककुत्स्थसे इन्द्रवाह, इन्द्रवाहसे अनेना, अनेनासे विश्वरन्धि, विश्वरन्धिसे चन्द्र और चन्द्रका युवनाश्व नामक प्रतापी पुत्र हुआ । युवनाश्वसे शावस्त, शावस्तसे बृहदश्व तथा बृहदश्वसे कुवलयाश्व सर्वश्रेष्ठ राजा हुए। कुवलयाश्वसे दृढाश्व, दृढाश्वसे हर्यश्व, हर्यश्वसे निकुम्भ, निकुम्भसे बर्हणाश्व, बर्हणाश्वसे कृताश्व, कृताश्वसे श्येनजित्, श्येनजित्से युवनाश्व, युवनाश्वसे मांधाता हुए। जो संसारमें त्रसदस्यु नामसे प्रसिद्ध थे। मांधातासे पुरुकुत्स, पुरुकुत्ससे फिर दूसरे त्रसदस्यु हुए । त्रसदस्युसे अनरण्य, अनरण्यसे हर्यश्व, हर्यश्वसे अरुण, अरुणसे त्रिबन्धन, त्रिबन्धनसे सत्यव्रत हुए। उनका नाम त्रिशंकु भी था ॥ ९–१७ ॥ सत्यव्रतसे हरिश्चन्द्र नामके बड़े सत्यवादी और प्रतापी राजा हुए। हरिश्चन्द्रसे रोहित, रोहितसे हरित, हरितसे चंप, चंपसे सुदेव, सुदेवसे विजय, विजयसे भरुक, भरुकसे वृक, वृकसे बाहुक, बाहुकसे सगर, सगरसे असमञ्जस, असमञ्जससे अंशुमान्, अंशुमान्से दिलीप, दिलीपसे भगीरथ, भगीरथसे श्रुत, श्रुतसे नाभ, नाभसे सिन्धुद्वीप, सिन्धुद्वीपसे अयुतायु, अयुतायुसे ऋतुपर्ण और ऋतुपर्णसे सुदास हुए। वे मित्रसह और कल्माषांघ्रि नामसे भी प्रसिद्ध थे ॥ १८–२३ ॥ सुदाससे अश्मक, अश्मकसे मूलक, मूलकसे नारीकवच, नारीकवचसे दशरथ,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रघोः पुत्रो ह्यजः प्रोक्तस्तस्माद्दशरथः स्मृतः । राज्ञो दशरथाज्जातः श्रीरामः परमेश्वरः ॥२७॥
यस्य नामान्यनन्तानि गृणंति मुनयः सदा । विष्णोरारभ्य कथिता एकषष्टिर्नृपा मया ॥२८॥
एकषष्टिर्नृपाश्चाग्रे मध्ये रामो विराजते । तस्य ते चरितं कृत्स्नं संक्षेपाच्च ब्रवीम्यहम् ॥२९॥
इक्ष्वाकुवंशप्रवरः क्षत्रियो लोकविश्रुतः । बलवान् सरयूतीरेऽयोध्यायां पार्थिवोत्तमः ॥३०॥
नाम्ना दशरथः श्रीमान् जम्बूद्वीपपतिर्महान् । शशास राज्यं धर्मेण सैन्येन महताऽऽवृतः ॥३१॥
अयोध्यायास्तु सान्निध्ये देशे श्रीकोसलाह्वये । कोसलायां महापुण्यः कोसलाख्यो नृपो महान् ॥३२॥
तस्यासीद्दुहिता रम्या कौसल्या पतिकामुका । तस्या दशरथेनैव विवाहो निश्चितो मुदा ॥३३॥
लग्नार्थं तं समानेतुं दूता दशरथं नृपम् । ययुर्विनिश्चयं कृत्वा विवाहदिवसस्य च ॥३४॥
तदा दशरथश्चापि साकेते सरयूजले । नौकास्थो जलजां क्रीडां चक्रे वै मंत्रिबंधुभिः ॥३५॥
निशायां सेनया युक्तः स्तुतो मागधवंदिभिः । रत्नदीनप्रकाशैश्च नन्तृतुर्वारयोषितः ॥३६॥
तस्मिन्काले तु लंकायां विधिं पप्रच्छ रावणः । कस्मान्मे मरणं ब्रह्मन् तत्त्वं मां वक्तुमर्हसि ॥३७॥
तद्रावणवचः श्रुत्वा कथयामास तं विधिः । कौसल्यायां दशरथाद्रामः साक्षाज्जनार्दनः ॥३८॥
चतुर्धा पुत्ररूपेण भूत्वा स निहनिष्यति । पंचमेऽहनि लग्नस्य राज्ञो दशरथस्य हि ॥३९॥
दिवसो निश्चितो विप्रैः कौसल्याख्येन रावण । तद्विधेर्वचनं श्रुत्वा पुष्पकस्थो दशाननः ॥४०॥
अयोध्यां सत्वरं गत्वा राक्षसैः परिवेष्टितः । नौकास्थं तं दशरथं जित्वा युद्धैः सुदारुणैः ॥४१॥
बभंज निजपादेन तां नौकां सरयूजले । तदा सर्वे मृतास्तत्र सरय्वा निमले जले ॥४२॥
दशरथसुमंत्रौ द्वौ नौकाखण्डोपरि स्थितौ । शनैः शनैः प्रवाहेण गत्वा भागीरथीं नदीम् ॥४३॥

दशरथसे ऐडविड, ऐडविडसे विश्वसह, विश्वसहसे खट्वाङ्ग, खट्वाङ्गसे दीर्घबाहु हुए। उन्हींका नाम दिलीप भी था। दिलीपसे रघु, रघुसे अज और अजसे बड़े प्रतापी महाराज दशरथ हुए। दशरथसे साक्षात् परमेश्वर मर्यादापुषोत्तम रामचन्द्रजा जायमान हुए ॥ २४-२७ ॥ उनके अनन्त नाम हैं। जिनको मुनिलोग सदा गाया करते हैं। विष्णुसे लेकर ६१ (इकसठ) राजे मैंने गिनाये। उन राजाओंके बाद रामचन्द्रजी प्रकट हुए। उनका चरित्र मैं तुमको संक्षेपमें बताता हूँ ॥ २८ ॥ २९ ॥ इक्ष्वाकुकुलमें श्रेष्ठ, लोगोंमें प्रसिद्ध, बलवान् क्षत्रिय, सरयू नदीके किनारे बसी हुई अयोध्या नगरीके राजा, जम्बूद्वीपके स्वामी, बड़े भारी श्रीमान् राजा दशरथ विशाल सेना रखकर धर्म तथा न्यायपूर्वक राज्यका शासन करते थे ॥ ३० ॥ ३१ ॥ अयोध्याके पास हा कोसलदेशकी कोसलपुरीमें कोसल नामका एक बड़ा पुण्यात्मा राजा राज्य करता था ॥ ३२ ॥ उसकी विवाहके योग्य एक सुन्दरी कौसल्या नामकी पुत्री थी। उसका उसके पिता कोसलने दशरथके साथ विवाह निश्चित किया। बादमें आनन्दके साथ विवाहके दिनका निश्चय करके उन्होंने लग्नके निमित्त राजा दशरथको बुलानेके लिए दूतोंको भेजा ॥ ३३ ॥ ३४ ॥ उस समय राजा दशरथ सरयूनदीके बीच नौकापर बैठकर इष्टमित्रों तथा मन्त्रियोंके साथ जलक्रीड़ा कर रहे थे। रात्रिका समय था, चारों ओर सैनिक खड़े थे, चारणगण स्तुति कर रहे थे और रत्नोंके दीपके प्रकाशसे समस्त नाव जगमगा रही थी। वाराङ्गनायें नानाप्रकारके नृत्य-गान कर रही थीं ॥ ३५ ॥ ३६ ॥ उसी समय लङ्काके राजा रावणने ब्रह्मासे पूछा—हे ब्रह्मन् ! मेरा किसके हाथों मरण होगा ? यह आप स्पष्ट कहिये ॥ ३७ ॥ रावणका वचन सुनकर ब्रह्माने कहा कि दशरथकी स्त्री कौसल्यासे साक्षात् जनार्दन भगवान राम आदि चार पुत्रोंके रूपमें उत्पन्न होंगे। उनमेंसे राम तुमको मारेंगे। कोसलराजने ब्राह्मणोंसे पूछकर राजा दशरथके लग्नका आजसे पाँचवाँ दिन निश्चित किया है। ब्रह्माका यह वचन सुना तो रावण बहुतसे राक्षसोंको साथ लेकर शीघ्र अयोध्यानगरीको चल पड़ा। वहाँ जा और घोर युद्ध करके उसने नौकापर बैठे राजा दशरथको पराजित किया और पादप्रहारसे नावको तोड़कर सरयूके जलमें डुबो दिया। उस समय और सब तो जलमें डूबकर मर गये। परन्तु राजा दशरथ तथा सुमन्त्र नामका मन्त्री दैवेच्छासे नावके टुकड़ोंपर बैठकर धीरे-धीरे

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः समुद्रमध्ये हि जीविताविश्वरेच्छया । रावणः कोसलं गत्वा कृत्वा परमसंगरम् ॥४४॥
कोसलाख्यं नृपं जित्वा कौसल्यां तां जहार सः । ततः प्रमुदितो लंकां ययावाकाशवर्त्मना ॥४५॥
दृष्ट्वा तिमिंगिलं मत्स्यं वसंतं लवणार्णवे । चित्ते विचारयामास देवास्ते मम शत्रवः ॥४६॥
लंकायाश्च हरिष्यन्ति कौसल्यां गुप्तविग्रहाः । अतस्तिमिङ्गिलायेमां न्यासभूतां करोम्यहम् ॥४७॥
इति निश्चित्य मनसि पेटिकायां निधाय ताम् । मत्स्यं समर्प्य हृष्टात्मा ययौ लंकां दशाननः ॥४८॥
तिमिङ्गिलोऽपि तामास्ये धृत्वाऽब्धौ व्यचरत्सुखम् । अग्रे दृष्ट्वा रिपुं स्वीयं तेन युद्धार्थमुद्यतः ॥४९॥
द्वीपे तां पेटिकां स्थाप्य संग्रामं रिपुणाऽकरोत् । एतस्मिन्नन्तरे नौकाखंडं तं द्वीपमागतम् ॥५०॥
तदा तौ मंत्रिनृपती द्वीपं तमारुरुहतुः । तत्र तां पेटिकां दृष्ट्वा समुद्धाट्यातिविस्मितौ ॥५१॥
तस्यां दृष्ट्वाऽथ कौसल्यां ज्ञात्वा वृत्तं परस्परम् । तया मुहूर्तसमये द्वीपे दशरथो नृपः ॥५२॥
गान्धर्वाख्यं विवाहं च चकार मुदिताननः । ततो राजाऽथ कौसल्या सुमंत्रो मंत्रिसत्तमः ॥५३॥
त्रयःस्थित्वा पेटिकायां तद्द्वारं पिदधुः पुनः । तिमिंगिलो रिपुं जित्वा चकारास्ये तु पेटिकाम् ॥५४॥
लंकायां रावणश्चापि समाहूय विधिं पुनः । उवाच प्रहसन्वाक्यं सभायां संस्थितः सुखम् ॥५५॥
विधे तव मृषा वाक्यं रावणेन मया कृतम् । हतो दशरथस्तोये कौसल्या गोपिता मया ॥५६॥
तद्रावणवचः श्रुत्वा सभायां पद्मसंभवः । दीर्घस्वरेण प्रोवाच ॐपुण्याहमिति स्फुटम् ॥५७॥
रावणः संभ्रमात्प्राह किमिदं व्याहृतं त्वया । विधिः प्रोवाच लग्नं तु जातं दशरथस्य हि ॥५८॥
तदा विधिं मृषा कर्तुं दूतान्संप्रेष्य सादरम् । तिमिङ्गिलात्समानीय पेटिकां ब्रह्मणोऽन्तिके ॥५९॥
समुद्धाट्य ददर्शासौ तत्र तस्यां दशाननः । तदाऽतिचकितः क्रुद्धस्तान् हतुं खड्गमाददे ॥६०॥

जलप्रवाहके सहारे गंगानदीमें जा पहुँचे ॥ ३८-४३ ॥ वहाँसे बहते हुए वे दोनों समुद्रमें जा मिले। उधर रावण अयोध्यासे चलकर कोसलनगरीमें जा पहुँचा और भयानक युद्ध करके राजा कोसलको जीत लिया। तदनन्तर कौसल्याका हरण करके वह आनन्दके साथ आकाशमार्गसे लङ्काको चला ॥ ४४ ॥ ४५ ॥ रास्तेमें क्षार समुद्रमें रहनेवाली तिमिङ्गिल मछलीको देखकर उसने सोचा कि सब देवता मेरे शत्रु हैं। कहीं रूप बदलकर वे लङ्कासे कौसल्याको चुरा न ले जायँ। इसीलिये इसको यहीं इस तिमिङ्गिलको घरोहररूपमें सौंप दूँ तो ठीक हो ॥ ४६ ॥ ४७ ॥ ऐसा सोचकर उसने कौसल्याको पिटारीमें बन्द करके तिमिङ्गिल मछलीको सौंप दिया और स्वयं आनन्दके साथ लङ्का चला गया ॥ ४८ ॥ वह मछली उस पिटारीको मुखमें लेकर सुखपूर्वक समुद्रमें घूमने लगी। सहसा अपने शत्रुको सामने देखकर उसने शत्रुके साथ युद्ध करनेका निश्चय किया ॥ ४९ ॥ तदनुसार पिटारीको एक टापूपर रखकर वह शत्रुसे युद्ध करने लगी। उसी समय वह नावका टुकड़ा भी उसी टापूके किनारे आ लगा ॥ ५० ॥ तब राजा दशरथ तथा सुमन्त्र उसी द्वीपमें उतर पड़े। वहाँ उनकी दृष्टि उस पिटारीपर पड़ी। खोलकर देखनेपर उसमें कौसल्याको देखकर उन्हें बड़ा आश्चर्य हुआ ॥ ५१ ॥ बादमें एक दूसरेसे सब बातोंको जान करके प्रसन्न हुए और अच्छे मुहूर्तमें वहींपर राजा दशरथने प्रसन्नतापूर्वक कौसल्याके साथ गांधर्व विवाह कर लिया। पश्चात् राजा, कौसल्या तथा मन्त्रियोंमें श्रेष्ठ मन्त्री सुमन्त्र ये तीनों पुनः पिटारीमें घुस गये और ढकना बन्द कर लिया। मछलीने भी शत्रुको जीतकर उस सन्दूकको फिर अपने मुखमें रख लिया ॥ ५२-५४ ॥ उधर लङ्कामें रावण सुखपूर्वक सभाके बीचमें बैठा और ब्रह्माजीको बुलाकर हँसते हुए बोला—॥ ५५ ॥ हे ब्रह्मन्! मैंने आपके वचनको भी झूठा कर डाला। दशरथको जलमें डुबोकर कौसल्याको छुपा दिया ॥ ५६ ॥ भरी सभामें रावणके इस वचनको सुनकर ब्रह्माने जोरसे स्पष्ट शब्दोंमें "ॐ पुण्याहम्" ऐसा कहा ॥ ५७ ॥ यह सुनकर रावणने पूछा कि यह आपने क्या कहा? ब्रह्माजी बोले—अरे! राजा दशरथका विवाह हो गया ॥ ५८ ॥ रावण ब्रह्माके वचनको असत्य प्रमाणित करनेके लिये दूतों द्वारा मछलीसे पेटी मँगवायी और ज्यों ही खोलकर ब्रह्माजीको दिखलाना चाहा, त्यों ही उसमें सबके साथ दशरथ कौसल्याको देखकर

CC0. In Public Domain Kirtikant Sharma Rajafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदाऽतिसंभ्रमाद्ब्रह्मा रावणं वाक्यमब्रवीत् । किं करोषि दशास्य त्वं माऽधुना साहसं कुरु ॥६१॥
कौसल्यैका स्थापिताऽस्यां पेटिकायां त्वया पुरा । त्रयस्तत्र तु संजाता भविष्यन्त्यत्र कोटिशः ॥६२॥
भविष्यति वधस्तेऽद्य रामोऽद्यैव जनिष्यति । साहसं कुरु माऽद्यैव सत्यायुषि दशानन ॥६३॥
यद्भविष्यं तद्भवतु तदग्रे माऽस्तु सांप्रतम् । एतान्दूतैः प्रेषयाद्य साकेतं त्वं सुखी भव ॥६४॥
न भविष्यति मद्वाणी मृषा जानीहि निश्चयम् । यद्भाव्यं तद्भवत्येव गहना कर्मणो गतिः ॥६५॥
तद्विधेर्वचनं सत्यं मत्वा भीतो दशाननः । पेटिकां प्रेषयामास साकेतं स्वभटैर्जवात् ॥६६॥
साकेते पेटिकां त्यक्त्वा भटास्ते रावणं गताः । अयोध्यायां महानासीत्संभ्रमो नृपदर्शनात् ॥६७॥
अयोध्यावासिनां नृणां कोसलाधिपतेरपि । ततः पुनर्विवाहस्य संभ्रमं कोसलाधिपः ॥६८॥
कृत्वा स्वराज्यं जामात्रे ददौ प्रीत्या हि पुत्रिकाम् । तदारभ्य कोसलेन्द्राः प्रोच्यन्ते रविवंशजाः ॥६९॥
ततो राजा दशरथः सुमित्रां मगधेशजाम् । विवाहेनापरां पत्नीं चकार दयितां प्रियाम् ॥७०॥
कैकेयनृपतेः कन्यां कैकेयीं पद्मलोचनाम् । विवाहेनाकरोद्भार्यां तृतीयां परमादरात् ॥७१॥
तथाऽन्यानि सप्तशतकलत्राण्यकरोन्नृपः । एवं राजा दशरथः शशास जगतीतलम् ॥७२॥
दानैर्भोगैर्दशरथो बभूव जरठो महान् । नाभवत्संततिस्तस्य धार्मिकस्यावनीपतेः ॥७३॥
कौसल्या च सुमित्रा च कैकेयी च गिरींद्रजे । एताः कुलीनाः सुभगा रूपयौवनसंयुताः ॥७४॥
तस्मिन् शासति राज्यं तु स्थितेऽयोध्यापुरि प्रिये । देवानां दानवानां च राज्यार्थं विग्रहो महान्॥७५॥
तत्र वागभवच्छ्रेष्ठा यत्रायोध्यापतिर्महान् । जयस्तत्र न संदेहस्तां श्रुत्वा पवनो जवात् ॥७६॥
प्रार्थयामास नृपतिं गत्वा युद्धाय सादरम् । ततो गत्वा दशरथश्चकार कदनं महत् ॥७७॥

पहले तो बहुत चकित हुआ। फिर क्रुद्ध होकर उन्हें मारनेके लिये उसने तलवार निकाल ली ॥ ५९ ॥ ६० ॥ तब ब्रह्माने रावणको रोककर कहा—अरे दशवदन ! यह क्या करता है ? इस समय ऐसा साहस मत कर ॥ ६१ ॥ देख, तूने केवल कौसल्याको ही इसमें रक्खा था। किन्तु ये एकसे एक तीन हो गये। वैसे हा इन तीनोंसे करोड़ों हो जायँगे। ६२ ॥ राम भी आज ही जन्म ले लेंगे और तू मारा जायगा। आयु शेष रहते क्यों व्यर्थ मरना चाहता है ? इसलिये तू ऐसा साहस त्याग दे ॥ ६३ ॥ जो होनी होगी सो आगे होगी। अभी तू कुछ मत कर और इन तीनोंका दूत द्वारा इनके स्थानको भेजवाकर सुखा हो ॥ ६४ ॥ मेरी बात कभी झूठ न होगी । इस बातका निश्चय रख। कर्मकी गति बड़ी गहन होती है। कर्मके अनुसार जो होनेवाला होता है, सो होकर ही रहता है ॥ ६५ ॥ इस घटनाको घटित होते देखकर रावण कुछ डर गया और ब्रह्माजीकी बातको सच्ची मानकर वह पिटारी अपने दूतों द्वारा शीघ्र अयोध्या भेज दी ॥ ६६ ॥ राजा दशरथ आदिको सकुशल आया देखकर अयोध्यावासियों तथा कोसलदेशके राजा आदिको बड़ी प्रसन्नता हुई और आश्चर्य भी हुआ। बादमें कोसलाधिपतिने बड़े समारोहके साथ फिरसे विवाह करके अपनी कमनीय कन्या कौसल्या तथा अपना संपूर्ण राज्य अपने दामाद राजा दशरथको दहेजरूपमें दे दिया। तबसे कोसलदेशके राजे भी सूर्यवंशी कहलाने लगे ॥ ६७--६९ ॥ तदनन्तर राजा दशरथने मगधदेशके राजाकी कन्या सुमित्राको ब्याहकर अपनी दूसरा प्राणप्रिया स्त्री बनायी ॥ ७० ॥ केकय देशके राजाकी कमलनयनी कन्या कैकेयीको ब्याहकर उन्होंने बड़े आदरपूर्वक तीसरी पत्नी बनायी ॥ ७१ ॥ इन तीनोंके अतिरिक्त अन्य भी उनकी सात सौ स्त्रियें थी। इस प्रकार आनन्दपूर्वक राजा दशरथ दान-मान-भोग-ऐश्वर्य आदिके द्वारा पृथ्वीका शासन करते हुए वृद्ध हो गये। परन्तु उन परम धार्मिक राजा दशरथके कोई सन्तान नहीं हुई ॥ ७२ ॥ ७३ ॥ हे प्रिये पार्वती ! पुत्रके बिना राजाको रूपयौवन युक्त मनोज्ञ कौसल्या, कैकेयी तथा सुमित्रा आदि स्त्रियें, राज्य और विशाल अयोध्यापुरी सूनी तथा व्यर्थ दीखने लगी। उसी समय देवताओं और दानवोंमें राज्य-के लिए बड़ा भारी युद्ध आरम्भ हो गया ॥ ७४ ॥ ७५ ॥ उस युद्धमें यह आकाशवाणी हुई कि 'जिसके पक्षमें अयोध्यापति राजा दशरथ होंगे, उसी पक्षकी विजय होगी।' उस वाणीको सुनकर पवनदेवने शीघ्र जाकर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतस्मिन्नन्तरे तत्र संग्रामेऽतिभयावहे । भिन्नाक्षं स्वरथं राजा नाविदद्दिष्टसंभ्रमात् ॥७८॥
राज्ञोऽन्तिके स्थिता सुभ्रूः कैकेयी रणकौतुकम् । पश्यन्ती स्वरथं भिन्नं ददर्श समरांगणे ॥७९॥
अक्षवत्सा निजं हस्तं चकार जयहेतवे । तया तु पूर्वं बाल्यत्वान्मष्यास्यं कस्यचिन्मुनेः ॥८०॥
कृष्णवर्णं कृतं तेन शप्ता तेऽप्यपवादतः । मुखमग्रे निरीक्ष्यन्ति नैव लोकाः कदाचन ॥८१॥
ततस्तं गंतुमुद्युक्तं कैकेयी वामहस्ततः । दंडादिकं ददौ तस्य मुनेर्हस्तेऽतिभक्तितः ॥८२॥
तस्यै ददौ वरं विप्रस्तत्र वामकरो वरात् । भविता वज्रकठिनः क्वापि नाशं न चैष्यति ॥८३॥
कैकेयी तं वरं स्मृत्वा स्वं चकाराक्षवत्करम् । अथ जित्वा रणे दैत्यान् दृष्ट्वा तत्कर्म पार्थिवः ॥८४॥
ददौ वरौ द्वौ तस्यै स न्यासभूतौ कृतौ तया । यदाऽहं याचयिष्यामि तदा त्वं देहि तौ मम ॥८५॥
तथेत्युक्त्वा नृपः पत्नीं ययौ स्वनगरीं प्रति । एकदा स निशायां तु मृगयायां महावने ॥८६॥
चकार वारिबंधं चावधीद्वनचरान् बहून् । एतस्मिन्नंतरे तत्र वने वाराणसीपथा ॥८७॥
करंडस्थौ स्वपितरौ स्वस्कंधे श्रवणो वहन् । काशीं नेतुं ययौ वैश्यो धर्मबाधाभयान्निशि ॥८८॥
नीरं पातुं शिशो देहि चावयोश्चेति प्रार्थितः । ताभ्यां करंडके न्यस्य तटाके जलसंनिधौ ॥८९॥
गत्वा जले स्वयं कुम्भं न्युब्जं तस्थौ जले क्षणम् । कुम्भस्य न्युब्जतः शब्दो बभूव करिणो यथा ॥९०॥
वनद्विपो न हंतव्यश्चेति जानन्नपि नृपः । वैश्यं राजा द्विपं मत्वा विव्याध स पतत्रिणा ॥९१॥
पपात श्रवणस्तोये हा केनाहं प्रताडितः । श्रुतश्चेति तद्वाक्यं श्रुत्वाऽभूद्विह्वलो नृपः ॥९२॥
गत्वा जलाद्बहिर्वेगाच्चं कृत्वाऽऽरूण्यं तद्गिरा । सर्वं वृत्तं विशल्यं तं चकार भयविह्वलः ॥९३॥

राजा दशरथसे युद्धमें सम्मिलित होनेका सादर प्रार्थना की। तदनुसार राजा दशरथ वहाँ जाकर दानवोंसे घोर युद्ध करने लगे ॥ ७६ ॥ ७७ ॥ उस भयानक संग्रामके समय राजाके रथका धुरा टूट गया, किन्तु दैववश राजाको पता नहीं लगा ॥ ७८ ॥ राजाके पास बैठी सुन्दर भौंहोंवाली रानी कैकेयी संग्रामका कौतुक देख रही थी। उसने सहसा रणमें अपने रथका धुरा टूटते देख लिया ॥ ७९ ॥ तत्काल उसने विजयलाभके लिए अपने बायें हाथको धुरेकी जगह लगा दिया। बचपनमें कैकेयीने किसी सोते हुए मुनिका मुँह स्याहीसे काला कर दिया था। तब मुनिने उसे शाप दे दिया कि जा, तेरा मुँह भी अपयशके कारण ऐसा काला होगा कि कोई देखना नहीं चाहेगा ॥ ८० ॥ ८१ ॥ जब मुनि वहाँसे चलने लगे, तब कैकेयीने भक्तिपूर्वक बायें हाथसे उनका दण्ड-कमण्डल उन्हें दे दिया ॥ ८२ ॥ इस सेवासे प्रसन्न होकर मुनिने उसे वरदान दिया कि जा, तेरा बायाँ हाथ समय पड़नेपर वज्र जैसा कठोर हो जायगा और किसी तरह घायल न होगा । ८३ ॥ कैकेयीने उस वरका स्मरण करके ही अपने हाथको धुरेके सदृश बनाकर रथमें लगा दिया था। रणमें दैत्योंको जीतनेके बाद राजा दशरथने कैकेयीके इस साहस भरे कार्यको देखकर प्रसन्नतापूर्वक उससे दो वर माँगनेके लिए कहा। उसने भी उन दोनों वरोंको राजाके पास ही धरोहररूपमें रख दिया और कहा कि जब मैं माँगूँ, तब आप ये दो वर मुझे दे दीजियेगा ॥ ८४ ॥ ८५ ॥ 'बहुत अच्छा' कहकर राजा अपनी स्त्रीके साथ अयोध्या लौट आये। एक दिन रात्रिके समय राजा दशरथ शिकार खेलनेके लिये सरयूके किनारे गहन वनमें जा पहुँचे। वहाँ उन्होंने बाणोंकी वर्षा करके नदीका जलप्रवाह रोक दिया और बहुतसे वनपशुओंको मारा। उसी समय श्रवण अपने बूढ़े तथा अंधे माता-पिताको काँवरमें बिठाकर काँधेपर उठाये हुए उस वन्य मार्गसे काशी ले जा रहा था । तभी गर्मीसे पीड़ित होकर वृद्ध माता-पिताने अपने पुत्रसे जल पिलानेको कहा। उनकी आज्ञा पाते ही श्रवण काँवरको जलके किनारे रख तथा घड़ेको टेढ़ा करके जल भरने लगा तो उस घड़ेसे हाथीके शब्द जैसा शब्द निकला ॥ ८६—९० ॥ 'बनैले हाथीको नहीं मारना चाहिये' इस बातको जानते हुए भी राजा दशरथने उस वैश्य श्रवणको हाथीके भ्रमसे शब्दवेघी बाण मारकर बींध दिया ॥ ९१ ॥ 'हाय ! मुझ निरपराधको किसने मारा' ऐसा चिल्लाकर श्रवण घड़ासमेत जलमें गिर पड़ा । मनुष्यकी बोली सुनकर राजा दशरथ घबड़ा उठे और दौड़कर वहाँ गये। उसको जल-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तावंधावपि तत्पुत्रवधं श्रुत्वा रुरोदतुः । कारयित्वा नृपतिना चितिं पुत्रसमन्वितौ ॥९४॥
दशरथाय तौ शापं ददतुः पुत्रदुःखितौ । पुत्रशोकादावयोर्हि यथा मृत्युस्तवास्त्विति ॥९५॥
ययौ नृपोऽपि नगरीं गुरुं वृत्तं न्यवेदयत् । वसिष्ठो नृपतेर्दोषशांत्यर्थं तुरगाध्वरम् ॥९६॥
नृपेण कारयामास साकेते सरयूतटे । रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥९७॥
शांतां स्वकन्यां प्रायच्छत्तद्राष्ट्रेऽभूदवर्षणम् । विभांडकाश्रमं वारनारीः संप्रेष्य तत्सुतम् ॥९८॥
रोमपादो मोहयित्वा ऋष्यश्रृंगं समानयत् । वारस्त्रियो वने गत्वा समानिन्युर्ऋषेः सुतम् ॥९९॥
नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः । तत्प्रतापादभूद्वृष्टिः पुत्रोऽपि नृपतेरभूत् ॥१००॥
ततस्तुष्टो रोमपादस्तस्मै शांतां ददौ सुताम् । दशरथोऽपि स्वपुरीमानयामास तं मुनिम् ॥१०१॥
स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः । प्रत्यक्षं हि चकाराग्निं यज्ञकुंडात्सपायसम् ॥१०२॥
आविर्भूत्वा स्वयं वह्निर्ददौ राज्ञे सुपायसम् । राज्ञा विभक्तं स्त्रीभ्यस्तत्कैकेय्या दुष्टभावतः ॥१०३॥
अहरत्पायसं हस्ताद्गृध्री शापविमोचकम् । सुवर्चलाऽप्सरोमुख्या नृत्यभंगात्स्वयंभुवा ॥१०४॥
शप्ता जाता तु सा गृध्री तया वेधाः सुतोषितः । तस्यै तुष्टो विधिः प्राह कैकेयीपायसं यदा ॥१०५॥
प्रक्षिपस्यंजनगिरौ तदा ते भविता गतिः । अप्सरा त्वं पूर्ववच्च भविष्यसि न संशयः ॥१०६॥
तस्मात्सा पायसं नीत्वाऽक्षिपदंजनिपर्वते । निजं स्वरूपं सा लब्ध्वा जगाम सुरमंदिरम् ॥१०७॥
ततस्ताभ्यां तु कैकय्यै दत्तं किंचित्तु पायसम् । अथ ता भक्षयामासुरंतर्गर्भास्तदाऽभवन् ॥१०८॥

से बाहर निकालकर उसके मुँहसे सब वृत्तान्त सुना तो भयसे काँपते हुए राजाने उस वैश्यबालकके शरीरसे बाण निकाला ॥ ९२ ॥ ९३ ॥ राजाके मुखसे पुत्रमरणकी बात सुनकर वे दोनों अंधे अतिशय विलाप करने लगे और राजासे चिता बनवाकर पुत्रके साथ जलकर परलोक सिधार गये। मरते समय पुत्रवियोगसे दुःखित वे दोनों अन्धी-अन्धे राजा दशरथको यह शाप देते गये कि 'जैसे हम दोनों पुत्रशोकसे मर रहे हैं, वैसे ही तुम भी पुत्रशोकसे ही मरोगे' ॥ ९४ ॥ ९५ ॥ राजाने नगरमें आकर यह सब हाल गुरु-वसिष्ठजीको सुनाया। कुछ दिनों बाद वसिष्ठजीने राजाकी दोषनिवृत्ति तथा पुत्रप्राप्तिके लिए उनसे सरयूके किनारे ऋष्यशृङ्गको बुलवाकर अश्वमेध यज्ञ करवाया। राजा दशरथके मित्र अंगदेशके राजा रोमपादने अपनी शान्ता नामकी कन्या ऋष्यशृङ्गको दे दी थी। क्योंकि एक बार राजा रोमपादने देशमें वर्षा न होने तथा उन्हें कोई पुत्र न होनेके कारण मन्त्रियोंके कथनानुसार ऋष्यशृङ्गके पिता विभांडकके आश्रमसे वेश्याओंके द्वारा मोहित करवाकर उन्हें अपने देशमें बुलवाया। वेश्यायें वनमें गयीं और नाचकर, गाना गाकर, बाजे बजाकर, हावभाव, आलिङ्गन तथा पूजा आदिके द्वारा मोहित करके ऋष्यशृङ्गको ले आयीं। उनके यज्ञ करानेसे राज्यमें वृष्टि हुई और राजाको पुत्र भी प्राप्त हुआ ॥ ९६-१०० ॥ तब प्रसन्न होकर राजा रोमपादने ऋष्यशृङ्गको अपनी शान्ता नामकी कन्या दान करके दे दी। अतएव दशरथ भी उन ऋष्यशृङ्गको अपने नगरमें ले आये ॥ १०१ ॥ उन मुनिने संतानरहित राजा दशरथसे इष्टि (यज्ञ) करवाकर खीर लिये हुए अग्निदेवको यज्ञकुण्डसे प्रत्यक्ष प्रकट किया ॥ १०२ ॥ इस प्रकार अग्निने स्वयं प्रकट होकर राजाको सुन्दर पुत्र देनेवाला पायस (खीर) दिया। राजाने वह खीर लेकर तीनों स्त्रियोंमें बाँट दी। तभी कैकेयीके भागको एक गृध्री यह सोचकर कि यदि इसको मैं ले जाऊँगी तो मेरा शाप छूट जायगा। इस स्वार्थसे खीर छीन ले गयी। कथान्तर। एक समय सुवर्चा नामकी अप्सराओंमें उत्तम अप्सराको नृत्यभङ्गके अपराधसे ब्रह्माने गृध्री होनेका शाप दे दिया। जब फिर उसने स्तुतिके द्वारा ब्रह्माको प्रसन्न किया। तब ब्रह्माजीने कहा कि जब तुम कैकेयीके पायसको छीनकर अंजनिपर्वतपर फेंकोगी। तब तुम्हारी पुनः सुगति हो जायगी और पूर्ववत् तुम अप्सरा हो जाओगी ॥ १०३-१०६ ॥ इसी कारण उस गृध्रीने खीर लेकर अंजनिगिरिपर डाल दी। जिससे वह अपने अप्सरा-रूपको प्राप्त होकर पुनः स्वर्ग चली गयी ॥ १०७ ॥ बादमें कौसल्या तथा सुमित्राने अपने-अपने भागमेंसे

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आसंस्तासां दोहदास्ते पुत्राणां भाविकर्मभिः । पुत्राणां भाविकर्माणि विदुस्ते दोहदैर्जनाः ॥१०९॥
इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकांडे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः

(राम लक्ष्मण भरत तथा शत्रुघ्नका जन्म)

श्रीशिव उवाच

एतस्मिन्नंतरे भूमिर्दशास्यादिप्रपीडिता । ब्रह्मणा प्रार्थयामास विष्णुं सोऽपि तदाऽब्रवीत् ॥ १ ॥
भूम्यामवतरिष्यामि भवंतु कपयः सुराः । गंधर्वी दुंदुभीनाम्नी भूम्याः कार्यार्थसिद्धये ॥ २ ॥
मंथराऽग्रे भवत्वद्धा राज्यविघ्नार्थसिद्धये । पश्चात्पुनर्द्वापरांते कुब्जात्वं कंसमंदिरे ॥ ३ ॥
अथ विष्णुश्चैत्रमासि नवम्यां मध्यगे रवौ । सूतिकागृहमध्येऽथ कौसल्यायाः पुरोऽभवत् ॥
चतुर्भुजः पीतवासा मेघश्यामो महाद्युतिः ॥ ४ ॥
साऽपि दृष्ट्वा बालभावं प्रार्थयामास तं हरिम् । ततो जातस्तदा बालः क्षणाद्रुक्मविभूषितः ॥ ५ ॥
हेमवर्णः कंजनेत्रश्चन्द्रास्यस्तपनप्रभः । ततः सुमित्रापुरतः शेषोऽभूद्बालरूपधृक् ॥ ६ ॥
आविर्भूतौ द्वौ यमलौ कैकेय्याः शंखचक्रके । एवं ते जनिता बालाश्चत्वारः समये शुभे ॥ ७ ॥
देवदुंदुभयो नेदुः पुष्पवृष्टिः शुभाऽपतत् । जातकर्मादिसंस्कारान् गुरुणा नृपतिस्तदा ॥ ८ ॥
कारयामास विधिवन्ननृतुर्वारयोषितः । ज्येष्ठं रामं तु कौसल्यातनयं प्राह वै गुरुः ॥ ९ ॥
सुमित्रातनयं नाम्ना लक्ष्मणं गुरुरब्रवीत् । ततो भरतशत्रुघ्ननामनी प्राह वै गुरुः ॥१०॥

थोड़ा-थोड़ा पायस कैकेयीको दे दिया । इस प्रकार सबने पायस खाया और सबने गर्भ धारण किया ॥ १०८ ॥ भावी पुत्रोत्पत्तिके गर्भचिह्नोंको देख तथा सुनकर होनहार पुत्रोंके द्वारा किये जानेवाले अद्भुत कार्योंको लोग पहले ही समझ गये ॥ १०९ ॥ इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे भाषाटीकायां प्रथमः सर्गः ॥ १ ॥

श्रीशिवजी बोले—हे प्रिये ! इसी बीच रावण आदि दुष्ट राक्षसोंसे पीडित होकर पृथ्वी माता ब्रह्माके साथ विष्णुभगवान्के पास गयीं और उनसे अपनी तथा धर्मकी रक्षाके लिये प्रार्थना की । तब विष्णुभगवानने कहा कि 'मैं तुम्हारे लिये भूमिपर अवतार लूंगा' । ऐसा कहकर उन्होंने देवताओंसे कहा—हे देवताओ ! तुम लोग मेरी सहायताके लिये वानररूपसे पृथ्वीपर जन्म लो । दुन्दुभी गंधर्वी पृथ्वीकी रक्षाके लिये पहिलेसे जाकर मन्थरारूपसे जन्म ले और रामके राज्याभिषेकमें विघ्न डाले । द्वापरके अन्तमें वही जाकर कंसके यहाँ कुब्जा बनेगी ॥ १–३ ॥ कुछ काल बाद साक्षात् विष्णुभगवान् चैत महीनेके कृष्णपक्षकी नवमी तिथिको मध्य सूर्यके समय प्रसूतिगृहमें कौसल्याके सामने चार भुजाधारी पीताम्बर पहिने हुए वर्षाऋतुकालीन मेघके समान श्यामशरीर तथा तेजस्वी रूपमें प्रकटे ॥ ४ ॥ कौसल्याने वह रूप देखकर भगवान्से बाल्यभाव स्वीकार करनेकी प्रार्थना की । तब भगवान् क्षण भरमें स्वर्णाभरणोंसे भूषित, सुवर्णके सदृश कान्तिसम्पन्न, कमलके समान नेत्र तथा चन्द्रतुल्य मुख एवं सूर्यके समान तेजस्वी बालक बन गये । बादमें सुमित्राके गर्भसे शेषावतार लक्ष्मणजी बालभावसे प्रकट हुए । फिर कैकेयीके गर्भसे विष्णुके शंख-चक्र अवतार लेकर एक साथ भरत-शत्रुघ्न पैदा हुए । इस प्रकार वे चारों बालक शुभ समय, अच्छे लग्न और शुभ नक्षत्रमें उत्पन्न हुए ॥ ५–७ ॥ देवताओंने प्रसन्न होकर नगाड़े बजाये और पुष्पवृष्टि की । राजाने गुरु वसिष्ठसे बालकोंका जातकर्म (संतानके उत्पन्न होनेपर किया जानेवाला कर्म) आदि संस्कार विधिपूर्वक करवाया । उस उत्सवपर वेश्याओं द्वारा अनेक प्रकारका नृत्य भी करवाया गया । वसिष्ठजीने कौसल्याके सबसे बड़े पुत्रका नाम राम रक्खा । सुमित्राके पुत्रका नाम लक्ष्मण और कैकेयीके दोनों पुत्रोंके नाम भरत तथा शत्रुघ्न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रमणाद्राम एवासौ लक्षणैर्लक्ष्मणस्त्विति । भरणाद्भरतश्चेति शत्रुघ्नः शत्रुतर्जनात् ॥११॥
अथ ववृधिरे सर्वे लक्ष्मणो राघवेण हि । शत्रुघ्नो भरतेनापि चकार क्रीडनादिकम् ॥१२॥
रुक्मकंकणमंजीरनूपुरैस्ते विभूषिताः । केयूररशनाहारकुण्डलैरतिशोभिताः ॥१३॥
शृंखलाबद्धरुक्मादिनिर्मितेषु वरेषु च । दोलकेषु च ते सर्वे दोलिता रेजिरे सुखम् ॥१४॥
भाले स्वर्णमयाश्वत्थपर्णान्यतिमहांति च । मुक्ताफलप्रलंबीनि शोभयंति स्म बालकान् ॥१५॥
कंठे रत्नमणिव्रातमध्यद्वीपिनखांचिताः । कर्णयोः स्वर्णसंपन्नरत्नार्जुनसुतालकाः ॥१६॥
सिंजानमणिमंजीरकटिसूत्रांगदैर्युताः । स्मितवक्त्राल्पदशना इन्द्रनीलमणिप्रभाः ॥१७॥
अगणे रिंगमाणाश्च संस्कारैः संस्कृताः शुभाः । ते तातं रंजयामासुर्मातॄँश्चापि विशेषतः ॥१८॥
कौसल्या नृपतिश्चापि नानावस्त्रैः सुभूषणैः । शोभयामासतुर्बालान्नानाव्याघ्रनखादिभिः ॥१९॥
रामः स्वपितरं दृष्ट्वा भोजनस्थं त्वरान्वितः । दुद्राव कवलं पात्राद्गृहीत्वा स पुनर्बहिः ॥२०॥
कौसल्या बालकं धर्तुं दुद्राव नृपनोदिता । न तस्याः करगश्चासीद्योगिनामप्यगोचरः ॥२१॥
परिवृत्य स्वयं रामः करेण मृदुलेन च । कौसल्यास्ये नृपास्येऽपि कवलावकरोन्मुदा ॥२२॥
एवं नानाकौतुकैश्च रंजयामास राघवः । नानाशिशुक्रीडनकैश्चेष्टितैर्मुग्धभाषितैः ॥२३॥
बालकृत्रिमयुद्धैश्च गमनैर्मुखचुंबनैः । पितरौ निजचारित्रैर्वाहनारोहणादिभिः ॥२४॥
ततस्ते बालकाः सर्वे वस्त्रालंकारभूषिताः । सभायां पितरं नत्वा तस्थुः सिंहासनोपरि ॥२५॥
अत्र पित्रोपनीतास्ते गुरुणा मुनिभिर्मुदा । गर्भात्संवत्सरे षष्ठे जन्मतः पंचमे समे ॥२६॥
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे ॥२७॥

रक्खा ॥ ८-१० ॥ मनोहर तथा आनन्ददायक होनेसे राम, शुभ लक्षणोंसे युक्त होनेसे लक्ष्मण, प्रजाका भरण-पोषण करनेमें निपुण होनेसे भरत और शत्रुनाशक होनेसे वसिष्ठने उनका शत्रुघ्न नाम रक्खा ॥ ११ ॥ लक्ष्मण रामके साथ और शत्रुघ्न भरतके साथ खेलते हुए बढ़ने लगे ॥ १२ ॥ सुवर्णके कड़े तथा नूपुरोंसे भूषित बाजूबन्द, हार, करधनी तथा कुण्डलोंसे सुशोभित, सोनेकी सिकड़ियोंको गलेमें पहने हुए वे बालक सुवर्ण-घटित, रत्नजटित तथा कंचनके साँकलोंसे बँधे हुए हिंडोलोंपर झूलते हुए बहुत ही सुन्दर लगते थे ॥ १३ ॥ १४ ॥ ललाटस्थलमें बँधे हुए सुवर्णनिर्मित पीपलके पत्तेके आकारवाले एवं जिनके अग्रभागमें बड़े-बड़े मोती लटक रहे थे, ऐसे सुन्दर आभूषणोंसे उन बालकोंकी शोभा और भी बढ़ी-चढ़ी दीखती थी। उनके कण्ठमें विविध मणि तथा बघनखे सुशोभित हो रहे थे। कानोंमें कनकके बने हुए रत्नजटित कुण्डल लहरा रहे थे। सिरपर घुंघराले बाल फहरा रहे थे। पाँवोंमें मणिमण्डित झाँझर झनझना रहे । हाथोंमें बाजूबन्द और कमरमें करधनी खनखना रही थी। चन्द्रमाके सदृश शुभ्र हास्य भरे मुखमें किरणोंके समान छोटे-छोटे दाँत चमचमा रहे थे । इन्द्रनीलमणिके समान श्याम कान्तिवाले, अँगनाईमें घुटनोंके बल रेंगते हुए, संस्कारोंसे संस्कृत और देखनेमात्रसे मन मोह लेनेवाले वे कुमार अपने माता-पिताके मनको मुग्ध करने लगे ॥ १५-१८ ॥ कौसल्या और राजा दशरथ भी अनेक प्रकारके वस्त्र तथा बघनखा आदि अलङ्कारोंसे अपने बालकोंको भूषित करने लगे ॥ १९ ॥ राम अपने पिताको थालमें भोजन करते देखते तो आकर उसमेंसे एक ग्रास हाथमें लेकर बाहर भाग जाते। राजाके कहनेपर कौसल्या रामको पकड़नेके लिए जब दौड़तीं तो योगियोंको भी अगम्य राम उनके हाथ नहीं आते थे। बादमें वे स्वयं धीरेसे आकर पीछेसे आनन्दपूर्वक अपने कोमल हाथोंसे माता-पिताके मुँहमें वह कौर रख देते थे ॥ २०-२२ ॥ ऐसी अनेक कौतुकयुक्त बालक्रीड़ा, बालचेष्टा, मधुर-मनोहर भाषण, बालकोंके कृत्रिम युद्ध, नाना प्रकारकी चालें, मुखचुम्बन और तरह-तरहकी बनावटी सवारियोंपर सवार होकर राम आदि चारों बालक माता-पिताके मनको लुभाने तथा आनन्दित करने लगे ॥ २३ ॥ २४ ॥ कालान्तरमें सब बालक वस्त्र-आभूषण आदिसे भूषित हो पिताको प्रणाम करके सभामें सिंहासनपर बैठने लगे। तब राजाने वसिष्ठ द्वारा सामने उनका यज्ञोपवीत संस्कार करवाया।

CC0. In Public Domain. Kirtikant Sharma Najafgarh, Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्भिश्चोपनयनमेवं शास्त्रेषु निर्णयः । गुरोरास्यात्सुमुहूर्ते वेदान् सांगांश्चतुर्विधान् ॥२८॥
चक्रुर्मुखोद्गतानेव बालाः शास्त्रादिकान्यपि । ब्रह्मचर्यसमाप्तौ ते तीर्थानि जग्मुरादरात् ॥२९॥
सेनया मंत्रिसहिता वसिष्ठेन समन्विताः । षण्मासैः पुनरागत्य साकेतं विविशुर्मुदा ॥३०॥
एवं ते मतिमन्तश्च प्रिया राज्ञो वशे स्थिताः । पितरं रंजयामासुः पौरान् जानपदानपि ॥३१॥
इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे रामजन्मनाम द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः

(ताड़कावध-अहल्योद्धार तथा सीतास्वयंवर)

श्रीशिव उवाच

एतस्मिन्नंतरेऽयोध्यां विश्वामित्रो ययौ मुनिः । यज्ञसंरक्षणार्थाय राजानं मुनिरब्रवीत् ॥ १ ॥
रामं च लक्ष्मणं चापि मह्यं देहि कियद्दिनम् । गुरूनामंत्र्य राजाऽपि प्रेषयामास तौ तदा ॥ २ ॥
जग्मतुर्यज्ञरक्षार्थं गाधिजेन रथस्थितौ । ततः प्रहृष्टो गाधेयः स्थित्वा कामाश्रमे पथि ॥ ३ ॥
प्रभाते स्नातयोः स्नातः प्रादाद्विद्यास्तयोर्मुदा । माहेश्वरीं च सद्विद्यां धनुर्विद्यापुरःसराम् ॥ ४ ॥
शास्त्रीमास्त्रीं लौकिकीं च रथविद्यां गजोद्भवाम् । अश्वविद्यां गदाविद्यां मंत्राह्वानविसर्जने ॥ ५ ॥
क्षुत्तृट्श्रमविलोपिन्यौ बलामतिबलामपि । सर्वविद्यास्त्ववाप्याथ ह्युभौ तौ रामलक्ष्मणौ ॥ ६ ॥
वनौकसां हितार्थाय जघ्नतुस्तत्र राक्षसान् । पथि पांथजनध्वंसकारिणीं नाम ताटिकाम् ॥ ७ ॥
राक्षसीमेकबाणेन जघान रघुनन्दनः । अप्सरा सा मुनिं पूर्वं क्षोभयामास कानने ॥ ८ ॥

शास्त्रोंका भी यही सिद्धान्त है कि ब्रह्मवर्चस् (ब्रह्मतेज) की इच्छावाले ब्राह्मणकुमारका यज्ञोपवीत गर्भसे छठें अथवा जन्मसे पाँचवें वर्ष होना चाहिये । बल चाहनेवाले क्षत्रियका छठें और धन चाहनेवाले वैश्य-कुमारका यज्ञोपवीत आठवें वर्ष अवश्य हो जाना चाहिये ॥ २५–२७ ॥ तदनन्तर अच्छे मुहूर्तमें गुरुके मुखसे राम-लक्ष्मणने सांग (शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष सहित) चारों वेद, छः शास्त्र (न्याय-वेदान्त वादि) और चौंसठ कला (गाना-बजाना आदि) सीख-पढ़कर हृदयंगम कर लिया । ब्रह्मचर्यकी समाप्तिके बाद राम आदि चारों भ्राता सेनाको, मन्त्रियोंको तथा गुरु वसिष्ठको साथ लेकर सहर्ष तीर्थयात्रा करने गये । छः महीनेमें वहाँसे लौट आये और आनन्दपूर्वक अयोध्यामें रहने लगे ॥ २८–३० ॥ इस प्रकार बुद्धिमान्, माता-पिताके परम भक्त, परम प्रिय तथा उनकी आज्ञापर चलनेवाले वे चारों बालक पिताको, नगरके लोगोंको तथा उस देशकी प्रजाको अपने सद्व्यवहारके द्वारा मोहित करने लगे ॥ ३१ ॥
इति श्रीशतकोटिरामचरितान्तर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे पं० रामतेजपाण्डेयकृतभाषा-टीकायां रामजन्मनाम द्वितीयः सर्गः ॥ २ ॥

श्रीशिवजी बोले—हे पार्वती ! तदनन्तर मुनि विश्वामित्र अयोध्या आये और राजा दशरथसे कहा कि यज्ञकी रक्षा करनेके लिए राम तथा लक्ष्मणको आप मुझे दे दीजिये । गुरु वसिष्ठके समझानेपर राजाने न चाहते हुए भी दोनों बालकोंको उनके साथ कर दिया ॥ १ ॥ २ ॥ तदनन्तर गाधिपुत्र विश्वामित्रके साथ रथपर बैठकर उनके यज्ञकी रक्षा करनेके लिए राम-लक्ष्मण चल दिये । रास्तेमें कामाश्रममें सबेरे स्नान करके प्रसन्न विश्वामित्रजीने स्नान किये हुए राम-लक्ष्मणको विविध विद्यायें सिखायीं । महेश्वर (शिवजीसे प्राप्त माहेश्वरी धनुर्विद्या, शस्त्रविद्या, अस्त्रविद्या, लौकिकी विद्या, रथविद्या, गजविद्या, अश्वविद्या, गदा चलानेकी विद्या, मन्त्रके द्वारा अस्त्रादिका आवाहन और विसर्जन करनेकी विद्या, भूख-प्यासको मिटानेवाली बला और अतिबला नामकी दो विद्याएँ तथा अन्यान्य सब विद्याओंको प्राप्त करके राम-लक्ष्मण वनवासी ऋषि-मुनियोंके सुखके लिये राक्षसोंको मारने लगे । रास्तेमें पथिकोंको मारकर खा जानेवाली ताड़का नामकी राक्षसीको रघुनन्दन रामचन्द्रने एक ही बाणसे मार डाला । सुन्दकी स्त्री और सुकेतु यक्षकी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राक्षसी तस्य शापेन बभूव सुंदकामिनी । मारीचश्च सुबाहुश्च सुंदात्तस्याः सुतावुभौ ॥ ९ ॥
रामबाणाद्गतिस्तस्याः कीर्तिता मुनिना पुरा । सा प्राप्य दिव्यदेहत्वं नत्वा रामं दिवं गता ॥ १० ॥
विश्वामित्राश्रमं रामो गत्वा तद्यज्ञघातकान् । राक्षसान्निशितैर्बाणैर्जघान रघुनन्दनः ॥ ११ ॥
प्रारम्भं रणयज्ञस्य चकार रघुनन्दनः । हत्वा सहस्रशः श्रीमान् राक्षसान् निशितैः शरैः ॥ १२ ॥
क्षिप्त्वा बाणेन मारीचं शतयोजनसागरे । हत्वा सुबाहुं चैकेन बाणेन रघुसत्तमः ॥ १३ ॥
स कृत्वा गाधियज्ञस्य समाप्तिं रघुनन्दनः । नाकरोद्रणयज्ञस्य समाप्तिं स्वकृतस्य च ॥ १४ ॥
कालानलमतृप्तं तं दृष्ट्वा तत्तृप्तिहेतवे । श्रुत्वा जनकगेहे वै तत्कन्यायाः स्वयंवरम् ॥ १५ ॥
रामलक्ष्मणसंयुक्तो मुनिस्तं नगरं ययौ । गमनावसरे मार्गे भर्तृशप्तां शिलां मुनिः ॥ १६ ॥
मुनिरूपिमहेन्द्रेण भुक्तां रहसि शोभनाम् । गौतमस्यांगनां नाम ह्यहल्यां चावदत्तयोः ॥ १७ ॥
ब्रह्मणा निर्मिताऽहल्या द्विमुखी गोःपरिक्रमात् । दत्ता पुरा गौतमाय विसृज्येंद्रादिकान्सुरान् ॥ १८ ॥
तत्स्मरन् मघवा वैरं तां भुक्त्वा मुनिशापतः । सहसा भगवान् जातः सहस्रलोचनस्ततः ॥ १९ ॥

श्रीरामचन्द्रो निजपादपद्मस्पर्शेन तां गौतमधर्मपत्नीम् ।
निष्कल्मषामद्भुतरूपयुक्तां चकार देवः करुणासमुद्रः ॥ २० ॥

नदीरूपा जनस्थानेऽहल्या गौतमशापतः । रामेण भ्रमताऽरण्ये स्वांघ्रिस्पर्शात्समुद्धृता ॥ २१ ॥
कल्पभेदाद्वदंतीत्थं मुनयश्चापि केचन । नैव शापोऽस्ति सर्वेषु कल्पेषु सत्कथा तथा ॥ २२ ॥
ततस्तौ सुरगन्धर्ववर्षितौ पुष्पवृष्टिभिः । दत्त्वाऽहल्यां गौतमाय जग्मतुर्जाह्नवीं प्रति ॥ २३ ॥

पुत्री ताड़का पहिले बड़ी सुन्दर अप्सरा थी। परन्तु बादमें जब उसने अगस्त्य ऋषिको वनमें सताया, तब उनके शापसे वह कुरूप राक्षसी बन गयी। उससे मारीच और सुबाहु ये दो राक्षस पुत्र उत्पन्न हुए ॥ ३–९ ॥ 'रामके बाणसे तेरी गति होगी' ऐसा अगस्त्य मुनिने उससे कहा था। इसलिए रामबाणसे इस समय अमर तथा दिव्य शरीर धारण करके वह स्वर्गको चली गयी ॥ १० ॥ वहाँसे चल तथा विश्वामित्रके आश्रममें जाकर रघुनन्दनने यज्ञमें विघ्न डालनेवाले समस्त राक्षसोंको अपने तीखे बाणोंसे मार डाला ॥ ११ ॥ रघुपति रामचन्द्रने वहाँ रणयज्ञ (युद्धरूपी यज्ञ) प्रारम्भ कर दिया। श्रीमान् रामने हजारों राक्षसोंको तीक्ष्ण बाणोंसे मारकर मारीचको एक बाणकी मारसे सौ योजन (चार सौ कोस) दूरीपर समुद्रमें फेंक दिया। उन्होंने दूसरे बाणसे मारीचके भाई सुबाहुको मार डाला ॥ १२ ॥ १३ ॥ विश्वामित्रजीके यज्ञकी तो उन्होंने राक्षसोंको मारकर निर्विघ्न समाप्ति कर दी। परन्तु अपने द्वारा प्रारम्भ युद्धयज्ञकी समाप्ति नहीं की अर्थात् उनका क्रोध शान्त नहीं हुआ ॥ १४ ॥ श्रीरामको प्रलयकालीन अग्निके सदृश उग्र तथा युद्धसे अतृप्त देखकर मुनि विश्वामित्रने उनकी तृप्तिके लिए राजा जनकके यहां उनकी कन्याका स्वयंवर सुनकर राम-लक्ष्मणको लेकर जनकपुरको प्रयाण किया। चलते-चलते रास्तेमें मुनिने अहल्याको देखकर कहा कि यह मुनिवेषधारी इन्द्रके द्वारा भोगी गयी परमसुन्दरी गौतमकी स्त्री है। यह भेद विश्वामित्रने राम-लक्ष्मणको बताया ॥ १५–१७ ॥ इस मनोहर मुखवाली अहल्याको बनाकर ब्रह्माने पृथ्वीकी परिक्रमा करनेवाले गौतम ऋषिको दे दिया। किसी इन्द्रादि देवताको नहीं दी ॥ १८ ॥ इन्द्रने उस वैरका स्मरण करके कपटसे एकान्तमें उसके साथ भोग किया। तदनन्तर गौतम मुनिके शापसे इन्द्र हजार भग (योनि) वाले हो गये। फिर प्रार्थना करनेपर गौतमकी कृपासे वे हजार नेत्रवाले बन गये। अब विश्वामित्रके अनुरोधसे करुणानिधि एवं साक्षात् देवतास्वरूप रामचन्द्रने दया करके अपने चरणकमलके स्पर्शसे उस शिलास्वरूपिणी गौतमकी धर्म-पत्नी अहल्याको दोषसे मुक्त करके अति अद्भुत स्वरूपवाली सुन्दरी स्त्री बना दिया ॥ १९ ॥ २० ॥ दण्डक वनके पास एक स्थानमें मुनिके शापसे शापित नदीरूपा अहल्याका अरण्यमें भ्रमण करते हुए रामचन्द्रने अपने परम पवित्र चरणस्पर्शसे उद्धार कर दिया ॥ २१ ॥ कुछ लोग इस कथाको कल्पभेदसे मानते और कहते हैं कि सब कल्पोंमें यह शापकी बात एक जैसी नहीं मिलती ॥ २२ ॥ इसके बाद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रामं नौकां कांक्षमाणं नौकापो वाक्यमब्रवीत् ।

नाविक उवाच

आदावहं क्षालयित्वा पादरेणूँस्तव प्रभो ॥ २४ ॥

पश्चान्नौकां स्पर्शयामि तव पादौ रघूद्वह । नोचेत्त्वत्पादरजसा स्पृष्टा नारी भविष्यति ॥ २५॥

क्षालयामि तव पादपङ्कजं नाथ दारुदृषदोः किमन्तरम् ।

मानुषीकरणचूर्णमस्ति ते इति लोके हि कथा प्रथीयसी ॥२६॥

अस्ति मे गृहिणी गेहे किं करोम्यपरां स्त्रियम् । इति तद्वाक्यमाकर्ण्य विहस्य रघुनन्दनः ॥२७॥
तेन संक्षालितपदो नौकां तामारुरोह सः । ततस्तीर्त्वा जाह्नवीं ते मिथिलां मुनिभिर्ययुः ॥२८॥
मिथिलायां समाहूताः कोटिशः पार्थिवा ययुः । चारणास्याद्दशास्योऽपि श्रुत्वाऽगच्छत्स्वमंत्रिभिः२९॥
अनाहूतः पुष्पकेण सेनया परिवारितः । न ययौ पुत्रविरहाद्राजा दशरथस्तदा ॥३०॥
अत्यादरैर्विदेहेन समाहूतोऽपि भक्तितः । श्रीरामलक्ष्मणाभ्यां च विश्वामित्रो मुनीश्वरः ॥३१॥
शनैर्मुदा स मिथिलां बहिश्चोपवनं ययौ । विश्वामित्रं समानेतुं जनको मन्त्रिभिः सह ॥३२॥
यावद्गन्तुं मनश्चक्रे तावच्छिष्यः समाययौ । विश्वामित्रस्य तं दृष्ट्वा ननाम जनकस्तदा ॥३३॥
ततः शिष्यः करं धृत्वा जनकस्य करेण हि । नीत्वा रहसि प्रोवाच वचनं स्वगुरोः स्फुटम् ॥३४॥
त्वामाह गाधिजो राजन् राज्ञो दशरथस्य हि । मया पुत्रौ समानीतौ वीरौ श्रीरामलक्ष्मणौ ॥३५॥
तौ सीतोर्मिलयोः पाणिग्रहणं हि करिष्यतः । पणीकृतं त्वया चापं रामोऽयं खण्डयिष्यति ॥३६॥
अतो वरविधानेन तौ पुरीं नेतुमर्हसि । एतद्वृत्तं चापभंगपर्यन्तं मा स्फुटं कुरु ॥३७॥

देवताओं और गन्धर्वोंने जिनके ऊपर दिव्य पुष्पोंकी वृष्टि की थी, ऐसे राम तथा लक्ष्मण गौतमको अहल्या सौंपकर जाह्नवी (गङ्गा) की ओर चल पड़े ॥ २३ ॥ गङ्गातटपर पहुँचकर रामचन्द्र पार उतरनेके लिये नाव खोज ही रहे थे कि इतनेमें एक नाववाला बोला—हे प्रभो ! हे रघूद्वह रामचन्द्रजी ! यदि आप कहें तो मैं पहिले आपके चरणकी धूलि धो लूँ, बादमें आपको नावपर बैठाकर पार उतार दूँ । क्योंकि ऐसा न करनेपर कहीं आपकी पदरज छूनेसे मेरी नाव भी स्त्री न बन जाय । क्योंकि पत्थर और लकड़ीमें कोई बहुत अन्तर नहीं होता । यह बात जगत्में प्रसिद्ध है कि आपके चरणकी रजमें जड़को भी मनुष्य बनानेकी सामर्थ्य हैं । इसलिये आपका चरण धोना आवश्यक है ॥ २४--२६ ॥ क्योंकि मेरे घरमें एक स्त्री है । अतएव मैं दूसरीको लेकर क्या करूँगा । इस अटपटे वाक्यको सुनकर आनन्दकन्द रामचन्द्र हँस पड़े ॥ २७ ॥ बादमें जब उस धीवरने पाँव धो लिया, तब रामचन्द्रजी मुनियोंके साथ नावपर सवार होकर गङ्गा पार हुए और वहाँसे मिथिलापुरीकी ओर चले ॥ २८ ॥ मिथिलामें निमन्त्रित राजाओंका एक प्रकारका छोटा-सा समुद्र एकत्र हो गया था । रावण भी बिना बुलाये चारणोंके मुखसे सुनकर ही सेना तथा मंत्रियोंसे घिरा हुआ पुष्पक विमानपर चढ़कर वहाँ जा पहुँचा । उस समय राजा दशरथ आदर तथा भक्तिपूर्वक जनकके द्वारा बुलाये जानेपर भी पुत्रविरहसे दुखी होनेके कारण नहीं आये थे । उसी समय मुनियोंके ईश्वर विश्वामित्र भी राम और लक्ष्मणके साथ धीरे-धीरे आनन्दपूर्वक मिथिलाके बाहर एक उपवनमें जा पहुँचे । राजा जनक विश्वामित्रको लिवा लानेके लिए जाना ही चाहते थे कि विश्वामित्रका एक शिष्य वहाँ आ पहुँचा । उसको विश्वामित्रका शिष्य जानकर राजाने नमस्कार किया ॥ २९--३३ ॥ शिष्यने राजाका हाथ पकड़ तथा एकान्तमें ले जाकर अपने गुरुका भेजा हुआ सन्देश भलीभाँति कह सुनाया ॥ ३४ ॥ उसने कहा—गाधिपुत्र विश्वामित्रने कहा है कि मैं अपने साथ राजा दशरथके दो शूरवीर पुत्रों राम-लक्ष्मणको यहाँ ले आया हूँ ॥ ३५ ॥ ये दोनों सीता तथा उर्मिलाका पाणिग्रहण करेंगे और आपका पणीकृत धनुष रामचन्द्रजी तोड़ेंगे ॥ ३६ ॥ इसलिये वरको ले आनेके विधानसे इन दोनोंको नगरमें लाना चाहिये । जबतक धनुष भङ्ग न हो तबतक यह वृत्तान्त किसीको न बताइएगा ॥ ३७ ॥ राजा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्त्वा जनकं शिष्यः स्वगुरुं शीघ्रमाययौ । जनकोऽपि मुदा युक्तस्तूष्णीमेव पुरीं निजाम् ॥३८॥
तोरणाद्यैः शोभयित्वा सैन्येन परिवेष्टितः । वारणेन्द्रं पुरस्कृत्य सभार्यस्तैर्नृपैः सह ॥३९॥
सुमेधादिप्रमदाभिर्नानावाद्यैर्मनोहरैः । विश्वामित्रांतिकं गत्वा नत्वा संपूज्य तं मुनिम् ॥४०॥
अज्ञात इव तौ पृष्ट्वा श्रुत्वा तद्वृत्तमादरात् । वस्त्रालंकारभूषाद्यैः सत्कृत्य विधिवन्नृपः ॥४१॥
गजयोस्तौ समारोप्य चामराद्यैः सुवीजितौ । विश्वामित्रेण मुनिना निनाय मिथिलां पुरीम् ॥४२॥
ननृतुर्वारनार्यश्च तुष्टुवुर्वन्दिमागधाः । नेदुर्नानासुवाद्यानि जगुस्ते तु नटादयः ॥४३॥
तदा तौ हट्टमार्गेण जग्मतुश्चातिशोभितौ । श्रुत्वा च पुरनार्यश्च वीरौ श्रीरामलक्ष्मणौ ॥४४॥
समागताविति मुदा जग्मतुश्चातिशोभितौ । कंजनेत्रैर्ददृशुस्तौ ववर्षुः पुष्पवृष्टिभिः ॥४५॥
तदा परस्परं प्रोचुः सीतायोग्यो वरस्त्वयम् । रामोऽस्माकं रोचते हि करोत्वेवं विधिस्तु सः ॥४६॥
उर्मिलायास्तु योग्योऽयं लक्ष्मणोऽस्ति सुलक्षणः । अस्माकं सुकृतैरद्य तयोरेतौ पती शुभौ ॥४७॥
श्रीरामलक्ष्मणौ रम्यौ भवतश्चोत्तमोत्तमौ । एवं तासां कामिनीनां वचनानि नृपात्मजौ ॥४८॥
शुश्रुवतुः शुभान्येव ह्यूर्ध्वास्यौ तौ ददर्शतुः । ततस्ते मिलिताः सर्वे नृपाः प्रोचुः परस्परम् ॥४९॥
एतादृशो विदेहेन यदाऽस्माभिः समागतम् । तदोत्सवः कृतो नैव ह्यनयोः क्रियते कथम् ॥५०॥
किमंतःस्थेन राज्ञाऽद्य सीता रामाय साऽर्पिता । किमस्माकं समाहूय मानभंगोऽद्य नः कृतः ॥५१॥
एवं तेषां नृपाणां च वचनानि नृपात्मजौ । जनको गाधिजश्चापि शुश्रुवुस्ते समततः ॥५२॥
ततः शनैः शनैर्वीरौ गवाक्षैः स्त्रीभिरीक्षितौ । जग्मतुर्वाद्यघोषाद्यैर्जनकस्य सभां प्रति ॥५३॥
ततोऽवतरतुर्वीरौ गजाभ्यां मुनिना सह । तत्स्वयंवरशालायामुपविष्टेषु राजसु ॥५४॥

जनकजीसे यह कहकर शिष्य शीघ्र अपने गुरुजीके पास लौट गया। राजा भी इस बातको मनमें रखकर बड़ी प्रसन्नताके साथ अपनी मिथिला नगरीको तोरण तथा रंग-बिरंगी पताकाओं आदिसे सजवाकर गहने, जरीकी झूल तथा सोनेके हौदेसे सुशोभित उत्तम एवं दर्शनीय हाथीको आगे करके सेना, सभी राजाओं, सुमेधा आदि स्त्रियों और अनेक प्रकारके मनोहर मांगलिक बाजे लेकर अपनी भार्याके साथ विश्वामित्र मुनिके पास गये और उनको नमस्कार करके पूजा की ॥३८--४०॥ मुनिसे अनजानकी तरह उन दोनों बालकोंका परिचय पूछकर विधिवत् वस्त्र-आभूषणसे उनका सत्कार करके हाथियोंपर चढ़ाकर चमर डुलवाते हुए जनकजी विश्वामित्रके साथ दोनों भाइयोंको मिथिलापुरीमें ले चले ॥ ४१ ॥ ४२ ॥ उस समय बहुतेरी वारांगनाएं सुन्दर नृत्य करने लगीं। चारण तथा भाट लोग स्तुतिपाठ एवं जयजयकार करने लगे। नाना प्रकारके बाजोंके मधुर स्वरसे दसों दिशायें गूंज उठीं। गायकजन मनोहर गायन गाने लगे ॥ ४३ ॥ इस प्रकार शूरवीर तथा अति सुन्दर राम-लक्ष्मण बाजारकी सड़कोंपर आ पहुँचे। उन्हें आते देख तथा औरोंसे सुनकर आनन्दके मारे पहिलेसे हो नगरका सब स्त्रियें नगरके प्रधान दरवाजेपर, अपने-अपने घरकी छतोंपर, झरोखों और अटारियोंपर जा बैठीं और अपने कमलसदृश नेत्रोंसे उन्हें बड़े चावसे देखती हुई उनपर फूलोंकी वर्षा करने लगीं ॥ ४४ ॥ ४५ ॥ फिर वे आपसमें कहने लगीं कि ये राम सीताके योग्य वर हैं। हमको तो राम बहुत प्रिय लगते हैं। इसलिए ईश्वर भी वैसा ही करे तो अच्छा हो। ये शुभ लक्षणोंसे युक्त लक्ष्मण उर्मिलाके योग्य वर हैं। हमारे भाग्यसे ये दोनों उत्तम, रमणीय तथा सुन्दर गात्रवाले राम और लक्ष्मण सीता तथा उर्मिलाके पति हों तो बहुत अच्छा हो। इस प्रकार उनके मनोहर वचनोंको सुनकर राम-लक्ष्मण दोनों भाई ऊपर मुख उठाकर उन्हें देखने लगे। बादमें वे सब राजे परस्पर कहने लगे—॥ ४६-४९ ॥ जब हम सब यहाँ आये, तब तो राजा जनकने ऐसा उत्सव नहीं किया। अब इन बालकोंके लिये ऐसा क्यों किया ॥ ५० ॥ राजाने कहीं चुपकेसे सीता रामको तो नहीं दे दी है? ऐसा ही था तो हम लोगोंको बुलाकर अपमानित क्यों किया गया ॥ ५१ ॥ उनकी बातें राम-लक्ष्मण, राजा जनक तथा विश्वामित्रजीने भी सुनी ॥ ५२ ॥ इधर झरोखोंमें बैठी हुई स्त्रियोंसे देखे जाते हुए वे दोनों वीर गाने एवं बाजेकी ध्वनि

CC-0. In Public Domain. Kirtikant Sharma, Najafgarh, Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वामित्रानुगौ तौ हि मुनिशालां प्रजग्मतुः । ऋद्धायां मुनिशालायां मुनेरग्रे निषीदतुः ॥५५॥
एवं सभायामृद्धायां राज्ञा कन्याप्रतिग्रहे । प्रतिज्ञातं मम धनुस्तत्सज्ज त्वमुपस्थितम् ॥५६॥
यदाऽधीता धनुर्विद्या मत्तः परशुधारिणा । तदा दत्तं मया तस्मै धनुस्त्रिपुरदाहकम् ॥५७॥
तेनैकविंशद्वारं हि निःक्षत्रा पृथिवी कृता । सहस्रबाहुर्निहतः स्वपितुर्घातकारणात् ॥५८॥
तन्मैथिलांगणे स्थाप्य जामदग्न्यो नृपं ययौ । अश्ववत्तद्धनुः कृत्वा जानकी क्रीडनं व्यधात् ॥५९॥
जामदग्न्यस्तेन सीतां ज्ञात्वा लक्ष्मीं तदिच्छया । ददौ नृपं पणार्थं तद्धनुरन्यैर्दुरासदम् ॥६०॥
पणीकृतं धनुस्तच्च विदेहेन स्वयम्वरे । ततः सभायामृद्धायां जनकः प्राह शंकितः ॥६१॥
संस्थाप्य राज्ञां पुरतस्तन्मे चापमनुत्तमम् । शस्त्रागारात्समानीतं वृषैः पंचशतैस्तु यत् ॥६२॥
सीतास्वयंवरार्थं यन्न्यस्तं परशुधारिणा । नृपः प्राह सभामध्ये यो वीरस्त्वद्य सदसि ॥६३॥
करिष्यति धनुः सज्जं तं वै सीता वरिष्यति । तत्तस्य वचनं श्रुत्वा धनुर्दृष्ट्वाऽचलोपमम् ॥६४॥
अधोमुखास्तदा सर्वे बभुवुः पार्थिवोत्तमाः । केचिद्भूमेः समुद्वोढुं धनुः शक्ता न चाभवन् ॥६५॥
भूमेरुच्चालिते केचिदूर्ध्वं नेतुं न चाशकन् । सर्वेऽप्युच्चालने तस्य नृपाः शक्ता न चाभवन् ॥६६॥
सज्जीकारः कुतस्तस्य मनसाऽप्यविचिंतितः । धनुः सज्जीकृतौ सर्वान्नृपान् ज्ञात्वा पराङ्मुखान् ॥६७॥
तदातिगर्वसंरूढः सभायां रावणोऽब्रवीत् । धनुषः सन्निधिं गत्वा विहसन् जनकं प्रति ॥६८॥
येन वै निर्जिता देवास्त्रैलोक्यं स्ववशे कृतम् । आन्दोलितो भुजाभिर्हि कैलासो येन वै मया ॥६९॥

आदिके साथ धीरे-धीरे राजा जनकके सभामण्डपमें जा पहुँचे ॥ ५३ ॥ वहाँ वीर राम-लक्ष्मण तथा मुनिगण हाथियोंसे नीचे उतरे । पश्चात् सभामण्डपमें राजाओंके यथास्थान बैठ जानेपर विश्वामित्रजीके साथ जाकर वे बालक भी मुनिमण्डपमें मुनिके आगे बैठ गये । ५४ ॥ ५५ ॥ इस प्रकार सभाके भर जानेपर कन्यादानके लिये नियत किये हुए धनुषपर ज्या (ताँत या डोरी) चढ़ानेके लिये राजाओंसे राजा जनकने कहा ॥ ५६ ॥ श्रीशिवजी कहते हैं—हे पार्वती ! जब परशुरामजीने मुझसे धनुर्विद्या प्राप्त की, उस समय मैंने उनको वह त्रिपुरको जलानेवाला धनुष दिया था ॥ ५७ ॥ उसके द्वारा उन्होंने इक्कीस बार पृथ्वीको क्षत्रियोंसे शून्य कर डाला और अपने पिताके घातक सहस्रबाहुको भी उसीसे मारा ॥ ५८ ॥ तदनन्तर परशुरामजी उस धनुषको राजा जनकके आँगनमें रख आये । बचपनमें जानकीजी उस धनुषको लकड़ीका घोड़ा बनाकर खेला करती थीं ॥ ५९ ॥ इस व्यवहारसे परशुराम सीताको लक्ष्मी समझने लगे और इसी अभिप्रायसे हर एकके लिये दुर्लभ वह धनुष राजा जनकको प्रतिज्ञापालनार्थ दे दिया ॥ ६० ॥ तदनुसार विदेहने उस धनुषको सीतास्वयम्वरमें प्रणकी जगहपर नियत किया । पश्चात् भरी सभामें सशंक भावसे जनकजीने उस मेरे सर्वोत्तम धनुषको सबके सामने रखकर राजाओंको अपनी प्रतिज्ञा कह सुनायी । वह धनुष शस्त्रागारसे पाँच सौ बैलों द्वारा खिंचवाकर राजा जनकने सीता-स्वयंवरके लिये वहाँ स्थापित किया था । भरी सभाके मध्यमें राजा जनकने राजाओंसे कहा—'जो राजा इन सभासदोंके सामने इस धनुषको सज्जित करेगा, उसीको सीता वरेगी ।' राजाके वचनको सुन तथा पर्वतके समान अचल उस धनुषको देखकर सबके सब राजाओं तथा महाराजाओंने मुख नीचे कर लिया । उनमेंसे कुछ तो उस धनुषको जमीनसे तनिक भी नहीं उठा सके ॥ ६१–६५ ॥ कुछ लोगोंने कुछ ऊँचा भी किया तो जमीनसे बिल्कुल नहीं उठा सके । बादमें सबके सब मिलकर उठाने लगे तो भी वह जमीनसे पूरा नहीं उठा । तब फिर उसपर डोरी चढ़ाना तो और भी कठिन काम था । सभामें धनुष चढ़ानेसे सब राजाओंको पराङ्मुख देखकर रावण गर्वके साथ धनुषके पास गया और हँसकर राजा जनकसे कहने लगा—॥ ६६–६८ ॥ हे राजन् ! जिस रावणने समस्त देवताओंको जीत लिया है, जिसने तीनों लोकोंको अपने वशमें कर लिया है तथा अपनी दो ही भुजाओंसे जिसने शिवजीके निवासस्थान कैलास पर्वतको हिला दिया है, उस रावणका यदि तुम राजाओंसे भरी सभामें बल देखना चाहते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्य मे जनकाद्य त्वं बलं पार्थिवसंसदि । द्रष्टुमिच्छसि किं त्वस्मिन् लघुचापे तृणोपमे ॥७०॥
एवं वदन् दशास्यः स नम्रो भूत्वा महद्धनुः । गृहीतुं वामहस्तेन चालयामास वै तदा ॥७१॥
न तच्चचाल किंचिच्च तदा दक्षिणसत्करम् । पुरः कृत्वा गृहीतुं तच्चालयामास वै पुनः ॥७२॥
न तच्चचाल तदपि तदाश्चर्येण रावणः । भुजाभ्यां चालयामास तदा चापं चचाल न ॥७३॥
एवं क्रमेण सर्वाभिर्भुजाभिश्चालयन् धनुः । विंशद्दोर्भिरेकदेशं चापस्योर्ध्वं चकार सः ॥७४॥
एकोनविंशद्दोर्भिश्च धृत्वा चैव महद्धनुः । गुणं भूम्यां निपतितं गृहीतुं हि दशाननः ॥७५॥
किंचिद्भूत्वा विनम्रः स दोष्णा जग्राह तं गुणम् । एतस्मिन्नंतरे तच्च पपात तद्धृदये धनुः ॥७६॥
न तद्विंशतिभुजाभिश्च चचाल हृदयाद्धनुः । तदा सभायामूर्ध्वास्यः पपात स दशाननः ॥७७॥
मुकुटः पतितो भूमौ मुक्तकच्छोऽप्यभूत्तदा । तदा विजहसुः सर्वे सभायां पार्थिवोत्तमाः ॥७८॥
तदा प्राणांतिकं चासीद्रावणस्य सभांगणे । अक्षीणि भ्रामयामास लालास्येभ्यो विनिर्ययौ ॥७९॥
तदा तं वेष्टयामासुर्मंत्रिणो राक्षसास्तदा । धनुरुच्चालने शक्तास्तेऽभवन्नैव संसदि ॥८०॥
सद्वस्त्रेषु दशास्यः स विष्ठामूत्रं तदाऽकरोत् । ततः सभायां जनकः पुनः प्राहातिशंकितः ॥८१॥
कोऽपि वीरोऽस्ति भूमौ न किं निर्वीरं हि भूतलम् । चेदस्ति कश्चित्सदसि तर्हि सोऽद्य सभांगणे ॥८२॥
जीवदानं करोत्वस्मै दशास्याय नृपाग्रतः । इति वाक्यशराघातभिन्नौ तौ रामलक्ष्मणौ ॥८३॥
ददर्शतुर्गाधिजस्य मुखं तौ स्फुरितभ्रुवौ । विश्वामित्रस्तदा प्राह राम चोत्तिष्ठ राघव ॥८४॥
किमेतं रावणस्याद्य त्वं पश्यसि सभांगणे । जीवयैनं राक्षसेन्द्रं सज्जं कुरु धनुस्त्विदम् ॥८५॥
तन्मुनेर्वचनं श्रुत्वा तथेत्युक्त्वा स राघवः । तदोत्थायासनाद्वेगात्प्रणनाम मुनीश्वरम् ॥८६॥
निष्कास्य कंठाद्धारादीन् कटिं बद्ध्वा तदा प्रभुः । मुकुटादि दृढं कृत्वा शनैः प्राप सभांगणम् ॥८७॥

हो तो भले ही देख लो, किन्तु इस तिनकेके समान हल्के धनुषमें क्या वीरता देखोगे ॥ ६९ ॥ ७० ॥ ऐसा कहकर दशमुख रावणने उस बड़े भारी धनुषको पहिले अपने बायें हाथसे ही हिलाना चाहा ॥ ७१ ॥ लेकिन वह तनिक भी नहीं हिला। तब उसने दाहिने हाथसे पकड़कर हिलाना चाहा, तिसपर भी जब वह नहीं हिला, तब रावणको बड़ा आश्चर्य हुआ और एक साथ दोनों हाथोंसे उठाना चाहा। फिर तीनसे, फिर चारसे इस प्रकार करते-करते जब बीसों भुजायें ऐक साथ लगा दीं, तब कहीं वह एक ओरसे कुछ ऊँचा हुआ ॥ ७२-७४ ॥ तब उसने उन्नीस भुजाओंसे उस महान् धनुषको सम्हाला तथा बीसवीं भुजासे जमीनपर लटकती हुई ताँतको पकड़कर ज्यों ही उपरको उठाना चाहा, त्यों ही वह धनुष उलटकर उसकी छातीपर गिर पड़ा ॥ ७५ ॥ ७६ ॥ तब बीसों हाथोंसे भी रावण उस धनुषको अपनी छातीपरसे नहीं हटा सका और उपर मुख किये पृथ्वीपर धड़ामसे गिर पड़ा ॥ ७७ ॥ उसके सिरका मुकुट दूर जा गिरा और धोतीकी लांग खुल गयी। यह देख सबके सब राजे खिलखिलाकर हँस पड़े ॥ ७८ ॥ रावण बेचारेके पसीना निकलने लगा, आँखे घूमने लगीं और मुखसे लार गिरने लगी ॥ ७९ ॥ उसके सब मन्त्रियों तथा सैनिकोंने आकर घेर लिया, परन्तु उन सबसे भी धनुष नहीं उठा ॥ ८० ॥ पहिने हुए सुन्दर वस्त्रोंमें रावणका मल-मूत्र निकल पड़ा। रावण जैसे वीरकी यह दशा देख राजा जनकको और भी शंका हुई और वे घबड़ाकर कहने लगे— ॥ ८१ ॥ क्या कोई भी बीर पुरुष इस भूतलपर नहीं रहा ? क्या पृथ्वी वीरोंसे शून्य हो गयी ? यदि कोई हो तो इस सभामें राजाओंके सामने रावणको जीवनदान देकर बचाये। उनके इस वाक्यरूपी बाणसे पीडित होकर राम तथा लक्ष्मण जिनकी भौंहें क्रोधके मारे फड़क रही थीं, विश्वामित्रके मुखकी ओर देखने लगे। तब विश्वामित्र बोले—हे राघव ! खड़े हो जाओ और इस रावणके प्राण बचाओ। तुम्हारे देखते रावण मर रहा है। सो ठीक नहीं है। इसे बचाकर धनुषको भी सज्जित करो ॥ ८२-८५ ॥ मुनिके वाक्य सुन तथा बहुत अच्छा कहकर राम तुरन्त आसनसे उठ खड़े हुए और मुनिको प्रणाम किया ॥ ८६ ॥ उन्होंने गलेमेंसे हार आदि आभूषण उतारकर रख दिये, कमरको कस लिया,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं राममागतं दृष्ट्वा जनाः सर्वेऽतिविस्मिताः । चकिताः पार्थिवाः सर्वे ददृशुर्नेत्रपंकजैः ॥८८॥
परस्परं तदा प्रोचुः किंमूढोऽस्ति शिशुस्त्वयम्। यत्रास्माभिः स्थितं तूष्णीं तत्रायं किं करिष्यति ॥८९॥
केचिदाहुर्दशास्यं हि द्रष्टुं बालः समागतः । केचिदूचुर्बालचेष्टा क्रियते शिशुनाऽत्र हि ॥९०॥
केचिदूचुः किमर्थं हि हारा मुक्तास्त्वनेन हि । केचिदूचुर्गाधिजेन चापं प्रति सुयोजितः ॥९१॥
केचिदूचुर्वैरबुद्ध्या चोदितः किं शिशुस्त्वयम् । वधार्थं चापघातेन विश्वामित्रेण राघवः ॥९२॥
केचिदूचुर्बलं त्वस्य मुनिनाऽत्र निरीक्षितुम् । चोदितोऽस्त्यत्र श्रीरामश्चापेऽस्थं किं करिष्यति ॥९३॥
एवं नानाविधांस्तर्कान्यावत्कुर्वंति पार्थिवाः । तावद्दृष्ट्वाऽग्रतो रामं जनकः प्राह गाधिजम् ॥९४॥
किमर्थं प्रेषितस्त्वत्र मुने बालः सभांगणे । लत्रैते रावणाद्याश्च नृपाः सर्वेऽपि कुण्ठिताः ॥९५॥
तस्मिंश्चापे त्वयं बालः किमागत्य करिष्यति । यत्त्वया शिष्यवाक्येन पूर्वं चाहं प्रबोधितः ॥९६॥
तत्सर्वं तु मृषैवाद्य चापाग्रे मुनिसत्तम । क्वायं बालः कोमलांगः क्वेदं चापं सुदुर्धरम् ॥९७॥
किं चातकस्तृषाक्रांतः सागरं शोषयिष्यति । एतस्मिन्नन्तरे सर्वाः सुमेधाद्याः स्त्रियश्च ताः ॥९८॥
द्विजराजाननं चारुदोर्दण्डद्वयशोभितम् । हेमवर्णोपमरुचिं शृंखलानूपुरांघ्रिणम् ॥९९॥
शृंखलाकंककबरद्वयशोभितसत्करम् । दिव्यकुण्डलमुकुटरत्नालंकारशोभितम् ॥१००॥
सुजंघं सुपदं शूरं सुजानुं सुन्दरोदरम् । सुस्कंधं सुहनुं कंबुकंठं त्रिबलिशोभितम् ॥१०१॥
स्मितास्यं कोमलोष्ठं च सुदंतावलिराजितम् । सुनासं सुकपोलं च कञ्जपत्रायितेक्षणम् ॥१०२॥
सुभ्रुभावं च सुस्निग्धं कुंचितालकशोभितम् । मुक्तामाणिक्यरत्नादिनानाऽलंकारशोभितम् ॥१०३॥

मुकुटको अच्छी प्रकार बांध लिया और धीरेसे सभाके बीचमें आ खड़े हुए ॥ ८७ ॥ रामको वहाँ खड़े देख सब लोग बड़े विस्मयमें पड़ गये और चकित होकर सबके सब राजे उन्हें अपने कमलसदृश नयनोंसे देखते हुए परस्पर कहने लगे कि यह बालक कैसा मूर्ख है । अरे, जहाँ हम लोगोंको चुप होना पड़ा, वहाँ यह क्या करेगा ? ॥ ८८ ॥ ८९ ॥ कोई कहने लगा कि यह बालक केवल रावणको देखनेके लिए आया है । किसीने कहा कि यह बालक तो मानों खेलने गया हो, ऐसा लगता है ॥ ९० ॥ कोई बोला- तब इसने गलेसे हार तथा माला क्यों उतार दी है ? किसीने उत्तर दिया कि इसको विश्वामित्रने धनुष उठानेके लिए भेजा है ॥ ९१ ॥ कोई बोला कि इस बालकको विश्वामित्रने शत्रुतावश भेजा है, जिससे यह धनुषसे दबकर मर जाय ॥ ९२ ॥ दूसरोंने कहा कि नहीं, मुनिने इसका बल देखनेके लिए भेजा है । परन्तु राम इस धनुषके विषयमें क्या कर सकता है ? ॥ ९३ ॥ इस प्रकार राजा लोग अनेक तरहके तर्क-वितर्क कर ही रहे थे कि रामको देखकर जनकने विश्वामित्रसे कहा—हे मुनिराज ! आपने इस बालकको क्यों भेजा है ? जिस धनुषके विषयमें बड़े-बड़े राजे-महाराजे तथा रावणकी भी शक्ति कुण्ठित हो गयी, वहाँ यह बालक जाकर क्या करेगा ? जो आपने पहले अपने शिष्यके द्वारा कहला भेजा था, सो सब आज इस धनुषके सामने झूठा होगा । क्योंकि कहाँ यह कोमल अंगका बालक और कहाँ यह अति दुर्धर्ष तथा महान् धनुष । चातक चाहे कितना ही प्यासा क्यों न हो, तो भी क्या वह समुद्रको सोख सकता है ? इसी समय सुमेधा आदि स्त्रियें झरोखोंसे, जालियोंसे, चौकों और छतोंपरसे सुन्दर तथा कोमल अङ्गवाले, कमलके सदृश नेत्रवाले, चन्द्रमाके समान सुन्दर मुखवाले, बड़ी-बड़ी भुजाओंसे शोभित, सुवर्णसदृश कान्तिसम्पन्न, नूपुर और सिकड़ियोंको पावँमें पहिने । ९४-९९ ॥ जिनके हाथोंमें सिकड़ी और कड़े शोभित हो रहे थे। जिनके सिरपर दिव्य मुकुट, कानोंमें दिव्य कुण्डल, हृदयपर रत्न तथा मणियोंके विशाल हार झलक रहे थे, पेट तथा ललाटमें त्रिवली पड़ी हुई थी । शंखके समान कंठ देखनेमें बड़ा ही अच्छा लगता था । जिनकी चिकनी ठोढ़ी, कोमल कपोल, हँसता हुआ मुखचंद्र, अनारकी पंक्तिके समान दाँत, सुन्दर लम्बी और पतली नाक तथा लाल-लाल होंठ थे । माणिक्य, मोती, रत्न तथा हीरों आदिसे जड़े हुए अनेक अलंकारोंसे अलंकृत,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुक्तारत्नपुष्पमालान्यस्तमप्यतिशोभितम् । न्यस्तहारं न्यस्तवस्त्रं बद्धपीताम्बरान्वितम् ॥१०४॥
दिव्यमुद्रांगुलिलसत्पंकजद्वयसत्करम् । एवं दृष्ट्वा स्त्रियो रामं सभाङ्गणविराजितम् ॥१०५॥
न्यस्तकोदंडतूणीरं शिवचापाभिसंमुखम् । प्रार्थयामासुस्ताः सर्वा ऊर्ध्वास्या ऊर्ध्वसत्कराः ॥१०६॥
पश्यंत्यो गगने शंभुं मोहान्नारायणं विधिम् । साक्षान्नारायणं रामं न ज्ञात्वा ताश्च वै स्त्रियः ॥१०७॥
हे शंभो हे रमाकान्त हे विधेऽस्मत्पुराकृतैः । व्रतदानादिपुण्यैश्च चापं सज्जीकरोत्वयम् ॥१०८॥
युष्माभिर्नः सुकृतैश्च कर्तव्यं पुष्पवद्धनुः । अद्यास्य कंठदेशेऽत्र मालां सीता दधात्वियम् ॥१०९॥
नो भवत्वद्य नेत्राणां साफल्यं दर्शनादिह । सीतया रामचंद्रस्य वेदिकायां स्थितस्य हि ॥११०॥
एतस्मिन्नंतरे सीता रामं दृष्ट्वा सभांगणे । दिव्यप्रासादसंरूढा सखीभिः परिवेष्टिता ॥१११॥
प्रोच्चचालासनाद्वेगादानंदस्वेदसंप्लुता ।
सख्यास्तुलस्याः कंठे स्वां दोर्लतां क्षिप्य सादरम् ॥११२॥
अब्रवीन्मधुरं वाक्यं रत्नालंकारमंडिता । किंपणोऽत्र कृतः पित्रा मम शत्रुस्वरूपिणा ॥११३॥
क्व रामः सुकुमारांगः क्वेदं चापं नगोपमम् । हा विधे किं करोष्यद्य किमस्त्यंतर्गतं तव ॥११४॥
रामाद्विनाऽन्यं पुरुषं मनसाऽहं न रोचये । यदि तातो बलादन्यं मां दास्यति तदा ह्यहम् ॥११५॥
त्यजामि जीवितं त्वद्य प्रासादपतनादिना । हे शंभो हे विधे दुर्गे हे सावित्रि सरस्वति ॥११६॥
हे गायत्रि स्वरे भानो मघवन्यम तोयप । हे कुबेरानल रमे हे विष्णो खगनायक ॥११७॥
हे फणींद्र निशानाथ हे सर्वे निर्जरादयः । युष्माकं प्रार्थयाम्यद्य प्रसार्य करपल्लवम् ॥११८॥
सर्वैरेतन्महच्चापं करणीयं तु पुष्पवत् । प्रवेशनीयं युष्माभिः श्रीरामभुजदंडयोः ॥११९॥
चतुर्दश वत्सराणि मुनिवृत्त्याऽनुवर्तिनी । विचरामि वने चाहं धनुः सज्जं करोत्वयम् ॥१२०॥

पन्ना, लाल, पुखराज, मुक्ता तथा हरे-पीले अनेक रङ्गकी पुष्पमालाओंसे मनोहर, पीताम्बर आदि सुन्दर वस्त्रोंको पहिने हुए, शङ्ख चक्र गदा पद्म आदि शुभ चिह्नोंसे चिह्नित करकमलवाले, सभामण्डपके बीच खड़े, दोनों कन्धोंपर धनुष और तूणीरको टाँगे तथा शिवधनुषके सामने मुख किये हुए रामको देखकर उन्हें साक्षात् नारायण न समझती हुई वे महिलायें आकाशमें स्थित शिव, विष्णु और ब्रह्माको देख उनसे हाथ जोड़कर प्रार्थना करने लगीं—॥ १००–१०७ ॥ हे शंभो ! हे रमाकांत ! हे ब्रह्मन् ! हमारे पूर्वोपार्जित व्रत-दानजन्य पुण्योंसे यह बालक धनुष चढ़ानेमें समर्थ हो ॥१०८॥ आप लोग हमारे पुण्यप्रतापसे इस धनुषको पुष्पके समान हल्का बना दें। जिससे हमारी सीता आज इनके गलेमें वरमाला डाले ॥ १०९ ॥ हमलोग सीतासहित रामचन्द्रको विवाहकी वेदीपर बैठे देखकर अपने नेत्रोंको सफल करें ॥ ११० ॥ उसी समय वस्त्रों तथा अलङ्कारोंसे सुशोभित सखियोंके साथ दिव्य भवनकी छतपर बैठी हुई सीता रामको सभाके बीच खड़े देख आनन्दके स्वेदसे परिप्लुत होकर शीघ्र आसनसे उठ खड़ी हुईं। अपनी प्रिय सखी तुलसीके गलेमें हाथ डाल तथा तनिक अगाड़ी बढ़कर आदरपूर्वक यह मधुर वाक्य बोलीं—शत्रुस्वरूप मेरे पिताने यह कैसी प्रतिज्ञा की है ? कहाँ ये कोमल अङ्गवाले बालक राम और कहाँ यह पर्वतके समान भारी तथा कठिन धनुष। यह इनसे कैसे चढ़ सकेगा ? हा ईश्वर ! तुमने यह क्या किया और क्या करनेका विचार है ? चाहे जो हो, मैं रामको छोड़कर दूसरे किसीको नहीं वरूँगी। यदि मेरे पिता मुझे दूसरे किसीको देंगे तो मैं महलपरसे गिरकर अथवा विष आदिके द्वारा शीघ्र प्राण त्याग दूँगी। हे शंभो ! हे विधे ! हे दुर्गे ! हे सरस्वती ! हे गायत्री ! हे स्वरे ! हे सूर्य ! हे इन्द्र ! हे जलपति वरुण ! हे कुबेर ! हे अग्ने ! हे रमे ! हे विष्णो ! हे गरुड़ ! हे फणीन्द्र ! हे चन्द्र ! हे समस्त देवताओं ! मैं आँचल फैलाकर प्रार्थना करती हूँ कि आप सब इस धनुषको फूलके समान हल्का बना दें और रामचन्द्रके भुजदण्डमें प्रवेश करके उन्हें बल प्रदान करें। जिससे राम धनुष चढ़ानेमें समर्थ हों और मुनिवृत्ति धारण करके रामकी

CC-0. In Public Domain. Kulkarni Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं नानाविधैर्वाक्यैः सीता देवानतोषयत् ।
एवं प्रासादसंस्थायाः सीताया विविधानि च ॥१२१॥
तथा तासां हि नारीणां नृपाणां जनकस्य च ।
वाक्यानि शृण्वन् श्रीरामः किंचित्कृत्वा स्मिताननम् ॥१२२॥
ययौ चापं नमस्कृत्य कृत्वा तं च प्रदक्षिणम् । पुनर्नत्वा शिवं ध्यात्वा गुरुं दशरथं नृपम् ॥१२३॥
कौसल्यां च गुरुं ध्यात्वा वामहस्तेन तद्दधौ । सव्यहस्तेन चापस्य गुणं धृत्वा रघूत्तमः ॥१२४॥
वामहस्तेन नम्रं तच्चकार सदसि क्षणात् । तदा निनेदुर्वाद्यानि तुष्टुवुर्वन्दिमागधाः ॥१२५॥
एतस्मिन्नन्तरे रामो वामहस्तबलाद्धनुः । मध्येऽभवत्त्रिखंडं तच्छैवं प्राचीनमुत्तमम् ॥१२६॥
चापभङ्गान्महानादस्तदाऽभूद्गगनांगणे । चकंपे धरणी त्वं चालिङ्गयन्मां भयाद्दृढम् ॥१२७॥
चुक्षुभुः सागराः सर्वे निनेदुस्ता दिशो दश । तारा निपेतुर्धरणीं शिरः शेषोऽप्यचालयत् ॥१२८॥
ववुर्वाताः सुगन्धाश्च देवास्ते गगने स्थिताः । वादयामासुर्वाद्यानि पुष्पौघैः समवाकिरन् ॥१२९॥
स्वर्वेश्या ननृतुः खे हि देवास्तोषं प्रपेदिरे । तदा निनेदुः सदसि भेर्यो दुंदुभयो वराः ॥१३०॥
नववाद्यस्वनाः सर्वे बभूवुर्जयनिःस्वनाः । ननृतुर्वारनार्यश्च तुष्टवुर्मागधादयः ॥१३१॥
स्त्रियो गवाक्षरंध्रैश्च रामं पुष्पैरवाकिरन् । तदा स रावणस्तूष्णीं लज्जयाऽऽनतमस्तकः ॥१३२॥
मुकुटैरपि हीनश्च मुक्तकच्छोऽतिविह्वलः । सभायां न क्षणं तस्थौ तूर्णं लंकापुरीं ययौ ॥१३३॥
रामेण भग्नं तच्चापं दृष्ट्वा नार्यो मुदान्विताः । चक्रुर्जयस्वनैर्घोषान्करैश्च करतालिकाः ॥१३४॥
सीताऽपि मुदिता जाता हर्षरोमांचनिर्भरा । अनिमेषा कंजनेत्रा राममुत्कंठिता ह्यभूत् ॥१३५॥
एतस्मिन्नंतरे राजा जनकः प्राह मन्त्रिणः । करिणीस्थामत्र सीतामानयध्वं समुत्सवैः ॥१३६॥

अनुगामिनी बनकर उनके साथ चौदह वर्ष तक वनमें भ्रमण करूँ ॥ १११-१२० ॥ इस प्रकार विविध वाक्योंसे सीता देवताओंको मनाने लगीं। प्रासादपर स्थित सीताके, उन स्त्रियोंके, राजा जनकके तथा अन्यान्य राजाओंके ऐसे-ऐसे वाक्योंको सुनकर मुसकाते हुए श्रीराम धनुषके पास गये । वहाँ जाकर उन्होंने धनुषको नमस्कार किया, प्रदक्षिणा की और शिवजीका मन ही मन ध्यान धरके प्रणाम किया। बादमें राजाओंमें श्रेष्ठ राजा दशरथ, माता कौसल्या तथा गुरु वसिष्ठका मन ही मन ध्यान धरके प्रणाम किया। फिर बायें हाथसे धनुष और दाहिने हाथसे उसकी ताँत पकड़कर क्षणभरमें सभाके सामने बायें हाथसे धनुषको झुकाकर ताँत चढ़ा दी। उस समय बाजे बजने लगे, पुष्पवृष्टि होने लगी और चारणगण रामका यश गाने लगे। इतनेमें रामके बायें बाहुबलसे उस उत्तम तथा पुरातन शिवधनुषके बीचसे तीन टुकड़े हो गये ॥ १२१-१२६ ॥ धनुषके टूटनेसे बड़ा घनघोर शब्द हुआ । जिससे समस्त गगनमण्डल गूँज उठा। धरती काँप उठी। हे पार्वती ! तुम भी उस समय मारे डरके हमसे चिपट गयी थीं। सब समुद्र चलायमान हो गये। दिशायें क्षुभित हो गयीं। तारे टूट-टूटकर पृथ्वीपर गिरने लगे। शेषनागका सिर घूमने लगा। सुगन्धयुक्त वायु बहने लगी। देवता आकाशसे फूल बरसाने और बाजे बजाने लगे । स्वर्गकी देवियाँ आकाशमें नृत्य करने लगीं और देवता आनन्द मनाने लगे। उस समय सभामण्डपमें भी उत्तम ढोल तथा नगाड़े बजने लगे ॥ १२७-१३० ॥ नये-नये बाजों तथा जयजयकारका घोष होने लगा। वाराङ्गनाएँ नाचने लगीं। भाँट आदि स्तुति करने लगे। झरोखोंसे स्त्रियें रामपर फूल बरसाने लगीं। तब रावण चुपचाप लज्जासे सिर नीचा किये हुए बिना लाँग लगाये मुकुटरहित हो घबराहटके साथ शीघ्र मिथिलापुरीसे निकलकर लङ्काको भाग गया। वहाँ वह क्षणभर भी नहीं ठहरा ॥ १३१-१३३ ॥ रामने धनुषको तोड़ डाला, यह देखकर स्त्रियें हर्षातिरेकसे जयजयकार करने और तालियाँ बजाने लगीं ॥ १३४ ॥ सीताके तो शरीरमें मारे आनन्दके रोमाञ्च हो आया। उत्कण्ठापूर्वक निमेषरहित होकर कमलसदृश नयनोंसे वे रामको निहारने लगीं ॥ १३५ ॥ तभी राजा जनकने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रक्षणाया निजैः सैन्यैर्वेष्टयित्वा समन्ततः । तथेति ते मंत्रिणश्च ययुर्वेगेन जानकीम् ॥१३७॥
प्रोचुस्ते मधुरं वाक्यं प्रबद्धकरसंपुटाः । हे सीते कंजनयने धन्याऽसि गजगामिनि ॥१३८॥
रविवंशोद्भवेनाद्य दशरथसुतेन च । रामेण भग्नं सदसि चापमुत्तिष्ठ वेगतः ॥१३९॥
करिणीपृष्ठमारुह्य राम त्वं गंतुमर्हसि । रामकंठेऽर्पयस्वाद्य रत्नमालां मुदान्विता ॥१४०॥
तन्मंत्रिणां वचः श्रुत्वा सीता नत्वा स्वमातरम् । सखीभिः करिणीपृष्ठे संस्थितासीन्मुदान्विता ॥१४१॥
तदग्रे नववाद्यानि निनेदुर्मञ्जुलानि वै । निनेदुः पृष्ठभागेऽपि नानावाद्यानि वै मुहुः ॥१४२॥
चित्रोष्णीष्ठाः कंचुकिनः शतशो वेत्रपाणयः । सीताकरिण्याश्चाग्रे ते दुद्रुवुर्दीर्घनिःस्वनाः ॥१४३॥
वारयन् जनसंमर्दं सीतां द्रष्टुं जनैः कृतम् । ननृतुर्वारनार्यश्च बभूवुर्यन्त्रनिःस्वनाः ॥१४४॥
तुष्टुवुर्मागधाद्याश्च नटा गानं प्रचक्रिरे । करिणीं वेष्टयामासुः सीतादास्यः सहस्रशः ॥१४५॥
अश्वारूढाश्चामरादि बिभ्रन्त्यो रुक्मशोभिताः । ततोऽश्वसंस्थाः शतशस्तां ययुश्चोपमातरः ॥१४६॥
जरठाः शस्त्रधारिण्यः स्वर्णदंडलसत्कराः । ततः पुरुषवद्वेषान्बिभ्रन्त्यः प्रमदोत्तमाः ॥१४७॥
ययुस्तरुण्यः शतशः शस्त्रहस्ताः सुभूषिताः । गोपितास्याः कंचुकिन्यस्तुरगादिषु संस्थिताः ॥१४८॥
ततस्ते मंत्रिणः सर्वे नानावाहनसंस्थिताः । स्वसैन्यैर्वेष्टयामासुः सीतायाः करिणीं मुदा ॥१४९॥
चामरैर्व्यजनैः सख्यो मुहुः सीतामवीजयन् । स्त्रियो गवाक्षरंध्रैश्च सीतां पुष्पैरवाकिरन् ॥१५०॥
एवं नानासमुत्साहैः शनैः सीता तडित्प्रभा । नवरत्नमयीं मालां बिभ्रती दक्षिणे करे ॥१५१॥
रामं नेत्रकटाक्षैश्च पश्यन्ती मुदितानना । सभायां राघवं गत्वा करिण्याश्चावरुह्य च ॥१५२॥
शनैः पद्भ्यां ययौ रामं तद्ग्रीवाया सुलज्जिता । मुमोच निजबाहुभ्यां रत्नमालां मुदान्विता ॥१५३॥
चकार नमनं रामं पादयोः स्थाप्य वै शिरः । तस्थाववाङ्मुखी सीता सभायामतिलज्जिता ॥१५४॥

अपने मन्त्रियोंको आज्ञा दी कि सुन्दर हथिनीपर बैठाकर सेनाकी देख-रेखमें समारोहके साथ सीताको यहाँ ले आओ ॥ १३६ ॥ 'बहुत अच्छा' कहकर मन्त्रिगण तुरन्त जानकीजीके पास गये ॥ १३७ ॥ वे हाथ जोड़कर इस प्रकार मधुर वाणीमें कहने लगे—हे गजगामिनी और कमलनयनी सीता ! तुम धन्य हो ॥ १३८ ॥ सूर्यवंशी दशरथपुत्र रामने सभामें धनुष तोड़ डाला। जल्दी उठकर खड़ी हो जाओ ॥ १३९ ॥ हथिनीपर चढ़कर अभी रामके पास चलना है। वहाँ चलकर आनन्दपूर्वक अभी उनके गलेमें यह रत्नोंकी माला (वरमाला) डाल दो ॥ १४० ॥ सीताने मन्त्रियोंके इस वाक्यको सुनकर माताके चरणोंमें नमस्कार किया और सहर्ष सखियोंके साथ हथिनीकी पीठपर सवार हो गयीं ॥ १४१ ॥ उनके आगे तथा पीछे नाना प्रकारके मनोहर बाजे बजने लगे ॥ १४२ ॥ रङ्ग-बिरङ्गी पगड़ियें बाँधे और हाथमें बेंत लिये अन्तःपुरके सैंकड़ों दरवान हथिनीके आगे-आगे जोरसे चिल्लाते हुए चलने लगे ॥ १४३ ॥ वे रास्तेमें सीताको देखनेके लिये खड़ी भीड़को हटा रहे थे। वेश्यायें नाचने लगीं। विविध वाद्योंके निनाद होने लगे। भाँट स्तुति करने और नट गाने लगे। सीताकी हजारों दासियोंने उन्हें घेर लिया ॥ १४४ ॥ १४५ ॥ उनके पीछे अश्वपर सवार तथा सुवर्णभूषित चमर आदि लिये हुए बहुतसी स्त्रियें तथा उनके पीछे घोड़ोंपर सवार सैंकड़ों उपमातायें (दाइयाँ) चलीं ॥ १४६ ॥ उनके पीछे शस्त्रधारिणी तथा सोनेकी छड़ियें लिये हुए सैंकड़ों बूढ़ी स्त्रियें चलीं। उनके बाद जवान स्त्रियें पुरुषका वेष बनाये और हाथमें शस्त्र लिये हुए चलीं। उनके बाद उसी वेषमें मुख ढाँके और कुरता पहिने घोड़ोंपर सवार होकर अस्त्र लिये हुए कुछ सुन्दरी स्त्रियें चलीं ॥ १४७ ॥ १४८ ॥ सबके पीछे विविध वाहनोंपर सवार मन्त्रिगण अपनी-अपनी सेनाके द्वारा सीताकी हथिनीको घेरे हुए चले ॥ १४९ ॥ सखीगण चँवर तथा पंखे सीताजीपर डुलाने लगीं। नगरकी स्त्रियें गवाक्षमार्गसे उनपर फूल बरसाने लगीं ॥ १५० ॥ इस तरह अनेक प्रकारसे सज-धजकर धीरे-धीरे बिजलीके सदृश दीप्तिवाली तथा दाहिने हाथमें नवरत्नोंका हार लिये हुए अपने नेत्रकटाक्षोंसे रामको देखती हुई सीता सभामण्डपके पास जा तथा हथिनीसे उतरकर धीरे-धीरे रामके पास गयीं और लज्जापूर्वक अपने हाथोंसे उनके गलेमें वह रत्नोंकी माला डाल दी ॥ १५१–१५३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ददर्श सीतां रामोऽपि हारशोभितहृत्स्थलाम् । अवाप तोषं नितरां ननाम गाधिजं प्रभुः ।।१५५।।
तदा रामं समालिंग्य विश्वामित्रो मुनीश्वरः । निवेशयन्निजांके तं स प्रेम्णाऽऽघ्राय मस्तके ।।१५६।।
तदा स जनकः सीतां गाधिजांके न्यवेशयत् । सीतया रघुनाथेन शुशुभे स मुनिस्तदा ।।१५७।।
मानयामास स मुनिर्जन्मसाफल्यतां हृदि । ततः सभायां जनको विश्वामित्रं वचोऽब्रवीत् ।।१५८।।
प्रसादात्तव रामस्य लाभो जातोऽद्य मे मुने । धन्योऽस्म्यहं कुलं धन्यं धन्यौ तौ पितरौ मम ।।१५९।।
योऽहं श्रीरामश्वशुरश्चेति लोके प्रथां गतः । इत्युक्त्वा गाधिजं नत्वा प्रणनाम रघूत्तमम् ।।१६०।।
तदा ते पार्थिवाः सीतां दृष्ट्वा तत्र तडित्प्रभाम् । बिंबोष्ठीं चंद्रवदनां तन्नेत्रशरताडिताः ।।१६१।।
बभूवुर्विकलास्तत्र दुर्दैवं मेनिरे निजम् । केचिन्मूर्छां ययुस्तत्र तान्समागत्य मैथिलः ।।१६२।।
प्रार्थयामास नृपतीन्विषण्णान् सदसि स्थितान् । नष्टश्रीम्लानवदनान् लज्जया नतकंधरान् ।।१६३।।
युष्माभिर्मेऽत्र कन्याया विवाहं विनिवर्त्य च । गंतव्यं स्वपुराण्येव करणीया कृपा मयि ।।१६४।।
तदा ते पार्थिवाः सर्वे मंत्रांश्चक्रुः परस्परम् । यदि युद्धे विजेतव्यः श्रीरामोऽद्य रणांगणे ।।१६५।।
तर्ह्यस्मिन् समये दुष्टे जयो नो न भविष्यति । कुमुहूर्ते वयं यातास्तूष्णीं गत्वा पुराणि हि ।।१६६।।
सुमुहूर्ते पुनर्योद्धुं यास्यामः सकला बलैः । भविष्यति तदाऽस्माकं जयो युद्धे विनिश्चयात् ।।१६७।।
यदा रामं बाणभिन्नं पश्यामः पतितं रणे । भविष्यामः कृतकृत्यास्तदा सर्वे वयं नृपाः ।।१६८।।
तदैवास्यापमानस्य दुःखं मर्मस्थलं गतम् । त्यजामः पार्थिवाः सर्वे जेष्यामो राघवं यदा ।।१६९।।
किमर्थमधुना वैरं दर्शनीयं नृपाय वै । इति संमंत्र्य ते सर्वे तथेत्युक्त्वा नृपोत्तमम् ।।१७०।।
कृत्वा सीताविवाहं च गच्छामः स्वस्थलानि हि । तदा तान् सकलं वस्तु गृहाणि जनको मुदा ।।१७१।।

तत्पश्चात् रामके चरणोंपर अपना सिर रख तथा नमस्कार करके सभामें लज्जावश कुछ नीचा मुख किये हुए खड़ी हो गयीं ॥ १५४ ॥ उस हारसे सुशोभितहृदय रामने भी सीताकी ओर देखा और अत्यन्त सन्तुष्ट होकर उन्होंने विश्वामित्रजीको प्रणाम किया ॥ १५५ ॥ मुनियोंके ईश्वर विश्वामित्रने रामको आलिङ्गन करके प्रेमसे गोदमें बिठाया और उनका सिर सूँघा ॥ १५६ ॥ तब राजा जनकने सीताको भी ले जाकर विश्वामित्रजीकी गोदमें बैठा दिया। उस समय सीता तथा रामके सहित विश्वामित्रजी बड़ी ही शोभाको प्राप्त हुए ॥ १५७ ॥ वे मन ही मन अपने जन्मको सफल समझने लगे। तदनन्तर राजा जनकने सभामें विश्वामित्रसे कहा—॥ १५८ ॥ हे मुनिराज ! आपकी कृपासे आज मुझे रामचन्द्र जैसा दामाद प्राप्त हुआ है। मैं अपनेको, अपने माता-पिताको तथा अपने कुलको धन्य समझता हूँ ॥ १५९ ॥ क्योंकि मैं रामचन्द्रके श्वशुरनामसे संसारमें विख्यात हुआ। ऐसा कहकर उन्होंने विश्वामित्रको तथा रघुकुलशिरोमणि रामचन्द्रको प्रणाम किया ॥ १६० ॥ उस समय वहाँ एकत्रित अन्यान्य राजे चपलाके समान चमकनेवाले बिम्ब अर्थात् पके हुए कुँदरूफलके सदृश ओंठ और चन्द्रमाके सदृश मुखवाली सीताको देखते ही उसके नेत्ररूपी बाणोंसे घायल होकर व्याकुल हो गये और अपना दुर्भाग्य समझने लगे। कुछ वहीं मूर्छित हो गये। तब मिथिलाके अधिपति राजा जनकने वहाँ जाकर उन कान्ति नष्ट हो जानेसे मलीनमुख, दुःखी, लज्जासे नीची गरदन करके सभामें बैठे हुए राजाओंसे प्रार्थना की–॥ १६१—१६३ ॥ कृपा करके मेरी कन्याके विवाहका उत्सव समाप्त करके ही आपलोग अपने-अपने नगरोंको जाइयेगा ॥ १६४ ॥ तब वे राजे विचार करने लगे कि यदि रामको युद्धमें जीतना ही हो तो भी इस कुसमयमें हमलोगोंको विजय लाभ नहीं होगा। क्योंकि हमलोग कुमुहूर्तमें आये हैं। अतएव अभी यहाँसे चुपचाप अपने-अपने स्थानोंको जाकर फिर किसी अच्छे मुहूर्तमें दलबलके सहित आयेंगे। उस समय रामको रणभूमिमें घायलकर और विजय प्राप्त करके हम सब कृतकृत्य होंगे तथा अपमानजनित हृदयगत दुःखको शान्त करेंगे। इसलिए इस समय राजा जनकसे वैर करना अच्छा नहीं है। सीताके विवाहको करवाकर ही चलेंगे। ऐसा विचार करके सब राजाओंने राजा जनकसे 'बहुत अच्छा' ऐसा कहा ॥ १६५–१७० ॥ इधर राजा जनकने सहर्ष रघूत्तम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कल्पयामास विधिवन्मुनींश्चापि रघूत्तमम् । ततो गाधिजवाक्येन विदेहः प्रेष्य मंत्रिणः ॥१७२॥
समानेतुं दशरथं तत्प्रतीक्षां चकार सः । तेऽपि गत्वा मंत्रिणश्च दृष्ट्वा दशरथं नृपम् ॥१७३॥
वृत्तं निवेद्य सकलं तं नत्वा तत्पुरःस्थिताः । वृत्तं दशरथः श्रुत्वा तुतोष नितरां तदा ॥१७४॥
सैन्येन नागरैः सर्वैः स्त्रीभिर्जानपदैः सह । मिथिलामगमच्छीघ्रं तदा दशरथो नृपः ॥१७५॥
तदा महोत्सवेनैव नृपं दशरथं पुरीम् । नेतुं गजं पुरस्कृत्य जनकः पार्थिवैर्ययौ ॥१७६॥
तदा दशरथाग्रे तौ दृष्ट्वा कैकेयजासुतौ । श्रीरामलक्ष्मणावत्र कुतः प्राप्तौ व्यचिंतयत् ॥१७७॥
तावद्रामलक्ष्मणाभ्यां युक्तं तं गाधिजं मुनिम् । स्वसेनायां नृपो दृष्ट्वा विस्मयं प्राप मैथिलः ॥१७८॥
ततो दशरथं नत्वा वसिष्ठं प्रणिपत्य च । गाधिजं जनकः प्राह कावेतौ रामरूपिणौ ॥१७९॥
ततस्तं गाधिजः प्राह रामांशाद्भरतस्त्वयम् । लक्ष्मणांशाच्च शत्रुघ्नः कैकेय्या नंदनाविमौ ॥१८०॥
तच्छ्रुत्वा जनकः प्राह राजानं गाधिजं गुरुम् । सीतां रामाय दास्यामि लब्धां भूमावयोनिजाम् ॥१८१॥
देहजामुर्मिलानाम्नीं लक्ष्मणायार्पयाम्यहम् । कुशध्वस्य मे बन्धोः श्रुतकीर्तिश्च मांडवी ॥१८२॥
वर्तेते बालिके रम्ये रूपयौवनमण्डिते । सीतोर्मिलाभ्यामपि ये मया नित्यं प्रलालिते ॥१८३॥
दास्याम्यहं भरताय मांडवीं मंडनान्विताम् । शत्रुघ्नाय श्रुतकीर्तिमर्पयाम्यहमादरात् ॥१८४॥
एवं स्नुषाश्चतस्रश्च त्वमंगीकुरु पार्थिव । तथेति जनकं प्राह राजा दशरथो मुदा ॥१८५॥
ततो दशरथः प्राह शतानंदं पुरोहितम् । अहल्याजठरोद्भूतं मैथिलाग्रे स्थितं मुनिम् ॥१८६॥
कथं लब्धा भुवः सीता तत्सर्वं वक्तुमर्हसि । शतानंदस्तथेत्युक्त्वाऽब्रवीद्दशरथं नृपम् ॥१८७॥

शतानंद उवाच

सम्यक् पृष्टं त्वया राजन् श्रृणुष्वैकाग्रमानसः । आसीत्पुरा नृपः कश्चित्पद्माक्ष इति विश्रुतः । ॥१८८॥

रामके लिये, मुनियोंके लिये तथा राजाओंके लिये सब प्रकारकी वस्तुओंका यथोचित प्रबन्ध कर दिया ॥ १७१ ॥ तदनन्तर विश्वामित्रके कहनेपर राजा जनकने अवधनरेश महाराज दशरथको बुलानेका निश्चय करके मन्त्रियोंको अयोध्या भेजा। तदनुसार वे राजा दशरथके पास गये और सब वृत्तान्त निवेदन करनेके बाद नमस्कार करके सामने खड़े हो गये। इस वृत्तान्तको सुनकर राजा दशरथ बहुत प्रसन्न हुए ॥ १७२–१७४ ॥ फिर राजा दशरथ स्त्रियोंको, सेनाको, नगर तथा देशके सब लोगोंको साथ लेकर आनन्द-पूर्वक शीघ्र मिथिलापुरीको चल पड़े ॥ १७५ ॥ उधर राजा जनक बड़े समारोहपूर्वक बाजे-गाजेके साथ एक हाथीको सजाकर सब राजाओंके संग उनकी अगवानीके लिए सामने आये ॥ १७६ ॥ महाराज दशरथके आगे कैकेयीके पुत्र भरत तथा शत्रुघ्नको देखकर राजा जनक विचारने लगे कि ये राम-लक्ष्मण यहाँ कहाँसे आ गये। बादमें जब विश्वामित्रके साथ राम-लक्ष्मणको अपनी सेनामें देखा तो आश्चर्यचकित होकर राजा जनकने महाराज दशरथ और मुनि वसिष्ठको प्रणाम करके विश्वामित्रसे पूछा कि ये दोनों राम-लक्ष्मण-के समान रूपवाले दूसरे बालक कौन हैं ? ॥ १७७–१७९ ॥ विश्वामित्रजीने उत्तर दिया कि रामके अंशस्वरूप भरत तथा लक्ष्मणके अंश शत्रुघ्न ये दोनों कैकेयीके पुत्र हैं ॥ १८० ॥ यह सुनकर राजा जनक गुरु विश्वामित्र तथा राजा दशरथसे कहने लगे कि अयोनिजा (योनिसे नहीं उत्पन्न) तथा पृथ्वीसे प्राप्त सीताको मैं रामके लिए देता हूँ तथा शरीरसे उत्पन्न उर्मिलाको लक्ष्मणके लिए दे रहा हूँ। उन्हें आप ग्रहण करें। मेरे भाई कुशध्वजकी श्रुतकीर्ति तथा माण्डवी नामकी सुन्दर तथा रूपयौवनसे सम्पन्न दो कन्याएँ हैं। जिनको कि सीता तथा उर्मिलाके साथ-साथ पालकर मैने बड़ी की है ॥ १८१-१८३ ॥ उनमें भूषणोंसे भूषित मांडवीको भरतके लिए तथा श्रुतकीर्तिको शत्रुघ्नके लिए देता हूँ। हे पार्थिव ! आप इन चारों पुत्र-वधुओंको स्वीकार करें। तब राजा दशरथने सहर्ष 'तथास्तु' कहा ॥ १८४ ॥ १८५ ॥ तदनन्तर राजा दशरथने राजा जनकके सामने खड़े अहल्याकी कोखसे उत्पन्न पुरोहित मुनि शतानन्दसे पूछा कि सीता धरतीमेंसे कैसे प्राप्त हुई। सो सब वृत्तान्त आप कहें। शतानन्दने 'बहुत अच्छा' कहकर बताना आरम्भ किया ॥१८६॥१८७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स दृष्ट्वा सकलाँल्लोकान् लक्ष्मीकामैकतत्परान् । चिंतयामास मनसि लक्ष्मीं कन्यां करोम्यहम् ॥१८९॥
तपसैव निजांके तां रंजयामि निरंतरम् । इति निश्चित्य स नृपस्तप्त्वा तीव्रं महत्तपः ॥१९०॥
दृष्ट्वा प्रसन्नामग्रे तु लक्ष्मीं वचनमब्रवीत् । दुहिता मे भव त्वं हि सा प्राह नृपतिं प्रति ॥१९१॥
परतंत्राऽस्म्यहं राजन् विष्णुं त्वं प्रार्थयाधुना । स चेद्दास्यति मां ते हि तर्ह्यहं दुहिता तव ॥१९२॥
भविष्यामि न संदेहस्तथेत्युक्त्वा नृपः पुनः । तप्त्वा तीव्रं तपो विष्णुं चकार वरदोन्मुखम् ॥१९३॥
नत्वा तं नृपतिः प्राह देहि कन्यां रमां मम । तद्राजवचनं श्रुत्वा मातुलुङ्गफलं हरिः ॥१९४॥
पद्माक्षाय ददौ श्रेष्ठं स्वयमंतर्दधे विभुः । तद्भित्वा नृपतिः कन्यां ददर्श कनकप्रभाम् ॥१९५॥
तां दृष्ट्वा साभिलाषः स कन्यां मेने निजां शुभाम् । पद्माक्षनृपतेः कन्यां पद्मां लोका वदंति च ॥१९६॥
आह्वयामासुस्तां रम्यां सर्वचित्तैकरंजनीम् । शकले मातुलुङ्गस्य भूत्वैकत्र फलं पुनः ॥१९७॥
जातं दृष्ट्वा दधाराथ स्वहस्ते नृपतेः सुता । सा स्ववर्धत नृपतेरंके चंद्रकला यथा ॥१९८॥
शुक्लपक्षे च तां दृष्ट्वा पद्माक्षोऽचिंतयद्धृदि । कस्मै देया मया कन्या ह्यस्यै योग्यो वरोऽत्र कः १९९॥
ततः संमंत्र्य नृपतिः स्वयंवरमथारभत् । स्वयंवरेऽथ पद्माया यज्ञारम्भं चकार सः ॥२००॥
स्वयंवराय यज्ञाय पत्रैराकारयन्नृपान् । तेऽपि शृङ्गारयुक्ताश्च ययुः पद्मास्वयंवरम् ॥२०१॥
पद्मास्वयंवरं श्रुत्वा ययुस्तत्र मुनीश्वराः । ययुर्देवाः सगंधर्वा दानवा मानवाः खगाः ।२०२॥
नगा नद्यः समुद्राश्च भूरुहाः कामरूपिणः । ययुर्यक्षाः किन्नराश्च राक्षसा रावणादयः ॥२०३॥
सर्वान् समागतान् दृष्ट्वा पद्माक्षः प्राह तान् प्रति । आकाशनीलवर्णेन यः स्वांगं परिलेपयेत् ॥२०४।
ददामि तस्मै पद्मेयं सत्यं ज्ञेयं वचो मम । तद्राजवचनं श्रुत्वा दुर्घटं नृपसत्तमाः ॥२०५॥

शतानन्द बोले—हे राजन् ! आपने जो वृत्तान्त पूछा सो बहुत अच्छा किया । मैं कहता हूँ, आप ध्यानसे सुनें । पूर्वकालमें पद्माक्ष नामका एक प्रसिद्ध राजा था ॥ १८८ ॥ उसने सब लोगोंको लक्ष्मीकी कामनामें तत्पर देखकर मनमें सोचा कि मैं तपके द्वारा लक्ष्मीको पुत्री बनाऊँ और अपना गोदमें लाड़-प्यार करके बड़ी करूँ । ऐसा निश्चय करके उसने लक्ष्मीको प्राप्त करनेके लिए बड़ा कठोर तप किया ॥ १८९ ॥ १९० ॥ जब प्रसन्न होकर लक्ष्मी सामने आ खड़ी हुईं तो उसने कहा कि तुम मेरी पुत्री बनो । यह सुनकर लक्ष्मीने राजासे कहा-॥ १९१ ॥ हे राजन् ! मैं तो विष्णुभगवान्‌के अधीन हूँ—स्वतन्त्र नहीं हूँ । इसलिए तुम विष्णुकी प्रार्थना करो । वे यदि मुझे तुम्हारे लिये दे देंगे तो मैं तुम्हारी पुत्री होऊँगी । इसमें सन्देह नहीं है । 'अच्छी बात है' कहकर राजा पद्माक्षने तीव्र तप करके विष्णुभगवान्‌को प्रसन्न किया ॥ १९२ ॥ १९३ ॥ विष्णुने उसे एक श्रेष्ठ मातुलुङ्गफल (बिजौरा नीबू अथवा नारंगीका फल) दिया और स्वयं अन्तर्धान हो गये । राजा पद्माक्षने उस फलको फोड़ा तो उसमें सुवर्णके समान जगमगाती कन्याको विद्यमान देखा ॥१९४॥१९५॥ कन्याभिलाषी राजाने बालिकाको देखकर उसे अपनी कन्या ही माना । सबके चित्तको आनन्द देनेवाली उस रमणीय कन्याको देखकर वहाँके सब लोग भी सहर्ष 'यह राजा पद्माक्षकी कन्या लक्ष्मी हैं' ऐसा कहने लगे । तभी उस बिजौराके टुकड़ोंका मिलकर फिर समूचा फल बन गया । यह देखकर राजाकी पुत्रीने उसे अपने हाथोंमें ले लिया । वह बालिका राजाके अंक (गोद) में शुक्लपक्षकी चन्द्रकलाकी भाँति बढ़ने लगी । उसे देखकर राजाके मनमें चिन्ता हुई कि 'यह कन्या मैं किसको दूँ, इसके योग्य वर कौन है' ॥ १९६–१९९ ॥ तदनन्तर राजाने विचार करके उसका स्वयम्वर रचाया । उसी स्वयम्वरमें उन्होंने यज्ञ भी आरम्भ कर दिया ॥ २०० ॥ स्वयम्वर तथा यज्ञके लिए निमन्त्रणपत्र भेजकर पद्माक्षने राजाओंको बुलाया । वे लोग शृङ्गार करके बड़े ठाट-बाटसे पद्माके स्वयम्वरमें आकर सम्मिलित हुए । स्वयम्वरका समाचार सुनकर बड़े-बड़े मुनीश्वर, देवता, गन्धर्व, दानव, मानव, जैसा चाहें वैसा रूप धारण करनेवाले खग, पर्वत, नदी, समुद्र, यक्ष, किन्नर और रावणादि राक्षस भी वहाँ आ पहुँचे ॥ २०१–२०३ ॥ उन सबको आया हुआ देखकर राजाने उनसे कहा कि जो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पद्मासौन्दर्यसंभ्रांतास्तां हर्तुं ते समुद्यताः । तान् कन्याहरणोद्युक्तान्नृपान् दृष्ट्वा सनिर्जरान् ॥२०६॥
चकार संगरं तैः स पद्माक्षो लोमहर्षणम् । तद्बाणपीडिता देवा मानवा विमुखा रणे ॥२०७॥
बभूवुस्तत्र दैत्यैश्च पद्माक्षो निहतो रणे । ततस्ते मिलिताः सर्वे तां धर्तुं दुद्रुवुर्जवात् ॥२०८॥
सा दृष्ट्वा धर्त्तुमुद्युक्तान् जुहावाग्नौ कलेवरम् । तामदृष्ट्वा नृपाद्यास्ते विचिन्वन्नगरे तदा ॥२०९॥
बभंजुर्नृपगेहानि भूमिं चक्रुरितस्ततः । श्मशानतुल्यं नगरं जातं वै क्षणमात्रतः ॥२१०॥
पद्माक्षनृपतेर्लक्ष्मीसंगाज्जातेदृशी दशा । तस्मान्न मुनयो लक्ष्मीं कामयंति कदाचन ॥२११॥
लक्ष्म्याश्चित्तस्य चांचल्यं भयं शोको वधोऽपि च । भवत्येव महद्दुःखं तस्मात्तां परिवर्जयेत् ॥२१२॥
पद्माक्षे निहते युद्धे नृपपत्न्यः सहस्रशः । भर्त्रा सहैव गमनं चक्रुस्ता भयनिर्भराः ॥२१३॥
ततस्ते दैत्यवर्याद्या ययुः स्वं स्वं स्थलं प्रति । एकदा वह्निकुंडात्सा पद्मा शक्तिः स्थिरा हरेः ॥२१४॥
बहिर्निर्गत्य कुंडस्य समीपे समुपाविशत् । एतस्मिन्नन्तरे तत्र पुष्पकस्थो दशाननः ॥२१५॥
विचरन् जगतीं जेतुमाकाशवर्त्मना ययौ । सारणस्तां ददर्शाथ वह्निकुंडे बहिः स्थिताम् ॥२१६॥
सारणो दर्शयामास रावणाय वचोऽब्रवीत् । पुरा सुरासुराद्याश्च यां धर्त्तुं समुपस्थिताः ॥२१७॥
सेयं पद्माक्षनृपतेः कन्या पद्माऽग्निसन्निधौ । तत्सारणवचः श्रुत्वा तां दृष्ट्वा काममोहितः ॥२१८॥
यानाज्जवादुत्पपात तां धर्तुं साऽनलेऽविशत् । तामग्नौ संप्रविष्टां स दृष्ट्वा ज्ञात्वाऽथ तत्स्थलम् ॥२१९॥
ततः प्राह दशास्यः स त्वया देवा नृपादयः । कृत्वाऽग्नौ वसतिं पद्मे श्रमग्रस्ताः कृताः पुरा ॥२२०॥
तदद्य वासस्थानं ते मया ज्ञातं मनोरमे । पद्मेऽधुनाऽहं त्वां धर्तुं शोधयाम्यनलस्थलम् ॥२२१॥

कोई अपने शरीरको आकाशके नीले रंगसे रंग लेगा (अर्थात् जो ऐसा कर सकेगा) उसे ही मैं यह अपनी पद्मा नामकी कन्या दूँगा। यह मेरी दृढ़ प्रतिज्ञा है । राजाके इस दुर्घट वचनको सुनकर वे नृपश्रेष्ठ पद्माके सौंदर्यपर मोहित होते हुए उसका बरबस हरण करनेके लिए उद्यत हो गये। देवताओं सहित उन राजाओंको कन्याहरणके लिए उद्यत देखकर राजा पद्माक्षने उनके साथ लोमहर्षण अर्थात् रोमांचकारी युद्ध किया। उनके बाणोंसे पीड़ित होकर मनुष्य तथा देवता रणसे भागने लगे। परन्तु अन्तमें दैत्योंके द्वारा राजा पद्माक्ष रणमें मारा गया। तदनन्तर वे सब मिलकर पद्माको पकड़नेके लिए बड़े वेगसे दौड़े। उनको पकड़नेके लिए आते देखकर पद्मा अग्निमें कूद पड़ी। उसको न देखकर राजाओंने उसे सारे नगरमें ढूँढ़ना आरम्भ किया। राजमहल खोदकर गिरा दिया और बहुत-सी इधर-उधरकी जमीन खोद डाली। क्षणभरमें सारा नगर श्मशान बन गया ॥ २०४–२१० ॥ लक्ष्मीके संसर्गसे राजा पद्माक्षकी ऐसी दशा हुई। इसीलिये मुनि लोग लक्ष्मीको कभी नहीं चाहते ॥ २११ ॥ लक्ष्मासे चित्तकी चंचलता बढ़ती है, भय बढ़ता है, शोक बढ़ता है, मनुष्य मारा जाता है और बड़ा भारी दुःख पाता है। इस वास्ते लक्ष्मीसे दूर रहना चाहिए ॥ २१२ ॥ युद्धमें राजा पद्माक्षके मारे जानेपर राजाकी हजारों स्त्रियें भयभीत होकर राजाके साथ ही सती हो गयीं ॥ २१३ ॥ बादमें वे सब दैत्य भी अपने अपने स्थानको चले गये। एक समय श्रीहरिकी स्थिरशक्तिरूपा लक्ष्मी अग्निकुण्डसे बाहर निकलकर कुण्डके समीप बैठी थीं। इतनेमें रावण पुष्पक विमानपर बैठकर विचरता हुआ जगत्को जीतनेके लिए आकाशमार्गसे उधर ही निकला। तब रावणका मंत्री सारण पद्माको अग्निकुण्डके बाहर बैठी देख रावणको दिखलाकर कहने लगा कि पूर्वकालमें जिस राजा पद्माक्षकी कन्याके लिए देवताओं और असुरोंको राजाके साथ युद्ध करना पड़ा था, वही कन्या अग्निकुण्डके पास बैठी है। सारणके इस वचनको सुन तथा पद्माको देख कामसे मोहित होकर रावण ज्यों ही वेगसे उसको पकड़नेके लिए नीचे कूदा, त्यों ही वह फिर अग्निमें प्रवेश कर गयी। उसको अग्निमें प्रवेश करती तथा उस स्थानको देखकर रावण कहने लगा—॥ २१४–२१९ ॥ हे पद्मे ! तुमने पहिले भी अग्निमें प्रवेश करके राजाओं तथा देवताओंको बड़ा भारी दुःख दिया है। हे मनोरमे ! तुम्हारा निवास-स्थान आज मैंने देख लिया है। अब मैं तुमको खोजनेके लिये सारा अग्निकुण्ड छान डालूँगा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्त्वा जलकुंभैश्च सिषेचाग्निं दशाननः । यावत्पश्यति कक्षायां तावत्तत्र ददर्श ह ॥२२२॥
पंच रत्नानि दिव्यानि गृहीत्वा तानि रावणः । करंडिकायां संस्थाप्य विमानेन ययौ पुरीम् ॥२२३॥
करंडिकां देवगेहे संस्थाप्य रावणस्तदा । रात्रौ मंदोदरीं प्राह मंचकस्थां रहःस्थितः ॥२२४॥
हे मंदोदरि रत्नानि मया त्वत्तोषदानि हि । समानीतानि यत्नेन त्वदर्थं सुरसद्मनि ॥२२५॥
करंडिकायां वर्तन्ते गच्छ गृह्णीष्व तानि हि । तद्दशास्यवचः श्रुत्वा सा ययौ देवमन्दिरम् ॥२२६॥
करंडिकां तत्र दृष्ट्वा तां नेतुं पतिसन्निधौ । यावदुच्चालयामास न चचाल तदा भुवः ॥२२७॥
तदा सा लज्जिता गत्वा रावणाय न्यवेदयत् । तच्छ्रुत्वा स प्रहस्याथ स्वयं नेतुं ययौ तदा ॥२२८॥
तां सोऽप्युच्चालयामास न चचाल करंडिका । यदा विंशद्भुजैर्भूम्या न चचाल करंडिका ॥२२९॥
तदा स विस्मयाविष्टो भयं मेने दशाननः । तत्रैवोद्घाटयामास रावणस्तां करंडिकाम् ॥२३०॥
तावद्ददर्श तस्यां स कन्यां सूर्यप्रभोपमाम् । तत्तेजोहरतेजस्कान्यासंश्चक्षूंषि रक्षसाम् ॥२३१॥
तां द्रष्टुं बालिकां रम्यां ययुः सुहृत्सुतादयः । तदा मंदोदरीं प्राह तस्या वृत्तं रणोद्भवम् ॥२३२॥
पद्माक्षकुलजात्यादि सर्वं वृत्तं दशाननः । क्रोधान्मंदोदरी प्राह भयभीता दशाननम् ॥२३३॥
इयं कृत्या प्रचंडा च कुलविध्वंसकारिणी । लंकां किमर्थमानीता ह्यस्या ज्ञात्वाऽपि चेष्टितम् ॥२३४॥
दुष्टां स्ववंशघाताय त्यजैनां सत्वरं वने । बालत्वेऽपीदृशी गुर्वी तारुण्ये किं करिष्यति ॥२३५॥
वधोऽस्यास्तव जानेऽहं मृत्युरेव भविष्यति । स्थापनीया न लंकायामियमद्यैव रावण ॥२३६॥
इति तस्या वचः श्रुत्वा सत्यं मेने दशाननः । मन्त्रिभिश्चाथ सम्मन्त्र्य दूतानाज्ञापयत्तदा ॥२३७॥
करंडिकेयं नीत्वाऽद्य विमाने स्थाप्य यत्नतः । त्यक्तव्या मम वाक्यात्तु वने गच्छत वेगतः ॥२३८॥
ततस्ते राक्षसाः सर्वे संमील्य पुष्पकेऽथ ताम् । करंडिकां तु संस्थाप्य निन्युश्चाकाशवर्त्मना ॥२३९॥

॥ २२० ॥ २२१ ॥ ऐसा कहकर दशाननने पानीके घड़ोंसे अग्निको बुझा दिया और ज्यों ही राखमें देखने लगा, त्यों ही उसमें उसे दिव्य पाँच रत्न दिखायी दिये ॥ २२२ ॥ रावणने उन पाँचों रत्नोंको उठा लिया और एक सन्दूकमें रख तथा विमानपर चढ़कर अपनी नगरीको चला गया ॥ २२३ ॥ वहाँ जाकर रावणने उस सन्दूकको देवगृहमें रखकर रात्रिके समय एकान्तमें पलँगपर बैठी हुई मन्दोदरीसे कहा— ॥ २२४ ॥ हे मन्दोदरी ! जिन्हें देखकर तुम सन्तुष्ट हो जाओगी, ऐसे कुछ रत्न मैं बड़े परिश्रमसे तुम्हारे लिए ले आया हूँ। वे देवालयमें संदूकके भीतर रक्खे हैं। जाकर ले आओ। रावणका वचन सुनकर वह देवालयमें गयी ॥ २२५ ॥ २२६ ॥ सन्दूकको देख उसे पतिके पास ले आनेके लिये उठाया तो वह जमीनसे तनिक भी नहीं उठी ॥२२७॥ तब उसने लज्जित होकर रावणसे सब हाल कहा। यह सुना तो हँसकर रावण स्वयं उसे लानेके लिये गया और उसे उठाया, किन्तु पेटी जमीनसे नहीं हिली ॥ २२८ ॥ २२९ ॥ इससे रावण बड़ा विस्मित हुआ और डर गया। फिर उसने वहीं उसको खोला ॥ २३० ॥ तब उसमें सूर्यके समान कान्तिवाली एक कन्या दिखायी दी। उसके तेजसे हतप्रभ होकर राक्षसोंकी आँखें चकपकाने लगीं ॥ २३१ ॥ उस मनोहर बालिकाको देखनेके लिये उसके मित्र तथा पुत्र आदि आने लगे। उस समय रावणने मन्दोदरीको युद्धका तथा जैसे वह राजा पद्माक्षके कुलमें उत्पन्न हुई थी, वह सब वृत्तान्त कह सुनाया। मन्दोदरी भयभीत होकर क्रोधपूर्वक दशाननसे कहने लगी–॥ २३२ ॥ २३३ ॥ इस कृतघ्ना, कुलविध्वंसकारिणी तथा प्रचण्डाके कर्मोंको जानते हुए भी तुम इसको लंकामें क्यों ले आये ? ॥ २३४ ॥ यह दुष्टा हमारे कुलका नाश करनेवाली है। इसको शीघ्र वनमें छुड़वा दो। बचपनमें ही यह इतनी भारी है तो जवानीमें न जाने क्या करेगी ॥ २३५ ॥ इससे तुम्हारी मृत्यु होगी। ऐसा मुझे जान पड़ता है। इसको लंकामें घड़ी भर भी नहीं रखना चाहिये ॥ २३६ ॥ रावणने मन्दोदरीकी बात सत्य समझ तथा मन्त्रियोंसे मन्त्रणा करके दूतोंको आज्ञा दी--॥ २३७ ॥ इस सन्दूकको यत्नपूर्वक शीघ्र विमानमें रखकर आज ही मेरे कथनानुसार वनमें छोड़ आओ ॥ २३८ ॥ पश्चात् वे सब राक्षस इकट्ठे हो तथा उस सन्दूकको विमानमें रखकर आकाशमार्गसे चले ॥ २३९ ॥ उस समय

CC0. In Public Domain. Sudhakant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशास्यपत्नी तानाह कार्या भूमिगता त्वियम् । स्थापनीया बहिर्नैयं दर्शनाद्वधकारिणी ॥२४०॥
गृहस्थाश्रमयुक्तो यस्तथा च विजितेंद्रियः । वृद्धिमेष्यति तद्गेहे कुमारीयं शुभानना ॥२४१॥
चराचरेषु सर्वत्र आत्मरूपेण यः स्थितः । तस्य गेहे चिरं कालं स्थास्यतीयं न संशयः ॥२४२॥
इति मंदोदरीवाक्यं श्रुत्वा दूताः सविस्तरम् । यावत्ते गंतुमुद्युक्तास्तावत्कन्या वचोऽब्रवीत् ॥२४३॥
यास्याम्यहं पुनर्लङ्कां राक्षसानां बधाय च । निधनाय दशास्यस्य सपुत्रस्य समंत्रिणः ॥२४४॥
अथ तृतीयवेलायामागत्याहं पुनस्त्विह । निकुम्भजं पौंड्रकं तं शतशीर्षं च रावणम् ॥२४५॥
हनिष्यामि पुनर्गत्वा पुनर्यास्यामि त्वत्पुरीम् । अहं चतुर्थवेलायामद्भुतं मूलकासुरम् ॥२४६।
कुंभकर्णसुतं शूरं मर्दयिष्याम्यहं पुनः । तत्तस्या वचनं श्रुत्वा हृदि विद्धो दशाननः ॥२४७॥
जातास्ते राक्षसाः सर्वे भयभीताः शवोपमाः । रावणश्चिंतयामास हंतव्याऽद्यैव बालिका ॥२४८॥
तीक्ष्णं खड्गं करे धृत्वा पद्मां दुद्राव रावणः । हंतुकामं पतिं दृष्ट्वा मयकन्या न्यवारयत् ॥२४९॥
साहसं कुरु माऽद्यैव सत्यायुषि दशानन । भविष्यति वधस्त्वद्य तव नास्या वचो मृषा ॥२५०॥
यद्भविष्यति भवतु तदग्रे त्यज कानने । कालान्तरेण यो मृत्युस्तमद्य त्वं किमिच्छसि ॥२५१॥
इति भार्यावचः श्रुत्वा तूष्णीमास दशाननः । ततः सा पेटिका दूतैर्नीता यानेन वै जवात् ॥२५२॥
पश्यन् वनानि सर्वाणि सीतायै मैथिलस्य च । कृता भूमिगता दूतैस्तदा सर्वैः करंडिका ॥२५३॥
ततो ययुः पुनर्लंकां दूतास्ते रावणस्य च । न्यवेदयन् रावणाय सर्वं वृत्तं यथाकृतम् ॥२५४॥
सा भूमिः सूर्यग्रहणे विदेहेन समर्पिता । ब्राह्मणाय द्विजश्चापि तां कर्षयितुमुद्यतः ॥२५५॥
पश्यन् मुहूर्तं प्रियः स प्रत्यब्दं वै पुनः पुनः । चिरकालेन दृष्ट्वाऽथ मुहूर्तं परमोदयम् ॥२५६॥

रावणकी स्त्रीने उनसे कहा कि दर्शनमात्रसे वध करनेवाली इस घातिनीको बाहर खुली न रखना, बल्कि जमीनमें गाड़ आना ॥ २४० ॥ गृहस्थाश्रमी होते हुए भी जो जितेन्द्रिय होगा, उसीके घरमें यह शुभानना कुमारी वृद्धिको प्राप्त होगी ॥ २४१ ॥ सब चराचरके साथ अपनी आत्माके समान बर्ताव करनेवाला जो होगा, उसके घरमें यह चिरकाल स्थित रहेगी। इसमें सन्देह नहीं है (अर्थात् समदर्शी तथा जितेन्द्रियके घरमें ही लक्ष्मी चिरकालतक रहती है—दूसरेके यहाँ नहीं) ॥ २४२ ॥ इस प्रकार मन्दोदरीकी बात सुनकर ज्यों ही दूत लोग चलनेको उद्यत हुए, त्यों ही कन्या कहने लगी—॥ ३४३ ॥ मैं फिर राक्षसों तथा मन्त्री और पुत्रसहित रावणका वध करनेके लिए लंकामें आऊँगी ॥ २४४ ॥ पुनः तीसरी बार यहाँ आकर निकुम्भपुत्र पौंड्रकको तथा सौ सिरवाले रावणको मारूँगी। फिर बादमें पुनः चौथी बार आकर शूरवीर कुम्भकर्ण तथा मूलकासुरको मारूँगी । उसके वचनको सुनकर दशाननका हृदय विद्ध हो गया ॥ २४५–२४७ ॥ वे सब राक्षस भी भयभीत होकर मृतक सरीखे हो गये । रावणने सोचा कि इस बालिकाको अभी मार डालना चाहिये । यह विचार तथा तीक्ष्ण तलवार हाथमें लेकर वह पद्माकी तरफ दौड़ा। पतिको इस प्रकार कन्याको मारनेके लिये उद्यत देखकर मयदानवकी कन्या मन्दोदरीने कहा—॥ २४८ ॥ २४९ ॥ हे दशानन ! आयु शेष रहनेपर भी आज ही तुम यह साहस मत करो। इससे तुम्हारी मृत्यु हो जायगी। इसका वचन झूठा न होगा ॥ २५० ॥ आगे, जो होनेवाला होगा सो होगा। अभी तो तुम इसे वनमें छुड़वा दो । कालान्तरमें होनेवाली मृत्युको आज ही क्यों बुलाते हो ? ॥ २५१ ॥ भार्याके इस वचनको सुनकर दशानन चुप हो गया। पश्चात् दूत उस सन्दूकचीको शीघ्र विमानमें रखकर ले गये ॥ २५२ ॥ सीताके योग्य मिथिला नरेशके वनोंको देखते हुए वहींपर सब दूतोंने उस करण्डिकाको भूमिमें गाड़ दिया ॥ २५३ ॥ तदनन्तर दूत लङ्का लौट गये और जो किया था, सो सब वृत्तान्त रावणसे निवेदन कर दिया ॥ २५४ ॥ राजा विदेहने वह जमीन सूर्यग्रहणके अवसरपर एक ब्राह्मणको दान दे दी थी। ब्राह्मणने उस जमीनको जुतवानेका विचार किया ॥ २५५ ॥ प्रतिवर्ष शुभ मुहूर्त देखते-देखते बहुत वर्षों बाद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शूद्रेण कर्षयामास भूमिं कृष्यर्थमादरात् । तदा हलसिताग्रेण निर्गता सा करंडिका ॥२५७॥
तां गृहीत्वा स शूद्रोऽपि ययौ भूमिपतिं द्विजम् । स मत्वा तन्निधानं तु हर्षात्प्राह द्विजोत्तमम् ॥२५८॥
श्रेष्ठस्तव मुहूर्तोऽयं महाभाग्यं तव द्विज । इमां हलाग्रसंभूतां गृहाण त्वं करंडिकाम् । २५९॥
निधानपूरितां गुर्वीं मया यत्नेन वाहिताम् । ततः स द्विजवर्यस्तु तां जग्राह करंडिकाम् ।२६०॥
तामानीय विदेहाय सभामध्ये ददौ मुदा । नृपतिं प्राह वृत्तं तद्विप्रः श्रुत्वा नृपोऽपि सः ॥२६१॥
उवाच ब्राह्मणं भक्त्या मया भूमिः समर्पिता । तस्यां लब्धा त्वया चेयं तवैवास्तु करंडिका ॥२६२॥
विदेहनृपतेर्वाक्यं श्रुत्वोवाच द्विजः पुनः । मह्यं समर्पिता पूर्वं भूमिरेव त्वया नृप ॥२६३॥
नेयं करंडिका रम्या वसुपूर्णा समर्पिता । यद्भूमौ वर्त्तते वित्तं तन्नृपस्य न संशयः ॥२६४॥
मा मामधर्मः स्पृशतु गृहाणेमां करंडिकाम् । एवं नृपस्य विप्रेण कलहोऽभूत्सुदारुणः ॥२६५॥
तदा सभासदाः सर्वे नृपतिं वाक्यमब्रुवन् । मा कार्यः कलहो राजन् पश्यास्यां किं नु वर्तते ॥२६६॥
तां तदोद्घाटयामास दूतैर्नृपतिसत्तमः । तस्यां दृष्ट्वा बालिकां तु विस्मयं प्राप पार्थिवः ॥२६७॥
द्विजस्त्यक्त्वा ययौ गेहं पालयामास तां नृपः । तदा खेचरवाद्यानि नेदुः कुसुमवृष्टिभिः ॥२६८॥
ववर्षुः सुरसंघाश्च तां कन्यां जनकं नृपम् । गंधर्वा गायनं चक्रुर्ननृतुश्चाप्सरोगणाः ॥२६९॥
तदा मेने निजां कन्यां जनकस्तोषमाप सः । जातकं कारयामास विप्रैस्तस्याः सविस्तरम् ।।२७०।
ददौ दानानि विप्रेभ्यो ननृतुर्वारयोषितः । मातुलुङ्गान्निर्गता या मातुलुङ्गीति सा स्मृता ॥२७१॥
अग्निवासादग्निगर्भा तथा रत्नावलीति च । रत्नांतरनिवासाच्च प्रोच्यते जगतीतले ॥२७२॥
धरण्या निर्गता यस्मात्तस्माद्धरणिजेति च । जनकेनाविता यस्माज्जानकीति प्रकीर्त्यते ॥२७३॥

अच्छा तथा परम उदयको करनेवाला मुहूर्त देखकर ॥ २५६ ॥ उस ब्राह्मणने आदरपूर्वक शूद्रसे उस जमीनमें खेतीके लिए हल चलवाया । उसी समय हलके फालसे वह सन्दूक निकल आयी। २५७ ॥ उसको लेकर वह शूद्र जमीनके मालिकके पास गया और उसको वह खजाना समझकर सहर्ष ब्राह्मणसे कहने लगा—हे द्विज ! आप बड़े भाग्यशाली हैं । आपने अच्छे मुहूर्तमें खेती आरम्भ करवायी । यह हलके अग्रभागसे (अर्थात् फालसे जिसको संस्कृतमें सीता कहते हैं) संभूत (प्राप्त) सन्दूकको लीजिये । मैं खजानेसे भरी हुई बड़ी भारी इस पिटारीको बड़ी कठिनाईसे यहाँ ले आया हूँ । उस द्विजने उसको ले लिया ॥ २५८-२६० ॥ उसको ले जाकर ब्राह्मणने सभाके सामने राजा विदेहको दिया और सब समाचार कह सुनाया। राजा भी यह सुनकर ब्राह्मणसे कहने लगे कि मैंने तो भक्तिसे भूमि आपको समर्पण कर दी है। तब उसमेंसे मिली हुई यह पिटारी भी आप ही की है ॥ २६१ ॥ २६२ ॥ राजा विदेहके वचनको सुनकर ब्राह्मण उनसे कहने लगा—हे नृप ! आपने मुझे भूमि ही दी है ॥ २६३ ॥ यह धनपूर्ण सुन्दर संदूक नहीं दी थी । इसलिये जो भूमिमें धन है, वह निर्विवाद राजाका ही होता है ।। २६४ ॥ मुझे अधर्ममें न डालें और इस पिटारीको आप स्वीकार करें । इस प्रकार राजा तथा ब्राह्मणमें बड़ा झगड़ा होने लगा । तब सब सभासदोंने राजासे कहा—हे राजन् ! कलहको छोड़ें और देखें कि इसमें क्या है ? ॥ २६५ ॥ २६६ ॥ तब नृपतियोंमें श्रेष्ठ नृपति विदेहने दूतोंसे सन्दूक खुलवायी। उसमें बालिकाको देखकर राजा बड़े विस्मित हुए । ब्राह्मण उसे वहीं छोड़कर घर चला गया । तब राजाने ही उस कन्याको पाल लिया । तब देवताओंके बाजे बजे और उन्होंने उस कन्या तथा राजाके ऊपर पुष्पवृष्टि की । गन्धर्व गाने लगे । अप्सरायें नृत्य करने लगीं ॥ २६७-२६९ ॥ तब राजा जनकने प्रसन्न होकर उसको अपनी पुत्री माना । ब्राह्मणोंके द्वारा विस्तारपूर्वक उसका जातकर्मसंस्कार (सन्तानके उत्पन्न होनेपर करनेका संस्कार) करवाया ॥ २७० ॥ विप्रोंको बहुतसे दान दिये और वेश्याओंका गायन करवाया गया। जगत्में वह कन्या मातुलुङ्गफलसे निकलनेके कारण मातुलुङ्गी, अग्निमें वास करनेसे अग्नि-गर्भा तथा रत्नोंमें निवास करनेसे रत्नावली कही जाने लगी ॥ २७१ ॥ २७२ ॥ धरणीसे निकलने-

CC0. In Public Domain. Kritikam Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सीराग्रान्निर्गता यस्मात्सीतेत्यत्र प्रगीयते । पद्माक्षनृपतेः कन्या तस्मात्पद्मेति सा स्मृता ॥२७४॥
एवं नामान्यनंतानि सीतायाः संति भो नृप । आकाशनीलवर्णाभवपुषाऽनेन जानकी ॥२७५॥
लब्धा रामेण पद्माक्षप्रतिज्ञा सफलीकृता । एवं त्वया यथा पृष्टं तथा त्वां विनिवेदितम् ॥२७६॥
चतस्रस्त्वं स्नुषास्त्वत्र कर्तुमर्हसि भो नृप ।

श्रीशिव उवाच

एतस्मिन्नंतरे तत्र पूर्वं दशरथेन च ॥ २७७ ॥
समाहूता ययुः सैन्यैः स्त्रीपुत्रैः श्वशुराश्च ते । कोसलो मगधेशश्च कैकेयश्च युधाजितः ॥२७८॥
मानयामास तान् राजा जनकोपि मुदान्वितः । ततो दशरथं पूज्य श्रीरामं लक्ष्मणं तथा ॥२७९॥
भरतं चापि शत्रुघ्नं संपूज्याभरणादिभिः । निनाय जनकस्तुष्टः स्वपुरीं परमोत्सवैः ॥२८०॥
तदा रामो नृपं नत्वा राज्ञा चालिंगितो मुहुः । वसिष्ठं गाधिजं नत्वा कौसल्यादिं प्रणम्य च ॥२८१॥
राज्ञो दशरथस्याग्रे तैः स्त्रीभिर्बन्धुभिः सह । गजारूढो ययावग्रे तेऽप्यभूवन् गजस्थिताः ॥२८२॥
नदत्सु वाद्यसंघेषु स्तुवत्सु मागधादिषु । नर्तत्सु वारनारीषु विवेश नगरीं प्रभुः ॥२८३॥
तदाऽऽसीत्संभ्रमः पौरस्त्रीणां श्रीरामदर्शने । विसृज्य स्वीयकृत्यानि दद्रुवुर्गोपुरादिषु ॥२८४॥
कट्यां निधाय बालांश्च ददृशू रघुनंदनम् । राजमार्गगतं रामं ववर्षुः पुष्पवृष्टिभिः ॥२८५॥
एवं महोत्सवैर्वासस्थलं दशरथः सुतैः । ययौ वस्त्रान्नतोयौघैः परिपूर्णं मनोरमम् ॥२८६॥
कृत्वा ज्योतिर्विदा लग्नदिवसस्य विनिश्चयम् । मंडपांश्च तोरणानि पताकाश्च ध्वजांस्तथा ॥२८७॥
रोपयामासुः सर्वत्र मंत्रिणो मिथिलां पुरीम् । मार्गाश्चंदनलिप्ताश्च पुष्पैराच्छादिता अपि ॥२८८॥
मालाभिस्तोरणैः पुष्पघोषाद्यैस्ते चकाशिरे । ततो मुहूर्तसमये वधूच्छिष्टां निशां शुभाम् ॥२८९॥

के कारण धरणिजा, जनकके द्वारा पालित होनेसे जानकी, सीता (फाल) के अग्रभागसे प्रकट होनेके कारण सीता और राजा पद्माक्षकी कन्या होनेसे वह पद्मा कहलायी ॥ २७३ ॥ २७४ ॥ हे महाराज दशरथ ! इस प्रकार सीताके अनेक नाम हैं। आकाशके समान नीलवर्णके रङ्गवाले रामने सीताको प्राप्त करके राजा पद्माक्षकी प्रतिज्ञा पूर्ण कर दी। इस प्रकार जो आपने पूछा सो मैंने निवेदन कर दिया। अब आपको ये चारों पुत्रवधुएँ स्वीकार करनी चाहियें। शिवजी बोले—इतनेमें पहिलेसे राजा दशरथके द्वारा बुलवाये गये उनके श्वसुर कोसलराज तथा मगधराज युधाजित् नामके कैकेयराज अपनी स्त्री और सेनाको साथ लेकर वहाँ आ पहुँचे। राजा जनकने भी उनका प्रेमपूर्वक स्वागत किया। पश्चात् राजा दशरथकी वस्त्र-आभूषण आदिसे और राम लक्ष्मण भरत तथा शत्रुघ्नकी पूजा करके राजा जनक महान् उत्सवके साथ अपने नगरमें ले गये ॥ २७५–२८० ॥ तदनन्तर रामने राजा दशरथको प्रणाम किया। राजाने उन्हें हृदयसे लगाया। फिर रामने गुरु वशिष्ठको तथा कौसल्या आदि माताओंको प्रणाम करके राजा दशरथके आगे उन स्त्रियों तथा वस्तुओंके सहित हाथियोंपर चढ़कर आगे-आगे चले। उनके पीछे और सब लोग गजारूढ़ होकर चल पड़े। इस प्रकार वाद्यसमूहके शब्दोंको सुनते, चारणोंकी स्तुतियोंको श्रवण करते तथा वेश्याओंके नाचको देखते हुए प्रभु रामने नगरमें प्रवेश किया। उस समय रामके दर्शनके लिये नगरकी स्त्रियें व्याकुल हो उठीं। अपने-अपने गृहकार्योंको छोड़ सबकी सब बालकोंको गोदमें लिये नगरके दरवाजे आदिपर जाकर रघुनन्दन रामका दर्शन करने लगीं। राम जब सड़कपर आ गये, तब उन्होंने उनपर पुष्पवृष्टि की ॥ २८१--२८५ ॥ इस तरह महोत्सवके साथ राजा दशरथ राम आदिको लेकर अन्न (भोजनका सामान), वस्त्र (ओढ़ने-बिछानेका सामान) तथा जल (नहाने-धोने तथा पीनेका पानी) आदिसे परिपूर्ण मनोहर वासस्थानपर (वरके ठहरनेके स्थानपर) गये ॥ २८६ ॥ मन्त्रियोंने ज्योतिषीके द्वारा लग्नका दिन निश्चय कराकर समस्त मिथिलापुरीको मण्डपोंसे, तोरणोंसे, पताकाओंसे तथा रङ्ग-बिरङ्गी ध्वजाओंसे सजवा दिया। मार्गोंको चन्दनसे लिपवाया गया। उनपर भाँति-

CC0. In Public Domain. Kuthant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुतैलाढ्यां स्त्रियः सर्वाः कौसल्याद्यास्तु मातरः । रामादीन् परिलिप्याऽऽदौ नीराजनपुरःसरम् ॥२९०॥
करकुंभांस्तोयपूर्णांश्चतुर्दिक्षु सदीपकान् । संस्थाप्य स्नापयामासुर्महावाद्यपुरःसरम् ॥२९१॥
तदाभ्यंगं स्वयं चापि कृत्वा सस्नुश्च मातरः । रामादीन् पुरतः कृत्वा वस्त्रालंकारभूषिताः ॥२९२॥
अभ्यङ्गपूर्वकं सस्नौ राजा दशरथोऽपि सः । समाहूय नृपस्त्रीश्च सभायां स्वस्तिके गुरुः ॥२९३॥
मुक्ताविनिर्मिते राज्ञः पार्श्वे वामे न्यवेशयत् । अग्रे रामादिकान्कृत्वा ताः स्त्रियोऽवनताननाः ॥२९४॥
हरिद्राकुंकुमालिप्तचरणा रेजिरेऽङ्गणे । वसिष्ठो ब्राह्मणैर्युक्तो राज्ञा रामादिभिर्मुदा ॥२९५॥
कृत्वा गणपतेः पूजां पुण्याह्वादित्रयं क्रमात् । कारयामास विधिवत्प्रतिष्ठां देवकस्य च ॥२९६॥
ग्रामाचारं कुलाचारं वृद्धाचारं तथा पुनः । देशाचारं च प्रमदाचारादीनकरोन्नृपः ॥२९७॥
तोयकुम्भं मंडपादिकानां पूजनमाचरत् । कौसल्याद्याः स्त्रियः सर्वा हरित्पीतारुणैर्वरैः ॥२९८॥
हेमतंत्वंकितैर्वस्त्रैर्विरेजुर्मंडपांगणे । जनकश्च नृपैर्युक्तो महावाद्यपुरःसरम् ॥२९९॥
रामादीन्स निजं गेहं नेतुकामः समाययौ । मंडपे पूजयामास रामादीन् जनकस्तदा ॥३००॥
हेमतन्तूद्भवैर्दिव्यैर्वस्त्रैराभरणादिभिः । तदा विरेजुस्ते बालाः सर्वे प्रमुदिताननाः ॥३०१॥
ततस्ते वारणेंद्रस्था दिव्यचामरवीजिताः । शृण्वंतो वाद्यघोषांश्च वर्षिता पुष्पवृष्टिभिः ॥३०२॥
हरिद्रांकितधान्यैश्च मांगल्यैर्मौक्तिकादिभिः । मातृभिर्वारणस्त्रीषु संस्थिताभिर्मुहुर्मुहुः ॥३०३॥
एवं ते राघवाद्याश्च पुरस्त्रीभिर्निरीक्षिताः । प्रासादोपरि संस्थाभिर्लाजाभिर्वर्षिता मुहुः ॥३०४॥
ददृशुर्नर्तनान्यग्रे वारस्त्रीणां स्मिताननाः । वाटिकाः पुष्पवृक्षाणां वरमृत्पात्रनिर्मिताः ॥३०५॥

भाँतिके पुष्प बिखेर दिये और खास-खास स्थानोंमें मालाएँ तथा तोरण बँधवा दिये। पुष्पलताओं और माङ्गलिक शब्दों द्वारा उस समय वह नगरी और भी दिव्य मालूम पड़ने लगी। तदनन्तर शुभ मुहूर्तमें जिस रातको सीताके शरीरमें स्त्रियोंके द्वारा तेल-हल्दी आदि मला गया। उसी रातमें कौसल्या आदि माताओंने आँगन लीप तथा राखका पानी छिड़ककर जलपूर्ण दीपक सहित चार सुन्दर घड़ोंको चारों दिशाओंमें स्थापित करके राम लक्ष्मण भरत और शत्रुघ्नको वाद्यध्वनिके साथ माङ्गलिक स्नान कराया ॥ २८७-२९१ ॥ फिर तेल आदि मलकर अपने आप भी सब माताओंने स्नान किया। पहिले राम आदिको वस्त्र तथा अलङ्कारोंसे भूषित करके तेल-हरदी आदिका शरीरमें अभ्यङ्ग करके (मलकर) राजा दशरथने भी स्नान किया। पश्चात् गुरु वशिष्ठने राजाकी सब स्त्रियोंको सभामण्डपमें बुलाकर राजाके वामभागमें मुक्तानिर्मित स्वस्तिक अंकित (वेदी या आसन) पर बैठाया। उस समय सभाके आँगनमें स्त्रियें राम आदि बालकोंको सामने बैठाकर निम्न मुख किये तथा हल्दी और तेल चरणोंमें लगाये अत्यन्त सुशोभित होने लगीं। ब्राह्मणोंके सहित वशिष्ठजीने राजा दशरथ तथा रामादिके द्वारा गणपतिपूजन तथा पुण्याहवाचन ये दोनों कर्म क्रमसे करवाये और तीसरा कर्म विधिवत् देवताकी प्रतिष्ठा करवायी। राजा दशरथने भी बादमें प्रसन्नतापूर्व ग्रामाचार, कुलाचार, वृद्धाचार, देशाचार तथा प्रमदाचार आदि किया ॥ २९२-२९६ ॥ तदनन्तर जलपूर्ण कुम्भ तथा मण्डप आदिकी पूजा की। मण्डपके आँगनमें हरी, लाल, पीली तथा जरीदार साड़ियोंको पहिनकर कौसल्या आदि स्त्रियें बड़ी सुन्दर दीखने लगी। बड़े बड़े बाजोंको बजवाते हुए अन्य राजाओंके सहित राजा जनक भी राम आदिको अपने भवनमें लिवा ले जानेके लिये वहाँ आये। मण्डपमें जाकर राजा जनकने राम आदिका पूजन किया ॥ ३०० ॥ उस समय प्रसन्न मुखवाले वे सब बालक जरीदार दिव्य वस्त्रों तथा आभरणोंको पहने हुए बड़े सुन्दर लगने लगे ॥ ३०१ ॥ बादमें वे सब जो कि उत्तम हाथियोंपर बैठे हुए थे, जिनपर सुन्दर चँवर ढुल रहे थे। हाथियोंपर बैठी हुई माताएँ चारों तरफसे बारम्बार जिनपर मोतियों, माङ्गलिक हल्दीमिश्रित चावलों तथा पुष्पोंकी बौछार कर रहीं थीं। जिनकी ओर नगरकी स्त्रियें बड़े चावसे देख रही थीं तथा भवनोंपरसे धानका लावा बरसा रहीं थीं। आनन्दभरे मुखोंसे वहाँके रास्तेमें वेश्याओंके नृत्य,

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा कृत्रिमवृक्षांश्च पताकाश्च ध्वजांस्तथा । वह्निसंगादोषधीनां पुष्पवृक्षविनिर्मितान् ॥३०६॥
तडित्प्रभोपमांश्चापि गगनान्तर्विराजितान् । वह्निसंज्ञादोषधीभ्यः प्राकारान् विविधान् वरान्॥३०७॥
चंद्रज्योत्स्नाकृत्रिमांश्च दीपवृक्षान् सहस्रशः । दीपमालाश्च व्याघ्रादीन्कृत्रिमान् रथसंस्थितान्॥३०८॥
ओषधीभिः पूरितांश्च केकीचक्रोपमादिकान् । ददृशुर्वारणेंद्रस्था एवं ते राघवादयः ॥३०९॥
तदा देवा विमानस्था ददृशुः कौतुकं मुदा । एवं नानोत्सवैर्बाला ययुर्जनकमंदिरम् ॥३१०॥
अवरुह्य गजेन्द्रेभ्यस्तस्थुस्ते मंडपांगणे । मधुपर्कविधानानि विष्टरादीनि च क्रमात् ॥३११॥
तयोर्गुरू चक्रतुस्तौ वसिष्ठगौतमात्मजौ । वाल्मीक्यादिमुनिगणैर्वेष्टितौ तुष्टमानसौ ॥३१२॥
ततः पूजां वधूनां च मुदा दशरथो नृपः । चकार गुरुणा युक्तस्तदा स मंडपाङ्गणे ॥३१३॥
ततो लग्नमुहूर्ते तान् वधूभिश्च पृथग्वरान् । वेदिकासु स्थितान् कृत्वा दम्पत्योरंतरे पटान्॥३१४॥
कृत्वा मंगलघोषांश्च मुनिभिश्चक्रतुर्गुरू । तदा तूष्णीं सभायां ते शुश्रुवुः सकला जनाः ॥
पुष्पौघैः पीतधान्यैश्च ववृषुर्दम्पतीन् स्त्रियः ॥ ३१५ ॥
श्रीदेवीतनयौ शिवः सुखकरो मित्रः शशी कंपनः सर्वे ते मुनयश्चला दश दिशः सर्पा मृगेंद्राः खगाः ।
नद्यःपुण्यसरोवराणि दितिजास्तीर्थानि कंजासनश्चेंद्रो वह्निरमरा नदी जलधयः कुर्वंतु वो मंगलम् ३१६॥
तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव । विद्याबलं दैवबलं तदेव काशीपतेर्यत्स्मरणं विधेयम् ३१७
एवं मंगलशब्दैश्च महावाद्यपुरःसरम् । तेषामंतःपटान्मुक्त्वा ॐपुण्योऽस्तूचतुर्गुरू ॥३१८॥
तासां ते पाणिग्रहणविधानं विधिपूर्वकम् । लाजाहोमादिकं सर्वं चक्रुर्मंगलपूर्वकम् ॥३१९॥
तदा महावाद्यघोषा निनेदुर्मंडपांगणे । ननृतुर्वारनार्यश्च जगुर्मागधवंदिनः ॥३२०॥

मनोहर मिट्टी आदिके बने हुए गमलों, वृक्षों तथा फूल-पत्तियोंसे बनी हुई वाटिकाओंको, कृत्रिम वृक्षोंको, पताकाओंको, ध्वजाओंको, अग्निके संयोगसे जलनेवाले, तड़ित्के समान रोशनीवाले और आकाशमें चमकनेवाले नाना प्रकारकी आतशबाजीसे सजे पुष्प-वृक्ष-लता आदिको, हजारों चन्द्रमाओंकी चाँदनीके कृत्रिम दीपवृक्षोंको, दीपमालाओंको, रथोंमें रखे हुए बनावटी व्याघ्र-गज आदिको, औषधिसे भरे हुए मोर तथा चर्खी आदिको देखने लगे ॥३०२–३०९॥ सब देवता भी आनन्दसे उस कौतुकको देख रहे थे। इस प्रकार विविध उत्सवों सहित वे राम आदि बालक राजा जनकके भवनको गये ॥ ३१० ॥ वहाँ जा तथा हाथियोंसे उतरकर वे मण्डपके आँगनमें खड़े हो गये। वाल्मीकि आदि मुनियोंसे घिरे हुए दोनों पक्षके गुरु वशिष्ठ तथा गौतमपुत्र शतानन्दने प्रसन्नतासे मधुपर्क (मधुमिश्रित दही) का विधान और आसन आदिका विधान क्रमशः करवाया ॥ ३११ ॥ ३१२ ॥ पश्चात् राजा दशरथने गुरु वशिष्ठको साथ लेकर सहर्ष भावी पुत्रवधुओंकी पूजा की। फिर शुभ मुहूर्त तथा सुलग्नमें मुनियों तथा गुरुजनोंने उन-उन वधुओं और उन-उन वीर बालकोंको पृथक्-पृथक् वेदियोंपर बैठाकर उन दम्पतियोंके बीचमें वस्त्रका आड़ करके मंगलमय शब्दोंका उच्चारण किया। सभाके सभी मनुष्य चुप होकर उसे सुनने लगे। स्त्रियें केसरसे रंगे पीले चावल तथा फूल वरवधूके ऊपर बरसाने लगीं॥ ३१३–३१५ ॥ सरस्वती, देवीतनय गणपति, सुखकारक शिव, सूर्य, चन्द्र, वायु, सब मुनि, चल-अचल जीव, दसों दिशायें, सर्प, मृगेन्द्र, खग, नदी, पवित्र सरोवर, दैत्य, तीर्थ, ब्रह्मा, इन्द्र, अग्निदेवता तथा नदी-समुद्र आदि तुम लोगोंका कल्याण करें॥ ३१६॥ काशीपति श्रीविश्वनाथ भगवानका स्मरण ही तुम्हारे लिए सुन्दर लग्न, शुभ दिन, ग्रहबल, विद्याबल तथा देवबल बन जाय ॥ ३१७ ॥ ऐसे मांगलिक शब्दों और मांगलिक बाजोंकी ध्वनि होने लगी। उसके बाद बीचमें पड़े हुए वस्त्रोंको हटा दिया गया और दोनों ओरके गुरुओंने "ॐपुण्योऽस्तु" ऐसा कहा ॥ ३१८ ॥ इस प्रकार उन लोगोंने मिलकर विधिपूर्वक उनका विवाहकार्य तथा लावाका हवन आदि सभी कृत्य मङ्गलपूर्वक संपादित कर दिया ॥ ३१९ ॥ तब मण्डपकी अँगनाईमें बड़े-बड़े बाजोंका निनाद होने लगा, वेश्यायें नाचने लगीं, भाट और बन्दीजन यशोगान करने लगे ॥ ३२० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नटा मंगलगीतैश्च तुष्टुवुस्ते महास्वनैः । तदा दानान्यनेकानि चक्रतुस्तौ नृपोत्तमौ ॥३२१॥
अथ ते बालकाः सर्वे वधूः स्थाप्य कटीषु वै । कौसल्यादिवनिताभिर्जग्मुस्ते भोजनगृहान् ॥३२२॥
तत्राम्रसिंचनं चक्रुः संपूज्य त्वां च मामपि । ततो रामादिकाः सर्वे स्वस्वपत्न्या पृथङ्मुखाः ॥३२३॥
चक्रुस्ते भोजनं हृष्टाः स्त्रीभिः सर्वत्र वेष्टिताः । राजा दशरथश्चापि सुहृद्भिश्च नृपोत्तमैः ॥३२४॥
पौरैर्जानपदैरिष्टैर्मुनिभिः परिवारितः । जनकस्य गृहं गत्वा चकार भोजनं मुदा ॥३२५॥
कौसल्याद्याः स्त्रियः स्त्रीभिश्चक्रुर्भोजनमुत्तमम् । सुमेधया प्रार्थितास्ता वंदिताश्च मुहुर्मुहुः ॥३२६॥
एवं नानासमुत्साहांश्चकार जनको मुदा । अथ ते बालकाः सर्वे स्त्रीवाक्यान्मातृसन्निधौ ॥३२७॥
स्वस्वपत्न्याः पादयोः स्वशिरोभिर्नमनं मुहुः । चक्रुस्तुष्टचेतसस्ते तास्ता नेमुः पृथक् पृथक् ॥
कुङ्कुमांकितपादाश्च तेषामंकेषु ता ददुः ॥३२८॥
श्रीरामः समवाप्य भूमितनयामाद्यां जगत्स्वामिनीं सर्वात्मा वरहेतुसुन्दरतनुः कारुण्यपूर्णेक्षणः ॥
विद्युद्वर्णविराजमानवसनस्त्रैलोक्यचूडामणिः शोभामाप जगत्त्रयेऽप्यनुपमां मुक्ताविराजद्गलः ॥३२९॥
चतुर्थे दिवसे रात्रौ वंशपात्रविराजितैः । दीपैर्नीराजिताः सर्वे विरेजू राघवादयः ॥३३०॥
रामादीनां पारिबर्हान् ददौ स जनकस्तदा । नियुतान् वारणेंद्रांश्च शिबिकाश्चापि तन्मिताः ॥३३१॥
तुरगान् दशलक्षांश्च नियुतान् स्यंदनान् ददौ । नानालंकारवासांसि गोदासीसेवकादिकान् ॥३३२॥
ददौ स राघवादिभ्यो येषां सख्या न विद्यते । एवं सम्मानितास्तेन ते बाला जनकेन हि ॥३३३॥
पूर्ववदुत्सवाद्यैश्च स्वस्वपत्न्या समन्विताः । गजारूढा नृत्यगीतैस्ताभिः स्वमंडपं ययुः ॥३३४॥
ततो राजा मासमेकं निनाय नृपवाक्यतः । ततः सैन्येन स्वपुरीं गन्तुं पुर्या बहिर्ययौ ॥३३५॥
सीताद्या निर्ययुर्मुग्धाः साश्रुनेत्राः सुविह्वलाः । सुमेधास्ताः समालिंग्य सांत्वयित्वा व्यसर्जयत् ॥३३६॥

नट लोग जोरसे मङ्गलगीतोंको गाकर स्तुति करने लगे और दोनों नृपश्रेष्ठोंने अनेक दान दिये ॥ ३२१ ॥ तदनन्तर वे सब बालक अपनी-अपनी बहूको कमरपर चढ़ाकर कौसल्या आदि माताओंके साथ भोजनालयमें गये ॥ ३२२ ॥ हे पार्वति ! वहाँ आम्रसेचन करके तुम्हारी तथा हमारी (शिव-पार्वतीकी) पूजा करनेके बाद राम आदिने अपनी-अपनी पत्नियोंके साथ आनन्दपूर्वक भोजन किया और सब स्त्रियाँ उन्हें घेरकर खड़ी हो गयीं। राजा दशरथने भी दूसरे राजाओंको, सुहृदोंको, नगर तथा देशके लोगोंको और मुनियोंको साथ ले तथा जनकके घरपर जाकर सहर्ष भोजन किया ॥ ३२३-३२५ ॥ सुमेधासे बार-बार प्रार्थित तथा आनंदित कौसल्या आदि स्त्रियोंने भी अन्यान्य स्त्रियोंके साथ जाकर भोजन किया ॥३२६॥ राजा जनकके यहाँ अनेक समारोह हुए । फिर उन बालकोंने प्रसन्न होकर स्त्रियोंके कहनेसे माताओंके सम्मुख अपनी-अपनी स्त्रियोंके पैरोंपर अपना-अपना सिर रखकर नमस्कार किया। पश्चात् उन स्त्रियोंने भी उनको अलग-अलग नमस्कार करके उनकी गोदोंमें कुंकुमसे रंजित पावँ रखे ॥ ३२७ ॥ ३२८ ॥ समस्त संसारके आत्मास्वरूप सुन्दर शरीरको धारण किये हुए, करुणापूर्ण नेत्रोंवाले, विद्युत्के समान वर्णवाले, पीले वस्त्रोंको धारण किये हुए, त्रिलोकीके चूड़ामणिस्वरूप गलेमें मोतीकी माला पहने हुए श्रीराम जगत्की आदिस्वामिनी और भूमितनया सीताको प्राप्त करके तीनों लोकोंमें अनुपमेय शोभाको प्राप्त हुए ॥ ३२९ ॥ चौथे दिन बाँसके पात्रमें जलाये हुए दीपकोंसे नीराजित तथा पूजित राम आदि चारों भाई बड़े ही शोभायमान होने लगे ॥ ३३० ॥ राजा जनकने राम आदिको ये दहेज दिये-दस लाख हाथी, दस लाख पालकियाँ, दस लाख घोड़े तथा दस लाख रथ, असंख्य अलंकार, पोशाक, गौएँ तथा दास-दासिएँ दीं। इस प्रकार राजा जनकके द्वारा सम्मानित वे बालक ॥ ३३१-३३३ ॥ अपनी-अपनी स्त्रियोंको साथ ले तथा हाथीपर सवार होकर नृत्य-गीत तथा बाजेके साथ अपने मण्डपको लौट आये ॥ ३३४ ॥ पश्चात् राजा दशरथ राजा जनकके आग्रहसे एक महीना वहीं व्यतीत करके अपने पुरको जानेके लिये सेनाके साथ उस पुरीसे बाहर आये ॥ ३३५ ॥ सीता आदि अश्रुपूर्ण नेत्रोंसे बहुत विह्वल होकर चलीं । सुमेधाने उनको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ राजा दशरथो जनकं विन्यवर्तयत् । तदा दशरथं प्राह जनकः साश्रुलोचनः ॥३३७॥
श्वसन् कवोष्णमम्लानास्यो विरहाद्गद्गदाक्षरः । एतावत्कालपर्यन्तं सीताद्या लालिता मया ॥३३८॥
अधुना त्वमिमास्त्वग्रे लालयस्व कृतेक्षणैः । इत्युक्त्वा नृपतिं नत्वा मिथिलां जनको ययौ ॥३३९॥
ततो दशरथश्चापि स्नुषास्त्रीतनयादिभिः । नृपैः सैन्येन स्वपुरीं ययौ मार्गे शनैः शनैः ॥३४०॥
अथ गच्छति श्रीरामे मैथिलाद्योजनत्रयम् । निमित्तान्यतिघोराणि ददर्श नृपसत्तमः ॥३४१॥
नत्वा वसिष्ठं प्रपच्छ किमिदं मुनिपुङ्गव । निमित्तानीह दृश्यंते विषमाणि समंततः ॥३४२॥
वसिष्ठस्तमथो प्राह भयमागामि सूच्यते । पुनरप्यभयं तेऽद्य शीघ्रमेव भविष्यति ॥३४३॥
मृगाः प्रदक्षिणं यांति त्वां पश्य शुभसूचकाः । एवं वै वदतस्तस्य ववौ घोरतरोऽनिलः ॥३४४॥
मुष्णंश्चक्षूंषि सर्वेषां पांसुवृष्टिभिरर्दयत् । ततो ददर्श परमं जामदग्न्यं महाप्रभम् ॥३४५॥
नीलमेघनिभं प्रांशुं जटामण्डलमंडितम् । धनुःपरशुहस्तं च साक्षात्कालमिव स्थितम् ॥३४६॥
कार्तवीर्यांतकं रामं दृप्तक्षत्रियमर्दनम् । प्राप्तं दशरथस्याग्रे रक्तास्यं रक्तलोचनम् ॥३४७॥
तं दृष्ट्वा भयसंत्रस्तो राजा दशरथस्तदा । अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत् ॥३४८॥
दंडवत्प्रणिपत्याह पुत्रप्राणान्प्रयच्छ मे । इति ब्रुवंतं राजानमनादृत्य रघूत्तमम् ॥३४९॥
उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेन्द्रियः । त्वं राम इति मन्नाम्ना चरसि क्षत्रियाधम ॥३५०॥
द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोऽसि मे । पुराणं जर्जरं चापं भंक्त्वा त्वं कत्थसे मुधा ॥३५१॥
इदं तु वैष्णवं चापमारोपयसि चेद्गुणम् । तर्हि युद्धं त्वया सार्द्धं न करोमि नृपात्मज ॥३५२॥
नो चेत्सर्वान्हनिष्यामि क्षत्रियांतकरस्त्वहम् । इति तद्वचनं श्रुत्वा राघवो वाक्यमब्रवीत् ॥३५३॥

छातीसे लगाया तथा आश्वासन देकर विदा किया ॥ ३३६ ॥ तब राजा दशरथने राजा जनकको लौटनेके लिये कहा। राजा जनक आँखोंमें आँसू भरकर कुछ गरम श्वास लेते हुए मलिन मुख किये पुत्रियोंके वियोगसे गद्‌गदस्वर होकर राजा दशरथसे कहने लगे कि आज तक मैंने सीता आदिका लालन-पालन किया और अब आजसे आप अपनी कृपादृष्टिसे इनका पालन-पोषण करें। ऐसा कह और राजाको नमस्कार करके राजा जनक मिथिलाको लौट गये ॥ ३३७–३३९ ॥ राजा दशरथ भी पुत्रों, पुत्रवधुओं, स्त्रियों, राजाओं तथा सेनाको साथ लेकर धीरे-धीरे अपनी नगरीको चले ॥ ३४० ॥ जब श्रीराम मैथिल देशसे निकलकर बारह कोस आगे बढ़े। तब राजा दशरथको अतिघोर अपशकुन दिखाई दिये ॥ ३४१ ॥ तब वे नमस्कार करके वसिष्ठजीसे कहने लगे—हे मुनिपुंगव ! यह क्या कारण है कि चारों तरफ ये अपशकुन दिखाई दे रहे हैं ? ॥ ३४२ ॥ वसिष्ठजीने कहा कि ये भावी भयके सूचक हैं। परन्तु शीघ्र ही आपका भय निवृत्त हो जायगा ॥ ३४३ ॥ देखिए, शुभसूचक हरिण दाहिनी ओर जा रहे हैं। इतना कहना ही था कि घोरतर वायु बहने लगी ॥ ३४४ ॥ उसने धूलसे सबकी आँखें भर दीं। बादमें बड़े तेजस्वी, नीले मेघके समान रंगवाले, ऊँची जटाओंसे मंडित, हाथमें धनुष तथा फरसा लिये, साक्षात् कालके समान लाल मुँह किये हुए, कार्तवीर्य (सहस्रबाहु) को मारनेवाले, उद्दण्ड तथा घमण्डी क्षत्रियोंका नाश करनेवाले परशुरामजी दशरथके आगे खड़े हो गये ॥ ३४५–३४७ ॥ राजा उनको देखकर भयसे विह्वल हो सत्कार-पूजा भूलकर त्राहि-त्राहि करने लगे ॥ ३४८ ॥ उन्होंने दंडवत् प्रणाम करके कहा कि आप मेरे पुत्र रामके प्राण बचायें। परन्तु परशुरामने क्रोधातुर होकर राजाका अनादर करके रघूत्तम रामसे इस प्रकार निष्ठुर वचन कहा—अरे क्षत्रियाधम राम ! तू मेरे नामसे संसारमें झूठ-मूठ क्यों प्रसिद्ध हुआ फिरता है ? ॥ ३४९ ॥ ३५० ॥ यदि तू सच्चा क्षत्रिय हो तो मेरे साथ युद्ध कर। पुराना सड़ा हुआ धनुष तोड़कर क्यों अपनी बड़ाईकी झूठी डींग हाँक रहा है ? ॥ ३५१ ॥ ओ रघुवंशज ! यदि तू इस विष्णुके धनुषपर डोरी चढ़ा दे तो मैं तेरे साथ युद्ध न करूँगा ॥ ३५२ ॥ नहीं तो मैं तुम सबको मार डालूँगा। क्योंकि क्षत्रियोंका नाश करना ही मेरा काम है। परशुरामका यह वचन सुनकर रामने कहा—॥ ३५३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वयमेकगुणाः स्वामिन् यूयं चैव गुणाधिकाः । गोविप्रदेवनारीषु राघवा नास्त्रधारिणः ॥३५४॥
मयैतैश्च जीवितानि तव पादार्पितानि हि । यथेच्छं घातयास्माकं विप्रैर्युद्धं करोमि न ॥३५५॥
इति ब्रुवति रामे वै चचाल वसुधा भृशम् । क्रुद्धं दृष्ट्वा जामदग्न्यं क्षत्रियांतमुपस्थितम् ॥३५६॥
अंधकारो बभूवाथ चुक्षुभुः सप्त सागराः । रामो दाशरथिर्वीरो वीक्ष्य तं भार्गवं रुषा ॥३५७॥
धनुराच्छिद्य तद्धस्तादारोप्य गुणमंजसा । तुणीराद्बाणमादाय संधायाकृष्य वीर्यवान् ॥३५८॥
उवाच भार्गवं रामः शृणु ब्रह्मन् वचो मम । लक्ष्यं दर्शय बाणस्य ह्यमोघो रामसायकः ॥३५९॥
लोकान् पादयुगं वापि वद शीघ्रं ममाज्ञया । एवं वदति श्रीरामे भार्गवो विकृताननः ॥३६०॥
संस्मरन् पूर्ववृत्तांतमिदं वचनमब्रवीत् । राम राम महाबाहो जाने त्वां परमेश्वरम् ॥३६१॥
पुराणपुरुषं विष्णुं जगत्सर्गलयोद्भवम् । बाल्येऽहं तपसा विष्णुमाराधयितुमंजसा ॥३६२॥
गत्वा हि तीर्थे गोमत्यास्तपसा तोष्य शार्ङ्गिणम् । अहर्निशं महात्मानं नारायणमनन्यधीः ॥३६३॥
यस्यांशेन मया भूम्यामवतारो धृतोऽस्ति हि । भूभारहरणार्थाय कार्तवीर्यवधेप्सया ॥३६४॥
ततः प्रसन्नो देवेशः शंखचक्रगदाधरः । उवाच मां रघुश्रेष्ठ प्रसन्नमुखपंकजः ॥३६५॥

श्रीभगवानुवाच

उत्तिष्ठ तपसो ब्रह्मन् विहितं ते तपो महत् । मच्चिदंशेन युक्तस्त्वं जहि हैहयपुंगवम् ॥३६६॥
कार्तवीर्यं पितृहणं यदर्थं तपसा श्रमः । ततस्त्रिःसप्तकृत्वस्त्वं हत्वा क्षत्रियमंडलम् ॥३६७॥
कृत्स्नां भूमिं कश्यपाय दत्त्वा शान्तिमुपावह । त्रेतायुगे दाशरथिर्भूत्वा रामोऽहमव्ययः ॥३६८॥
उत्पत्स्ये परया भक्त्या तदा द्रक्ष्यसि मां पुनः । मत्तेजः पुनरादास्ये त्वयि दत्तं मया कृतम् । ३६९॥
तदा तपश्चरँल्लोके तिष्ठ त्वं ब्रह्मणो दिनम् । इत्युक्त्वाऽन्तर्दधे देवस्तथा सर्वं मया कृतम् ॥३७०॥
स एव विष्णुस्त्वं राम जातोऽसि ब्रह्मणाऽर्थितः । मयि स्थितं तु त्वत्तेजस्त्वयैव पुनराहृतम् ॥३७१॥

हे स्वामिन् ! हम एक गुणवाले तथा आप अनेक गुणवाले हैं। रघुवंशी लोग गौ, ब्राह्मण, देवता तथा स्त्रीपर शस्त्र नहीं उठाते ॥ ३५४ ॥ मैंने और इन सबने आपके चरणोंमें जीवन अर्पण कर दिया है । आप जैसा चाहें वैसा करें । यदि चाहें तो मार डालें, परन्तु मैं ब्राह्मणके साथ युद्ध कदापि नहीं करूँगा ॥ ३५५ ॥ रामके ऐसा कहनेपर क्षत्रियोंके नाशकस्वरूप जामदग्न्य (परशुराम) को क्रुद्ध देखकर वसुधा काँपने लगी। चारों ओर अन्धकार छा गया तथा सातों समुद्र क्षुभित हो उठे। तब दशरथपुत्र वीर रामने भी परशुरामको क्रोधसे देखकर उनके हाथसे धनुष छीन लिया और डोरी चढ़ा तथा भाथेमेंसे बाण निकाल और उसपर चढ़ा तथा बलपूर्वक खींचकर भार्गव परशुरामसे कहने लगे—हे ब्रह्मन् ! मेरी बात सुनिए और मुझे लक्ष्य बताइए। मेरा बाण खाली नहीं जा सकता ॥ ३५६–३५९ ॥ शीघ्र ही मुझे या तो लोकोंको विद्ध करनेकी आज्ञा दीजिए अथवा अपने दो चरणोंको । रामके इस वचनको सुनकर विकृतमुख होते हुए परशुरामने पूर्व वृत्तान्तको स्मरण करते हुए कहा–हे राम ! हे राम ! हे महाबाहो ! मैं आपको जगत्‌की उत्पत्ति, स्थिति तथा प्रलयके कारणस्वरूप पुराणपुरुष साक्षात् परमेश्वर विष्णु समझता हूँ। बचपनमें मैंने गोमती-तीर्थमें जाकर शार्ङ्गधनुषधारी विष्णुभगवान्‌को, जिनके एक अंशसे मैंने संसारमें भूभार हरण करने तथा कार्तवीर्यको मारनेके लिए अवतार लिया है, उन्हें अपने तपसे प्रसन्न किया। तब प्रसन्नमुख होकर शंख-चक्रगदापद्मधारी उन देवेशने मुझसे कहा ॥ ३६०–३६५ ॥ श्रीभगवान् बोले – हे ब्रह्मन् ! तप करना छोड़कर तू उठ खड़ा हो। मैंने तेरे तपोबलको जान लिया है । मेरे चिदंशसे युक्त होकर तू हैहयश्रेष्ठ तथा अपने पिताको मारनेवाले कार्तवीर्यको मार। जिसके लिए तूने तपका परिश्रम किया है। बादमें इक्कीस बार क्षत्रिय-समुदायका नाश करके समस्त पृथिवी कश्यपको दान देकर शान्त हो। पश्चात् त्रेतायुगमें मैं अविनाशी दाशरथी राम होकर उत्पन्न होऊँगा। तब तू परम भक्तिसे मुझे देखेगा। उस समय मै तुझे दिया हुआ अपना तेज लौटा लूँगा ॥ ३६६–३६९ ॥ तदनन्तर ब्रह्माके एक दिन तक तू तप करता हुआ संसारमें

CC0. In Public Domain. Kirtikant Sharma Rajajigarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अद्य मे सफलं जन्म प्रतीतोऽसि मम प्रभो । नमोऽस्तु जगतां नाथ नमस्ते भक्तिभावन ॥३७२॥
नमः कारुणिकानंत रामचन्द्र नमोऽस्तु ते । देव यद्यत्कृतं पुण्यं मया लोकजिगीषया ॥३७३॥
तत्सर्वं तव बाणाय भूयाद्राम नमोऽस्तु ते । ततो मुक्त्वा शरं रामस्तत्कर्म भस्मसात्करोत् ॥३७४॥
ततः प्रसन्नो भगवान् श्रीरामः करुणामयः । जामदग्न्यं तदा प्राह वरं वरय चेति सः ॥३७५॥
ततः प्रीतेन मनसा भार्गवो राममब्रवीत् । यदि मेऽनुग्रहो राम तवास्ति मधुसूदन ॥३७६॥
त्वद्भक्तसंगस्त्वत्पादे मम भक्तिः सदाऽस्तु वै । तथेति राघवेणोक्तः परिक्रम्य प्रणम्य तम् ॥३७७॥
पूजितस्तदनुज्ञातो महेंद्राचलमन्वगात् । रावणेन जिता देवाः सगर्वो रावणो महान् ॥३७८॥
सहस्रबाहुना बद्धः सोऽर्जुनो भार्गवेण हि । हतः क्षणेन समरे सोऽद्य श्रीभार्गवोऽपि च ॥३७९॥
जितस्तद्धनुषा बाणमोचनाद्राघवेण हि । एवं श्रीरामचंद्रस्य पौरुषं किं वदाम्यहम् ॥३८०॥
अथ राजा दशरथो रामं मृतमिवागतम् । दृढमालिंग्य हर्षेण नेत्राभ्यां जलमुत्सृजन् ॥३८१॥
ततः प्रीतेन मनसा स्वस्थचित्तः पुरीं ययौ । अयोध्यायां सुमंत्रोऽपि नृपं श्रुत्वा समागतम् ॥३८२॥
नगरीं शोभयामास पताकाध्वजतोरणैः । वारणेंद्रं पुरस्कृत्य रामं प्रत्युद्ययौ जवात् ॥३८३॥
अथो नदत्सु वाद्येषु राजा पुत्रैः सुहृज्जनैः । विवेश नगरं पौरैः पश्यन्नृत्यादिकं पथि ॥३८४॥
रामादयः स्वपत्न्या ते गजसंस्था ययुः पुरीम् । ननृतुर्वारनार्यश्च तुष्टवुर्मागधादयः ॥३८५॥
एवं राजा गृहं गत्वा बालकैः स्वीयसद्मनि । रमापूजाः कारयित्वा ददौ दानान्यनेकशः ॥३८६॥
तदाऽलंकारवस्त्राद्यैः सुहृदः पार्थिवादयः । रामादीन्पूजयामासुस्तथा दशरथं नृपम् ॥३८७॥

रह। ऐसा कहकर प्रभु अन्तर्द्धान हो गये। मैंने भी सब वैसे ही किया ॥ ३७० ॥ हे राम ! वही आप ब्रह्मासे प्रार्थित होकर पृथिवीपर अवतीर्ण हुए हैं। मेरे तनमें स्थित अपना तेज आपने ही फिर आज आहरण कर लिया है ॥ ३७१ ॥ आपके दर्शनसे मेरा जन्म सफल हो गया। हे भक्तिभावन ! हे जगन्नाथ ! हे करुणाशील ! हे रामचन्द्र ! आपको नमस्कार है। हे देव ! लोकोंको जीतनेकी इच्छासे मैंने जो जो कर्म किये हैं, वे सब आपके बाणको समर्पित हैं (अर्थात् उन्हें आप अपने बाणका लक्ष्य बनाकर नष्ट कर दें)। तब रामने बाण छोड़कर उनके कर्मोंको भस्म कर दिया ॥ ३७२–३७४ ॥ तदनन्तर प्रसन्न होकर करुणामय भगवान् श्रीरामने परशुरामसे कहा कि तुम वर माँगो, मैं तुमपर प्रसन्न हूँ ॥ ३७५ ॥ यह सुनकर प्रसन्न मनसे भार्गवने रामसे कहा—हे मधुसूदन राम ! यदि आप मेरेपर अनुग्रह रखते हों तो मुझे सदा आप अपने भक्तोंका संग तथा अपने विषयमें निर्मल भक्ति प्रदान करें। तब रामचन्द्रजीने 'तथास्तु' कहा। तदनन्तर परशुराम उन्हें नमस्कार तथा परिक्रमा करके और आज्ञा लेकर महेन्द्राचलकी ओर चल दिये। जिस रावणने देवताओंको जीता था, उस सगर्व महान् रावणको सहस्रबाहु अर्जुनने बाँध लिया था। उसी अर्जुनको परशुरामने युद्ध करके क्षणभरमें मार डाला था। उन परशुरामको भी रामने उन्हींके दिये हुए धनुषपर बाण चढ़ाकर जीत लिया। हे पार्वती ! इस प्रकार रामके पुरुषार्थका वर्णन मैं कहाँ तक करूँ। उनके बल-वीर्यका अन्त नहीं है ॥ ३७६–३८० ॥ पश्चात् राजा दशरथ रामको मरकर लौटे हुए की तरह आलिंगन करके हर्षके आँसू बहाने लगे ॥ ३८१ ॥ बादमें प्रसन्न मन होकर वे स्वस्थ चित्तसे अयोध्यापुरीको चल पड़े। उधर अयोध्यामें सुमन्त्रने जब राजा दशरथके आगमनकी बात सुनी तो उन्होंने नगरीको पताका, ध्वजा तथा तोरणोंसे खूब सजाया और हाथी लेकर रामको लेनेके लिए आगे आये ॥ ३८२ ॥ ३८३ ॥ राजा दशरथने पुत्र-मित्र तथा नगरनिवासियोंके साथ रास्तेमें नृत्य आदि देखते हुए बाजे-गाजेके साथ नगरमें प्रवेश किया ॥ ३८४ ॥ राम आदिने भी अपनी स्त्रियोंके साथ हाथियोंपर बैठकर पुरीमें प्रवेश किया। वेश्यायें नृत्य करने लगीं तथा भाट आदि स्तुति करने लगे ॥ ३८५ ॥ राजाने घर जाकर बालकोंसे लक्ष्मीका पूजन करवाया और अनेक प्रकारके दान दिये ॥ ३८६ ॥ पश्चात् सुहृदों तथा राजाओंने वस्त्र-अलङ्कारसे राम आदिकी और राजा दशरथकी पूजा की ॥ ३८७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशरथोऽपि तान्सर्वान् पूजयामास वैभवैः । ततस्ते सुहदः सर्वे नृपाश्च स्वस्थलं ययुः ॥३८८॥
प्रीत्या युधाजितं राजा स्थापयामास स्वांतिकम् । रामाद्या रमयामासुः स्वस्वदारैः स्वसद्मसु ॥३८९॥

पार्वत्युवाच

श्रीविष्णोस्तु चिदंशेन जामदग्न्यस्त्वया स्मृतः ॥३९०॥
तद्वच्चायं राघवः किं नुद मे संशयं प्रभो ।

श्रीशिव उवाच

अष्टावंशेन विधृता अवताराश्च विष्णुना ॥३९१॥
रामकृष्णावतारौ च पूर्णरूपेण तौ धृतौ । वरिष्ठौ सकलेष्वेवावतारेषु हि तावुभौ ॥३९२॥
तयोरपि वरः पूर्वः सत्यसंधो जितेंद्रियः । ज्ञेयो रामावतारो हि नानेन सदृशः परः ॥३९३॥
कृष्णः कृष्णरुचिर्ज्ञेयः श्रीरामो रुक्मसंरुचिः । एवं गिरींद्रजे प्रोक्तं सीतायाश्च स्वयंवरम् ॥
अस्य सर्गस्य श्रवणान्मंगलं लभ्यते नरैः ॥३९४॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे सीतास्वयंवरो नाम तृतीयः सर्गः ॥३॥

चतुर्थः सर्गः

(रामका शत्रु राजाओंके साथ युद्ध तथा विष्णुको वृन्दाका शाप)

श्रीशिव उवाच

अथ सीतायुतः श्रीमान् रामः साकेतसंस्थितः । बुभुजे विविधान् भोगान् राजसेवापरोऽभवत् ॥ १ ॥
शरत्कालाश्विने मासि जनकेन स्वमन्त्रिणः । आह्वानाय च राजानं प्रेषितास्त्वरितं ययुः ॥ २ ॥
तानागतान्दशरथः शीघ्रं सत्कृत्य सादरम् । पप्रच्छागमने हेतुं तेऽपि नत्वा तमूचिरे ॥ ३ ॥
दीपावल्युत्सवार्थं त्वां स कुटुम्बं समंत्रिणम् । पौरजानपदैः साकमाह्वयामास ते सुहृत् ॥ ४ ॥
तत्तेषां वचनं श्रुत्वा दूतानाज्ञापयन्नृपः । कथ्यतां नगरे राष्ट्रे गमनं मिथिलां प्रति ॥ ५ ॥

राजा दशरथने भी उन सबका अनेक विभवोंसे सत्कार किया। बादमें वे सब सुहृद तथा राजा लोग अपने-अपने स्थानोंको चले गये ॥ ३८८ ॥ किन्तु राजाने प्रीतिपूर्वक युधाजित्को रोक लिया। राम-लक्ष्मण तथा भरत आदि भी अपनी-अपनी स्त्रियोंके साथ जाकर अपने-अपने महलोंमें रमण करने लगे ॥ ३८९ ॥ पार्वतीजी कहने लगीं—हे शिवजी ! श्रीविष्णुके चिदंशसे परशुरामजीका अवतार आपने बताया और उसीसे आपने रघुपति रामचन्द्रजीका भी अवतार बताया है। फिर इन दोनोंमें क्या अन्तर है ? सो कहकर मेरी शङ्का दूर कीजिये। श्रीशिवजीने उत्तर दिया कि विष्णुभगवानने अपने अंशसे कुल आठ अवतार धारण किये थे। उनमेंसे राम तथा कृष्णका पूर्ण अवतार था। सब अवतारोंमें ये दो अवतार श्रेष्ठ थे ॥ ३९०-३९२ ॥ उन दोनोंमें भी सत्यवादी तथा जितेन्द्रिय रामावतार उत्तम था। रामके समान और कोई नहीं था ॥ ३९३ ॥ कृष्णको कृष्णरुचिवाले तथा रामको रुक्मरुचिवाले जानो। इस प्रकार शिवजीने गिरीन्द्रतनया (पार्वती) को सीताका स्वयम्वर कह सुनाया। इस सर्गको सुननेवाले मनुष्योंको मङ्गल लाभ होता है ॥ ३९४ ॥ इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये 'ज्योत्स्ना'-भाषाटीकायां सारकाण्डे सीतास्वयम्वरो नाम तृतीयः सर्गः ॥ ३ ॥

श्रीशिवजी बोले—हे देवि ! श्रीमान् राम सीताके साथ अयोध्यामें विविध राजभोगोंका सुख भोगने लगे ॥ १ ॥ शरत्कालके आश्विन महीनेमें राजा जनकने अपने मन्त्रियोंको महाराज दशरथको बुलानेके लिये भेजा। वे शीघ्र अयोध्या जा पहुँचे ॥ २ ॥ राजा दशरथने उनका आदर-सत्कार करके आनेका कारण पूछा। मन्त्रियोंने नमस्कार करके कहा—॥३॥ आपके मित्र राजा जनकने सकुटुम्ब आपको मन्त्रियों, पुरवासियों तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुमुहूर्ते ततो राजा हस्त्यश्वरथपत्तिभिः। पौरैर्जानपदैः साकं ययौ करिविराजितः॥ ६॥
राज्ञः पृष्ठे समाजग्मुर्गजोपरि विराजिताः। रामलक्ष्मणभरतशत्रुघ्नास्ते स्वलंकृताः॥ ७॥
कौसल्याद्या राजदाराःस्नुषाभिस्ताःपृथक् पृथक् रत्नमाणिक्यमुक्तादिशोभितासु वरासु च॥ ८॥
करिणीषु समासीना वेष्टिता वेत्रपाणिभिः। धातृकाभिः स्वदासीभिर्ययुर्वस्त्रादिभूषिताः॥ ९॥
आगतं नृपतिं श्रुत्वा जनकः पौरवासिभिः। प्रत्युज्जगाम हर्षेण निनाय नगरीं प्रति॥१०॥
वाद्यघोषनिनादैश्च दुन्दुभीनां महास्वनैः। वारांगनानां नृत्याद्यैर्गायकानां च गायनैः॥११॥
मार्गे मार्गे महासौधारूढस्त्रीणां कदम्बकैः। पुष्पवृष्टिविवर्षाभिर्ययौ नृपगृहं नृपः॥१२॥
ततो गृहाणि रम्याणि पूरितान्यन्नवारिभिः। प्रविवेश नृपश्रेष्ठो जनकेनातिमानितः॥१३॥
ततो नानासमुत्साहैर्मिष्ठान्नैर्नृत्यगायनैः। वस्त्रैराभरणैः सर्वान् जामातॄंश्च विशेषतः॥१४॥
मणिरत्नादिदीपैश्च मुहुर्नीराजनैरपि। जनकः पूजयामास दीपावल्यां महादिने॥१५॥
दीपोत्सवैर्महापुण्यैर्बलिराज्यं प्रवर्तते। आनन्दः सर्वलोकानां मंगलानि गृहे गृहे॥१६॥
अभ्यंगोद्वर्तनाद्यैश्च वरपक्वान्नभोजनैः। गोदासदासीदानैश्च हस्त्यश्वरथपत्तिभिः॥१७॥
चकार तुष्टान् जामातॄन् जनको नृपतिं तथा। नृपपत्नीं स्वदुहितॄरयोध्यास्थादिकान् क्रमात्॥१८॥
ततः प्रस्थानमकरोत्पुरीं दशरथो नृपः। ततो राजा दशरथः सैन्येन परिवेष्टितः॥१९॥
ययौ शनैः शनैर्मार्गे सुहृन्मन्त्रिपुरःसरः। एतस्मिन्नंतरे मार्गे सीतार्थं धनुषा पुरा॥२०॥
भग्नमाना नृपतयः पूर्ववैरमनुस्मरन्। असंख्याताः ससैन्यास्ते रुरुधुर्नृपतिं पथि॥२१॥

देशवासियोंके सहित दीवालीके उत्सवपर बुलाया है॥ ४॥ उनका यह वचन सुनकर राजाने दूतों द्वारा मिथिला चलनेका समाचार सारे गाँवों तथा नगरोंमें कहला दिया॥ ५॥ फिर शुभ मुहूर्त देखकर राजा अश्वारुढ़, गजारूढ़ तथा पैदल सैनिकोंको साथ लेकर नगर तथा राष्ट्रके लोगोंके साथ हाथीपर सवार होकर चले॥ ६॥ राजाके पीछे सुन्दर अलंकार धारण करके हाथीपर सवार होकर राम, लक्ष्मण, भरत और शत्रुघ्न चले॥ ७॥ उनके पीछे कौसल्या आदि राजाकी स्त्रिएँ भी अपनी-अपनी पुत्रवधुओंके साथ रत्न-माणिक्य-मोती आदिसे सुशोभित उत्तम हथिनियोंपर अलग-अलग सवार हो बेंतधारी सिपाहियों, धाइयों तथा दासियोंसे घिरी हुई वस्त्र आदिसे भूषित होकर चल पड़ीं॥ ८॥ ९॥ राजा दशरथका आगमन सुनकर राजा जनक पुरवासियोंको साथ लेकर स्वागत करनेके लिए गये और राजा दशरथको नगरमें ले आये॥ १०॥ रास्तेमें जगह-जगह वाद्योंका घोषनाद और नगाड़ोंका तुमुल निनाद होने लगा, वारांगनाएँ नाचने लगीं, गायकोंके गाने होने लगे तथा बड़े-बड़े महलोंकी अटारियोंपर स्थित स्त्रियोंके झुण्ड फूलोंकी बौछार करने लगे। इस प्रकार राजा दशरथ राजभवनमें पहुँचे॥ ११॥ १२॥ पश्चात् जनकसे सम्मानित होकर अन्न-जल आदिसे परिपूर्ण भवनोंमें पधारे॥ १३॥ बादमें विशेषरूपसे राजा जनकने सब जामाताओंकी विविध उत्सवोंसे, मिष्ठान्नसे, नृत्यसे, गीतसे, वस्त्रसे, अलंकारसे तथा मणिरत्नमय दीपकोंको आरतीसे दीपावलीके शुभ दिन बारम्बार पूजन तथा सत्कार किया॥ १४॥ १५॥ दीपोत्सवके महापुण्यसे राजा बलिका राज्य आरम्भ हुआ था। इसीसे सब लोगोंको आनन्द हुआ तथा घर-घर मंगल होने लगा॥ १६॥ राजा जनकने उन जामाताओंके शरीरमें तेल और चन्दन आदि लगा तथा गुलाबजल छिड़ककर इत्र आदि लगाया और उन्हें सुन्दर पकवान जिमा तथा हाथी, घोड़े, रथ, गाएँ, प्यादे, दास तथा दासिएँ देकर जमाइयों और राजा दशरथको सन्तुष्ट किया। तदनन्तर क्रमशः राजाको, स्त्रियोंको, अयोध्यानिवासियोंको और अपनी लड़कियोंको भी राजा जनकने यथेच्छ वस्तुएँ देकर सन्तुष्ट किया॥ १७॥ १८॥ तदनन्तर जब कि राजा दशरथ राजाओं, मन्त्रियों, सेना तथा मित्रोंके साथ धीरे-धीरे अयोध्याको जा रहे थे। उसी समय उन राजाओंने जिनका कि सीतास्वयम्वरमें मानभंग हुआ था, उस वैरका स्मरण करके असंख्य सेनाओंके साथ आकर राजा दशरथको घेर लिया। उनको देखा

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तान्दृष्ट्वा नृपतींश्चापि किमेतदिति विह्वलः। मन्त्रिभिर्मन्त्रयामास जनकः स्वजनैरपि ॥२२॥
एतस्मिन्नंतरे रामः श्रुत्वा चिन्तार्णवे निजम्। निमग्नं पितरं शीघ्रं ययौ लक्ष्मणसंयुतः ॥२३॥
नत्वा दशरथं रामः किञ्चिन्नम्र इदं जगौ। तात राजन्न कर्तव्या चिन्ता सति मयि त्वया ॥२४॥
क्षणादेव वधिष्यामि पश्य त्वं कौतुकं मम। ततो रामवचः श्रुत्वा राजाऽऽलिंग्य रघूत्तमम् ॥२५॥
प्राह षड्वार्षिको बालस्त्वं कथं योद्धुमिच्छसि। अरण्ये सकुटुम्बोऽहं वेष्टितोऽस्मि नृपाधमैः ॥२६॥
अहमेव गमिष्यामि योद्धुं रक्षस्व वाहिनीम्। तत्तातवचनं श्रुत्वा रामस्तं पुनरब्रवीत् ॥२७॥
यदा मे कुंठितां शक्तिं पश्यसि त्वं रणांगणे। तदा मे कुरु साहाय्यं तावदत्र स्थिरो भव ॥२८॥
स्वां वाहिनीं सकुटुंबां तात त्वं रक्ष मद्गिरा। इत्युक्त्वा पितरं नत्वा सज्जीकृत्य शरासनम् ॥२९॥
जगाम रथमारूढो लक्ष्मणोऽपि तमन्वगात्। तौ दृष्ट्वा भरतश्चाथ शत्रुघ्नोऽपि जगाम सः ॥३०॥
तान्दृष्ट्वा दशसाहस्रीं राजसेनामचोदयत्। ततस्ते पार्थिवाः सर्वे रथस्थं तं रघूत्तमम् ॥३१॥
निरीक्ष्य दर्शयामासुः स्वसेनायां परस्परम्। समागतोऽयं श्रीरामः स्वपितृस्यन्दनस्थितः ॥३२॥
एष वै सुमहच्छ्रीमान् विटपी सम्प्रकाशते। विराजत्युज्ज्वलस्कन्धः कोविदारध्वजो रथे ॥३३॥
दशरथाज्ञया तस्य रथे शस्त्रौघपूरिते। ध्वजबद्धपताकोच्चकोविदारे स्थितस्त्वयम् ॥३४॥
एवं वदन्तस्ते सर्वे रथैर्योद्धुं समाययुः। ततोऽभवन्महद्युद्धं घोरं तच्च परस्परम् ॥३५॥
अस्त्रैः शस्त्रैर्भिन्दिपालैः शतघ्नीभिः परश्वधैः। रामस्य सैनिकान् मुक्त्वा राजानो राममन्वयुः ॥३६॥
ते ववर्षुर्महाशस्त्रैर्बाणैर्व्याप्य दिगम्बरम्। तान्दृष्ट्वा नृपतीन् सर्वान् राममेवाभिसम्मुखान् ॥३७॥
लक्ष्मणः प्राद्रवच्छीघ्रं भरतोऽपि च शत्रुहा। स्वामितारकवद्घोरमासीद्युद्धं सुदारुणम् ॥३८॥
ततो नृपतयः सर्वे शस्त्रौघैर्भरतं तदा। ते विध्वा मूर्च्छितं चक्रुः स्यंदनात्पतितो भुवि ॥३९॥

तो घबराकर राजा दशरथ मन्त्रियों तथा स्वजनोंको पास बुलाकर विचार करने लगे कि यह क्या बात है? ॥ १९-२२ ॥ अपने पिताको चिन्तासमुद्रमें डूबा सुनकर राम लक्ष्मणके साथ उनके पास गये ॥ २३ ॥ पिता दशरथको नमस्कार करके राम नम्रतापूर्वक कहने लगे—हे तात! हे राजन्! मेरे रहते हुए आपको चिन्ता नहीं करनी चाहिए ॥ २४ ॥ मैं क्षणभरमें इन सबको मार डालूँगा। आप मेरा कौशल देखिये। रामके वचनको सुनकर राजाने उनका आलिंगन करके कहा—हे राम! छः वर्षका बालक तू क्या युद्ध करेगा? इस अरण्यमें सकुटुम्ब मुझको इन नीच राजाओंने आ घेरा है। इसलिए मैं ही इनको मारूँगा और तू सेनाकी रक्षा कर। पिताके इस वचनको सुनकर राम उनसे फिर कहने लगे—॥ २५-२७ ॥ जब आप मेरी शक्तिको रणाङ्गणमें कुण्ठित होते देखें, तब मेरी सहायता करिएगा। तबतक आप मेरे कहनेसे यहीं रहकर सकुटुम्ब अपनी सेनाकी रक्षा करें। ऐसा कहकर रामने पिताको नमस्कार किया और धनुषको ठीक करके रथपर चढ़कर चल दिये। उनके पीछे लक्ष्मण भी गये। उन दोनोंको जाते देख भरत और शत्रुघ्न भी उनके साथ चल दिये ॥ २८-३० ॥ उन सबको जाते देखकर राजा दशरथने दस हजार सैनिकोंकी सेना उनके साथ भेजी। उधर सब राजे रथस्थित रामको आते देख अपनी सेनामें एक दूसरेको दिखाने लगे कि यह राम अपने पिताके रथपर चढ़कर आ रहा है। यह बड़ा तेजस्वी है। विशाल शाखावाले पेड़के समान ऊँचे तथा शोभित कन्धेवाला राम रथमें कोविदार (कचनार या रक्तकाञ्चन) की ध्वजा लगाये हुए अपने पिताकी आज्ञासे उनके ही रथपर सवार होकर आ रहा है। ऐसा कहकर वे सब राजे युद्ध करनेके लिए रथ लेकर चले। पश्चात् परस्पर बड़ा भारी युद्ध होने लगा ॥ ३१-३५ ॥ वे सब एक दूसरेपर अस्त्र, शस्त्र, तीर, तोप तथा फरसे चलाने लगे। वे राजे रामके सैनिकोंको छोड़कर रामपर झपटे ॥ ३६ ॥ वे लोग आकाशको व्याप्त करके बड़े-बड़े शस्त्रों तथा बाणोंकी वर्षा करने लगे। उन सब राजाओंको अकेले रामके साथ युद्ध करते देख लक्ष्मण, भरत तथा शत्रुघ्न भी दौड़ पड़े और उनमें तारकासुर तथा कार्तिकेयकी तरह भयानक युद्ध होने लगा। तब सब

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भरतं पतितं दृष्ट्वा शत्रुघ्नं विव्यधुः शरैः । तं चापि विरथं कृत्वा दुद्रुवुर्लक्ष्मणं नृपाः ॥४०॥
ववर्षुर्निशितैर्बाणैश्चक्रुस्तं व्याकुलं रणे । तथैव राघवं चापि शरैराच्छादयन्नृपाः ॥४१॥
ततः श्रीरामचन्द्रोऽपि लीलया समरांगणे । पश्यत्सु जालरंध्रैश्च कौसल्याद्यासु मातृषु ॥४२॥
सीतया भ्रातृपत्नीषु पित्रा मंत्रिकुलेष्वपि । टणत्कृत्य महच्चाप वायव्यास्त्रेण तान्नृपान् ॥४३॥
शुष्कपर्णवदुद्धूय आक्षिपदब्धिरोधसि । मोहनास्त्रेण शेषान् हि मोहयामास राघवः ॥४४॥
लुलुंठ सकलं सैन्यं हस्त्यश्वरथसंकुलम् । ततो मूर्छितमालोक्य भरतं कैकयी रणे ॥४५॥
करिण्याःशीघ्रमुत्प्लुत्य शुशोचांके निधाय तम् । ततो दशरथश्चापि कौसल्याद्या नृपस्त्रियः ॥४६॥
सांत्वयित्वाऽथ तान् रामः सौमित्रिं प्राह वेगतः । इतो विदूरे सौमित्रे मुद्गलस्य तपोनिधेः ॥४७॥
आश्रमोऽस्ति हि तत्र त्वं गत्वा वल्लीः शुभावहाः । संजीविन्यादिकाः सर्वाः शीघ्रमानय लक्ष्मण ॥४८॥
मुनेस्तपःप्रभावेण बहवः संति तत्र वै । तथेति लक्ष्मणो गत्वा स्यंदनस्थस्त्वरान्वितः ॥४९॥
अवरुह्य रथाद्वीरः संविवेशाश्रमं मुनेः । निवारितः स वटुकैः समाधिविरमे मुनेः ॥५०॥
याच्ञां कृत्वा शुभा वल्लीः प्राप्स्यसे त्वं न चान्यथा ।
कालातिक्रमभीत्या स लक्ष्मणोऽपि रघूत्तमम् ॥५१॥
वृत्तं निवेदयामास पुनस्तं राघवोऽब्रवीत् । निवारयित्वा वटुकान् विना शस्त्रैस्त्वरान्वितः ॥५२॥
आनय त्वं शुभा वल्लीर्मा शंकां च मुनेः कुरु । सोऽपि रामाज्ञया गत्वा निवार्य वटुकान् क्षणात् ॥५३॥
बलात्कारेण ता वल्लीर्गृहीत्वा राममागतः । भरतं जीवयामास विशल्यं कृत्य सानुजम् ॥५४॥
ततः समुत्थितं दृष्ट्वा कैकेयी भरतं मुदा । संतोषं परमं चक्रे कैकेयी पितरं तदा ॥५५॥
राघवं सा समालिंग्य भरतं परिषस्वजे । ततो राजाऽतिसंतुष्टः समालिंग्य रघूत्तमम् ॥५६॥

राजाओंने शस्त्रोंसे भरतको बींधकर मूर्छित कर दिया और वे रथसे गिर पड़े ॥ ३७-३९ ॥ भरतको पृथ्वीपर गिरा देखकर राजाओंने शरोसे शत्रुघ्नको भी विद्ध किया। उनको भी गिराकर वे राजे लक्ष्मणकी ओर दौड़े ॥ ४० ॥ उनपर भी बाणोंकी वर्षा करके व्याकुल कर दिया । इसी प्रकार राघव रामको भी राजाओंने बाणोंसे आच्छादित कर दिया ॥ ४१ ॥ बादमें श्रीरामचन्द्रने समरके मैदानमें पालकियोंकी खिड़कियोंमें लगी हुई चिकोंमेंसे देखती हुई कौसल्या आदि माताओंके, सीताके तथा अपने भाइयोंकी स्त्रियोंके समक्ष राजाओं और मन्त्रियोंके सामने अपने बड़े भारी धनुषका टंकोर करके उसपर वायव्यास्त्र चढ़ाकर उससे उन राजाओंको सूखे पत्तोंकी तरह उड़ाकर समुद्रके किनारे फेंक दिया। बाकी लोगोंको रामने मोहनास्त्रसे मूर्छित कर दिया ॥ ४२-४४ ॥ हाथी, घोड़े, रथ तथा पैदलोंकी समस्त सेनाको जमीनमें लिटा दिया । रणमें भरतको मूर्छित देख कैकेयी हथिनीसे उतरी और उनको गोदमें लेकर विलाप करने लगी। तदनन्तर राजा दशरथ तथा उनकी स्त्रियें कौसल्या आदि भी विलाप करने लगीं ॥ ४५ ॥ ४६ ॥ तब रामने सबको आश्वासन देकर कहा—लक्ष्मण ! यहाँसे कुछ दूरपर एक तपोनिधि मुद्गलमुनिका आश्रम है । वहाँ जाकर तुम कल्याणकारिणी संजीवनी आदि बूटियोंको ले आओ ॥ ४७ ॥ ४८ ॥ मुनिके तपके प्रभावसे वहाँ अनेक प्रकारकी जड़ियें उगी हुई हैं। 'बहुत अच्छा' कहकर वीर लक्ष्मण रथपर चढ़कर शीघ्र मुनिके आश्रममें गये । वहाँके ब्रह्मचारियोंने उनको बूटिये लेनेसे रोका और कहा कि तुम मुनिके समाधिसे उठनेपर उनसे पूछकर ही बूटियें ले जा सकते हो—अन्यथा नहीं। समय बीत जानेके डरसे लक्ष्मणने आकर रामसे सब हाल कहा। रामने फिर कहा कि उन वटुकोंको अस्त्रके बिना हाथसे हटाकर शीघ्र ही उन शुभ जड़ियोंको ले आओ। मुनिसे मत डरो। रामकी आज्ञा पाकर वे वहाँ गये तथा बलप्रयोगके बिना ही बटुकोंको हटाकर उन जड़ियोंको लेकर रामके पास लौट आये। तब रामने भरतके शरीरसे बाण निकालकर उन्हें जड़ीसे जीवित किया। भरतको स्वस्थ देखकर कैकेयी बहुत प्रसन्न हुई। उसने रामका आलिंगन करके भरतको आलिंगन किया। राजाने भी प्रसन्न

CC0. In Public Domain. Sri Kant Sharma Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हर्षान्नानोत्सवांस्तत्र चकार गुरुणा द्विजैः । ततस्ते वटवः सर्वे हाहाकृत्य मुनीश्वरम् ॥५७॥
वृत्तं निवेदयामासुः समाधिविरमे मुनेः । स मुद्गलोऽपि तच्छ्रुत्वा विस्मयेनाब्रवीद्वटून् ॥५८॥
को लक्ष्मणः किमर्थं कस्याज्ञया सोऽहरद् द्रुमम् । विदित्वा सकलं वृत्तमागच्छध्वं त्वरान्विताः ॥५९॥
तथेति ते दशरथं गत्वा प्रोचुस्त्वरान्विताः । कस्त्वं किमर्थमानीता वल्ल्यो लक्ष्मणहस्ततः ॥६०॥
तान्दृष्ट्वा क्रोधसंयुक्तान् राजा चिन्तातुरोऽब्रवीत् । अहं दशरथो वल्ल्यो भरतार्थं ममाज्ञया ॥६१॥
आनीता मुनये सर्वे ब्रुवध्वं नतिपूर्वकाः । अहमप्यागमिष्यामि मुनिं सांत्वयितुं जवात् ॥६२॥
ततस्ते मुनये सर्वं नृपनामाद्यवर्णयन् । श्रुत्वा रामस्य पितरं क्रोधं संहृत्य वेगतः ॥६३॥
दर्शनार्थं मतिं चक्रे तावद्दृष्टो नृपः पुरः । बद्ध्वा करसंपुटं तं प्रणमंतं नृपोत्तमम् ॥६ ॥
प्रार्थयन्तं समुत्थाप्य पूजयामास सादरम् । रामाद्या नृपपुत्राश्च कौसल्याद्या नृपस्त्रियः ॥६५॥
प्रणम्याथ मुनिं स्तुत्वा तस्थुर्मुद्गलभार्यया । सुमत्या पूजिताः सर्वा राजदारा विशेषतः ॥६६॥
ततो दशरथः प्राह मुनिं स्तुत्वा पुनः पुनः । मयाऽपराधितं राज्ञा क्षम्यतां तत्त्वया मुने ॥६७॥
मुनिर्दशरथं प्राह ह्युपकारो महान् कृतः । नोचेत्कथं दर्शनं मे ध्यानस्थस्य सुतस्य ते ॥६८॥
श्रीरामस्य ससीतस्य नृवेषस्य हि मायया । इति तस्य वचः श्रुत्वा दृष्ट्वा तुष्टं मुनीश्वरम् ॥६९॥
उवाच नृपतिर्नत्वा किंचित्प्रष्टुमना मुनिम् । ज्ञात्वा नृपस्य स मुनिर्हृद्गतं प्रष्टुकामुकम् ॥७०॥
एकांते तुलसीखंडे नीत्वा तं नृपमेव सः । पप्रच्छ किं ते वांछाऽस्ति वदस्व कथ्यते मया ॥७१॥
तमब्रवीद्दशरथः श्रीरामस्य हि भावि यत् । हिताहितं सविस्तारं ज्ञातुमिच्छे मुनीश्वर ॥७२॥
नृपस्य वचनं श्रुत्वा राजानं मुनिरब्रवीत् ।

मुद्गल उवाच

साक्षान्नारायणो विष्णुः सर्वव्यापी जनार्दनः ॥ ७३ ॥

होकर रामका हृदयसे लगाया। उस समय उन्होंने आनन्दसे गुरु तथा ब्राह्मणों द्वारा अनेक उत्सव कराये। उधर समाधिसे निवृत्त होनेपर सब वटुकोंने हाहाकार करके मुनिको सब हाल सुनाया। तब मुद्गल मुनि विस्मित होकर वटुकोंसे कहने लगे---॥ ४९--५८ ॥ जाओ, वह लक्ष्मण कौन है, किस लिये और किसके कहनेसे बूटियाँ ले गया है। शीघ्र इस बातका पता लगाकर आओ ॥ ५९ ॥ 'अच्छा, कहकर उन्होंने दशरथके पास जाकर पूछा कि तुम कौन हो और तुमने लक्ष्मणके द्वारा जड़ियें क्यों मँगवायी हैं ? ॥ ६० ॥ उन्हें क्रुद्ध देखकर राजा चिन्तापूर्वक कहने लगे कि मैं राजा दशरथ हूँ। लक्ष्मण मेरे कहनेसे भरतके लिये जड़ियें ले आया है। मेरा नमस्कार कहकर मुनिसे यह सब वृत्तान्त कह दें। मैं भी मुनिको समझानेके लिये शीघ्र ही आ रहा हूँ ॥ ६१ ॥ ६२ ॥ लौटकर बटुकोंने मुनिको राजाका नाम आदि कह सुनाया। रामके पिताका नाम सुना तो मुनिने क्रोधको रोक तथा शीघ्र जाकर राजासे मिलनेका विचार किया ही था कि इतनेमें राजा दशरथ स्वयं आकर सामने खड़े हो गये और हाथ जोड़ प्रणाम करके प्रार्थना करने लगे। तब खड़े होकर मुनिने उनकी सादर पूजा की। राम आदि राजाके पुत्र तथा कौसल्या आदि राजाकी स्त्रियें भी मुनिको प्रणाम करके उनकी स्तुति करती हुई खड़ी हो गयीं। मुद्गल मुनिकी भार्या सुमतिने विशेषरूपसे राजाकी स्त्रियोंका सत्कार किया ॥ ६३-६६ ॥ राजाने बारम्बार स्तुति करके मुनिसे कहा--हे मुनि! मुझसे जो अपराध हुआ है। उसको क्षमा करें ॥ ६७ ॥ मुनिने महाराज दशरथसे कहा कि नहीं, तुमने मेरा बड़ा भारी उपकार किया है। नहीं तो ध्यानयोग्य और मायासे मनुष्यका रूप धारण किये हुए सीताके सहित आपके पुत्र रामका दर्शन मुझे कैसे मिलता ? मुनिके वचन सुन तथा उन्हें प्रसन्न देखकर राजाने नमस्कार करके उनसे कुछ पूछना चाहा। इतनेमें मुनि राजाके हृदयकी बात जान गये और एक ओर तुलसीकी झाड़ीमें ले जाकर वे स्वयं राजासे कहने लगे---हे राजन्! कहो, तुम्हारी क्या पूछनेकी इच्छा है, मैं उसका उत्तर दूँगा ॥ ६८--७१ ॥ राजाने कहा--हे मुनीश्वर! रामका भविष्य कैसा है ? मैं उसका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूभारहरणार्थाय तवापि वरदानतः । अवतीर्णोऽस्ति त्वत्तो हि तव पुण्यमहोदयात् ॥७४॥
अधर्मस्य विनाशं च वृद्धिं धर्मस्य सादरम् । निर्द्दलनं हि दुष्टानां सज्जनानां च पालनम् ॥७५॥
करिष्यति महानेष तव पुत्रो रघूत्तमः । दशवर्षसहस्राणि दशवर्षशतानि च ॥७६॥
करिष्यति महद्राज्यं गते त्वयि दिवं नृप । सप्तद्वीपपतिश्चायं भविष्यति नृपो महान् ॥७७॥
द्वौ तौ भविष्यतः पुत्रौ चतस्रश्च स्नुषास्तथा । चतुर्विंशतिपौत्राश्च पौत्र्यस्तु द्वादशैव हि ॥७८॥
असंख्याताः प्रपौत्राद्या भविष्यन्ति सुतस्य ते । कियद्दिनैरयं वृंदाशापं भोक्तुं हि दंडके ॥७९॥
गमिष्यति ततः पश्चान्महद्राज्यं करिष्यति । तत्तस्य वचनं श्रुत्वा नृपः प्राह मुनिं पुनः ॥८०॥

दशरथ उवाच

का वृंदा कस्य भार्या सा कथं शप्तो हरिस्तया । तत्सर्वं विस्तरेणैव कथयस्व मुनीश्वर ॥८१॥

मुद्गल उवाच

पुरा जलंधरेणासीद्युद्धं श्रीशंकरस्य च । वृंदापातिव्रतबलाद्रक्षितं विष्णुना तदा ॥८२॥
ज्ञात्वा तद्दर्शितपथा पार्वत्या धर्षणादिना । जालंधरपुरं गत्वा तद्दैत्यपुटभेदनम् ॥८३॥
पातिव्रत्यस्य भंगाय वृंदायाश्चाकरोन्मतिम् । अथ वृंदारका देवी स्वप्नमध्ये ददर्श ह ॥८४॥
भर्तारं महिषारूढं तैलाभ्यक्तं दिगंबरम् । दक्षिणाशागतं मुण्डं तमसाऽप्यावृतं तदा ॥८५॥
ततः प्रबुद्धा सा बाला तं स्वप्नं स्वं विचिन्तती । कुत्रापि नालभच्छर्म गोपुराट्टालभूमिषु ॥८६॥
ततः सखीद्वययुता नगरोद्यानमागता । वनाद्वनांतरं याता ददर्शातीव भीषणौ ॥८७॥
राक्षसौ सिंहवन्नादौ दंष्ट्रानयनभीषणौ । तौ दृष्ट्वा विह्वलाऽतीव पलायनपरा तदा ॥८८॥
ददर्श तापसं शांतं सशिष्यं मौनमास्थितम् । ततस्तत्कंठमासज्य निजबाहुलतां भयात् ॥८९॥
मुने मां रक्ष शरणमागतामित्यभाषत । तत्तस्या वचनं श्रुत्वा ध्यानं मुक्त्वा स वै मुनिः ॥९०॥

हित-अहित जानना चाहता हूँ ॥ ७२ ॥ राजाकी बात सुनकर मुनि मुद्गल कहने लगे—साक्षात् नारायण तथा सर्वव्यापी जनार्दन विष्णुभगवान् पृथ्वीका भार उतारने तथा पूर्वजन्ममें आपको वरदान देनेके कारण आपके पुण्य-प्रतापसे स्वयं अवतरे हैं। ये अधर्मका नाश करके धर्मकी वृद्धि करेंगे। रामचन्द्रजी दुष्टोंका दलन करके सज्जनोंका पालन करेंगे। हे नृप ! आपके देवलोक चले जानेपर ये दस हजार दस सौ वर्ष तक राज्य करेंगे। ये सप्तद्वीपके अधिपति और महान् राजा होंगे ॥ ७३-७७ ॥ इनके दो पुत्र और चार पुत्रवधुएँ होंगी। चौबीस पोते और बारह पोतियें होंगी। आपके पुत्र रामके परपोते असंख्य होंगे। कुछ दिनोंके लिए ये दण्डकारण्यमें वृन्दासे प्राप्त शापको छुड़ाने जायँगे। उसके बाद विशाल राज्य करेंगे। यह सुनकर राजाने फिर मुनिसे कहा ॥ ७८-८० ॥ राजा दशरथ बोले— वृन्दा कौन थी तथा किसकी स्त्री थी ? उसने भगवान्को क्यों शाप दिया ? हे मुनीश्वर ! यह सब विस्तारपूर्वक कहें ॥ ८१ ॥ मुद्गल बोले— पूर्वकालमें जलंधर नामका एक दैत्य था। वृन्दा उसकी बड़ी पतिव्रता स्त्री थी। उसके पातिव्रतके बलसे वह शिवजीके साथ युद्ध करके भी नहीं हारा। तब भगवान विष्णु पार्वतीसे उसका कारण जानकर उनके कथनानुसार जालन्धरपुर गये। वहाँ दैत्यमिथुनका भेदन करके वृन्दाका पातिव्रत भङ्ग करनेके लिए उन्होंने उसके साथ भोग करनेका विचार किया। तभी वृन्दादेवीने स्वप्नमें अपने पतिको तेलसे नहाये, नंगे शरीर, भैंसेपर चढ़कर दक्षिण दिशाको जाते, सिर मुड़ाये तथा तमसे आच्छादित देखा। जब वह बाला जागी तो स्वप्नपर विचार करने लगी। गोपुर, छत तथा अँटारी आदिपर उसे कहीं चैन नहीं मिली ॥ ८२-८६ ॥ तब वह अपनी दो सखियोंको साथ लेकर नगरके बाहर बागमें मन बहलाने लगी। वहाँ एकसे दूसरे और दूसरेसे तीसरे बागमें वह जब फिरने लगी, तब उसको भयानक सिंहके समान गर्जन करनेवाले और भयंकर दाँत तथा नेत्रवाले दो राक्षस दिखाई दिये। उनको देख तथा विह्वल होकर वह इधर-उधर भागने लगी। उसे वहाँ सहसा शिष्योंसे युक्त एक मौनव्रतधारी शान्त तपस्वी दिखाई दिये। तब वह अपनी दोनों भुजारूपिणी

CC-0. In Public Domain. Kirikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उन्मील्य नयने वृंदां हृदि दृष्ट्वाऽब्रवीद्वचः । तिष्ठ त्वं बालिके ह्यत्र मा भयं कुरु सर्वथा ॥९१॥
इत्युक्त्वा पुरतो दृष्ट्वा राक्षसौ मुनिसत्तमः । निर्भर्त्सयंतौ हुंकारैः क्रोधेन महता वृतः ॥९२॥
तौ तद्धुंकारतस्त्रस्तौ पलायनपरौ तदा । तत्सामर्थ्यं मुनेर्दृष्ट्वा वृंदा सा विस्मयावृता ॥९३॥
प्रणम्य दंडवद्भूमौ मुनिं वचनमब्रवीत् ।

वृन्दोवाच

रक्षिताऽद्य त्वया घोराद्भयादस्मात्कृपानिधे ॥९४॥
किंचिद्विज्ञप्तुमिच्छामि कृपया तद्वदस्व माम् । जलंधरो हि मे भर्ता रुद्रं योद्धुं गतः प्रभो ॥९५॥
स तत्रास्ते कथं युद्धे तन्मे कथय सुव्रत । मुनिस्तद्वाक्यमाकर्ण्य कृपयोर्ध्वमवैक्षत ॥९६॥
तावत्कपी समायातौ तं प्रणम्याग्रतः स्थितौ । ततस्तद्भ्रूलतासंज्ञाप्रयुक्तौ गगनांतरात् ॥९७॥
गत्वा क्षणार्धादागत्य वानरावग्रतः स्थितौ । शिरःकबंधहस्तौ च दृष्ट्वाऽब्धितनयस्य सा ॥९८॥
पपात मूर्च्छिता भूमौ भर्तृव्यसनदुःखिता । कमंडलुजलैः सिक्ता मुनिनाऽऽश्वासिता तदा ॥९९॥
रुदित्वा सुचिरं वृंदा तं मुनिं वाक्यमब्रवीत् ।

वृन्दोवाच

कृपानिधे मुनिश्रेष्ठ जीवयैनं मुने प्रियम् ॥१००॥
त्वमेवास्य पुनः शक्तो जीवनाय मतो मम ।

मुनिरुवाच

नायं जीवयितुं शक्यो रुद्रेण निहतो युधि ॥१०१॥
तथापि त्वत्कृपाविष्टः पुनः संजीवयाम्यहम् । इत्युक्त्वांतर्दधे यावत्तावत्सागरनंदनः ॥१०२॥
वृंदामालिंग्य तद्वक्त्रं चुचुंब प्रीतमानसः । अथ वृंदाऽपि भर्तारं दृष्ट्वा हर्षितमानसा ॥१०३॥
रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरम् । कदाचित्सुरतस्यांते दृष्ट्वा विष्णुं तमेव हि ॥१०४॥

लताएँ उनके गलेमें डालकर भयभीतभावसे कहने लगी—हे मुने ! आपकी शरणमें आयी हुई मुझ अबलाकी रक्षा करिए। उसके इस आर्त वचनको सुना तो ध्यान छोड़कर मुनिने उसे अपने हृदयसे लिपटी हुई पाया। तब वे उससे कहने लगे-बालिके ! तुम यहाँ निर्भय होकर रहो ॥ ८७–९१ ॥ उसे इस प्रकार समझाकर मुनिश्रेष्ठने डराते तथा हुंकार करते हुए उन दोनों राक्षसोंको अपने सामने देखा। तब क्रुद्ध होकर वे भी हुंकार करने लगे। उनके हुंकारसे त्रस्त होकर वे दोनों राक्षस भाग गये। मुनिके इस अद्भुत सामर्थ्यको देखा तो वृन्दा आश्चर्यचकित होकर भूमिपर दण्डवत् प्रणाम करके कहने लगी। वृन्दा बोली हे कृपानिधे ! मुझे आपने इस घोर संकटसे बचा लिया। अब मैं आपसे कुछ पूछना चाहती हूँ। सो कृपा करके कहिये। हे प्रभो ! मेरा पति जलंधर शिवजीसे युद्ध करने गया है। हे सुव्रत ! वह वहाँ किस दशामें है, यह मुझे बताइए। मुनिने उसकी बात सुनकर कृपापूर्वक ऊपरकी ओर देखा तो उपरसे दो बन्दर आये और मुनिको प्रणाम करके सामने खड़े हो गये। उनके हाथोंमें वृन्दाने अब्धितनय जलन्धरका कटा सिर, हाथ तथा धड़ देखा। यह देखनेके साथ ही वह पतिवियोगके दुःखसे दुःखित तथा मूर्छित होकर धरतीपर गिर पड़ी। तब मुनिने उसके मुँहपर कमण्डलुका जल छिड़का और सचेत करके शांत किया ॥ ९२–९९ ॥ बहुत समय तक रोनेके बाद वृन्दा कहने लगी—हे कृपानिधे ! हे मुनिश्रेष्ठ ! आप मेरे प्रिय पतिको जीवित कर दें ॥ १०० ॥ मेरी समझमें आप ही इसको जिलानेमें समर्थ हैं। मुनि बोले—युद्धमें शिवजीके द्वारा निहत जलन्धरको जीवित करना असम्भव है। फिर भी तुमपर दया करके मैं इसे जीवित करता हूँ। ऐसा कहकर वे अन्तर्धान हो गये। इतनेमें सागरनन्दन जलन्धर प्रकट हो गया और आनन्दसे वृन्दाका आलिङ्गन करके मुख चुम्बन करने लगा। वृन्दाने भी अपने पतिको देखा तो प्रसन्न होकर उस वनमें बहुत दिनतक उसके साथ रमण करती रही। एक दिन रमणके अनन्तर उसी जलन्धरको विष्णु के रूप में

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्भर्त्स्य क्रोधसंयुक्ता वृंदा वचनमब्रवीत् ।

वृन्दोवाच

तव ज्ञातं हरे शीलं परदाराभिगामिनः ॥१०५॥

त्वं ज्ञातोऽसि मया सम्यङ्मायी प्रत्यक्षतापसः । यौ त्वया मायया द्वौ तौ स्वकीयौ दर्शितौ मम ॥१०६॥

तावेव राक्षसौ भूत्वा तव भार्यां विनेष्यतः । जयविजयनामानौ ज्ञातौ कृत्रिमरूपिणौ ॥१०७॥

त्वं चापि भार्यादुःखार्तो वने कपिसहायवान् । भव सर्वेश्वरोऽपि त्वं यत्ते शिष्यौ समागतौ ॥१०८॥

पुण्यशीलसुशीलौ तौ कपिरूपधरावुभौ । अतस्ते वानरैरस्तु संगतिर्दंडके वने ॥१०९॥

वटुरूपधरः शिष्यो यस्तार्क्ष्यश्चेति वेद्म्यहम् । इत्युक्त्वा सा तदा वृंदा प्रविवेश हुताशनम् ॥११०॥

ततो जालंधरो दैत्यो निहतो युधि शंभुना । तस्माद्राजन्निदानीं तौ कुम्भकर्णदशाननौ ॥१११॥

जातौ सागरमध्ये तौ लंकायामधुना स्थितौ । नीत्वा जनकजां बालां पंचवट्यास्तु मातृवत् ॥११२॥

पालयित्वाऽथ षण्मासान् रामबाणान्मरिष्यति । रामोऽपि बालिनं हत्वा सुग्रीवेण समन्वितः ॥११३॥

शिलाभिः सागरं बद्ध्वा सीतामादाय यास्यति । यात्रायज्ञविलासांश्च सप्तद्वीपप्ररक्षणम् ॥११४॥

करिष्यति दयितया बंधुभिश्च यथासुखम् । इदं गोप्यं त्वया राजन् कथनीयं न कुत्रचित् ॥११५॥

श्रीशिव उवाच

इत्युक्त्वा मुद्गलः सर्वं भावि रामस्य कौतुकात् । चरित्रं वर्णयामास यदा यद्यत्करिष्यति ॥११६॥

तत्सर्वं नृपतिः श्रुत्वा तुष्टः पप्रच्छ तं पुनः । पूर्वजन्मनि कश्चाहं किं मया सुकृतं कृतम् ॥११७॥

तत्सर्वं वद मां ब्रह्मन् यस्माज्जातो हरिः सुतः । मम साक्षाद्रामचंद्रो लक्ष्मीःसीता त्वभूत्स्नुषा ॥११८॥

इति तस्य वचः श्रुत्वा नृपमाह पुनर्मुनिः ।

मुद्गल उवाच

आसीत्सह्याद्रिविषये करवीरपुरे पुरा ॥११९॥

ब्राह्मणो धर्मवित्कश्चिद्धर्मदत्त इति श्रुतः । विष्णुव्रतकरः सम्यग्विष्णुपूजारतः सदा ॥१२०॥

देखा तो क्रुद्ध होकर धिक्कारती हुई वृन्दा बोली—हे हरे! तुम्हारे इस परस्त्रीगमनरूपी व्यवहारको धिक्कार है ॥ १०१ ॥ मैंने अब जाना कि तुम मायावी तथा बनावटी तपस्वी हो। तुमने अपने निजी दो दूतोंको वानर-रूपमें मुझे दिखलाया था, वे ही दोनों राक्षस होकर तुम्हारी स्त्रीका हरण करेंगे। वे दोनों कृत्रिमरूपधारी जयविजय तुम्हारे पार्षद थे ॥ १०२-१०७ ॥ सर्वेश्वर होनेपर भी तुम स्त्रीके वियोगसे दुःखी होकर वानरोंके साथ वनमें चक्कर लगाओगे। तुम्हारे वे दोनों पुण्यशील-सुशील शिष्य भी बानर बनेंगे। उनमेंसे तार्क्ष्य नामका शिष्य वटुरूप धारण करेगा। और भी बहुतसे वानर दंडकवनमें तुमको मिलेंगे। इतना कहकर वृन्दा अग्निमें प्रविष्ट हो गयी ॥ १०८-११० ॥ इस प्रकार वृन्दाका पातिव्रत खंडित होनेके बाद जलन्धर वास्तविकरूपमें शंभुके द्वारा मारा गया। हे महाराज दशरथ! इस शापके कारण इस समय रावण-कुम्भकर्ण जन्म लेकर समुद्र-के बीच लंकामें निवास करते हैं। वे पंचवटीसे जनककी पुत्री सीताको ले जाकर छः मास तक माताकी तरह पालन करनेके पश्चात् रामके बाणोंसे मारे जायँगे। राम भी वालीको मारकर सुग्रीवके साथ पत्थरोंसे समुद्रको बाँध तथा उस पार जाकर सीताको ले आयेंगे। पश्चात् प्राणप्रिया सीता तथा बन्धुओंके साथ राम तीर्थयात्रा, यज्ञ तथा विलास करते हुए सप्तद्वीपोंकी रक्षा करेंगे। हे राजन्! यह गोप्य बात किसीको न बतलाइएगा ॥ १११-११५ ॥ श्रीशिवजी बोले—हे पार्वती! इस प्रकार मुद्गलने रामका समस्त भावी चरित्र बता दिया ॥ ११६ ॥ इन सब बातोंको सुन तथा प्रसन्न होकर राजा दशरथने फिर पूछा कि मैं कौन था और मैंने कौनसे सुकृत किये थे कि जिससे साक्षात् भगवान् रामरूपमें मेरे पुत्र बने तथा साक्षात् लक्ष्मी सीता होकर मेरी पुत्रवधू बनीं। हे ब्रह्मन्! यह सब हाल मुझे कह सुनाइये ॥ ११७ ॥ ११८ ॥ यह सुनकर मुद्गल मुनि राजासे फिर कहने लगे। मुनि बोले—हे राजन्! सह्याद्रिपर करवीरपुरमें परम धर्मज्ञ धर्मदत्त नामसे विख्यात एक ब्राह्मण

CC0. In Public Domain. Kartikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वादशाक्षरविद्यायां जपनिष्ठोऽतिथिप्रियः। कदाचित्कार्तिके मासि हरिजागरणाय सः ॥१२१॥
रात्र्यां तुर्याविशेषायां जगाम हरिमंदिरम्। हरिपूजोपकरणान् प्रगृह्य व्रजता तदा ॥१२२॥
तेन दृष्टा समायाता राक्षसी भीमनिःस्वना। वक्रदंष्ट्रा ललज्जिह्वा निनग्ना रक्तलोचना ॥१२३॥
दिगंबरा शुष्कमांसा लंबोष्ठी घर्घरस्वना। तां दृष्ट्वा भयसंत्रस्तः कंपितावयवस्तदा ॥१२४॥
पूजोपकरणैः सर्वैः पयोभिश्चाहनद्बलात्। संस्मृत्य यद्धरेर्नाम तुलसीयुक्तवारिणा ॥१२५॥
सोऽहनद्वारिणा तस्मात्तत्पापं लयमागतम्। अथ संस्मृत्य सा पूर्वजन्मकर्मविपाकजम् ॥१२६॥
स्वां दशामब्रवीत्तीव्रं दंडवच्च प्रणम्य सा।

कलहोवाच

पूर्वकर्मविपाकेन दशामेतां गताऽस्म्यहम् ॥१२७॥
तत्कथं तु पुनर्विप्र याम्यहं गतिमुत्तमाम्।

मुद्गल उवाच

तां दृष्ट्वा प्रणतामार्तां वदमानां स्वकर्म च ॥१२८॥
अतीव विस्मितो विप्रस्तदा वचनमब्रवीत्।

धर्मदत्त उवाच

केन कर्मविपाकेन त्वं दशामीदृशीं गता ॥१२९॥
कुतः प्राप्ता च किंशीला तत्सर्वं विस्तराद्वद।

कलहोवाच

सौराष्ट्रनगरे ब्रह्मन् भिक्षुनामाऽभवद्द्विजः ॥१३०॥
तस्याहं गृहिणी ब्रह्मन् कलहाख्याऽतिनिष्ठुरा। न कदाचिन्मया भर्तुर्वचसाऽपि शुभं कृतम् ॥१३१॥
नार्पितं तस्य मिष्टान्नं भर्तुर्वचनभंगया। पाककाले मया नित्यं यद्यच्चान्नं मनोरमम् ॥१३२॥
तत्तत्पूर्वं स्वयं भुक्त्वा पश्चाद्भर्त्रे निवेदितम्। एकदा स पतिर्मित्रं मम वृत्तं न्यवेदयत् ॥१३३॥
नैव शृणोति मे पत्नी मद्वाक्यं किं करोम्यहम्। तेन श्रुत्वा तु सकलं क्षणं संचिन्त्य वै हृदि ॥१३४॥
उवाच मत्पतिं किंचिद्युक्तिं तां ते वदाम्यहम्। निषेधोक्त्या वदस्व त्वं गृहिणी सा करिष्यति ॥१३५॥

रहता था। वह विष्णुके व्रतोंको करनेवाला, भली भाँति विष्णुपूजामें रत, सदा बारह अक्षरके मन्त्र (ॐनमो भगवते वासुदेवाय) के जपमें निष्ठा रखनेवाला तथा अभ्यागतोंका प्रेमी था। एक बार वह कार्तिक में रात्रिजागरण करके चौथे पहर पूजाकी सामग्री लेकर हरिमन्दिरमें जा रहा था कि रास्तेमें सहसा उसने एक भयानक घरघर शब्द करती हुई, टेढ़े दाँतोंवाली, जीभको हिलाती, नितान्त नग्न, लाल नेत्रोंवाली, जिसके शरीरका सब मांस सूख गया था—ऐसी लम्बे होठों और नग्न शरीरवाली एक राक्षसीको आते देखा। उसको देखकर ब्राह्मण भयसे काँप उठा। तब वह समस्त पूजाकी सामग्री तथा जल आदि फेंक-फेंककर उसको मारने लगा। वह नारायणका नाम लेता हुआ उसके ऊपर तुलसीपत्र तथा जल फेंकता जाता था। बस, इसीसे अनायास उस राक्षसीके सब पाप धुल गये और उसको पूर्वजन्मके कर्मोंका स्मरण हो आया॥ ११६-१२६॥ तब वह ब्राह्मणको दंडवत् प्रणाम करके कहने लगी। कलहा बोली—हे विप्र! मैं पूर्वजन्मके कर्मोंके फलस्वरूप इस दशाको प्राप्त हुई हूँ। हे ब्रह्मन्! सौराष्ट्रनगरमें भिक्षुनामका एक ब्राह्मण रहता था। मैं उसकी कलहा नामकी बड़ी निष्ठुर स्त्री थी। मैंने कभी वचनसे भी पतिकी भलाई नहीं की॥ १२७-१३१॥ रसोईमें कभी मैं मिष्ठान बनाती तो पतिसे झूठा बहाना करके तथा उसकी बात टालकर मिठाई नहीं देती थी। भोजनके समय प्रतिदिन जो जो अच्छी चीज बनाती, पहिले उसको मैं खा लेती थी तब पतिको देती थी। एक दिन मेरे पतिने जाकर अपने एक मित्रसे कहा कि मेरी स्त्री मेरी बात नहीं मानती। मैं क्या करूँ? उसके

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तव वाक्येन कार्यादि यत्किंचित्तव वांछितम् । तथेति मित्रवाक्येन गृहमेत्य पतिर्मम ॥१३६॥
मामाह दयिते मा त्वं भोजनार्थं समाह्वय । मम मित्रं महद्दुष्टं तच्छ्रुत्वा स्वपतेर्वचः ॥१३७॥
तदा भर्ता मयोक्तः स मित्रं ते साधुसम्मतम् । समाह्वयाम्यशनार्थमद्यैव ब्राह्मणोत्तमम् ॥१३८॥
ततो मया समाहूतः स्वयं गत्वा पतेः सखा । तदारभ्य निषेधोक्त्या कार्यमाज्ञापयत्पतिः ॥१३९॥
एकदा स पितुर्दृष्ट्वा क्षयाहः स्वपतिर्मम । मामाह दयिते श्राद्धं न करिष्याम्यहं पितुः ॥१४०॥
तद्वाक्यं स्वपतेः श्रुत्वा मया विप्रा निमंत्रिताः । मया धिक् धिक् कृतो भर्ता कथं श्राद्धं करोषि न १४१॥
पुत्रधर्मं न जानासि का गतिस्ते भविष्यति । ततः पुनः स मामाह पक्वान्नमद्य मा कुरु ॥१४२॥
द्विजं निमंत्रयस्वैकं मा विस्तारं कुरु प्रिये । तत्तस्य वचनं श्रुत्वा मयाऽष्टादश भूसुराः ॥१४३॥
निमंत्रितास्तु श्राद्धार्थं पक्वान्नानि कृतानि हि । ततः पुनः स मामाह प्रिये शृणु वचो मम ॥१४४॥
मया सहादौ त्वं मिष्टं पाकं भुक्त्वा ततः परम् । स्वी ोच्छिष्टं त्वद्य विप्रान् परिवेषणमाचर ॥१४५॥
तन्मया कथित श्रुत्वा स पतिर्धिक्कृतः पुनः । कथमादौ स्वयं भुक्त्वा पश्चाद्विप्रान्समर्पयेत् ॥१४६॥
एवं सर्वं निषेधोक्त्या श्राद्धं चांगं चकार सः । पिंडदानादिकं कृत्वा मामाह स पतिः पुनः ॥१४७॥
अहश्चोपोषणं त्वद्य करिष्यामि न संशयः । तत्तस्य वचनं श्रुत्वा मिष्टान्नेन स भोजितः ॥१४८॥
ततो दैववशाद्भर्ता विस्मृत्य प्राह मां पुनः । नीत्वा पिंडान् क्षिपस्वाद्य सत्तीर्थे परमादरात् ॥१४९॥
ततो मया शौचकूपे नीत्वा पिंडा विसर्जिताः । ततः खिन्नमना विप्रो हाहेत्युक्त्वा स्थिरोऽभवत् १५०
क्षणं विचिंत्य मामाह पिंडान्मा त्वं बहिः कुरु । तदोत्तीर्य शौचकूपे मया पिंडा बहिः कृताः ॥१५१॥
ततः पुनः स मामाह पिंडान् तीर्थे क्षिपस्व मा । तदा तीर्थे मया क्षिप्तास्ते पिंडाः परमादरात् ॥१५२॥

मित्रने यह सुनकर मनमें विचार किया ॥ १३२-१३४ ॥ तदनन्तर उसने मेरे पतिसे जो कुछ कहा था, सो मैं कहती हूँ । उसने कहा—हे मित्र ! तुम अपनी स्त्रीसे उलटी बात कहा करो, तब वह तुम्हारे मना किये हुए कामको अवश्य करेगी और तुम्हारा अभीष्ट सिद्ध होगा । मित्रकी बात सुन तथा 'बहुत अच्छा' कहकर मेरा पति घरपर आया ॥ १३५ ॥ १३६ ॥ वह मुझसे कहने लगा–हे प्रिये ! मेरे मित्रको तुम कभी भोजनके लिये न बुलाया करो । वह बड़ा दुष्ट है । पतिके इस वचनको सुनकर मैंने कहा कि तुम्हारा मित्र ब्राह्मणोंमें श्रेष्ठ तथा बड़ा सज्जन है । उसको मैं आज ही भोजनके लिये बुलाती हूँ ॥ १३७ ॥ १३८ ॥ तब मैं स्वयं जाकर पतिके मित्रको बुला लायी । तबसे मेरा पति विपरीत कथनसे ही काम लेने लगा ॥ १३९ ॥ एक दिन मेरा पति अपने पिताकी मरणतिथि आनेपर कहने लगा—हे दयिते ! मैं आज अपने पिताका श्राद्ध नहीं करूँगा ॥ १४० ॥ यह सुनकर मैंने उसके कहनेके प्रतिकूल झटपट ब्राह्मणोंको निमंत्रण दे दिया और पतिसे कहा कि तुमको धिक्कार है, जो अपने पिताका श्राद्ध भी नहीं करते ॥ १४१ ॥ तुम पुत्रके धर्मको नहीं जानते । इसलिये न जाने तुम्हारी क्या गति होगी । तब उसने कहा कि यदि करना ही है तो केवल एक ब्राह्मणको निमंत्रण दे देना, अधिक बखेड़ा नहीं बढ़ाना । पकवान-मिठाई आदिमें व्यर्थ खर्च नहीं करना । यह सुनकर मैंने एक साथ अठारह ब्राह्मणोंको निमत्रण दे दिया । श्राद्धके लिए अनेक प्रकारके पकवान बनाये । फिर पतिने मुझसे कहा कि आज तुम पहले मेरे साथ मिष्टान्न भोजन करके बादमें अपना जूठा भोजन ब्राह्मणोंको परोसना ॥ १४२-१४५ ॥ यह सुनकर मैंने पतिको धिक्कारा और कहा कि तुमको धिक्कार है। पहले स्वयं खाकर पश्चात् ब्राह्मणोंको भोजन करानेके लिये कहते हो ? ॥ १४६ ॥ इस प्रकार विपरीत कथनसे पतिने मेरे द्वारा विधिवत् श्राद्ध करवाया। पिण्डदान आदि करके फिर उन्होंने मुझसे कहा—॥ १४७ ॥ मैं आज कुछ भी न खाकर उपवास करूँगा । यह सुनकर मैंने उन्हें खूब मिष्टान्न खिलाया ॥ १४८ ॥ बादमें दैववशात् भूलकर पतिने मुझसे कहा कि इन पिंडोंको ले जाकर प्रेमसे किसी पवित्र तीर्थके जलमें फेंक आओ ॥ १४९ ॥ यह सुनकर मैंने उन पिंडोंको ले जाकर पाखानेमें डाल दिया । यह देखा तो वह विप्र हाय-हाय करने लगा ॥ १५० ॥ क्षणभर सोचकर मुझसे कहा कि देखो, पाखानेसे पिंडोंको बाहर न निकालना । तब पौचकूपमें उतरकर मैंने उन पिंडोंको निकाल लिया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं मया कदा भर्तुर्वचनं न कृतं तदा । कलहप्रियया नित्यं मय्युद्विग्नमना यदा ॥१५३॥
परिणेतुं ततोऽन्यां वै मनश्चक्रे पतिर्मम । ततो गरं समादाय प्राणस्त्यक्तो मया द्विज ॥१५४॥
अथ बद्ध्वा वध्यमानां मां निन्युर्यमकिंकराः । यमश्च मां तदा दृष्ट्वा चित्रगुप्तमपृच्छत ॥१५५॥

यम उवाच

अनया किं कृतं कर्म फलं शुभमथाशुभम् । प्राप्नोत्येषा च तत्कर्म चित्रगुप्तावलोकय ॥१५६॥

कलहोवाच

चित्रगुप्तस्तदा वाक्यं भर्त्सयन्मामुवाच ह ।

चित्रगुप्त उवाच

अनया तु शुभं कर्म कृतं किंचिन्न विद्यते ॥१५७॥
मिष्ठान्नं भुज्यमानेयं न भर्तरि तदर्पितम् । अतश्च बगुलीयोन्यां स्वविष्ठादाऽत्र तिष्ठतु ॥१५८॥
पतिं द्वेष्टि सदा त्वेषा नित्यं कलहकारिणी । विष्ठादा शूकरीयोन्यां तस्मात्तिष्ठत्वियं यम ॥१५९॥
पाकभांडे सदा भुंक्ते गुप्तं चैका यतस्ततः । तस्माद्दोषाद्बिडालाऽस्तु स्वजातापत्यभक्षिणी ॥१६०॥
भर्तारमपि चोद्दिश्य ह्यात्मघातः कृतोऽनया । तस्मात्प्रेतशरीरेऽपि तिष्ठत्वेकाऽतिनिंदिता ॥१६१॥
अतश्चैषा मरुदेशे प्रापितव्या हरेर्भटैः । तत्र प्रेतशरीरस्था चिरं तिष्ठत्वियं ततः ॥१६२॥
ऊर्ध्वं योनित्रयं चैषा भुनक्त्वशुभकारिणी ।

कलहोवाच

ततो दूतैः प्रापिताऽहं मरुदेशं क्षणाद्द्विज ॥१६३॥
दत्त्वा प्रेतशरीरं मां गतास्ते स्वस्थलं प्रति । साऽहं पंचदशाब्दानि प्रेतदेहे स्थिता किल ॥१६४॥
क्षुत्तड्भ्यां पीडिताऽत्यर्थंदुःखिता स्वेन कर्मणा । ततः क्षुत्पीडिता नित्यं शरीरं वणिजस्त्वहम् ॥१६५॥
प्रविश्य दक्षिणे प्राप्ता कृष्णावेण्यास्तु संगमे । तत्तीरं संश्रिता यावत्तावत्तस्य शरीरतः ॥१६६॥
शिवविष्णुगणैर्दूरमपाकृष्टा बलादहम् । ततः क्षुत्क्षामया दृष्टो भ्रमंत्या त्वं मया द्विज ॥१६७॥

॥ १५१ ॥ फिर पतिने कहा—देखो, कहीं इनको किसी तीर्थमें न डालना । तब मैंने ले जाकर उन पिंडोंको बड़े आदरपूर्वक तीर्थजलमें डाल दिया ॥ १५२ ॥ इस तरह मुझ कलहप्रियाने जब कभी भी पतिका सीधी तौरपर कहा हुआ काम नहीं किया, तब दुःखित होकर उसने अपना दूसरा ब्याह करना निश्चित किया । हे द्विज ! तब मैंने जहर खाकर अपने प्राण त्याग दिये ॥ १५३ ॥ १५४॥ तब यमदूत मुझे बाँधकर यमराजके पास ले गये । यमराज मुझे देखकर चित्रगुप्तसे कहने लगे ॥ १५५ ॥ यमराजने कहा—चित्रगुप्त ! देखो, इसने अच्छा कर्म किया है या बुरा, जिससे इसको वैसा ही फल दिया जाय ॥ १५६ ॥ कलहा कहने लगी—यह सुनकर चित्रगुप्त मुझे धमकाते हुए कहने लगे कि इसने तो कोई अच्छा कर्म कभी किया नहीं । यह मिष्ठान्न बनाकर खाती थी, परन्तु अपने पतिको नहीं देती थी । इसलिये यह बगुलीकी योनिमें जाकर अपनी ही विष्ठा खानेवाली पक्षिणी बने । प्रतिदिन झगड़ा तथा पतिसे द्वेष करनेके कारण यह विष्ठा भक्षण करनेवाली सूकरयोनिमें पैदा हो । हे यम ! इधर-उधर छिपकर भोजन बनानेके पात्रमें अकेली ही खानेवाली यह बिल्ली बने ॥१५७–१६०॥ पतिके उद्देश्यसे इसने आत्मघात किया है । इस कारण यह अतिनिन्दित प्रेतयोनिमें अकेली रहे ॥ १६१ ॥ हे यम ! इसको दूतोंके द्वारा मरुप्रदेशमें भेज देना चाहिये । वहाँ जा तथा प्रेत बनकर यह बहुत काल पर्यन्त निवास करे ॥ १६२ ॥ यह पापिनी उपर्युक्त सभी योनियोंको भोगे । कलहा बोली—हे द्विज ! तब यमदूतोंने क्षण ही भरमें मुझे मरुदेशमें पहुँचा दिया ॥ १६३ ॥ वहाँ प्रेतयोनिमें डालकर वे अपने स्थानको चले गये । मैं पन्द्रह वर्ष तक प्रेतयोनिमें रही ॥ १६४ ॥ अपने किये हुये कर्मोके अनुसार मैं सदा भूख-प्याससे अत्यन्त दुःखिनी रहने लगी । इस प्रकार नित्य भूखसे पीडित हो एक बनियेकी देहमें पैठकर मैं दक्षिणमें कृष्णा-वेणीके संगमपर आयी । वहाँ आनेपर शिव तथा विष्णुके गणोंने मुझे बलपूर्वक उस बनियेके शरीरसे अलग करके दूर भगा दिया । तदनन्तर हे द्विज !

CC-0. In Public Domain. Vipin Kumar Sharma Rajasthani Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वद्धस्ततुलसीवारिसंस्पर्शाद्धतपातका । तत्कृपां कुरु विप्रेंद्र कथं मुक्ता भवाम्यहम् ॥१६८॥
योनित्रयादग्रभाव्यादस्माच्च प्रेतभावतः । मामुद्धर मुनिश्रेष्ठ त्वामहं शरणं गता ॥१६९॥
इत्थं निशम्य कलहावचनं द्विजश्च तत्पापकर्मभयविस्मयदुःखयुक्तः ।
तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वा चिरं सुवचनं निजगाद दुःखात् ॥१७०॥
इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकांडे वृन्दाशापकलहाख्यानं नाम चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः

(धर्मदत्त द्वारा कलहाका उद्धार)

धर्मदत्त उवाच

विलयं यांति पापानि तीर्थदानव्रतादिभिः । प्रेतदेहे स्थितायास्ते तेषु नैवाधिकारिता ॥१॥
त्वद्ग्लानिदर्शनादस्मात् खिन्नं च मम मानसम् । नैव निर्वृतिमायाति त्वामनुद्धृत्य दुःखिताम् ॥२॥
पातकं च तवात्युग्रं योनित्रयविपाकजम् । नैवाल्पैः क्षीयते पुण्यैः प्रेतत्वं चातिगर्हितम् ॥३॥
तस्मादाजन्मजनितं यन्मया कार्तिकव्रतम् । तत्पुण्यस्यार्धभागेन सद्गतिस्त्वमवाप्नुहि ॥४॥
कार्तिकव्रतपुण्येन न साम्यं यांति सर्वथा । यज्ञदानानि तीर्थानि व्रतान्यपि ततो ध्रुवम् ॥५॥

मुद्गल उवाच

इत्युक्त्वा धर्मदत्तोऽसौ यावत्तामभ्यषेचयत् । तुलसीमिश्रतोयेन श्रावयन् द्वादशाक्षरम् ॥ ६ ।
तावत्प्रेतत्वनिर्मुक्ता ज्वलदग्निशिखोपमा । दिव्यरूपधरा जाता लावण्येन यथोर्वशी ॥७॥
ततः सा दंडवद्भूमौ प्रणनाम यदा द्विजम् । उवाच सा तदा वाक्यं हर्षगद्गदभाषिणी ॥८॥

कलहोवाच

त्वत्प्रसादाद्द्विजश्रेष्ठ विमुक्ता निरयादहम् । पापाब्धौ मज्जमानायास्त्वं नौभूतोऽसि मे ध्रुवम् ॥९॥

भूखों मरती एवं भ्रमण करती हुई मैंने यहाँ तुमको देखा ॥ १६५-१६७ ॥ यहाँ तुम्हारे हाथके जल तथा तुलसीसे मेरे सब पाप दूर हो गये हैं। इस कारण हे विप्रेन्द्र ! अब ऐसी कृपा करो कि जिससे भावी तीन योनियोंसे मेरी मुक्ति हो जाय। हे मुनिश्रेष्ठ ! मैं तुम्हारी शरणमें आयी हूँ। तुम मेरा इस प्रेतयोनिसे भी उद्धार करो। ब्राह्मणने कलहाके वृत्तान्तको सुना तो उसके पापकर्मसे भय विस्मय तथा दुःखसे इस और उसकी इस ग्लानिपूर्ण दशाको देखकर कृपासे चञ्चलचित्त हो और बहुत देरतक सोचकर दुःखसे इस प्रकार सुन्दर वचन कहना आरम्भ किया ॥ १६८-१७० ॥ इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये 'ज्योत्स्ना' भाषाटीकायां सारकाण्डे वृन्दाशापकलहाख्यानं नाम चतुर्थः सर्गः ॥ ४ ॥

धर्मदत्त बोले—तीर्थ, दान तथा व्रतके द्वारा पाप क्षीण होते हैं, परन्तु प्रेतशरीरमें रहनेसे तुम्हारा उनपर अधिकार नहीं है ॥ १ ॥ तुम्हारी इस दुर्दशाको देखकर मेरा मन बहुत दुखी हो रहा है। जबतक तुम्हारा इस दुःखसे उद्धार न होगा, तबतक मुझको शान्ति नहीं मिलेगी ॥ २ ॥ यह नीच प्रेतत्व और तीन योनियोंको भोगानेवाला तुम्हारा महान् पाप साधारण पुण्योंसे क्षीण न होगा ॥ ३ ॥ इस कारण जन्मसे लेकर अबतक किये हुए अपने कार्तिकव्रतके पुण्यका आधा भाग मैं तुमको देता हूँ। उससे तुम सद्गतिको प्राप्त होओगी ॥ ४ ॥ कार्तिकव्रतके पुण्यके समान यज्ञ-दान-तीर्थ आदि कोई भी नहीं हो सकता। यह बात निश्चित है ॥ ५ ॥ मुनि मुद्गल कहने लगे-हे राजन् ! इतना कहकर धर्मदत्तने ज्यों ही उसके ऊपर तुलसीदल तथा जल छिड़ककर द्वादश अक्षरोंका मंत्र सुनाया। त्यों ही प्रेतयोनिसे मुक्त होकर वह जलती हुई अग्निकी लपटके समान दिव्य रूप धारण करके उर्वशीके सदृश सुन्दर स्त्री बन गयी ॥ ६ ॥ ७ ॥ तब वह ब्राह्मणके चरणोंको दण्डवत् प्रणाम करके सहर्ष गद्गद वाणीसे कहने लगी ॥ ८ ॥ कलहा बोली—हे द्विजोंमें श्रेष्ठ द्विज ! आपकी कृपासे मैं नरकमें जानेसे बच गयी। पापसमुद्रमें डूबती हुई मुझ पापिनीको बचाकर आपने

CC0. In Public Domain. Kirtikanth Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्गल उवाच

इत्थं सा वदती विप्रं ददर्शायांतमंबरात् । विमानं सुन्दरं युक्तं विष्णुरूपधरैर्गणैः ॥१०॥
अथ सा तद्विमानस्थैर्विमाने चाधिरोपिता । पुण्यशीलसुशीलाद्यैरप्सरोगणसेविता ॥११॥
तद्विमानं तदाऽपश्यद्धर्मदत्तः सविस्मयः । पपात दंडवद्भूमौ दृष्ट्वा तौ पुण्यरूपिणौ ॥१२॥
पुण्यशीलसुशीलौ च समुत्थाप्यानतं द्विजम् । समभ्यनन्दयन् वाणीं प्रोचतुर्धर्मसंयुताम् ॥१३॥

गणावूचतुः

साधु साधु द्विजश्रेष्ठ यस्त्वं विष्णुरतः सदा । दीनानुकंपी धर्मज्ञो विष्णुव्रतपरायणः ॥१४॥
आबालत्वात्त्वया ह्येतद्यत्कृतं कार्तिकव्रतम् । तव तस्यार्धदानेन पुण्यं द्वैगुण्यमागतम् ॥१५॥
त्वत्पुण्यस्यार्धभागेन यदस्याः पूर्वकर्मजम् । जन्मान्तरशतोद्भूतं पापं तद्विलयं गतम् ॥१६॥
स्नानैरेव गतं पापं यदस्याः पूर्वकर्मजम् । हरिजागरणाद्यैश्च विमानमिदमागतम् ॥ ७॥
वैकुण्ठं नीयते साधो नानाभोगयुता त्वियम् । दीपदानभवैः पुण्यैस्तैजसं रूपमाश्रिता ॥१८॥
तुलसीपूजनाद्यैश्च कार्तिकव्रतकैः शुभैः । विष्णुसान्निध्यगा जाता त्वया दत्तैः कृपानिधे ॥१९॥
त्वमप्यस्य भवस्यान्ते भार्यया सह यास्यसि। वैकुंठभुवनं विष्णोः सान्निध्यं च सरूपताम् ॥२०॥
ते धन्याः कृतपुण्यास्ते तेषां च सफलो भवः । यैर्भक्त्याऽऽराधितो विष्णुर्धर्मदत्त त्वया यथा ॥२१॥
सम्यगाराधितो विष्णुः किं न यच्छति देहिनाम्। औत्तानपादिर्येनैव ध्रुवत्वे स्थापितः पुरा ॥२२॥
यन्नामस्मरणादेव देहिनो यांति सद्गतिम् । ग्राहगृहीतो नागेन्द्रो यन्नामस्मरणात्पुरा ॥२३॥
विमुक्तः संनिधिं प्राप्तो जातोऽयं जयसंज्ञकः । ग्राहोऽयं विजयो नाम्ना श्रीविष्णोश्चिंतनादभूत् ।
यतस्त्वयाऽर्चितो विष्णुस्तत्सान्निध्यं प्रयास्यसि । बहून्यष्टसहस्राणि भार्याद्वययुतस्य ते ॥२५॥

नावका काम किया है ॥ ९ ॥ मुद्गल मुनि कहने लगे कि इस बातको कहते ही कहते उसने देखा कि आकाशमार्गसे विष्णुरूपधारी गणोंसे युक्त एक सुन्दर विमान उतर रहा है ॥ १० ॥ बादमें विमानमें बैठे हुए पुण्यशील तथा सुशील आदिने कलहाको विमानमें बैठा लिया और अप्सरायें उसकी सेवा करने लगीं ॥ ११ ॥ धर्मदत्तको वह विमान देखकर बड़ा आश्चर्य हुआ और उसने पुण्यात्मा तथा पुण्यशील सुशीलको देखकर उनके चरणोंमें दण्डवत् प्रणाम किया ॥ १२ ॥ उन दोनोंने भी उस विनम्र द्विजको खड़ा देख तथा अभिनन्दन करके धर्मयुक्त वाणीमें कहा ॥ १३ ॥ दोनों गण कहने लगे—हे द्विजश्रेष्ठ ! वाह-वाह, तुम धन्य हो । तुम दीनोंपर दया करते हो, धर्मको जानते हो और सदा विष्णुभक्तिमें रत रहते हुए विष्णुके व्रतमें तत्पर रहते हो ॥ १४ ॥ तुमने जो बचपनसे ही कार्तिकमासका व्रत करके आज उस पुण्यका आधा भाग दान दिया है, इससे तुम्हारा पुण्य दुगुना हो गया है ॥ १५ ॥ तुम्हारे आधे पुण्यसे इसके सैकड़ों जन्मके पापकर्मोंका नाश हो गया ॥ १६ ॥ तुम्हारे कराये हुए तुलसीदलयुक्त जलके स्नानसे ही इसके पूर्वमें किये हुए सब पाप दूर हो गये थे । अब विष्णु-जागरणके पुण्यसे इसके लिए यह विमान आया है ॥ १७ ॥ हे साधो ! तुम्हारे दीपदानके पुण्यसे इस तेजस्वी रूप धारण करनेवालीको हम विविध सुख भोगनेके लिए वैकुण्ठ ले जा रहे हैं ॥ १८ ॥ हे कृपानिधे ! तुम्हारे दिये हुए तुलसीपूजन तथा कार्तिकव्रतके पुण्यसे यह विष्णुभगवानके सांनिध्यको प्राप्त हुई है ॥ १९ ॥ तुम भी इस जन्मके अन्तमें स्त्रीसहित वैकुण्ठमें जाकर विष्णुके सांनिध्य तथा सरूपताको प्राप्त होओगे ॥ २० ॥ हे धर्मदत्त ! वे लोग धन्य हैं और बड़े धर्मात्मा तथा सफल जन्मवाले हैं, जिन्होंने कि तुम्हारी तरह विष्णुकी आराधना की है ॥ २१ ॥ भली भाँति पूजित विष्णुभगवान् मनुष्यको क्या नहीं देते ? जिन्होंने पूर्वसमयमें राजा उत्तानपादके पुत्रको ध्रुवपदपर स्थापित किया ॥ २२ ॥ जिनके नामस्मरणमात्रसे ही मनुष्य सद्गतिको प्राप्त हो जाता है । प्राचीन समयमें मगरसे पकड़ा गया गजेन्द्र जिनके नामका स्मरण करनेसे मुक्त होकर विष्णुके सांनिध्यको प्राप्त हुआ और जय नामका द्वारपाल बना । ग्राह भी विष्णुका चिन्तन करके विजय नामका द्वारपाल बना था ॥ २३ ॥ २४ ॥ इसी प्रकार तुमने भी विष्णुभगवान्का पूजन किया है।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः पुण्ये क्षयं प्राप्ते यदा यास्यसि भूतलम् । सूर्यवंशोद्भवो राजा विख्यानस्त्वं भविष्यसि ॥२६॥
नाम्ना दशरथस्तत्र भार्याद्वययुतः पुमान् । तृतीयेयं तदा भार्या पुण्यस्यैवार्धभागिनी ॥२७॥
कलहा कैकेयी नाम्नी भविष्यति न संशयः । तत्रापि तव सान्निध्यं विष्णुर्दास्यति भूतले ॥२८॥
आत्मानं तव पुत्रत्वं प्रकल्प्यामरकार्यकृत । रामनाम्ना रावणादीन् हत्वा राज्यं करिष्यति ॥२९॥
तवाजन्मव्रतादस्माद्विष्णुसंतुष्टिकारणात् । न यज्ञा न च दानानि न तीर्थान्यधिकानि वै ॥३०॥
अतस्त्वग्रेऽपि धर्मज्ञ नित्यं विष्णुव्रते स्थितः । त्यक्तमात्सर्यदंभोऽपि भव त्वं समदर्शनः ॥३१॥
कार्तिके माधवे माघे चैत्रे मासचतुष्टये । प्रत्यब्दं त्वं धर्मदत्त प्रातःस्नायी सदा भव ॥३२॥
एकादशीव्रते तिष्ठ तुलसीवनपालकः । ब्राह्मणानपि गाश्चापि वैष्णवांश्च सदा भज ॥३३॥
मसूरिकाश्चारनालं वृन्ताकादीनि खाद मा । एवं त्वमपि देहांते तद्विष्णोः परमं पदम् ॥३४॥
प्राप्नोषि धर्मदत्त त्वं तद्भक्त्यैव यथा वयम् । पुण्यशीलसुशीलाख्यौ जयश्च विजयस्तथा ॥३५॥

धन्योऽसि विप्राग्र्य यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः ।
यदर्धभागात्सफलान्मुरारेः प्रणीयतेऽस्माभिरियं सलोकताम् ॥३६॥

मुद्गल उवाच

इत्थं तौ धर्मदत्तं तमुपदिश्य विमानगौ । तया कलहया सार्द्धं वैकुण्ठभुवनं गतौ ॥३७॥
धर्मदत्तोऽप्यसौ राजन् प्रत्यब्दं तद्व्रते स्थितः । देहांते परमं स्थानं भार्याभ्यामन्वितोऽभ्यगात् ॥३८॥
बहून्यब्दसहस्राणि स्थित्वा वैकुण्ठसद्मनि । ततः पुण्यक्षये जाते जातोऽसि त्वं नृपो महान् ॥३९॥
त्रिभिः स्त्रीभिर्दशरथ ते विष्णुः पुत्रतां गतः । रामोऽयं लक्ष्मणः शेषो भरतोऽब्जोऽरिशत्रुहा ॥४०॥
एवं सर्वं मयाऽऽख्यातं यथा पृष्टं त्वया मम । धन्यस्त्वं यस्य तनयः साक्षान्नारायणोऽभवत् ॥४१॥

इसलिए तुम भी दोनों स्त्रियोंके साथ कई हजार वर्ष पर्यन्त उनके सांनिध्यको प्राप्त होओगे ॥ २५ ॥ तत्पश्चात् पुण्य क्षाण होनेपर जब तुम पुनः पृथ्वीपर आओगे, तब सूर्यवंशमें बड़े प्रख्यात राजा बनोगे ॥ २६ ॥ दोनों स्त्रियाँ तुम्हारे साथ रहेंगी और तुम श्रीमान् दशरथ नामके राजा बनोगे। उस समय यह आधे पुण्यकी भागिनी कलहा निःसन्देह कैकेयी नामकी तुम्हारी तीसरी स्त्री होगी। वहाँ पृथ्वीपर भी भगवान् सदा तुम्हारे सन्निकट रहेंगे ॥ २७ ॥ २८ ॥ वे प्रभु देवताओंका कार्य साधन करनेके लिए अपने आपको तुम्हारा पुत्र बनाएँगे तथा रामनाम धारण करके रावण आदिको मारकर राज्य करेंगे ॥ २९ ॥ विष्णुको प्रसन्न करनेवाले तुम्हारे जन्मसे लेकर किये हुए इस व्रतसे बढ़कर कोई यज्ञ, दान तथा तीर्थ आदि नहीं हैं ॥ ३० ॥ इस कारण आगे भी तुम धर्मज्ञ, नित्य विष्णुके व्रतमें स्थित और मात्सर्य-दम्भ आदिसे रहित होकर समदर्शी बनो ॥ ३१ ॥ हे धर्मदत्त ! प्रतिवर्ष कार्तिक, वैशाख, चैत तथा माघ इन चारों महीनोंमें प्रातःकाल स्नान करके तुम एकादशीका व्रत और तुलसीका पूजन करो। ब्राह्मण, गौ तथा विष्णुभक्तोंकी सेवामें तत्पर रहा करो ॥ ३२ ॥ ३३ ॥ मसूर, सौवीर तथा बैंगन आदिका खाना छोड़ दो। हे धर्मदत्त ! ऐसा करनेसे तुम भी जय-विजय तथा पुण्यशील-सुशील आदि हम लोगोंकी तरह विष्णुके उस परम पदको उनकी भक्ति मात्रसे ही प्राप्त होजाओगे ॥ ३४ ॥ ३५ ॥ हे ब्राह्मणश्रेष्ठ ! तुम धन्य हो, क्योंकि तुमने जगद्गुरु विष्णुको सन्तुष्ट करनेवाला यह व्रत किया है, जिसके अमोघ पुण्यभागके प्रभावसे हमलोग भी मुरारि भगवान्की सलोकताको (समानलोकको) प्राप्त हुए हैं ॥ ३६ ॥ मुद्गल बोले—इस प्रकार वे दोनों धर्मदत्तको उपदेश दे तथा विमानमें बैठकर कहलाके साथ वैकुण्ठधामको चले गये ॥ ३७ ॥ हे राजन् ! वह धर्मदत्त भी प्रतिवर्ष उस व्रतको करके देहान्त होनेके बाद दोनों स्त्रियोंके साथ परमपदको प्राप्त हुआ ॥ ३८ ॥ बहुत वर्षों पर्यन्त वैकुण्ठ-धाममें रहकर पुण्यक्षय होनेके बाद यहाँ आकर वही तुम इतने बड़े राजा बने हो ॥ ३९ ॥ तुम अपनी तीनों स्त्रियोंके साथ यहाँ आये। विष्णुभगवन् तुम्हारे पुत्र राम बने, शेष लक्ष्मण बने, ब्रह्मा भरत बने तथा चक्र शत्रुघ्न बना ॥ ४० ॥ जो तुमने पूछा था, वह सब मैंने तुमको कह सुनाया। तुम धन्य हो। क्योंकि साक्षात् नारायण तुम्हारे पुत्र हुए हैं ॥ ४१ ॥ श्रीशिवजी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्त्वा नृपतिं पूज्य विससर्ज मुनिस्तदा । आलिंग्य रामं सौमित्रिं मेने च कृतकृत्यताम् ॥४२॥
तदा राजा स्वसैन्येन महाहर्षसमन्वितः । अयोध्यामगमद्रम्यां गोपुराट्टालमंडिताम् ॥४३॥
नृपमागतमाज्ञाय मंत्रिणः पुरवासिनः । पताकातोरणाद्यैश्च दिव्यचंदनसेचनैः ॥४४॥
नगरीं भूषयित्वा ते नृत्यवाद्यादिमंगलैः । निन्युः कुटुम्बसहितं राजानं नगरीं प्रति ॥४५॥
राममागतमाज्ञाय गोपुराट्टालपंक्तिषु । कट्यां निधाय बालांश्च स्त्रियः स्थित्वा निजैः करैः । ४६॥
सुवर्णकुसुमाद्यैश्च ववर्षुः पुष्पवृष्टिभिः । काश्चिन्मार्गोपरि स्थित्वा कुंभदीपादिमंगलैः ॥४७॥
आर्तिक्याद्यैश्च राजानं सरामं शांतिकारकैः । पूजयंति स्म ताः सर्वा राजमार्गे पृथक् पृथक् ॥४८॥
एवं नानासमुत्साहैर्नर्तनैर्वारयोषिताम् । दुंदुभीनां निनादैश्च गायकानां च गायनैः ॥४९॥
सौधोद्भवगवाक्षैश्च स्त्रीमुक्तपुष्पवृष्टिभिः । ययौ स्वशिविरं राजा वीज्यमानः सुचामरैः ॥५०॥
ततस्तान् जनकामात्यान् वस्त्रालंकारवाहनैः । सत्कृत्य भोजनाद्यैश्च प्रेषयामास मैथिलम् ॥५१॥
एवं सर्वेषूत्सवेषु जनको वार्षिकेषु सः । निनाय मिथिलां राममातृभिः पार्थिवेन च ॥५२॥
उत्तरोत्तरतः पूज्य तोषयामास राघवम् । रामोऽपि रमयामास लीलाभिर्नृपतिं तदा ॥५३॥
मासैः षड्भिर्जनकजा लघ्वी श्रीराघवाच्छुभा । लग्नात्त्वेकादशे वर्षे रजोयुक्ता बभूव ह ॥५४॥
तद्वार्तां जनकः श्रुत्वा पत्नीभिर्मन्त्रिभिः सह । अयोध्यामगमच्छीघ्रं राजा प्रत्युज्जगाम तम् ॥५५॥
परस्परं समालिंग्य साकेतमिथिलाधिपौ । नृत्यवाद्यसमुत्साहैरयोध्यां विविशुः सुखम् ॥५६॥
ततो महासमुत्साहैर्नानामंडपतोरणैः । कदलीस्तंभमालाभिरिक्षुदंडैः सुचामरैः ॥५७॥
चतुर्द्वारमण्डपैश्च घंटाघोषैः सदर्पणैः । किंकिणीजालघोषैश्च वितानैर्दीपराजिभिः ॥५८॥

बोले कि ऐसा कहकर मुनिने राजाकी पूजा की और उन्हें विदा किया। राम-लक्ष्मणका आलिङ्गन करके उन्होंने अपनेको कृतकृत्य समझा ॥ ४२ ॥ तब राजा दशरथ अत्यन्त हर्षित अपनी सेनाके साथ पुरद्वार तथा अटारियोंसे सुशोभित रमणीक अयोध्यापुरीको गये ॥ ४३ ॥ राजाका आगमन सुनकर मन्त्रियों तथा पुरवासियोंने पताकाओं तथा तोरणोंसे नगरीको सजा तथा सड़कोंपर चन्दन छिड़कवाकर नृत्य और मांगलिक वाजे गाजेके साथ सकुटुम्ब राजाको नगरमें ले आये ॥ ४४ ॥ ४५ ॥ रामको आया जानकर स्त्रियें अपने बालकोंको कमरपर उठाकर पुरद्वार तथा अटारियोंकी पंक्तियोंपर जाकर खड़ी हो गयीं और अपने हाथसे उनपर सुवर्ण-कुसुमोंकी वृष्टि करने लगीं। कुछ स्त्रियाँ पानीसे भरा मांगलिक कलश और कुछ मांगलिक दीप लेकर रास्तेमें सामने खड़ी हो गयीं और कुछ राजमार्गमें जगह-जगह शान्तिकारी आरती आदिसे रामके सहित राजाकी पूजा करने लगीं ॥ ४६-४८ ॥ इस प्रकार अनेक उत्सवोंसे युक्त वेश्याओंके नृत्य तथा नगाड़ोंके शब्दों एवं गायकोंके गानोंके साथ महलोंके झरोखोंसे स्त्रियों द्वारा की गयी पुष्पवृष्टिसे आच्छादित तथा सुन्दर चमरोंसे वीज्यमान होते हुए राजा दशरथ अपने शिबिरमें गये ॥ ४९ ॥ ५० ॥ तदनन्तर वस्त्र, अलङ्कार, अश्व-गजादि वाहन तथा भोजन आदिसे राजा जनकके मन्त्रियोंका सत्कार करके उन्हें मिथिला भेज दिया ॥ ५१ ॥ इस प्रकार राजा जनक प्रत्येक वार्षिक उत्सवमें रामको उनकी माताओं तथा राजा दशरथको मिथिलापुरीमें बुलाते थे ॥ ५२ ॥ राजा जनक रामको सदा संतुष्ट रखनेकी चेष्टा करते थे। राम भी अनेक लीलाओं द्वारा राजाको आनन्दित करते थे। सुन्दरी तथा शुभा जानकी रामसे छः महीना छोटी थीं। विवाहके ग्यारहवें वर्षमें वे रजस्वला हुई ॥ ५३ ॥ ५४ ॥ यह समाचार सुनकर राजा जनक अपनी स्त्रियों तथा मन्त्रियोंके साथ अयोध्या गये। राजा दशरथने भी उनकी अगवानी की ॥ ५५ ॥ अयोध्यापति तथा मिथिलाधिपति दोनों परस्पर जी भरकर गले मिले। तदनन्तर नृत्य वाद्य आदि उत्सवपूर्वक सुखसे अयोध्यामें प्रविष्ट हुए ॥ ५६ ॥ पश्चात् विविध मण्डपों, तोरणों, केलेके स्तम्भों, पुष्पोंकी मालाओं, ईखके दण्डों, चामरों, चार दरवाजेवाले मण्डपों, घण्टा-घड़ियालके शब्दों, छोटी-छोटी घण्टियोंके समुदायके शब्दों, शीशों, चँदोवों तथा दीपपंक्तियों द्वारा

CC0. In Public Domain. Kirtikant Sharma Najafgarh, Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसिष्ठो मुनिभिः सार्द्धं गर्भाधानविधिं शुभम् । कारयामास रामेण सीतायाश्चातिहर्षितः ॥५९॥
तदा वस्त्रैरलंकारैर्जनको नृपतिं मुदा । पूजयामास सस्त्रीकं स्नुषापुत्रसमन्वितम् ॥६०॥
मासमेकमतिक्रस्य ययौ स्वनगरीं सुखम् । रामोऽपि सीतया सार्द्धं नानाभोगान्सुपुष्कलान् ॥६१॥
बुभुजे हेमरत्नादिनिर्मितेषु गृहेषु सः । रुक्ममंडनयुक्ताभिर्दासीभिर्वीजितः सुखम् ॥६२॥
एवं तासां नृपसुतपत्नीनां च पृथक् पृथक् । यथाकाले निधानेषु गर्भाधानादिकेषु च ॥६३॥
आगत्य जनकश्चक्रे नानोत्साहान्मुदान्वितः । अयोध्यानगरीमध्ये वाद्यघोषो गृहे गृहे ॥६४॥
मंगलानि च सर्वत्र न कुत्राप्यस्त्यमंगलम् । न दरिद्री ऋणी नासीन्नाधिव्याधिप्रपीडितः ॥६५॥
रामादिभिश्चतुर्भिस्तैर्बंधुभिस्तदनंतरम् । पृथग्गेहेषु भार्याभिर्गार्हस्थ्यमभ्यनुष्ठितम् ॥६६॥
रामः प्रातः समुत्थाय कृतशौचादिसत्क्रियः । आरुह्य शिबिकां दिव्यां स्नानार्थं सरयूं नदीम् ॥६७॥
गत्वा कूले वाहनादि विसृज्य रघुनंदनः । गच्छंस्तस्याः पावनार्थं सरय्वाः पुलिने मुदा ॥६८॥
मंत्रिभिर्वेष्टितो गत्वा नत्वा तां सरयूनदीम् । स्नात्वा नित्यविधिं कृत्वा ब्राह्मणैः परिवारितः ॥६९॥
दत्त्वा दानान्यनेकानि गोभूधान्यरसादिभिः । संपूज्य सरयूं पुण्यां ब्राह्मणान् पूज्य सादरम् ॥७०॥
ययौ रथं समारुह्य रुक्मबन्धनबंधितम् । रुक्मतंतुरज्जुभिश्च सर्वतः परिवेष्टितम् ॥७१॥
पट्टकूलादिवसनैर्वरै राच्छादितं शुभम् । वाजिवाहं सारथिना सुस्नातेन प्रचोदितम् ॥७२॥
किंकिणीवरमालाभिर्घंटाभिरतिगर्जितम् । रुक्मदंडधरैर्दूतैरग्रे दर्शितसत्पथम् ॥७३॥
पथि नीराजितः स्त्रीभिर्वर्षितः पुष्पवृष्टिभिः । प्राप स्वीयं गृहं रामः सूर्यकोटिसमप्रभम् ॥७४॥
अवरुह्य रथाद्रामः पादयोर्धृत्य पादुके । विवेश सीतासंदत्तपादार्घ्याचमनो गृहम् ॥७५॥
गत्वाऽग्निहोत्रशालायां सीतयाऽऽसनसंस्थितः । अग्निहोत्रादिविधिना वह्निं हुत्वा ततः परम् ॥७६॥

महान् उत्सवके साथ गुरु वसिष्ठने मुनियोंको साथ लेकर रामका सीताके साथ आनन्दपूर्वक शुभ गर्भाधान-संस्कार किया ॥ ५७–५९ ॥ तदनन्तर राजा जनकने स्त्रियों, पुत्रों तथा पुत्रवधुओं सहित राजा दशरथकी वस्त्र-अलङ्कार आदिसे प्रसन्नतापूर्वक पूजा की ॥ ६० ॥ इस प्रकार एक मास अयोध्यामें रहकर आनन्दसे वे अपने नगरको लौट गये। राम भी सीताके साथ सुवर्ण-रत्नों आदिसे निर्मित भवनोंमें अनेक प्रकारके भोगोंको भोगने लगे। उस समय सोनेके गहनोंसे सुशोभित दासियें पंखा झलती थीं ॥ ६१ ॥ ६२ ॥ इसी प्रकार प्रत्येक राजपुत्रकी स्त्रीके गर्भाधानसंस्कारमें आकर राजा जनकने विविध उत्सव किये और अयोध्या नगरीमें घर-घर बाजे बजे ॥ ६३ ॥ ६४ ॥ सारी अयोध्या मङ्गलमयी हो गयी। कहीं भी अमङ्गलका नाम न था। उस नगरीमें कोई दरिद्र, ऋणी, मानसिक तथा शारीरिक दुःखसे पीड़ित नहीं था ॥ ६५ ॥ पश्चात् राम आदि चारों भाई अपनी-अपनी स्त्रियोंके साथ अलग-अलग महलोंमें गृहस्थधर्मका पालन करने लगे ॥ ६६ ॥ राम प्रतिदिन प्रातः उठते तथा शौचादि कृत्यसे निवृत्त हो दिव्य पालकीपर सवार होकर स्नान करनेके लिए सरयू नदीपर जाते थे। सवारी आदिको किनारे छोड़ आनन्दसे सरयूको पवित्र करनेके लिये बालुकापर होते हुए वहाँ जाते थे ॥ ६७ ॥ ६८ ॥ मन्त्रियोंके सहित जाकर वे सरयू नदीको नमस्कार करके स्नान तथा नित्यकर्म करते और ब्राह्मणोंको गौ, भूमि, धान्य तथा सुवर्ण आदिका दान देकर पवित्र सरयू और ब्राह्मणोंकी सादर पूजा करते थे ॥ ६९ ॥ ७० ॥ तदनन्तर सोनेके बंधनोंसे बँधे हुए सुवर्णके तारकी रस्सियोंसे युक्त रेशम तथा मखमलके उत्तम वस्त्र द्वारा चारों ओरसे आच्छादित एवं सुन्दर सारथीसे प्रेरित अश्वोंवाले रथपर सवार होकर लौटते थे ॥ ७१ ॥ ७२ ॥ घुँघरूकी मालाओं तथा घण्टियोंके शब्दसे गर्जित उस रथके आगे सोनेकी छड़ियोंवाले छड़ीदार दौड़कर मार्ग दिखलाते चलते थे ॥ ७३ ॥ रास्तेमें स्त्रियों द्वारा पूजित तथा पुष्पवृष्टिसे आच्छादित राम करोड़ों सूर्योंके समान प्रभासम्पन्न अपने महलमें पधारते ॥७४॥ वहाँ रथसे उतरकर रामचन्द्र-जी खड़ाऊँ पहिनकर घरमें जाते। वहाँ सीताजी स्वयं उन्हें पाँव तथा हाथ-मुँह धोनेका जल देती थीं ॥ ७५ ॥ पश्चात् सीता समेत राम अग्निहोत्रशालामें जा तथा आसनपर बैठकर अग्निहोत्रकी विधिसे अग्निमें हवन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्फटिकस्य च लिंगस्य कर्ममार्गे यथाविधि । लोकानां शिक्षणार्थाय कृत्वा पूजनमुत्तमम् ॥७७॥
जानक्या दत्तपक्वान्ननैवेद्यादि समर्प्य च । ब्राह्मणान्पूज्य दानाद्यैस्तोष्य लब्ध्वा तदाशिषः ॥७८॥
तुलसीं च गुरुं धेनुमश्वत्थं मुनिपादपम् । पूजयित्वा रविं देवं ब्रह्मयज्ञं विधाय च ॥७९॥
गुरोर्मुखाच्च पौराणीं कथां श्रुत्वा तु सीतया । गुरुं पुनः प्रपूज्याथ बन्धुभिः परिवेष्टितः ॥८०॥
प्रार्थितश्च मुहुः पत्न्या ब्राह्मणैः परिवारितः । नारिकेलकपित्थाम्रसुलभाजम्बुदाडिमैः ॥८१॥
खर्जूरिकापनसाद्यैः पक्वान्नैर्घृतपाचितैः । उपाहारं सुखं कृत्वा तांबूलं परिगृह्य च ॥८२॥
दिव्यवस्त्राणि संगृह्य दृष्ट्वाऽऽदर्शे निजं मुखम् । निरीक्षितश्च वैदेह्याऽऽरुह्य स्यंदनमुत्तमम् ॥८३॥
वेष्टितो मंत्रिदूताद्यैस्तूर्यध्वनिपुरःसरम् । मातृगेहं ततो गत्वा ताः प्रणम्यावनिं गतः ॥८४॥
सव्यां प्रदक्षिणां कृत्वा गत्वा राजगृहं प्रति । सिंहासनस्थं राजानं नत्वा स्थित्वा तदाज्ञया ॥८५॥
पौरकार्याण्यनेकानि कृत्वा राज्ञा विसर्जितः । ययौ स्यंदनमास्थाय नृपं नत्वा पुनः पुनः ॥८६॥
तूर्यगीतनिनादैश्च नर्तनैर्वारयोषिताम् । ययौ स्वीयं गृहं रामः स्यंदनादवरुह्य च ॥८७॥
भूमिजादत्तपादार्घ्याचमनोयासनादिकम् । गृहीत्वा तद्बहिर्गत्वा कृतं तत्तां न्यवेदयत् ॥८८॥
सर्वं वृत्तं कौतुकेन हास्यगीतादिमंगलैः । रमयित्वा भूमिकन्यां दिव्यवस्त्रादिभूषिताम् ॥८९॥
ततो मध्याह्नसमये सरय्वां वाऽथ सद्मनि । स्नात्वा माध्याह्निकं कर्म चकार रघुनंदनः ॥९०॥
नित्यं यत्राकरोत्स्नानं सरयूनिर्मले जले । तदाख्ययाऽभवत्तीर्थं रामतीर्थमिति स्फुटम् ॥९१॥
तद्विख्यातं त्रिभुवने चैत्रमासि विशेषतः । माध्याह्निकं च संपाद्य ब्राह्मणैर्मन्त्रिभिर्जनैः ॥९२॥
इष्टैः सुवर्णपात्रेषु त्रिपदासु घृतेषु च । परिष्कृतेषु जानक्या सीतया गतिलाघवात् ॥९३॥
क्वणत्कंकणमंजीरकिंकिणीनूपुरादिषु । नदत्सु भोजनं चक्रे राघवो हर्षपूरितः ॥९४॥
करशुद्धिं विधायाथ भुक्त्वा ताम्बूलमुत्तमम् । ततः शतपदं गत्वा निद्रां कृत्वा तु सीतया ॥९५॥

करते थे ॥७६॥ लोगोंको कर्म करनेका यथार्थ उपदेश देनेके लिए वे स्फटिकके शिवलिङ्गका पूजन करते और सीताके दिये हुए पक्वान्नका नैवेद्य भोग लगाते थे। तदनन्तर ब्राह्मणोंकी पूजाकर तथा उन्हें दान आदिके द्वारा संतुष्ट करके उनसे अनेक आशीर्वाद लेते थे ॥७७॥७८॥ तदनन्तर तुलसी, गुरु, गौ, पीपल, शमी तथा सूर्यदेवकी पूजा और ब्रह्मयज्ञका विधान करके सीताके साथ गुरुमुखसे पुराणोंकी कथा सुनते थे। फिर गुरुकी पूजा करके पत्नीके प्रार्थना करनेपर ब्राह्मणों तथा बन्धुओंके साथ नारियल, कैथा, आम, सुलभा (शालपर्णी), जामुन, अनार, खजूर तथा कटहल आदि और घृतके पक्वान्न आनन्दसे खाकर पान खाते थे ॥ ७९-८२ ॥ तत्पश्चात् दिव्य वस्त्र धारण करके शीशेमें मुख देख वैदेहीके समक्ष उत्तम रथपर चढ़ तथा दूतों और मन्त्रियोंको साथ ले तुरही आदि बाजोंके साथ माताके महलमें जाते और भूमिपर लोटकर उन्हें प्रणाम करते थे ॥८३॥८४॥ फिर दाहिनी ओरसे प्रदक्षिणा करके राजा दशरथके महलमें जाते और वहाँ सिंहासनपर बैठे हुए राजाको प्रणाम करके उनकी आज्ञासे बैठ जाते थे ॥ ८५ ॥ तदनन्तर नगरसम्बन्धी अनेक कार्योंपर परामर्श करके राजा उनको लौटा देते थे। तब राम राजाको प्रणाम करते और रथपर सवार हो गाने-बजाने तथा नाचनेके शब्दोंको सुनते हुए महल जाते। वहाँ रथसे उतरकर घरमें जाते और सीताके हाथों प्राप्त जलसे पाँव-हाथ-मुँह आदि धोकर जो कुछ कार्य कर आते थे, वह सब सीताको कह सुनाते ॥ ८६-८८ ॥ पश्चात् दिव्य वस्त्रोंसे भूषित सीताको सुन्दर हास्य-गीत आदिके द्वारा प्रसन्न करते थे ॥ ८९ ॥ उसके बाद राम दोपहरको सरयू या घर ही में स्नान करके मध्याह्नके कृत्य करते थे ॥ ९० ॥ जिस जगह वे नित्यप्रति स्नान करते थे, उस स्थानका नाम रामतीर्थ पड़ गया ॥ ९१ ॥ तीनों लोकोंमें वह स्थान प्रसिद्ध हो गया। विशेष करके चैत्रमासमें उसका बड़ा माहात्म्य है। मध्याह्नकृत्य करनेके बाद ब्राह्मणों, मन्त्रियों तथा मित्रजनोंके साथ तिपाइयोंपर रक्खे हुए सुन्दर परिष्कृत सुवर्णपात्रोंमें मन्दगतिवाली तथा जिनके अङ्ग-प्रत्यङ्गमें कंकण, झांझर, नूपुर और करधनी आदि गहने बज रहे थे, ऐसी सीताके साथ रघुपति राम हर्षपूर्वक भोजन करते थे ॥ ९२-९४ ॥ पश्चात् हाथ धो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुनर्वस्त्राणि संगृह्य लब्ध्वा शस्त्राणि सादरम् । धनुर्बाणौ करे धृत्वा रथे स्थित्वाऽथ बंधुभिः ॥९६॥
पुष्पारामोद्यानकादीन् दृष्ट्वा तु कौतुकेन च । वाद्यघोषैर्नर्तनाद्यैर्गत्वा स्वीयं गृहं पुनः ॥९७॥
सायंसंध्यादि संपाद्य पुनर्हुत्वा सविस्तरम् । शंभुं भक्त्या पुनः पूज्य कृत्वा चैवोपहारकम् ॥९८॥
रत्नकांचनमाणिक्यनिर्मिते मंचके वरे । दिव्यप्रासादमध्ये स सीतया रघुनायकः ॥९९॥
हास्यगीतविनोदाद्यैर्निद्रां चक्रे ततः परम् । एवं नानासमुत्साहैर्निनायार्कसमाः सुखम् ॥१००॥
एकदा राघवं राजा ज्ञात्वा मुद्गलवाक्यतः । वसिष्ठवाक्यतश्चापि चरित्रैश्चाप्यमानुषः ॥१०१॥
साक्षान्नारायणं विष्णुं मत्वाहूय रहः स्थितः । पप्रच्छ विनयेनैव हृदि भावं विधाय च ॥१०२॥
राम नारायणस्त्वं हि भूभारहरणाय च । मत्तो जातोऽसीति लोका वदंत्यज्ञानबुद्धयः ॥१०३॥
अतः पृच्छामि ते राम मायया मोहितस्तव । किंचिज्ज्ञानोपदेशेन नाशयाज्ञानजां मतिम् ॥१०४॥
दारापत्यादिगेहेषु स्थिता नैवोपशाम्यति । तत्पितुर्वचनं श्रुत्वा राजानं राघवोऽब्रवीत् ॥१०५॥

श्रीराम उवाच

शृणु राजन् प्रवक्ष्यामि तव ज्ञानार्थमुत्तमम् । शृणोतु मम मातेयं कौसल्याऽपि तव प्रिया ॥१०६॥
नश्वरं भासते चैतद्विश्वं मायोद्भवं नृप । यथा शुक्तौ रौप्यभासः काचभूम्यां जलस्य च ॥१०७॥
यथा रज्जौ सर्पभासो मृगतोये जलस्पृहा । तद्वदात्मनि भासोऽयं कल्प्यते नश्वरोऽबुधैः ॥१०८॥
अज्ञानदृष्टिभिर्नित्यं मन्यते न तु पंडितैः । आत्मा शुद्धो निर्व्यलीकः सच्चिदानंदलक्षणः ॥१०९॥
यस्यांशांशेन विश्वेशा ब्रह्माद्याः सकला वयम् । स्थित्युत्पत्तिविनाशार्थं नानारूपाणि मायया ॥११०॥
धार्यंते नटवद्राजन्न तेष्वासक्त एव सः । यथा पद्मं न स्पृशति जलं मायां तथा मलः ॥१११॥
आत्मा नित्यो न स्पृशति परमानंदविग्रहः । देहागारसुतस्त्रीषु मामकेति च या मतिः ॥११२॥

तथा ताम्बूल खाकर सौ पग टहलनेके बाद सीताके साथ आराम करते थे ॥ ९५ ॥ फिर वस्त्र पहिन तथा दोनों हाथोंमें धनुष-बाण लेकर बन्धुओंके साथ रथपर सवार होकर पुष्पित बाग-बगीचोंको देखते, आनन्द-पूर्वक गायन सुनते तथा नाच देखते हुए पुनः अपने घर आ सायंसंध्यादि नित्य कर्म करते और यथा-विधि हवन करके भक्तिसे शिवजीकी पूजा करते थे। सायंकालको भोजन करके रत्नकांचन तथा माणिक्यके सुन्दर पलंगपर दिव्य महलमें सीताके साथ हास्य-गीत तथा विनोदपूर्वक शयन करते थे। इस प्रकार आनन्दसे सुखपूर्वक बारह वर्ष बीत गये ॥ ९६-१०० ॥ एक समय मुनि मुद्गल तथा गुरु वसिष्ठके वाक्योंसे और रामके दैवी चरित्रोंको देख राजा दशरथने रामको साक्षात् नारायण समझकर एकान्तमें बुलाया और भक्तिभाव तथा विनयपूर्वक कहने लगे-॥ १०१ ॥ १०२ ॥ हे राम ! तुम साक्षात् नारायण हो। तुमने भूमिका भार हरण करनेके लिए मेरे घर अवतार लिया है। ऐसा अज्ञानयुक्त बुद्धिवाले लोग कहते हैं। इस कारण हे राम ! तुम्हारी मायासे मोहित मैं प्रार्थना करता हूँ कि तुम ज्ञानका उपदेश देकर मेरा अज्ञान दूर कर दो ॥ १०३ ॥ १०४ ॥ स्त्री-पुत्र तथा गृह आदिमें अनुरक्त मेरी बुद्धि कभी शान्ति तथा सुखका अनुभव नहीं करती। पिताके इस वचनको सुनकर राम राजा दशरथसे बोले ॥ १०५ ॥ श्रीरामने कहा — हे राजन् ! मैं आपको ज्ञानलाभके लिए उत्तम उपदेश देता हूँ। उसे आप तथा आपकी प्राणप्रिया और मेरी माता कौसल्या भी ध्यानसे सुनें ॥ १०६ । हे नृप ! मायासे उत्पन्न यह समस्त संसार आत्मामें उसी प्रकार झूठा भासित होता है जैसे कि सीपीमें चाँदी, रेतीमें जल, रस्सीमें साँप तथा मृगमरीचिकामें सलिल भासित होता है। अज्ञानी लोग इस आभासको भी नित्य तथा अनश्वर समझते हैं। परन्तु पण्डित लोग तो इससे विपरीत ही मानते हैं। उनके मतमें आत्मा शुद्ध, नित्य तथा सच्चिदानन्दस्वरूप है ॥ १०७ ॥ १०८ ॥ उसके अंशमात्रसे समस्त विश्वके स्वामी ब्रह्मादि तथा हम सब प्राणी मायाके अधीन होकर जगत्की स्थिति उत्पत्ति तथा विनाशके लिये नटकी तरह विविध रूपोंको धारण करते हैं। किन्तु आत्मा स्वयं किसीमें आसक्त नहीं होता। जिस प्रकार कमल-पत्र जलका स्पर्श नहीं करता, उसी प्रकार अमल, नित्य और परम आनन्दस्वरूप आत्मा भी मायासे निर्लिप्त

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उपसंहृत्य बुद्‌ध्वा संन्यस्य ब्रह्मणि चिद्घने । यद्यत्किंचिद्भासतेऽत्र तत्तन्नारायणात्मकम् ॥११३॥
पश्य त्वं सर्वभावेन मुच्यसे भवसंकटात् । सत्यं शौचं दया शांतिः क्षमा चेंद्रियनिग्रहः ॥११४॥
अहिंसा भगवद्भक्तिर्वेदमार्गानुवर्तनम् । इत्याद्या ये गुणा राजन् तान् भजस्व निरंतरम् ॥११५॥
चौर्यं द्यूतं विवादं च मात्सर्यं दंभमेव च । क्रौर्यं लोभं भयं क्रोधं शोकं निंद्यप्रवर्तनम् ॥११६॥
वेदविप्रयतीनां च साधूनां मानभंजनम् । निंदां पैशुन्यमनिशं त्यज दूरं स्वतो नृप ॥११७॥
पूर्वं त्वया तपस्तप्तं पुत्रत्वं याचितं मम । तस्माज्जातोस्मि त्वत्तोऽहं कौसल्यायांनृपोत्तम ११८॥
यन्मया कथितं चैतदज्ञानमलनाशनम् । गोपनीयं प्रयत्नेन कथनीयं न कुत्रचित् ॥११९॥
तद्रामवचनं श्रुत्वा गतमायामलो नृपः । सद्भावपरिपूर्णस्तु रोमांचितवपुर्धरः ॥१२०॥
प्रणनाम राघवस्य चरणौ दृढभावतः । ततो रामः पुनः प्राह पितरं निर्मलाशयम् ॥१२१॥
नेदं योग्यं त्वया राजन् वंदनादि शिशुं प्रति । मायया नरवेषस्य मम उपहासकारणम् ॥१२२॥
मनसैव च मां नित्यं भज भावेन सादरम् । मच्चित्तो मद्गतप्राणो मयि भक्तिं दृढां कुरु ॥१२३॥
इत्युक्त्वा पितरौ नत्वा गृहीत्वाज्ञां तयोः प्रभुः । ययौ रथसमारूढः श्रीरामः स्वनिकेतनम् ॥१२४॥
कदा मातुर्गृहं गत्वा सीतया भोजनं व्यवधात् । कदा भ्रातृगृहेष्वेव कदा पंक्तौ पितुः स्वयम् ॥१२५॥
कदा दशरथं तातं भोजनार्थं निजे गृहे । भार्यापुत्रादिभिर्युक्तं पौरैर्विप्रैः समन्वितम् ॥१२६॥
मुदा रामः समाहूय भोजयामास सादरम् । श्रीरामदर्शनार्थं ते तपोवननिवासिनः ॥१२७॥
अयोध्यानगरीमेत्य द्वारपैरनिषेधिताः । शतशः प्रत्यहं रामं दृष्ट्वा स्तुत्वा पुनः पुनः ॥१२८॥
आतिथ्यं रघुनाथस्य गृहीत्वा तुष्टमानसाः । सप्तपंचदिनान्येव स्थित्वा पुण्यकथादिभिः ॥१२९॥
रमयित्वा रमानाथं जग्मुः स्वं स्वं वराश्रमम् । यत्र यत्र हि रामस्य प्रीतिं ज्ञात्वा विदेहजा ॥१३०॥

रहती है। देह-गेह-पुत्र-स्त्री आदिपरसे ममता हटाकर अथवा संन्यास भावके द्वारा समस्त भावनाओंको छोड़कर यह जो दृश्यमान संसार है, उसको चिद्घन ब्रह्मसे अभिन्न नारायणस्वरूप जान तथा उसी ईश्वरको सर्वत्र व्याप्त देखकर आप इस भवसङ्कटसे मुक्त हो जायँगे। हे राजन्! पहले आप सत्यभाषण, पवित्रता, दया, शान्ति, क्षमा, इन्द्रियनिग्रह, अहिंसा, भगवद्भक्ति तथा वेदोक्त मार्गके अनुवर्तन आदि गुणोंको निरन्तर धारण करें ॥ १०९–११५ ॥ हे नृप! चोरी, जुआ, ईर्ष्या, पाखण्ड, क्रूरता, लोभ, भय, क्रोध, शोक, निन्दनीय काममें प्रवृत्ति, वेद-विप्र-साधु-संन्यासी आदिका मानभङ्ग, निन्दा और चुगलखोरी आदिको अपने दिलसे दूर कर दें ॥ ११६ ॥ ११७ ॥ हे नृप! आपने पूर्वकालमें तप करके मुझको पुत्ररूपसे माँगा था। इसी कारण मैं आपके द्वारा कौसल्याके गर्भसे पुत्ररूपमें जायमान हुआ हूँ ॥ ११८ । यह जो मैंने आपको अज्ञानरूपी मल नष्ट करनेवाला उपदेश दिया है, उसे आप अपने मनमें ही रखियेगा—किसीसे कहिएगा नहीं ॥ ११९ ॥ रामके इस उपदेशको सुनते ही राजाके मनसे मायाकृत मोह दूर हो गया और सद्भावसे परिपूर्ण तथा रोमांचित शरीर होकर दृढ़ भक्तिभावसे राजा दशरथने रामके चरणोंकी वन्दना की। इस प्रकार निर्मल हृदयवाले पितासे राम फिर कहने लगे - ॥ १२० ॥ १२१ ॥ हे राजन्! पुत्रको प्रणाम करना आपको उचित नहीं है। मायासे मनुष्यदेहधारी मेरा इससे उपहास होगा। इस कारण आप सदा आदरभावसे मनमें ही मेरा भजन किया करें। मन तथा प्राणको मुझे अर्पण करके मेरी दृढ़ भक्ति करें ॥ १२२ ॥ ऐसा कह तथा माता-पिताकी आज्ञा लेकर श्रीरामने उनको नमस्कार किया और रथपर सवार होकर अपने भवनको चले गये ॥ १२४ ॥ वे सीताके साथ कभी माताके महलमें जाकर भोजन करते, कभी भाइयोंके भवनमें और कभी पिताके साथ पंक्तिमें बैठकर भोजन करते थे। कभी स्त्रियों पुत्रों ब्राह्मणों तथा नागरिकोंके साथ पिता दशरथको अपने भवनमें बुलाकर सादर हर्षपूर्वक भोजन कराते थे। प्रतिदिन सैकड़ोंकी संख्यामें वनवासी मुनिजन भी श्रीरामचन्द्रका दर्शन करनेके लिये अयोध्या आते रहते थे। वे विना रोकटोक भीतर जाकर रामका दर्शन तथा स्तुति करते और रामके द्वारा किये हुए सत्कारको ग्रहण करके प्रसन्नतापूर्वक पाँच-सात दिन वहाँ रहकर अपने-अपने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्तच्चकार सा साध्वी हास्यक्रीडासनादिकम् । विवाहानन्तरं रामः समा द्वादश सीतया ॥१३१॥
रमयामास साकेते महाक्रीडापुरःसरम् । सहस्रवर्षैर्विज्ञेयं श्रेष्ठं वर्षं कृते युगे ॥१३२॥
शतवर्षैश्च त्रेतायां द्वापरे दशवर्षजम् । कलेर्मानेन बोद्धव्यं शून्यहासात्त्रिविक्रमात् ॥१३३॥
एवं श्रीरामचंद्रेण भोगा भुक्ताः सुरोपमाः । यस्मिन् ऋतौ च यद्द्रव्यं फलपुष्पादिकं शुभम् ॥१३४॥
तत्सर्वं सर्वदैवासीद्रामे साकेतसंस्थिते । अनावृष्टिर्न वै कुत्र तस्कराणां भयं न हि ॥१३५॥
हिंसादीनां भयं नासीदयोध्याविषये प्रिये । युधाजिन्नाम कैकेयीभ्राता भरतमातुलः ॥१३६॥
निनाय भरतं स्वीयराज्ये शत्रुघ्नसंयुतम् । कौतुकेन नृपं पृष्ट्वा कैकेयीं प्रणिपत्य च ॥१३७॥
एवं रामस्य मांगल्यं बालत्वेऽपि सुखावहम् । ये शृण्वंति नरा भक्त्या न तेषामस्त्यमंगलम् ॥१३८॥
एवं यथा त्वया पृष्टं तथा सर्वं मयोदितम् । रामेणाचरितं यच्च नृणां मांगल्यदायकम् ॥ ३९॥
एवं गिरींद्रजे प्रोक्तं बाललीलादिकौतुकम् । रामचंद्रस्य संक्षेपात्तव प्रीत्यै सुखावहम् ॥१४०॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे
रामदिनचर्यावर्णनं नाम पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः

(रामका दण्डकवनमें प्रवेश)

श्रीशिव उवाच

एवं त्रेतायुगे रामं नगर्यां सीतया सुखम् । क्रीडंतं नारदोऽर्केब्दे ययावाकाशवर्त्मना ॥१॥
अथ रामो मुनिं पूज्य सीतया लक्ष्मणेन च । शुश्राव वचनं तस्य सुरैर्विज्ञापितं च यत् ॥२॥
निहत्य रावणं युद्धे ततो राज्यं कुरुष्व हि । अंगीकृत्य रघुश्रेष्ठस्तं मुनिं च व्यसर्जयत् ॥३॥
अथ रामोऽब्रवीत्सीतां मम राज्याभिषेचनम् । कर्तुकामोऽस्ति तत्राहं विघ्नमुत्पाद्य दंडकम् ॥४॥

अश्रमको चले जाते थे । जो काम करनेसे राम प्रसन्न होते थे, पतिव्रता सीता उन-उन हस्य-क्रीडा तथा आसनादिका विधान करती थीं । विवाहके बाद रामने बारह वर्ष तक सीताके साथ अयोध्यामें आनन्द-पूर्वक विलास किया । कलियुगके हजार वर्षोंके बराबर सत्ययुगका एक वर्ष जानना चाहिये । कलियुगके सौ वर्षोंके बराबर त्रेतायुगका एक वर्ष और कलियुगके बारह वर्षके बराबर द्वापरका एक वर्ष होता है ॥१२५-१३३॥ इस प्रकार श्रीरामचन्द्रने बारह बर्ष तक देवताओंके योग्य भोगोंको भोगा । रामचन्द्रजीके अयोध्यामें रहते समय जिस ऋतुमें जो पुष्प-फल आदि होना चाहिए, वह सब नियमसे उत्पन्न हुआ करते थे । कभी अनावृष्टि नहीं हुई और चोरोंका भय नहीं रहा । हे प्रिये पार्वती ! उस राज्यमें कभी किसीको हिंसक पशुओंका भय नहीं हुआ । एक दिन युधाजित् नामक कैकेयीका भाई तथा भरतका मामा वहां आया और राजासे पूछ तथा कैकेयीको मनाकर शत्रुघ्नसहित भरतको अपने राज्यमें ले गया । ॥ १३४-१३७ ॥ बाल्यावस्थामें ही मङ्गलस्वरूप तथा सुखदायक रामके चरित्रको जो मनुष्य भक्तिभावसे सुनता है, उसका कभी अमङ्गल नहीं होता ॥ १३८ ॥ इस प्रकार मनुष्यमात्रके लिए कल्याणकारी श्रीरामचन्द्रका चरित्र मैंने तुमको कह सुनाया ॥ १३९॥ १४० ॥ इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये बालचरित्रे भाषाटीकायां सारकाण्डे रामदिनचर्यावर्णनं नाम पञ्चमः सर्गः ॥ ५ ॥

श्रीशिवजी बोले—इस तरह अयोध्यानगरीमें सुखपूर्वक सीताके साथ कीडा करते हुए रामके पास बारहवें वर्षमें एक दिन आकाशमार्गसे नारद मुनि पधारे ॥ १ ॥ सीता तथा लक्ष्मणके साथ रामने मुनिकी पूजा की और उनके मुखसे देवताओंका यह संदेश सुना कि आप पहले रावणको मारकर पश्चात् राज्य करें । रघुश्रेष्ठ रामने भी 'बहुत अच्छा' कहकर उन्हें विदा किया ॥ २ ॥ ३ ॥ तदनन्तर राम सीतासे कहने लगे-हे सीते !

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गच्छामि रावणादीनां वधार्थं लक्ष्मणेन च । अयोध्यायां वसात्र त्वं कौसल्यां पार्थिवं भज ॥५॥
तद्रामवचनं श्रुत्वा प्रणिपत्य रघूत्तमम् । उवाच मधुरं वाक्यं वनं मां त्वं नय प्रभो ॥६॥
कारणान्यत्र वै त्रीणि संति तानि वदाम्यहम् । भवत्वद्य प्रयाणं मे दंडकं हि त्वया सह ॥७॥
वनप्रयाणं मामाह भर्त्रा स सत्यवाग्द्विजः । बालत्वे कररेखां मे दृष्ट्वा कश्चिद्द्विजाग्रणीः ॥८॥
अन्यत्स्वयंवरे पूर्वं सुरानपि मयोदितम् । यदा चापांतिकं प्राप्तः सज्जितुं त्वं सभांगणे ॥९॥
चतुर्दश वत्सराणि मुनिवृत्त्यनुवर्तिनी । विचरिष्याम्यरण्येऽहं धनुः सज्जं करोत्वयम् ॥१०॥
तत्सत्यं कुरु मद्वाक्यं प्रयाणाद्दंडकं त्वया । अन्यच्छ्रुतं मया पूर्वं रामायणमनुत्तमम् ॥११॥
तत्र सीतां विना रामो न गतोऽस्ति हि दंडकम् । तस्मात्त्वं मां रघुश्रेष्ठ दंडकं नेतुमर्हसि ॥१२॥
तत्सीतावचनं श्रुत्वा तथास्त्विति वचोऽब्रवीत् । विहस्य राघवः श्रीमान् समालिंग्य विदेहजाम् ॥१३॥
अथ राजा दशरथः श्रीरामस्याभिषेचनम् । यौवराज्यपदे कर्तुमुद्युक्तः प्राह वै गुरुम् ॥१४॥
यौवराज्यपदे राममभिषेक्तुं त्वमर्हसि । तद्राजवचनं श्रुत्वा गुरुर्दशरथं नृपम् ॥१५॥
कौसल्यागृहमानीय बोधयामास वै रहः । राजन् शृणु त्वं कौसल्यासुमित्रे शृणुतं त्विमे ॥१६॥
रावणस्य वधार्थं हि रामः श्वो दंडकं वनम् । गमिष्यति लक्ष्मणेन सीतया कैकयीवरात् ॥१७॥
तस्मात्त्वमज्ञवत्तूष्णीं संभारानभिषेचितुम् । कारयस्व सुमंत्रेण समाहूय नृपादिकान् ॥१८॥
श्रीरामविरहाद्राजन् ब्राह्मणस्यापि शापतः । अचिरादेव स्वर्लोकं त्वं गमिष्यसि पार्थिव ॥१९॥
कौसल्येयं रामराज्योत्सवं पश्यतु वै पुनः । अंतरिक्षाद्विमानस्थस्त्वं पश्यसि महोत्सवम् ॥२०॥
दुर्लंघ्या भाविनी रेखा ब्रह्मादीनां नृपोत्तम । इति श्रुत्वा गुरोर्वाक्यं तेन राजा सभां ययौ ॥२१॥
रामराज्याभिषेकाय संभारानकरोन्मुदा । दूतैराकारयामास नृपान् दशरथस्तदा ॥२२॥

पिताजी मेरा राज्याभिषेक करना चाहते हैं, परन्तु मैंने उसमें विघ्न खड़ा करके रावण आदिको मारनेके लिए लक्ष्मणके साथ दण्डकारण्य जानेकी तैयारी की है। तुम यहीं रहकर माता कौसल्याकी और महाराजकी सेवा करना ॥ ४ ॥ ५ ॥ रामका यह वचन सुनकर सीता रघूत्तम रामके चरणोंपर गिर पड़ीं और यह मधुर वचन बोलीं—हे प्रभो ! मुझे भी अपने साथ वनको ले चलिए ॥ ६ ॥ इसमें तीन कारण हैं। उन्हें मैं बताती हूँ। एक तो यह कि बाल्यावस्थामें मेरे हाथकी रेखा देखकर एक ब्राह्मणश्रेष्ठने कहा था कि तुम अपने पतिके साथ वनवास करोगी। सो आपके साथ वनमें जानेसे उस ब्राह्मणकी बात सत्य हो जायगी ॥ ७ ॥ ८ ॥ दूसरा कारण यह है कि जब आप सभाके बीच स्वयम्वरके समय धनुष चढ़ाने चले थे। तब मैंने देवताओंसे प्रार्थना की थी—हे देवताओं ! यदि राम धनुष चढ़ा लें तो मैं चौदह वर्ष तक मुनिवृत्ति धारण करके वनमें विचरण करूँगी ॥ ९ ॥ १० ॥ अतएव आप मुझे वनमें ले जाकर मेरी प्रतिज्ञाको भी सच्ची बनाएँ। तीसरा कारण यह है कि मैंने सर्वोत्तम रामायण-महाग्रंथमें यह सुना है कि सीताके बिना राम अकेले कभी वनमें नहीं गये। सो आपको मुझे दण्रकारण्यमें साथ ले चलना चाहिये ॥ ११ ॥ १२ ॥ सीताके वचन सुनकर रामने उनका आलिङ्गन करके "तथास्तु" कहा ॥ १३ ॥ इधर राजा दशरथने रामका युवराजपदपर अभिषेक करनेका निश्चय करके गुरु वसिष्ठसे कहा कि आप श्रीरामका युवराजपदपर अभिषेक करें। इस बातको सुनकर वे राजा दशरथको कौसल्याके भवनमें ले आये और एकान्तमें कहने लगे—॥ १४-१६ ॥ हे राजन् ! आप तथा ये कौसल्या और सुमित्रा मेरे कथनको सुनें। राम कैकेयीके वरसे सीता तथा लक्ष्मणको साथ लेकर रावणको मारनेके लिए कल ही दण्डकवन चले जायँगे ॥ १७ ॥ इसलिये अनजानकी तरह आप चुपचाप रामका अभिषेक करनेके लिए सुमन्त्रको कहकर सब सामग्री मँगवाइए और समस्त राजाओंको निमन्त्रित करिए ॥ १८ ॥ हे पार्थिव ! श्रीरामके विरह तथा ब्राह्मणके शापसे आप शीघ्र स्वर्ग सिधारेंगे ॥ १९ ॥ बादमें कौसल्या रामके राज्योत्सवकी देखेगी और स्वर्गीय विमानमें बैठकर आप अन्तरिक्षसे वह उत्सव देखेंगे ॥ २० ॥ हे नृपोत्तम ! भविष्यकी रेखा ब्रह्मादिकोंके लिए भी दुर्लंघनीय होती है। गुरु वसिष्ठका यह वचन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषीश्वराः समाजग्मुर्नानाश्रमनिवासिनः । नगरीं शोभायामासुर्दूताश्चित्रध्वजोत्तमैः ॥२३॥
पताकाभिस्तोरणैश्चैव हेमकुम्भैर्मनोरमैः । गुरुराज्ञापयामास सुमंत्रं नृपमंत्रिणम् ॥२४॥
श्वः प्रभाते मध्यकक्षे कन्यकाः स्वर्णभूषिताः । तिष्ठन्तु षोडश गजाः स्वर्णरत्नादिभूषिताः ॥२५॥
चतुर्दन्तः समायातु ऐरावतकुलोद्भवः । नानातीर्थोदकैः पूर्णाः स्वर्णकुम्भाः सहस्रशः ॥२६॥
स्थाप्यतां तत्र वैय्याघ्रचर्माणि त्रीणि वा नव । श्वेतच्छत्रं रत्नदंडं मुक्तामणिविराजितम् ॥२७॥
दिव्यमाल्यानि वस्त्राणिदिव्यान्याभरणानि च । मुनयः संस्कृतास्तत्र तिष्ठन्तु कुशपाणयः ॥२८॥
नर्तक्यो वारमुख्याश्च गायका वैदिकास्तथा । नानावादित्रकुशला वादयंतु नृपांगणे ॥२९॥
हस्त्यश्वरथपादाता बहिस्तिष्ठंतु सायुधाः । नगरे यानि तिष्ठंति देवतायतनानि च ॥३०॥
तेषु प्रवर्ततां पूजा नानाबलिभिरादृताः । राजानः शीघ्रमायान्तु नानोपायनपाणयः ॥३१॥
इत्यादिश्य वसिष्ठस्तु रथेन रघुनन्दनम् । गत्वा सम्मानितस्तेन सर्वं वृत्तं न्यवेदयत् ॥३२॥
निमित्तमात्रस्त्वं राम श्वो गमिष्यसि दंडकान् । चतुर्दश समास्तत्र स्थित्वा संहृत्य रावणम् ॥३३॥
बंधुना सीतया सार्धं ततो राज्यं करिष्यसि । लौकिकीं वृत्तिमालंब्य स्वीकुरुष्व पितुर्वचः ॥३४॥
अद्य त्वं सीतया सार्धमुपवासं यथाविधि । कृत्वा शुचिर्भूमिशायी भव राम जितेंद्रियः ॥३५॥
इत्युक्त्वा रथमारुह्य दृष्ट्वा रामं सलक्ष्मणम् । जानकीं चापि स गुरुर्ययौ राजगृहं पुनः ॥३६॥
कौसल्या च सुमित्रा च रामराज्याभिषेचनम् । मृषाऽपि श्रुत्वा श्रीगुरोरास्यात्स्नेहसमन्विते ॥३७॥
चक्रतुः पूजनं देव्यास्तद्विघ्नोपशमस्पृहे । बलिदानैः शांतिपाठैर्मुनिवृंदसमन्विते ॥३८॥
अथापराह्णे सौधस्था दास्याः पुत्री तु मंथरा । शोभितां नगरीं दृष्ट्वा पृष्ट्वा वृद्धां पथि स्थिताम् ॥३९॥

सुनकर राजा दशरथ सभामें गये ॥ २१ ॥ वहा मन्त्रीसे रामके राज्याभिषेकके वास्ते सब सामग्री जुटवायी और प्रसन्नतापूर्वक दूतोंको भेजकर राजाओंको बुलवाया ॥ २२ ॥ उस समय आश्रमोंमें रहनेवाले अनेक ऋषीश्वर भी वहाँ आ पहुँचे । दूतोंने चित्र-विचित्र ध्वजा, पताका और तोरणोंसे नगरीको सजाया । स्थान-स्थानपर उत्तम तथा मनोहर सुवर्णके कलश स्थापित किये गये । गुरु वसिष्ठने मन्त्री सुमन्त्रको आज्ञा दी कि कल सबेरे ही सुवर्णके अलङ्कारोंसे अलंकृत कन्यायें और चार-चार दाँतोंवाले ऐरावत कुलमें उत्पन्न सुवर्ण तथा रत्नों आदिसे अलंकृत सोलह हाथी मध्यकक्षमें उपस्थित रहने चाहियें । वहाँ अनेक तीर्थोंके जलसे परिपूर्ण स्वर्णकुम्भ ॥ २३–२६ ॥ तीन या नौ बाघम्बर, मोती और मणियोंसे सुशोभित रत्नजटित दण्डवाले श्वेत छत्र, चमर, सुन्दर मालायें, सुन्दर वस्त्र तथा दिव्य आभूषण भी तैयार रहें। स्नान आदि संस्कारोंसे संस्कृत मुनिजन हाथमें कुशा लिये हुए तैयार रहें ॥ २७ ॥ २८ ॥ नर्तकियें, वेश्यायें, गायक, वेदघोष करनेवाले विप्र तथा नाना प्रकार बाजा बजानेमें कुशल शिल्पी मिलकर राजमहलके सामने गाना-बजाना प्रारम्भ कर दें ॥ २९ ॥ हाथी, घोड़े, रथ और पैदल सेना शस्त्र धारण करके बाहर खड़ी रहे । नगरमें जहाँ-जहाँ देवालय हैं, वहाँ-वहां अनेक सामग्रियोंसे प्रेमपूर्वक पूजा की जाय और सब राजे भेंट ले-लेकर उपस्थित हों ॥ ३० ॥ ३१ ॥ इतना कहकर वसिष्ठ रथपर सवार हुए और रघुनन्दन रामके पास गये । रामने उनको आदरपूर्वक आसन दिया। तब मुनि ने उन्हें सब वृत्तान्त सुनाते हुए कहा—॥ ३२ ॥ हे राम ! तुम निमित्तमात्र हो । कल तुम दण्डकवनको चले आओगे । वहाँ चौदह वर्ष रहकर रावणको मारोगे । उसके पश्चत् भाई लक्ष्मण तथा सीताके साथ प्रसन्नतापूर्वक राज्य करोगे । अतएव लोकव्यवहार निभानेके लिए पिताके वचनको मान लो ॥ ३३ ॥ ३४ ॥ आज तुम सीताके साथ पवित्रतापूर्वक विधिवत् ब्रह्मचर्यसे रहो और पृथ्वीपर शयन करो ॥ ३५ ॥ ऐसा कह और राम-लक्ष्मण तथा सीतासे मिलकर गुरुदेव रथपर सवार हुए और वहाँसे राजमहलको चल दिये ॥ ३६ ॥ तदनन्तर कौसल्या और सुमित्रा गुरुदेवके मुखसे रामके राज्याभिषेकको झूठा सुनकर भी स्नेहवश विघ्नोंकी शांतिकी इच्छासे मुनियोंको साथ लेकर पूजाद्रव्यों तथा शांतिपाठोंसे देवीका पूजन करने लगीं ॥ ३७ ॥ ३८ ॥ दोपहरके समय छतपर खड़ी दासीपुत्री मंथराने नगरको सुशोभित देखकर रास्तेकी एक बुढ़ियासे इसका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रुत्वा श्रीरामराज्यार्थं ययौ वेगेन कैकयीम् । सर्वं वृत्तं निवेद्याथ तूष्णीमासीत्तदा क्षणम् ॥४०॥
तच्छ्रुत्वा कैकयी चापि तस्यै भूषणमर्पयत् । एतस्मिन्नंतरे वाण्या देववाक्यात्सुमोहिता ॥४१॥
तुष्टां दृष्ट्वा तु कैकेयीं भर्त्सयंत्याह तां पुनः । मूढे कथं त्वं तुष्टाऽसि हतभाग्याऽसि वेद्म्यहम् ॥४२॥
रामे राज्यपदं प्राप्ते कौसल्यायाश्च कैकयि । दासी भविष्यसि त्वं हि अतो मद्वचनं कुरु ॥४३॥
वरेण न्यासभूतेन राज्यं श्रीभरताय हि । नृपं प्रार्थय रामस्य द्वितीयेन वरेण च ॥४४॥
दंडकारण्यगमनं चतुर्दश समाः पदा । क्रोधागारं प्रविश्याद्य कुरुष्व यन्मयेरितम् ॥४५॥
तन्मंथरोक्तं स्वहितं मत्वा सापि तथाऽकरोत् । मोहिता साऽविवेकेन श्रीराघवसुरेच्छया ॥४६॥
ततो निशायां राज्ञा सा ज्ञाता क्रोधगृहस्थिता । गत्वा तत्र नृपः शीघ्रं ददर्श कैकयीं तदा ॥४७॥
विकीर्यमाणकेशां तां त्यक्ताऽलंकारमंडनाम् । भूमौ शयानां तां दृष्ट्वा ज्ञात्वा तस्या मनोगतम् ॥४८॥
रामाय दंडकारण्यं यौवराज्यं सुताय च । वराभ्यां याचितं ज्ञात्वा हेत्युक्त्वा मूर्च्छितोऽभवत् ॥४९॥
प्रभाते तत्सुमंत्रेण वृत्तं श्रुत्वा नृपं ययौ । कैकेयी मंत्रिणा पृष्टा सुमंत्रं प्राह सा तदा ॥५०॥
अत्रानयस्व श्रीरामं द्रष्टुं तं वांछते नृपः । सोऽप्याह रामं नृपतिमपृष्ट्वा नानयाम्यहम् ॥५१॥
तदा शनैर्नृपः प्राह शीघ्रमानय राघवम् । सुमंत्रोऽप्यानयामास राघवं पार्थिवाज्ञया ॥५२॥
ततो रामो नृपं गत्वा श्रुत्वा कैकेयजागिरा । आत्मानं दंडके वासं वरदानं पितुः पुरा ॥५३॥
तथेत्यंगीचकाराथ नृपं वचनमब्रवीत् । मा ते शोकोऽस्तु हे तात ह्यहं गच्छामि दंडकान् ॥५४॥
तद्रामवचनं श्रुत्वा हाहेत्युक्त्वा नृपोऽब्रवीत् । मां विहाय कथं घोरं विपिनं गन्तुमिच्छसि ॥५५॥
तस्य तद्वचनं श्रुत्वा सांत्वयामास राघवः । अहं प्रतिज्ञां निस्तीर्य शीघ्रं यास्यामि ते पुराम् ॥५६॥

कारण पूछा ॥ ३९ ॥ उसके मुखसे रामके राज्याभिषेककी बात सुनकर वह शीघ्र कैकेयीके पास गयी और सब वृत्तान्त सुनाकर क्षण भर चुपचाप खड़ी रही ॥ ४० ॥ उसकी बात सुनकर कैकेयीने उसको अपना एक आभूषण दे दिया। इतनेमें देवताओंकी प्रेरणा तथा सरस्वतीसे मोहित मंथरा कैकेयीको प्रसन्न देखकर उसे डराती हुई कहने लगी—अरे मूढ़े ! रामके राज्याभिषेकका समाचार सुनकर तू प्रसन्न क्यों हुई ? ऐसा ज्ञात होता है कि तेरा भाग्य तुझसे रूठ गया है। यदि रामको राज्य मिल गया तो ओ कैकेयी ! तुझे कौसल्याकी दासी बनना पड़ेगा। इस कारण जो मैं कहूँ, वैसा कर ॥ ४१ ॥ ४२ ॥ अपने पति राजा दशरथके पास धरोहर रक्खें दो वरोंमेंसे एकके द्वारा तू भरतके लिये राज्य माँग और दूसरे वरके द्वारा चौदह वर्षके लिए रामका पैदल दण्डकारण्यगमन माँग। तू अभी कोपभवनमें चली जा ॥ ४३–४५ ॥ उसने भी श्रीरामचन्द्र तथा देवताओंकी इच्छासे और अविवेकके कारण मोहित मन्थराके उस कथनको अपना हितकारक समझकर वैसा ही किया ॥ ४६ ॥ सायंकालके समय जब राजाको ज्ञात हुआ कि कैकेयी कोपभवनमें है, तब वे उसके पास गये और देखा कि कैकेयी सिरके बाल खोले, भूषण तथा वस्त्रोंको फेंककर धरतीपर पड़ी हुई है। पश्चात् जब राजा दशरथने उसके अभिप्रायको जाना तो उसके कथनानुसार दो वरोंमेंसे एकके द्वारा रामको दण्डकारण्यवास और दूसरेके द्वारा भरतको यौवराज्य देनेकी बात स्वीकार करके मूर्छित हो गये ॥ ४७–४९ ॥ प्रातःकाल मंत्री सुमंत्र इस वृत्तान्तको सुनकर राजाके पास गये। सुमन्त्रके पूछनेपर कैकेयीने कहा-- ॥ ५० ॥ राजा रामको देखना चाहते हैं। जाओ, उन्हें यहाँ बुला लाओ। सुमन्त्रने कहा कि राजासे बिना पूछे मैं रामको यहाँ नहीं ले आ सकता ॥ ५१ ॥ तब राजाने धीरेसे कहा कि 'रामको शीघ्र ले आओ।' सुमंत्र भी महाराजकी आज्ञासे शीघ्र रामको ले आये ॥ ५२ ॥ रामने राजाके पास आकर कैकेयीकी वाणीसे अपने दण्डकारण्यवास तथा पिताका पूर्वकालमें वरदान देनेका हाल सुना तो "तथास्तु" कहकर स्वीकार किया। उन्होंने राजासे कहा--हे तात ! आप शोक न करें, मैं अभी दण्डकारण्य जाता हूँ ॥ ५३ ॥ ५४ ॥ रामका वचन सुनकर राजा दशरथ कहने लगे-- हे राम ! मुझको छोड़कर तुम वनमें कैसे जाओगे ? ॥ ५५ ॥ पिताके इस करुण वचनको सुनकर राम उन्हें

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदानीं गंतुमिच्छामि व्येतु मातुश्च हृच्छयः । मातरं च समाश्वास्य ह्यनुनीय च जानकीम् ।।५७।।
आगत्य पादौ वंदित्वा तव यास्ये सुखं वनम् । इत्युक्त्वा तौ परिक्रम्य मातरं द्रष्टुमाययौ ।।५८।।
नत्वा स्वमातरं रामः समाश्वास्य पुनः पुनः । नत्वा प्रदक्षिणाः कृत्वा तामामंत्र्य ययौ गृहम् ।।५९।।
सर्वं वृत्तं तु सीतां स कथयामास राघवः । सीतया लक्ष्मणेनापि वनं गंतुं पुनः पुनः ।।६०।।
प्रार्थितश्च तथेत्युक्त्वा त्वरयामास राघवः । सर्वस्वं ब्राह्मणान्दत्त्वा सीतयाऽग्निसमन्वितः ।।६१।।
पद्भ्यामेव शनैर्भ्रात्रा ययौ रामो नृपान्तिकम् । गच्छंतं पथि श्रीरामं पद्भ्यां दृष्ट्वा पुरौकसः ।।६२।।
परस्परेण ते वृत्तं श्रुत्वा व्याकुलमानसाः । बभूवुस्तान्वामदेवः कथयामास सादरात् ।६३।।
नारदागमनं रामप्रतिज्ञां रावणस्य च । वधादिकं सविस्तारं विष्णुं मनुजरूपिणम् ।।६४।।
पौराः श्रुत्वा गतक्लेशा ह्यभूवन्पथि संस्थिताः । ततो नत्वा नृपं रामः कैकेयीं वाक्यमब्रवीत् ।।६५।।
अम्बागतोऽहं विपिनं गंतुमाज्ञां ददस्व माम् । ततः सा वल्कलादीनि ददौ रामादिकांस्तदा ।।६६।।
रामस्तान् परिधायाथ स्वयं सीतामशिक्षयत् । तद्दृष्ट्वा कैकेयीं प्राह गुरुः क्रोधेन भर्त्सयन् ।।६७।।
जडे पापिनि दुर्वृत्ते राम एव त्वया वृतः । वनवासाय दुष्टे त्वं सीतायै किं प्रदास्यसि ।।६८।।
इत्युक्त्वा दिव्यवस्त्राणि सीतायै स गुरुर्ददौ । राजा दशरथोऽप्याह सुमंत्रं रथमानय ।।६९।।
रथमारुह्य गच्छन्तु वनं वनचरप्रियाः । रामः प्रदक्षिणं कृत्वा पितरौ रथमारुहत् ।।७०।।
सीतया लक्ष्मणेनाथ चोदयामास सारथिम् । कौसल्यां च सुमित्रां च तातमाश्वास्य वै पुनः ।।७१।।
समाश्वास्य जनान् रामस्तमसातीरमाययौ । माघमासे सिते पक्षे पंचम्यां परमेऽहनि ।।७२।।
प्राप्ते ह्यष्टादशे वर्षे राघवाय महात्मने । आसीनद्वनप्रयाणं हि स्वपुर्यास्तमसातटम् ।।७३।।

सांत्वना देते हुए बोले कि मैं आपकी प्रतिज्ञा पूरी करके शीघ्र पुरीमें लौट जाऊँगा ।। ५६ ।। परन्तु इस समय तो मैं जाना ही चाहता हूँ। जिससे कि माता कैकेयीके हृदयका शोक दूर हो सके। माताको आश्वासन दे तथा सोताको समझाकर मैं आ रहा हूँ। तब आपके चरणोंको प्रणाम करके सुखसे वनको प्रस्थान करूँगा। यह कहकर राम उन दोनोंकी परिक्रमा करके दर्शन करनेके लिये माता कौसल्याके पास गये ।। ५७ ।। ५८ ।। माताको नमस्कार करनेके बाद बारम्बार समझा तथा प्रदक्षिणा करके उनकी आज्ञासे अपने महलमें गये ।। ५९ ।। वहाँ जाकर श्रीरामने सीताको समस्त वृत्तान्त कह सुनाया। जब सीता और लक्ष्मण बारम्बार अपने साथ वनमें ले चलनेकी प्राथना की, तब 'अच्छा' कह तथा शीघ्र ब्राह्मणोंको सर्वस्व दान देकर सीता तथा अग्निको साथ लेकर भाई लक्ष्मणके साथ पैदल ही राजाके पास आये। रास्तेमें पुरवासीजन रामको पैदल आते देख तथा एक दूसरेसे सब वृत्तान्त जानकर बड़े चिन्तातुर हुए। तब वामदेव मुनिने प्रेमसे उन लोगोंको नारदका आगमन, रामकी प्रतिज्ञा, रावणका वध तथा विष्णुका मनुष्यरूप धारण करना आदि वृत्तान्त विस्तारसे कह सुनाया ।। ६०-६४ ।। रास्तेमें खड़े पुरवासीजन उनकी यह बात सुनकर शान्त हो गये। रामने राजाके पास जा तथा उन्हें नमस्कार करके कैकेयीसे कहा—।। ६५ ।। हे अम्ब ! मैं वन जानेके लिए तैयार हो गया हूँ। आप मुझे आज्ञा दें। तब उसने राम, सीता तथा लक्ष्मणको पहिननेके लिये वल्कल वसन दिये ।। ६६ ।। राम स्वयं उन्हें पहिनकर सीताको बल्कल पहिनना सिखलाने लगे। यह देखकर मुनि वसिष्ठ क्रुद्ध होकर कैकेयीको धमकाते हुए कहने लगे—।। ६७ ।। ओ जड़े ! अरी पापिनि ! अयि दुर्वृत्ते ! तूने केवल रामके वनवासका वर माँगा है। तब सीताको पहिननेके लिये बल्कल क्यों देती है ? ।। ६८ ।। यह कहकर सीताके लिए गुरुने दिव्य वस्त्र दिये। राजा दशरथ बोले—हे सुमन्त्र ! रथ ले आओ। उस रथपर सवार होकर वनचरोंके प्रिय ये तीनों वनको जायँगे। बादमें रामने माता-पिताकी प्रदक्षिणा की और सीता तथा लक्ष्मणको साथ लेकर रथपर सवार हुए। तब सारथीको रथ चलानेकी आज्ञा दी। कौसल्या, सुमित्रा, पिता तथा अन्य जनोंको आश्वासन देकर राम चल पड़े और शीघ्र ही तमसा नदीके तीरपर जा पहुँचे। अठारहवें वर्षके माघ शुक्ल वसन्तपञ्चमीकी शुभ तिथिको महात्मा रामने अपने नगरसे चलकर तमसाके किनारेकी ओर प्रयाण किया था

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इंद्राद्या निर्जराश्चक्रुस्तदा तन्मार्गसत्क्रियाम् । आसन् शुभाश्च शकुना रामस्य व्रजतो वनम् ॥७४॥
उषित्वैकां निशां तत्र शृंगबेरपुरं ययौ । गुहेन मानितश्चापि तत्र रात्रिं निनाय सः ॥७५॥
गुहानीतैर्वटक्षीरैर्बबंध राघवो जटाम् । प्रभाते सीतयाऽऽरुह्य नौकायां लक्ष्मणेन सः ॥७६॥
प्रेषयामास सरथं सुमंत्रं नगरीं प्रति । गुहस्तां वाहयामास नौकां स्वज्ञातिभिस्तदा ॥७७॥
गंगामध्यगतां गंगां प्रार्थयामास जानकी । देवि गंगे नमस्तेऽस्तु निवृत्ता वनवासतः ॥७८॥
रामेण सहिताऽहं त्वां लक्ष्मणेन च पूजये । सुरामांसोपहारैश्च नानाबलिभिरादृता ॥७९॥
इत्युक्त्वा परकूलं तु गत्वा रामो गुहं तदा । विसर्जयित्वा तत्रैकां निशां नीत्वा शनैः शनैः ॥८०॥
भारद्वाजाश्रमं गत्वा तस्थौ तेनातिमानितः । ततः प्रयागे यमुनां तीर्त्वा गत्वा महावनम् ॥८१॥
वाल्मीकेराश्रमं गत्वा तस्थौ तेनातिपूजितः । चित्रकूटे लक्ष्मणेन पर्णशालां मनोरमाम् ॥८२॥
कृत्वा मांसैर्मृगोद्भूतैर्बलिं दत्त्वा रघूत्तमः । तस्थौ तस्यां सुखं भ्रात्रा सीतया स्वगृहं यथा ॥८३॥
शयनासनपाकाग्निदेवादीनां पृथक् पृथक् । तत्रासन्विविधाः शालास्तरुवल्लिविराजिताः ॥८४॥
कंदैर्मूलैर्वनोद्भूतैर्मृगमांसफलादिभिः । मुनीश्वराणामातिथ्यं चक्रुस्ते स्वगृहे यथा ॥८५॥
एकदा निद्रितं रामं सीतांके सन्निरीक्ष्य च । ऐन्द्रः काकस्तदागत्य नखैस्तुंडेन चासकृत् ॥८६॥
सीतांगुष्ठं मृदु रक्तं विददारामिषाशया । निद्राभंगभयाद्भर्तुः सीतया न निवारितः ॥८७॥
सीतांगुष्ठं तु काकेन भिन्नं दृष्ट्वा रघूत्तमः । अभिद्रवंतं रक्तास्यमीषिकास्त्रं मुमोच सः ॥८८॥
केनाप्यरक्षितस्यास्त्रभयाद्ब्रह्मांडगोलके । स्वशरणमागतस्यास्य पुनर्नारदवाक्यतः ॥८९॥
ईषिकास्त्रेण काकस्य बिभेद नयनं क्षणात् । एवं नानाकौतुकानि कुर्वंस्तस्थौ सुखं प्रभुः ॥९०॥

॥ ६९-७३ ॥ उस समय इन्द्रादि देवताओंने मार्गमें उनका सत्कार किया। वनमें जाते हुए रामको अनेक शुभ शकुन दीखे ॥ ७४ ॥ वे वहाँ एक रात्रि निवास करके शृङ्गबेरपुर गये। वहाँ निषादराजके द्वारा सम्मानित होकर उस रातको वहीं बिताया ॥ ७५ ॥ सबेरे रामने निषादके द्वारा लाये हुए वटवृक्षके दूधसे जटा बाँधी। तदनन्तर सीता तथा लक्ष्मणके साथ नौकापर सवार हुए ॥ ७६ ॥ वहाँसे रथसहित सुमन्त्रको अयोध्या लौटा दिया। तब निषादराजने स्वयं अपने जातिवालोंके साथ मिलकर नावको खेना आरम्भ किया ॥ ७७ ॥ जानकीने बीच धारामें जाकर गङ्गाजीकी प्रार्थना की और कहा—हे देवि गंगे ! आपको नमस्कार है। मैं राम तथा लक्ष्मणके माथ वनसे सकुशल लौटकर आदर तथा श्रद्धापूर्वक मांस-मदिरा आदिके उपहारोंसे आपकी पूजा करूँगी ॥ ७८ ॥ ७९ ॥ उस पार जा तथा वहाँ एक रात निवास करके रामने निषादको लौटा दिया और धीरे-धीरे चलकर भारद्वाजके आश्रमपर जा पहुँचे। वहाँ उनका अत्यन्त आग्रह देखकर ठहर गये। सबेरे प्रयागमें यमुनाको पार करके चले और महावन (चित्रकूट) में स्थित वाल्मीकिके आश्रममें जा पहुँचे। वहाँ उनसे पूजित होकर ठहरे। चित्रकूटमें रामने लक्ष्मणसे एक मनोहर पर्णकुटी बनवायी ॥ ८०-८२ ॥ मृगोंके मांसकी बलि देकर रघूत्तम राम सीता तथा भाईके साथ सुखपूर्वक घरकी तरह उसमें रहने लगे ॥ ८३ ॥ शयनका बैठनेका, खानेका, अग्निका तथा देवता आदिका स्थान विविध बेतों और लताओंसे निर्माण किया गया। वे स्थान अति रमणीक लगते थे ॥ ८४ ॥ वहाँ उत्पन्न होनेवाले कंद-मूल-फल तथा मृगमांस आदिसे, जैसे अपने भवनमें मुनीश्वरोंका सत्कार करते थे, वैसे ही सत्कार करने लगे ॥ ८५ ॥ एक समय सीताकी गोदमें सिर रखकर रामको सोते देख इन्द्रका पुत्र जयन्त कौआ बनकर वहाँ आया और अपने नख तथा चोंचसे बारम्बार सीताके पाँवके लाल अंगूठेका मांस खानेकी इच्छासे उसे विदीर्ण करने लगा। सीताने पतिकी निद्रा भंग हो जानेके भयसे उसको नहीं हटाया ॥ ८६ ॥ ८७ ॥ जागनेके बाद रामने सीताके अंगूठेको कौएके द्वारा विदारित देखकर रक्तरञ्जित मुखवाले भागते हुए कौएपर सींकका अस्त्र छोड़ा ॥ ८८ ॥ ब्रह्माण्ड भरमें उस अस्त्रके भयसे जब किसीने जयन्तकी रक्षा नहीं की, तब नारदके कहनेपर वह रामकी शरणमें आया। उस समय क्षणभरमें रामने सींकके अस्त्रसे जयन्तकी केवल एक आँख फोड़कर उसे जीवनदान दे दिया। इस प्रकार सबके प्रभु राम विविध

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुमंत्रोऽपि पुरीं गत्वा नृपं वृत्तं न्यवेदयत् । सोऽपि राजा राघवेति जपन्स्वं जीवितं जहौ ॥९१॥
नृपं मृतं गुरुर्ज्ञात्वा तैलद्रोण्यां निधाय तम् । युधाजिन्नगराद्दूतैः कैकेय्यास्तनयावुभौ ॥९२॥
आनयामास भरतशत्रुघ्नौ वेगतस्तदा । तावुभावपि वेगेन स्वां पुरीं संविवेशतुः ॥९३॥
मात्रा संपादितं कृत्यं ज्ञात्वा धिक्कृत्य मातरम् । भरतः पितरं वह्निं ददौ सरयुसैकते ॥९४॥
वीराणां मातरस्ताश्च जग्मुर्न स्वामिना दिवम् । पितुरुत्तरकार्यादि कर्म कृत्वा सविस्तरम् ॥९५॥
मंथरां ताडयामास मातुरग्रे पुनः पुनः । प्रार्थितोऽप्यभिषेकार्थं राज्यमंगीचकार न ॥९६॥
ततो मंत्रिजनैः साकं मातृभिः पुरवासिभिः । परावर्तयितुं रामं ययौ स भरतस्तदा ॥९७॥
गुहेन मानितश्चापि भारद्वाजाश्रमं ययौ । तपोबलेन भूस्वर्गं निर्माय भरतं मुनिः ॥९८॥
ससैन्यं पूजयामास तं नत्वा भरतोऽपि सः । मुनिसंदर्शितपथा चित्रकूटेऽग्रजं ययौ ॥९९॥
दृष्ट्वा रामं तु शालायां सीतया बंधुना स्थितम् । नत्वा तेनालिंगितश्च सर्वं वृत्तं न्यवेदयत् ॥१००॥
रामः श्रुत्वा मृतं तातं गत्वा मंदाकिनीं नदीम् । स्नात्वा तिलांजलिं दत्त्वा ययौ शालां निजांगिरौ १०१॥
ततस्तं प्रार्थयामास भरतो गुरुणा सह । राज्यार्थं राघवश्चापि नेत्युवाच पुनः पुनः ॥१०२॥
प्रायोपवेशनं तत्र दर्भेषु भरतस्तदा । चकार निग्रहं तस्य ज्ञात्वा गुरुमचोदयत् ॥१०३॥
रामाज्ञया गुरुश्चाह भरतं बोधयंस्तदा । भूभारहरणार्थाय विष्णुः साक्षाद्रघूत्तमः ॥१०४॥
अत्र जातोऽस्ति देवानां वचनाद्रावणादिकान् । हंतुं गच्छति रामोऽद्य मा त्वं निग्रहमाचर ॥१०५॥
ततो ज्ञात्वा हरिं रामं भरतो राममब्रवीत् । राज्यार्थं पादुके देहि तयोः सेवां करोम्यहम् ॥१०६॥
जटावल्कलधारी च वसामि नगराद्बहिः । प्रतीक्षां तव राजेंद्र वर्षाणि च चतुर्दश ॥१०७॥

लीलायें करने लगे ॥८९॥९०॥ उधर सुमन्त्रने अवधपुरीमें जाकर राजा दशरथको सब वृत्तान्त सुनाया। राजाने भी 'हा राघव ! हा राघव !' करते-करते प्राण छोड़ दिये ॥ ९१ ॥ तब गुरु वसिष्ठने मृत राजाके शरीरको तेलके टाँकेमें रखवा दिया और युधाजित्के नगरमें टिके दोनों पुत्रों भरत-शत्रुघ्नको दूतोंके द्वारा तुरन्त बुलवाया। वे दोनों शीघ्र अपने नगरमें आये तथा माताके कुकृत्यको सुनकर उसे धिक्कारने लगे। भरतने पिताके शरीरका सरयू नदीकी बालुकामें अग्निसंस्कार किया ॥ ९२-९४ ॥ वीर पुरुषोंकी माताएँ स्वामीके साथ स्वर्गलोकको नहीं गयीं। भरतने पिताकी उत्तरक्रियायें विस्तार सहित कीं ॥ ९५ ॥ तदनन्तर भरत-शत्रुघ्नने माताके सामने मंथराको बारम्बार पीटा और माताके बहुत कहनेपर भी भरतने राज्य नहीं स्वीकार किया ॥ ९६ ॥ पश्चात् वे मन्त्रियों, माताओं तथा पुरवासियोंके साथ रामको लौटा लानेके हेतु वनको गये ॥ ९७ ॥ रास्तेमें भरत निषादराज द्वारा सम्मानित होकर भारद्वाजके आश्रममें पधारे। मुनिने अपने तपोबलसे पृथ्वीपर स्वर्गकी रचना करके सेना सहित भरतका सत्कार किया। तदनन्तर भरत उनको प्रणाम करके उनके बतलाये हुए रास्तेसे चित्रकूटमें अपने बड़े भाई रामके पास गये ॥ ९८ ॥ ९९ ॥ पर्णशालामें सीता तथा लक्ष्मण सहित रामको देखकर भरतने उन्हें प्रणाम किया। तदनन्तर रामसे आलिङ्गित होकर उन्होंने सब वृत्तान्त उन्हें कह सुनाया ॥१००॥ पिताकी मृत्यु सुनकर राम मन्दाकिनी नदीपर गये। वहाँ स्नान करके तिलाञ्जलि दी और पर्वतपर स्थित अपनी पर्णशालामें लौट आये ॥ १०१ ॥ गुरु वसिष्ठको साथ लेकर भरतने रामसे राज्य स्वीकार करनेके लिये बारम्बार प्रार्थना की। तिसपर भी राम उसको बार-बार अस्वीकार ही करते गये ॥१०२॥ तब भरत कुशाके आसनपर बैठकर अनशन (उपवास) करने लगे। उनकी दृढ़ता तथा असन्तोष देखकर रामने गुरु वसिष्ठसे भरतको समझानेके लिये कहा ॥ १०३ ॥ रामकी आज्ञासे गुरुने भरतको समझाते हुए कहा कि ये विष्णुस्वरूप रघूत्तम राम भूभार हरण करनेके लिये इस पृथ्वीपर अवतरे हैं। ये देवताओंके अनुरोधसे रावण आदिको मारने जा रहे हैं। इस कारण तुम हठ मत करो ॥ १०४ ॥ १०५ ॥ तब भरत रामको साक्षात् ईश्वर जानकर उनसे बोले—हे राम ! राजकार्य करनेके लिए आप अपनी खड़ाऊँ दे दें। जटा-वल्कलधारी मैं उनकी नित्य सेवा-पूजा करता हुआ नगरके बाहर रहूँगा। परन्तु हे राजेन्द्र ! यदि आप

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा चतुर्दशे वर्षे पूर्णे गुप्ते रवौ त्वहम् । प्रवेक्ष्याम्यनलं राम सत्यमेतद्वचो मम ॥१०८॥
तत्तस्य वचनं श्रुत्वा तथेत्युक्त्वा रघूत्तमः । राज्यार्थं स्वीयपदयोः पादुके रत्नभूषिते ॥१०९॥
ददौ रामस्तदा तस्मै ततस्तं स व्यसर्जयत् । गृहीत्वा पादुके दिव्ये भरतो रत्नभूषिते ॥११०॥
मस्तकोपरि ते बद्ध्वा कृतकृत्यममन्यत । ततो नत्वा रघुश्रेष्ठं परिक्रम्य पुनः पुनः ॥१११॥
सैन्येन मातृभिः शीघ्रं राममामंत्र्य सो ययौ । संप्रार्थयत्कैकयी सा रामचन्द्रं पुनः पुनः ॥११२॥
मयाऽपराधितं राम तत्क्षंतव्यं रघूत्तम । तामाह रामचंद्रोऽपि न त्वया मेऽपराधितम् ॥११३॥
मच्छंदान्मंथरावाक्यात्त्वं वाण्या मोहितातदा । सुखं गच्छांब स्वपुरीं न क्रोधोऽस्ति मम त्वयि ॥११४॥
इत्युक्त्वा रामचंद्रेण भरतेन न्यवर्तत । भरतः पूर्वमार्गेण ययौ स्वनगरीं मुदा ॥११५॥
सर्वान् स्थाप्य नगर्यां तु नंदिग्राममकल्पयत् । तस्थौ स भरतस्तत्र स्थाप्य सिंहासनोपरि ॥११६॥
रामस्य पादुके दिव्ये फलमूलाशनः स्वयम् । राजकार्याणि सर्वाणि यावंति पृथिवीपतेः ॥११७॥
तानि पादुकयोः सम्यङ्निवेदयति राघवः । गणयन्दिवसान्येव रामागमनकांक्षया ॥११८॥
स्थितो रामार्पितमनाः साक्षाद्ब्रह्ममुनिर्यथा । रामोऽपि चित्रकूटाद्रौ वसन्मुनिभिरादृतः ॥११९॥
चकार सीतया क्रीडां विपिने रम्यपर्वते । मनःशिलासुतिलकं सीताया भालकेऽकरोत् ॥१२०॥
गंडयोश्चित्रवल्लीः स चकार निजहस्ततः । वृक्षारुणदलैश्चित्रैः कोमलैः कुसुमादिभिः ॥१२१॥
एवं क्रीडन्सुखं रामस्तस्थौ पत्न्याऽनुजेन च । नागरास्तं सदा जग्मू रामदर्शनलालसाः ॥१२२॥
दृष्ट्वा सज्जनसंबाधं रामस्तत्याज तं गिरिम् । अन्वगात्सीतया भ्रात्रा ह्यत्रेराश्रममुत्तमम् ॥१२३॥
नत्वाऽत्रिं मानितस्तेन तस्थौ तत्र दिनत्रयम् । गृहस्थामनुसूया तां सीताऽत्रेर्वचनात्तदा ॥१२४॥

निश्चित समयपर नहीं लौटेंगे तो मैं चौदह वर्ष समाप्तिके दिन सूर्यास्तके समय अग्निमें प्रवेश कर जाऊँगा। हे राम ! मेरी इस प्रतिज्ञाको आप सत्य समझें ॥ १०६-१०८ ॥ उनके इस वचनको सुनकर रघूत्तम रामने "तथाऽस्तु" कहा और राज्यके लिए अपने पावँकी रत्नभूषित पादुकाएँ देकर उन्हें विदा किया। भरतने उन रत्नभूषित पादुकाओंको लेकर माथे चढ़ाया और अपने आपको कृतकृत्य समझा। पश्चात् रघुश्रेष्ठ रामको बारम्बार प्रणाम करके परिक्रमा की और उनकी आज्ञा लेकर भरत माता और सेनाके साथ तुरन्त अयोध्याकी ओर चल दिये। उस समय कैकेयी पुनः पुनः रामसे प्रार्थना करने लगी—॥ १०९-११२ ॥ हे राम ! हे पुरुषोत्तम ! मैंने जो अपराध किया है, उसे क्षमा कर दो। रामने कहा—माताजी ! तुम्हारा कोई अपराध नहीं है ॥ ११३ ॥ मेरी इच्छासे ही सरस्वतीने मंथराके वाक्यसे तुमको मोहित कर दिया था। हे अम्ब ! अब तुम सुखपूर्वक अयोध्या जाओ। मुझे तुमपर कुछ भी क्रोध नहीं है ॥ ११४ ॥ ऐसा कहनेके बाद कैकेयी रामके कथनानुसार भरतके साथ नगरको लौटी। भरत भी सहर्ष जिस मार्गसे आये थे, उसी मार्गसे अपनी नगरीको लौट गये ॥ ११५ ॥ वहाँ जा तथा सबको नगरमें पहुँचाकर उन्होंने नन्दीग्राम बसाया। वहीं भरत सिंहासनपर रामकी दिव्य खड़ाऊँ रख तथा फल-मूल खाकर रहने लगे। राज्यके जो-जो काम आते थे, उन सबको भरत-जी खड़ाऊँके सामने लाकर प्रतिदिन निवेदन कर दिया करते थे। इस प्रकार राममें मन लगाकर रात्रि-दिवसोंको गिनते हुए भरत साक्षात् ब्रह्ममुनिकी भाँति समय व्यतीत करने लगे। उधर राम भी मुनियोंसे सत्कार प्राप्त करके सानन्द चित्रकूट पर्वतपर रहने लगे ॥ ११६-११६ ॥ उस पवित्र तथा मनोहर वनमें राम सीताके साथ क्रीड़ा करते थे। मैनसिलकी सुन्दर शिलापर चन्दनादि घिसकर राम सीताके मस्तकपर तिलककी रचना करते थे ॥१२०॥ अपने कोमल हाथोंसे सीताके कोमल गालोंपर चित्रावलीका निर्माण करते थे। वृक्षोंके कोमल-कोमल लाल पत्तों और अनेक प्रकारके फूलोंसे सीताको सजाते थे ॥ १२१ ॥ इस प्रकार क्रीड़ा करते हुए राम अपनी प्राणप्यारी पत्नी तथा अनुज लक्ष्मणके साथ सुखपूर्वक रहते थे। वहाँ अनेक नागरिक रामके दर्शनकी अभिलाषासे सदा उनके पास आते रहते थे ॥ १२२ ॥ इस प्रकार लोगोंका आवागमन देखकर रामने उस पर्वतको छोड़ दिया और भाई लक्ष्मण तथा सीताको लेकर अत्रिऋषिके उत्तम आश्रमकी ओर चल

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नत्वा तयाऽऽलिंगिता सा तदंके समुपाविशत् । अनुसूया तदा सीतां पूजयामास सादरम् ॥१२५॥
दिव्ये ददौ कुण्डले द्वे निर्मिते विश्वकर्मणा । दुकूले द्वे ददौ तस्यै निर्मले भक्तिसंयुता ॥१२६॥
अंगरागं च सीतायै ददावत्रेस्तु सा प्रिया । न त्यक्ष्यतेऽङ्गशोभां त्वं कदापि जनकात्मजे ॥१२७॥
पातिव्रत्यं पुरस्कृत्य राममन्वेहि जानकि । कुशली राघवो यातु त्वया भ्रात्रा पुनर्गृहम् ॥१२८॥
भोजयित्वा यथान्यायं रामं सीतासमन्वितम् । अत्रिर्विसर्जयामास रामो नत्वा ययौ वनम् ॥१२९॥
एवं वर्षमतिक्रांतं रामस्य गिरिवासिनः । यथासुखं लक्ष्मणेन जानक्या सहितस्य च ॥१३०॥
एवं गिरींद्रजेऽयोध्यापुर्यां रामेण यत्कृतम् । चरित्रं तन्मया किंचित्त्वदग्रे विनिवेदितम् ॥१३१॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे
अयोध्याचरित्रे दंडकवनप्रवेशो नाम षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः

(रामके द्वारा विराध और खर-दूषणका वध)

श्रीशिव उवाच

अथ रामः सीतया तु लक्ष्मणेन समन्वितः । ययौ स दंडकारण्यं सज्जं कृत्वा मनद्धनुः ॥ १ ॥
अग्रे ययौ स्वयं रामस्तत्पृष्ठे जानकी ययौ । तस्याः पृष्ठे स सौमित्रिर्ययौ धृतशरासनः ॥ २ ॥
वने दृष्ट्वाऽथ कासारं स्नात्वा पीत्वा जलं सुखम् । भुक्त्वा फलानि पक्वानि तस्थुस्तत्र क्षणं त्रयः ॥ ३ ॥
एतस्मिन्नंतरे तत्र विराध नाम राक्षसम् । ते तं ददृशुरायांतं महासत्त्वं भयानकम् ॥ ४ ॥
करालदंष्ट्रावदनं भीषयंतं स्वगर्जितैः । वामांसन्यस्तशूलाग्रग्रथितानेकमानुषम् ॥ ५ ॥
भक्षयंतं गजं व्याघ्रं महिषं वनगोचरम् । ज्यारोपितं धनुर्धृत्वा रामो लक्ष्मणमब्रवीत् ॥ ६ ॥

दिये ॥ १२३ ॥ अत्रि ऋषिको नमस्कार करनेके बाद उनसे सम्मानित होकर वे वहाँ तीन दिन ठहरे। अत्रिके कहनेसे सीता कुटीमें स्थित अनसूयाके पास गयीं ॥ १२४ ॥ नमस्कार करनेपर उन्होंने सीताका आलिङ्गन किया और सीता उनकी गोदमें बैठ गयीं। पश्चात् अनसूयाने उनका आदर-सत्कार करके पूजन किया ॥ १२५ ॥ तदनन्तर विश्वकर्माके बनाये दो दिव्य कुण्डल और दो स्वच्छ सूक्ष्म वस्त्र प्रेम तथा भक्तिपूर्वक सीताको दिये ॥ १२६ ॥ अत्रिकी प्रिया अनसूयाने सीताको महावर आदि रङ्ग भी अङ्गोंमें लगानेके लिए दिये और कहा—हे जनकात्मजे। यह रङ्ग तुम्हारे अङ्गोंपरसे कभी नहीं उतरेगा ॥ १२७ ॥ हे जानकी ! पातिव्रत धर्मको निभाती हुई तुम रामकी अनुगामिनी बनो। यथासमय राम तुम्हारे तथा भाई लक्ष्मणके साथ सकुशल घर लौट जायँगे ॥ १२८ ॥ तब अत्रिने सीता सहित रामको यथोचित भोजन कराकर विदा किया। राम भी नमस्कार करके चल दिये ॥ १२९ ॥ इस तरह रामको सीता तथा भाईके सहित सुखपूर्वक पर्वतोंपर निवास करते हुए एक वर्ष बीत गया ॥ १३० ॥ हे गिरीन्द्रजे ! अयोध्यापुरीमें रामने जो काम किया था, वह सब मैंने तुम्हारे सामने कह सुनाया ॥ १३१ ॥ इति श्रीशतकोटिरामचरितान्तर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे अयोध्याचरित्रे पं० रामतेजपाण्डेयकृत 'ज्योत्स्ना' भाषाटीकायां दण्डकवनप्रवेशो नाम षष्ठः सर्गः ॥ ६ ॥

शिवजी बोले—हे गिरजे ! इसके बाद राम बड़े भारी सज्जीकृत धनुषको हाथमें लेकर सीता तथा लक्ष्मणके साथ दण्डकारण्यमें गये ॥ १ ॥ आगे आगे स्वयं राम, पीछे सीता और उनके पीछे हाथमें धनुष धारण करके लक्ष्मण चले ॥ २ ॥ वनमें एक सरोवर देखा तो सुखपूर्वक स्नान करके जल पिया और पके फलोंको खाकर क्षणभर तीनोंने वहाँ विश्राम किया ॥ ३ ॥ इतनेहीमें उन्होंने अपनी ओर आते हुए बड़े भयानक विराध नामके राक्षसको देखा ॥ ४ ॥ वह अपने विकराल दाँतवाले मुखको फैला तथा भयानक गर्जन करता हुआ उन लोगोंको डराने लगा। उसने अपने भालेकी नोकमें बींधकर बहुतसे मनुष्योंको धारण कर रक्खा था। वह वनचर व्याघ्र, हाथी और महिष आदिको भी मार-मारकर खा रहा था। यह देख राम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रक्ष त्वं जानकीमत्र संहनिष्यामि राक्षसम् । स तु दृष्ट्वा रमानाथं लक्ष्मणं जानकीं तदा ॥७॥
कौ युवामिति तौ प्राह ततो रामस्तमब्रवीत् । नामकर्म निजं सर्वं कैकेय्याऽपि च यत्कृतम् ॥८॥
तद्रामवचनं श्रुत्वा विहस्य राक्षसोऽब्रवीत् । मां जानासि त्वं राम विराधं लोकविश्रुतम् ॥९॥
मद्भयान्मुनयः सर्वे त्यक्त्वा वनमितो गताः । यदि जीवितुमिच्छास्ति त्यक्त्वा सीतां निरायुधौ १०॥
पलायेतां न चेच्छीघ्रं भक्षयामि युवामहम् । इत्युक्त्वा राक्षसः सीतामादातुमभिदुद्रुवे ॥११॥
रामश्चिच्छेद तद्बाहू शरेण प्रहसन्निव । ततः क्रोधपरीतात्मा व्यादाय विकटं मुखम् ॥१२॥
राममभ्यद्रवद्रामश्चिच्छेद परिघावृतः । पदद्वयं तदा सर्प इवास्येन ययौ पुनः ॥१३॥
ततोऽर्धचंद्राकारेण निहतो राघवेण सः । ततः सीता समालिंग्य प्रशशंस रघूत्तमम् ॥१४॥
देवदुन्दुभयो नेदुर्दिवि देवगणेरिताः । ततो विराधकायात्तु पुरुषश्च विनिर्गतः ॥१५॥
नत्वा रामं निजं वृत्तं कथयामास सादरम् । दुर्वाससाऽहं शप्तस्तु पुरा विद्याधरः शुभः ॥१६॥
इदानीं मोचितः शापात्त्वया कालांतराद्वने । इत्युक्त्वा राघवं स्तुत्वा विमानेन ययौ दिवम् ॥१७॥
विराधे स्वर्गते रामो लक्ष्मणेन च सीतया । जगाम शरभंगस्य वनं सर्वसुखावहम् ॥१८॥
शरभंगं ततो नत्वा तेन सम्मानितो बहु । तस्थौ तत्र निशामेकां शरभंगो मुनीश्वरः ॥१९॥
तस्मै समर्प्य स्वं पुण्यमारुरोह चितिं तदा । स्तुत्वा तं स विमानेन वैकुण्ठं परमं ययौ ॥२०॥
ततः शनैः सुतीक्ष्णस्य ययावाश्रममुत्तमम् । नत्वा तं पूजितस्तेन सुखं तस्थौ रघूद्वहः ॥२१॥
एतस्मिन्नंतरे तत्र नानाश्रमनिवासिनः । मुनयो राघवं द्रष्टुं समाजग्मुः सहस्रशः ॥२२॥
सर्वे ते राघवं नत्वा स्तुत्वा निन्युर्निजं निजम् । आश्रमं सीतया भ्रात्रा चक्रुः पूजां सविस्तराम् ॥२३॥

धनुषपर डोरी चढ़ाकर लक्ष्मणसे बोले-॥ ५ ॥ ६ ॥ हे लक्ष्मण ! तुम यहाँ जानकीकी रक्षा करो । मैं इस दुष्ट राक्षसको मारूँगा । वह राक्षस रमापति राम, लक्ष्मण तथा जानकीको देखकर बोला—तुम कौन हो ? तब रामने अपना नाम, काम तथा कैकेयीका कृत्य सब कुछ कह सुनाया ॥ ७ ॥ ८ ॥ रामके वचनको सुनकर राक्षस हँसा और कहने लगा–हे राम ! क्या तू लोकविख्यात विराधको नहीं जानता ? ॥ ९ ॥ मेरे ही डरसे सब मुनि इस वनको छोड़कर भाग गये हैं । यदि तुम दोनों जीना चाहते हो तो सीता तथा शस्त्रको छोड़कर भाग जाओ । नहीं तो तुम दोनोंको मैं अभी खा जाऊँगा । इतना कहकर वह राक्षस सीताको पकड़ने दौड़ा ॥ १० ॥ ११ ॥ तब हँसते हुए रामने उसके दोनों हाथोंको अपने बाणसे काट दिया । तब विराध क्रुद्ध हो तथा विकट मुख फैलाकर रामकी ओर दौड़ा । तब रामने अति वेगसे दौड़कर उसके दोनों पाँवोंको भी काट डाला । फिर वह सर्पकी तरह मुखसे खानेके लिये झपटा ॥ १२ ॥ १३ ॥ तब रामने अपने अर्द्धचन्द्राकार बाणसे उनके सिरको भी काट डाला और वह मर गया । यह देख सीता रामका आलिङ्गन करके उनकी प्रशंसा करने लगीं ॥ १४ ॥ तभी आकाशमें देवताओंके नगाड़े बजने लगे । पश्चात् विराधके शरीरसे एक दिव्य पुरुष प्रकट हुआ ॥ १५ ॥ वह रामको प्रणाम करके बड़े आदरसे अपनी कहानी सुनाते हुए कहने लगा–पूर्व समयमें मैं एक सुन्दर विद्याधर था, परन्तु दुर्वासा ऋषिने मुझको शाप देकर इस दशाको प्राप्त करा दिया ॥ १६ ॥ आज बहुत कालके बाद आपने मुझको उस शापसे युक्त किया है । यह कह और रामकी स्तुति करके वह विमानमें बैठकर स्वर्ग चला गया ॥ १७ ॥ विराधके चले जानेपर राम लक्ष्मण तथा सीताके साथ सर्वसुखदायक शरभंग मुनिके वनमें पधारे ॥ १८ ॥ उनको नमस्कार करके तथा उनसे सम्मानित होकर वे एक रात्रि वहाँ ठहरे । मुनिश्रेष्ठ शरभंगने अपना सब पुण्य उनके चरणोंमें समर्पण करके रामके सामने ही चितामें प्रवेश किया और उनकी स्तुति करके विमानपर बैठकर दिव्य रूपसे वैकुण्ठ धामको चले गये ॥ १९ ॥ २० ॥ वहाँसे रामने सुतीक्ष्ण मुनिके सुन्दर आश्रमकी ओर प्रयाण किया । वहाँ पहुँचनेपर रामने मुनिको नमस्कार किया । मुनिने उनका बहुत सत्कार करके अपने यहाँ ठहराया ॥ २१ ॥ वहाँ श्रीरामके दर्शनार्थ विविध आश्रमोंसे हजारों मुनि आते थे ॥ २२ ॥ वे सब सीता तथा लक्ष्मणके सहित रामको नमस्कारकर और उनकी स्तुति करके उन्हें अपने-अपने आश्रममें ले

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकरात्रं त्रिरात्रं वा पंच सप्त दिनानि वा । पक्षमात्रं तु मासं वा सार्धमासमथापि वा ॥२४॥
त्रिमासान्पंचमासं वा षष्ठाष्टैकादशाथवा । साग्रं संवत्सरं वापि स्वाश्रमेषु रघूत्तमम् ॥२५॥
संस्थाप्य चक्रुरातिथ्यमधिकं चोत्तरोत्तरम् । पत्न्याऽनुजेन श्रीराममेवं पूज्य विसर्जयन् ॥२६॥
भ्रमतैवं हि रामेण नव वर्षाणि दंडके । आश्रमेषु मुनीनां च ह्यतिक्रांतानि वै सुखम् ॥२७॥
बहवो निहतास्तत्र राक्षसा भ्रमता तदा । राघवेण सह भ्रात्रा क्रीडताऽवनिकन्यया ॥२८॥
नानाश्रमारामपुष्पवनोपवनभूमिषु । नदीजलतटाकाद्रिशिखरादिस्थलेष्वपि ॥२९॥
जंब्वाम्ररंभाद्राक्षादिनानावृक्षलतेषु हि । चकार सीतया क्रीडां रामो देव्या यथा शिवः ॥३०॥
अथ रामो ययौ कुम्भसंभवस्यानुजाश्रमम् । सुमतिः पूजयामास राघवं सीतयान्वितम् ॥३१॥
ततः सीतायुतो रामः शनैर्भ्रात्रा मुदान्वितः । अगस्तेराश्रमं प्राप नानावृक्षविराजितम् ॥३२॥
प्रत्युद्गम्य मुनिश्चापि मुनिभिर्वटुभिर्वृतः । राघवं तं समालिंग्य स्वाश्रमं तेन सो ययौ ॥३३॥
अथ तं पूजयामास राघवं कुम्भसंभवः । रामोऽपि मानितस्तेन तस्थौ तत्र कियद्दिनम् ॥३४॥
ततः स्तुत्वा रमानाथमगस्त्यो मुनिसत्तमः । ददौ चापं महेन्द्रेण रामार्थं स्थापितं पुरा ॥३५॥
अक्षय्यौ बाणतूणीरौ खड्गं रत्नविभूषितम् । ततो रामो मुनेर्वाक्याद्गौतम्या उत्तरे तटे ॥३६॥
ययौ पंचवटीं रम्यां मार्गे दृष्ट्वाऽथ पक्षिणम् । जटायुषं नगाकारमरुणात्मजमुत्तमम् ॥३७॥
सखायं स्वपितुश्चापि संभाष्याथ विवेश तम् । तत्र कृत्वा महाशालां यथा पूर्वं कृता गिरौ ॥३८॥
मृगमांसैर्बलिं दत्त्वा तस्थौ रामो यथासुखम् । सीतां संरक्षयामास जटायुः पक्षिराट् स्वयम् ॥३९॥
राघवस्य पंचवट्यां सीतया क्रीडतः सुखम् । सार्धत्रीणि वत्सराणि ह्यतिक्रांतानि पार्वति ॥४०॥
वने शूर्पणखापुत्रं तपंतं सांबनामकम् । ब्रह्मा ददौ दिव्यखड्गं तं सांबो न ददर्श सः ॥४१॥
तद्धृत्वा लक्ष्मणः खड्गं वृक्षान्वल्लीर्वभंज सः । वृक्षगुल्मे हतः सांबस्ततो राघवमब्रवीत् ॥४२॥

जाते और विधिवत् पूजा करते थे ॥ २३ ॥ वे एक-दो दिन, पांच-सात मास अथवा पूरे वर्ष भर अपने आश्रममें रखकर रघूत्तम रामका प्रतिदिन अधिकाधिक प्रेमसे आतिथ्य करते और अन्तमें पत्नी तथा भाईके सहित रामका पूजन करके विदा करते थे ॥ २४ –२६ ॥ इस तरह मुनियोंके आश्रमोंमें घूम-फिरकर रामने सुखसे नौ वर्ष बिता दिये ॥ २७ ॥ वहाँ भाई लक्ष्मणके साथ भ्रमण करते हुए रामने बहुतसे राक्षसों-को मार डाला ॥ २८ ॥ रामने अनेक आश्रमोंमें, बागोंमें, पुष्प भरे वनोंमें, नदीके जलमें, तालाबोंमें, पर्वतके शिखर आदि स्थलोंमें, जामुन, आम, केला, दाख आदि अनेक वृक्षों तथा लताकुन्जोंमें सीताके साथ शिव-पार्वतीकी तरह क्रीड़ा की ॥ २९ ॥ ३० ॥ तत्पश्चात् राम कुम्भज ऋषिके छोटे भाई मार्कण्डि मुनिके आश्रमपर गये । उन बुद्धिमान् मुनिने भी सीतासहित रामकी पूजा की ॥३१॥ वहाँसे चलकर सीता तथा भाईके साथ राम विविध वृक्षोंसे मंडित अगस्त्य मुनिके आश्रमपर गये ॥ ३२ ॥ वहाँ मुनि अगस्त्य अन्य मुनियों और ब्रह्मचा-रियोंसे साथ आगे आये और रामका आलिङ्गन करकें आश्रममें ले गये ॥ ३३ ॥ उन्होंने रामकी विधिवत् पूजा की । उनसे पूजित होकर रामने वहाँ कुछ दिन निवास किया ॥ ३४ ॥ मुनिश्रेष्ठ अगस्त्यने रामकी प्रशंसा की और इन्द्रके द्वारा प्रदत्त तथा उनके लिये पहिलेसे ही रक्खा हुआ धनुष रामको दिया ॥ ३५ ॥ अक्षय बाणवाले दो तूणीर (तरकस) तथा रत्नजटित तलवार दी । पश्चात् रामने मुनिके कथनानुसार गौतमी नदीके उत्तरी किनारेपर स्थित रमणीक पञ्चवटीकी ओर प्रस्थान किया । रास्तेमें उनको पर्वताकार अरुणपुत्र एवं उनके पिताका श्रेष्ठ मित्र जटायु नामका पक्षी मिला । उससे सम्भाषण करके वनमें आगे बढ़े । चित्रकूटकी तरह वहाँपर भी उन्होंने पर्णकुटी बनवायी ॥ ३६ ॥ ३७ ॥ वहाँ मृगोंके मांसकी बलि देकर राम आनन्दसे रहने लगे । पक्षिराज जटायु स्वयं सीताकी रक्षा करने लगा ॥ ३८ ॥ ३९ ॥ हे पार्वती ! पंचवटीमें रामको सीताके साथ क्रीड़ा करते हुए साढ़े तीन वर्ष व्यतीत हो गये ॥ ४० ॥ उस वनमें सूर्पणखाका पुत्र साम्ब तप करता था । यह देखकर ब्रह्माने एक दिव्य खड्ग उसे दिया, पर इस बातका साम्बको पता नहीं लगा ॥ ४१ ॥ अब लक्ष्मणने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रायश्चित्तं ब्रह्महणं मां वद त्वं रघूत्तम । रामोऽप्याह हतः सांबो राक्षसो न मुनिर्हतः ॥४३॥
तच्छ्रुत्वा लक्ष्मणस्तुष्टःसांबमात्रापि तच्छ्रुतम् । तत्स्मरंती पुत्रदुःखं राक्षसी कामरूपिणी ॥४४॥
विचचार शूर्पणखा नाम्नी च सर्वघातिनी । एकदा पंचवट्यां सा रामं दृष्ट्वाऽथ राक्षसी ॥४५॥
पुत्रदुःखसमाक्रांता धृत्वा रूपं मनोहरम् । कापट्यबुद्धया श्रीरामं सानुजं हंतुमुद्यता ॥४६॥
उवाच मधुरं वाक्यं वस्त्रालंकारमंडिता । कौ युवां का त्वियं रम्या किमर्थमागता वनम् ॥४७॥
कुतः समागतावत्र क्वाधुना गच्छतः पुरः । तत्तस्या वचनं श्रुत्वा रामः सर्वं न्यवेदयत् ॥४८॥
ततः सा राघवं प्राह भव भर्ता मम प्रभो । सोऽप्याह दयिता मेऽस्ति बहिस्तिष्ठति लक्ष्मणः ॥४९॥
प्रार्थयामास सौमित्रिं सा तं सोऽप्युत्तरं ददौ । अहं दासोऽस्मि रामस्य त्वं तु दासी भविष्यसि ॥५०॥
ततः क्रोधेन सा सीतां धर्तुं वेगेन दुद्रुवे । तदा तां राघवः प्राह ममायं शर उत्तमः ॥५१॥
चिह्नार्थं लक्ष्मणाय त्वं नीत्वा दर्शय वेगतः । मद्बाणदर्शनात्कार्यं सिद्धिं नेष्यति लक्ष्मणः ॥५२॥
इत्युक्त्वा राघवो बाणं ददौ तस्यै क्षुरोपमम् । सत्यं मत्वा रामवाक्यं सा ययौ लक्ष्मणं पुनः ॥५३॥
लक्ष्मणाय रामबाणं दर्शयामास राक्षसी । स बुद्ध्वा हृद्गतं बंधोस्तं संधाय शरासने ॥५४॥
मुमोच बाणं वेगेन रामनाम्नांकितं शुभम् । स शरो राक्षसीं गत्वा घ्राणकर्णौष्ठहृद्धवान् ॥५५॥
संछित्वा रामतूणीरं विवेश क्षणमात्रतः । घ्राणकर्णौष्ठहृज्जातरहिता साऽपि राक्षसी ॥५६॥
हा हतास्मीति जल्पंती ययौ बंधून्खरादिकान् । दृष्ट्वा स्वसां तादृशीं ते त्रिशिरःखरदूषणाः ॥५७॥
तन्मुखात्सकलं वृत्तं श्रुत्वा ते क्रोधसंयुताः । चतुर्दश महाघोरान् राक्षसान्प्रेषयंस्तदा ॥५८॥

उस खड्गको लेकर उस घने वनके सब वृक्षों और लताओंको काट डाला । उस वृक्षपुंजके साथ साम्ब भी मारा गया । यह देखकर लक्ष्मण रामसे कहने लगे—॥ ४२ ॥ हे रघुराज ! आप मुझे ब्रह्महत्यानिवारक कोई प्रायश्चित्त बतायें । तब रामने कहा ~ तुमने तो साम्ब नामके राक्षसको मारा है, न कि मुनिको ॥ ४३ ॥ ४४ ॥ यह सुनकर लक्ष्मण प्रसन्न हुए । उधर यथेच्छ रूप धारण करनेवाली साम्बकी माता सूर्पणखा राक्षसीने जब यह सुना तो पुत्रमरणके दुःखसे दुःखित होकर बारम्बार पुत्रका स्मरण करती हुई क्रोधसे सबको मार डालने-की इच्छासे इधर-उधर विचरने लगी । एक दिन पंचवटीमें रामको देखकर वह राक्षसी पुत्रदुःखसे व्याकुल हो उठी और मनोहर रूप धारण करके सीता-लक्ष्मण सहित रामको मारनेके लिए उद्यत हो गयी ॥ ४५ ॥ ४६ ॥ वह वस्त्र तथा अलंकारसे सजकर उनके पास जा पहुँची और इस प्रकार मधुर वचन कहने लगी-तुम दोनों तथा यह सुन्दरी स्त्री कौन है और यहाँ वनमें तुम सब किस लिए आये हो ? ॥ ४७ ॥ कहाँसे आ रहे हो और अब आगे कहाँ जानेका विचार है ? उसके प्रश्न सुनकर रामने अपना सब वृत्तान्त कह सुनाया ॥ ४८ ॥ तब वह बोली-हे प्रभो ! कृपा करके आप मेरे पति बनें । उत्तरमें रामने कहा कि मेरे पास तो यह मेरी प्रिय पत्नी विद्यमान है । इसलिए तुम बाहर खड़े मेरे छोटे भाई लक्ष्मणके पास जाओ ॥ ४९ ॥ रामके कथनानुसार सूर्पणखाने बाहर जाकर लक्ष्मणसे अपनी इच्छा प्रकट की । लक्ष्मणने कहा कि मैं तो रामका दास हूँ । तुम मेरी स्त्री बनकर क्या करोगी । मेरे साथ तुम्हें भी दासी बनना पड़ेगा ॥ ५० ॥ यह सुनकर सूर्पणखा क्रोधसे लाल हो गयी और सीताको पकड़नेके लिए बड़े वेगसे झपटी । रामने उसे रोककर कहा कि यह मेरा सुन्दर बाण पहचानके लिए ले जाकर लक्ष्मणको दिखाओ । मेरे बाणको देखते ही लक्ष्मण तुम्हारी इच्छा पूरी कर देगा ॥ ५१ ॥ ५२ ॥ यह कहकर रामने छुरेके समान तीक्ष्ण एक बाण उसको दिया । रामकी बातको सत्य समझ वह राक्षसी बाण लेकर फिर लक्ष्मणके पास गयी ॥ ५३ ॥ वहाँ जाकर उसने लक्ष्मणको रामका बाण दे दिया । लक्ष्मण बड़े भाईका अभिप्राय समझ गये और धनुषपर चढ़ाकर रामनामसे अंकित उस शुभ बाणको छोड़ दिया । वह बाण राक्षसोके पास गया और उसके नाक, कान, ओंठ तथा स्तनोंको काटकर पुनः क्षण भरमें रामकी तरकसमें लौट गया । कान, नाक, ओंठ तथा स्तनोंसे रहित वह राक्षसी ॥ ५४–५६ ॥ 'हाय मैं मारी गयी' इस प्रकार चिल्लाती हुई खर-दूषण आदि अपने भाइयोंके पास जा पहुँची । बहिनकी यह

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तान् रामः क्षणमात्रेण चतुर्दशशरैर्यमम् । संप्रदर्श्य निजं लोकं प्रेषयामास लीलया ॥५९॥
तान् राक्षसान् मृतान् श्रुत्वा खराद्यास्ते त्रयः क्रुधा । युद्धाय निर्ययुः सैन्यैः सहस्रैश्च चतुर्दश ॥६०॥
रामोऽपि बंधुं सीतां च गुहायां स्थाप्य वेगतः । चकार राक्षसैर्युद्धं शस्त्रैरस्त्रैर्भयावहम् ॥६१॥
चतुर्दशसहस्राणि स्त्रीयरूपाणि राघवः । कृत्वा तेषां च पुरतः शरैस्तान्मर्दयत्क्षणात् ॥६२॥
हत्वा खरं दूषणं च तथा त्रिशिरसं शरैः । चतुर्दशसहस्रांस्तान्प्रेषयामास स्वं पदम् ॥६३॥
मुहूर्तेन तु रामेण सहस्राणि चतुर्दश । मिता सेना खराद्यैश्च निहता गौतमीतटे ॥६४॥
खराद्याः कंटका यत्र स्थितास्तत्र त्रिकंटकम् । क्षेत्रं ख्यातं त्र्यंबकाख्यं तदेव प्रोच्यते भुवि ॥६५॥
जनस्थानं भूसुराणां ददौ वस्तुं रघूद्वहः । अथ सीता समालिंग्य राघवं प्रशशंस सा ॥६६॥
अथ तां जानकीं प्राह रामो रहसि सादरम् । सीते त्वं त्रिविधा भूत्वा रजोरूपा वसानले ॥६७॥
वामांगे मे सत्त्वरूपा वस छाया तमोमयी । पंचवट्यां दशास्यस्य मोहनार्थं वसात्र वै ॥६८॥
तद्रामवचनं श्रुत्वा तथा सीता चकार सा । ततः सूर्पणखा लंकां गत्वा रावणमब्रवीत् ॥६९॥
धिक् त्वां राक्षसराजानं वृत्तं चारैर्न वेत्सि यः । चतुर्दशसहस्रा सा सेना त्वद्बन्धुभिः सह ॥७०॥
मानुषेणैव रामेण जनस्थाने निपातिता । तत्तस्या वचनं श्रुत्वा तां दृष्ट्वा तादृशीं तदा ॥७१॥
सिंहासनाच्चचालाथ पुनः पप्रच्छ तां स्वसाम् । वद किं कारणं युद्धे प्राह सा राक्षसेश्वरम् ॥७२॥
स्त्रीरत्नां जानकीं दृष्ट्वा मया चित्ते विचिंतितम् । रावणार्थं विनेष्यामि धर्तुं तां तत्पुरोगता ॥७३॥
तावद्बाणेन नीताऽहं दशामेतां तु रावण । सौमित्रिणा पंचवट्यामाज्ञया राघवस्य च ॥७४॥
सांबोऽपि मे हतः पुत्रस्तप्यमानो निरर्थकम् । मत्तोषार्थं कृतं युद्धं बंधुभिस्ते निपातिताः ॥७५॥

दशा देखकर त्रिशिरा, खर और दूषणने उसके मुखसे सब समाचार सुनकर क्रोधयुक्त हो चौदह भयानक राक्षसोंको उसी समय रामसे लड़नेके लिये भेजा ॥ ५७ ॥ ५८ ॥ तब रामने चौदह बाणोंसे क्षणमात्रमें लीलापूर्वक उनको मारकर अपने लोक भेज दिया ॥ ५९ ॥ उनके मारे जानेका समाचार सुनकर खर आदि तीनों राक्षस क्रुद्ध होकर चौदह हजार सैनिकोंके साथ युद्धके लिए निकल पड़े ॥ ६० ॥ राम भी सीता तथा लक्ष्मणको एक गुफामें रखकर शीघ्र अस्त्र-शस्त्रोंसे प्रहार करते हुए राक्षसोंके साथ भयानक युद्ध करने लगे ॥ ६१ ॥ उस समय राम अपने चौदह हजार रूप बनाकर उनके सामने गये और समरभूमिमें उन सबका मद मर्दन कर डाला ॥ ६२ ॥ उन्होंने खर, दूषण, त्रिशिरा तथा चौदह हजार राक्षसोंको बाणोंसे मारकर अपने धाम भेज दिया ॥ ६३ ॥ इस प्रकार मुहूर्तमात्रमें रामने चौदह हजार सैनिकों तथा खर आदिको गौतमी नदीके किनारे मार डाला ॥६४॥ जहाँ ये खर-दूषण-त्रिशिरा तीनों भाई कंटकरूपसे रहते थे । वह स्थान त्रिकंटक नामसे प्रसिद्ध था और उसीको लोग त्र्यम्बक भी कहते थे ॥ ६५ ॥ तदनन्तर रघुनन्दन रामने वह स्थान त्रिकंटक (त्र्यम्बक) ब्राह्मणोंको निवास करनेके लिए दान दे दिया । यह सब देखकर सीता रामका आलिंगन करके उनकी प्रशंसा करने लगीं ॥ ६६ ॥ एक दिन राम एकान्तमें सीतासे सादर कहने लगे—हे सीते ! तुम तीन रूपोंको धारण करके रजोरूपसे अग्निमें, सत्त्वरूपसे छायाकी तरह मेरे बायें अंगमें और तमोमयी बनकर रावणको मोहित करनेके लिये यहाँ पंचवटीमें निवास करो ॥ ६७ ॥ ६८ ॥ रामके उस वचनको सुनकर सीताने वैसा ही किया । तभी सूपर्णखा लंकामें जाकर रावणसे बोली—॥ ६९ ॥ हे राक्षसराज ! तुम्हारे जैसे राजाको धिक्कार है, जो दूतोंके द्वारा तुम्हें राज्यकी दशाका पता नहीं लगता । चौदह हजार सेना सहित तुम्हारे भाइयोंको मनुष्यरूपधारी रामने दण्डकारण्यमें मारकर गिरा दिया । उसके इस वचनको सुन तथा उसकी वह दशा देख सिंहासनसे कुछ ऊँचे होकर वह अपनी बहिनसे पूछने लगा कि युद्ध होनेका क्या कारण है, सो बतलाओ । तब वह राक्षसेश्वर रावणसे बोली—॥ ७०-७२ ॥ स्त्रियोंमें रत्न जानकीको देखकर मैंने निश्चय किया था कि इसको रावणके लिये ले जाऊँगी । यह विचारकर मैं उसको पकड़नेके लिये सामने गयी ॥ ७३ ॥ हे रावण ! इतनेमें [illegible] मेरी यह दशा कर दी । रामके

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्यस्ति पौरुषं किंचित्तर्हि सीतां समानय। नोचेदधोमुखस्तिष्ठ यथा स्त्री गतभर्तृका ॥७६॥
तत्तस्या वचनं श्रुत्वा सांत्वयामास तां स्वसाम्। तौ रामलक्ष्मणौ हत्वा तव शोकाश्रुमार्जनम् ॥७७॥
करोम्यहं लोहितेन तयोः खेदं भजस्व मा। एवं नानाविधैर्वाक्यैः सांत्वयित्वा स्वसां मुहुः ॥७८॥
स्वहितस्योपदेष्टारं मातुलं तपसि स्थितम्। ययौ रथेन मारीचं तस्मै वृत्तं न्यवेदयत् ॥७९॥
सोऽथ तं भीषयामास भागिनेयं मुहुर्मुहुः। विश्वामित्राध्वरे त्यक्तमात्मानं तं न्यवेदयत् ॥८०॥
रामाख्यया रथं रत्नं रजतं रुक्मभूषितम्। श्रुत्वाऽत्र रादि यत्किंचिद्रामं मत्वा बिभेम्यहम्। ८१॥
केन ते शिक्षिता बुद्धिरियं लंकाविघातिनी। आप्तरूपोऽस्ति कः शत्रुर्येनेयं शिक्षिता मतिः ॥८२॥
कथां न कुरु रामस्य तं दृष्ट्वा त्वं मरिष्यसि। ततः क्रोधेन तं प्राह यदि नायासि राघवम् ॥८३॥
मया तर्हि वधिष्यामि त्वामतः कुरु मद्वचः। भूत्वा त्वं मृगरूपश्च रामस्त्वामनुयास्यति ॥८४॥
त्वं शब्दं कुरु रामस्य लक्ष्मणस्तेन यास्यति। ततस्तां जानकीं वेगाल्लङ्कां स्वामानयाम्यहम्॥८५॥
लंकायास्तव दास्यामि स्वीयराज्याद्धमादरात्। इति तस्याग्रहं दृष्ट्वा मारीचो ह्यचिंतयत् ॥८६॥
रामहस्तान्मृतिः श्रेष्ठा माऽस्तु रावणहस्ततः। इति निश्चित्य मारीचस्तथेत्युक्त्वा ययौ तदा ॥८७॥
रावणेन रथे स्थित्वा गत्वा पंचवटीं प्रति। भूत्वा हेममयश्चित्रो मोहयामास जानकीम् ॥८८॥
सा छाया तामसी दृष्ट्वा मृगं राघवमब्रवीत्। क्रीडार्थं मां मृगं चेमं धृत्वा देहि रघूत्तम ॥८९॥
मृगश्चेद्बाणभिन्नांगः करोमि कंचुकीं त्वचः। तत्तस्या वचनं श्रुत्वा ज्ञात्वा सर्वं रघूत्तमः ॥९०॥

कहनेसे लक्ष्मणने पंचवटीमें मेरी यह दशा की है ॥ ७४ ॥ उन्होंने विना किसी कारण तपस्या करते हुए मेरे प्राणप्रिय पुत्र साम्बको भी मार डाला। तब मुझे संतुष्ट करनेके लिए खर-दूषणादि भाइयोंने रामके साथ युद्ध किया। किन्तु उसने उन्हें भी मार डाला ॥ ७५ ॥ यदि तेरेमें कुछ भी बल हो तो सीताका हरण कर, नहीं तो पतिके मर जानेपर विधवा स्त्रीकी तरह नीचा मुँह करके बैठा रह ॥ ७६ ॥ उसके वचन सुनकर रावण अपनी बहिनको समझाने लगा और बोला कि मैं राम-लक्ष्मणको मारकर उनके खूनसे तुम्हारे शोकाश्रुका मार्जन करूँगा—तुम दुखी न होओ। इस प्रकार अनेक वाक्योंसे उसने भगिनीको बार-बार समझाया ॥ ७७ ॥ ७८ ॥ पश्चात् रथपर बैठकर वह हितका उपदेश करनेवाले तथा तपमें स्थित अपने मामा मारीचके पास गया और उसे सब हाल कह सुनाया ॥ ७९ ॥ तब मारीच अपने भांजे रावणको वार-बार डराता हुआ बोला कि रामने मुझे विश्वामित्रके यज्ञके समय बाणसे उठाकर समुद्रके किनारे फेंक दिया था ॥ ८० ॥ तभीसे मैं रथ, रत्न, रजत (चांदी), रुक्म (सोना) तथा रमणी आदि नामोंके रकार अक्षर सुनने मात्रसे ही डर जाता हूँ (अर्थात् रामके भयसे मैंने इन सब चीजोंसे प्रेम करना भी छोड़ दिया है) ॥ ८१ ॥ लंकाका नाश करनेवाली यह मंत्रणा तुमको किसने दी है ? वह मित्ररूपमें छिपा हुआ तुम्हारा शत्रु ही है, जिसने तुमको यह मति दी है ॥ ८२ ॥ उसकी बात मत मनो, नहीं तो मारे जाओगे। यह सुना तो क्रुद्ध होकर रावण मारीचसे बोला--यदि तुम रामके पास नहीं जाओगे तो मैं तुम्हें मार डालूँगा। इसलिये मेरा कहा मान लो। तुम मृग बनकर जब रामके पास जाओगे तो राम तुम्हारे पीछे चल देंगे। वनमें दूर ले जाकर तुम रामके जैसा स्वर बनाकर ''हा लक्ष्मण'' ऐसा चिल्लाना। तब लक्ष्मण भी आश्रम छोड़कर तुम्हारी ओर चल देंगे। उस समय मैं शीघ्र सीताको अपनी लंकामें उठा लाऊँगा। ८३--८५ ॥ यदि मेरा कार्य सिद्ध हो जायगा तो मैं तुमको लंकाका आधा राज्य दे दूँगा। उसके आग्रहको सुनकर मारीचने मनमें विचार किया कि रावणके हाथसे मरनेकी अपेक्षा रामके हाथसे मरना अच्छा है। यह निश्चय करके मारीच 'बहुत अच्छा' कह तथा रथपर सवार होकर रावणके साथ पंचवटीको उसी समय चल पड़ा। वहाँ जाकर उसने सुवर्णका मृग बनकर सीताको मोहित कर लिया ॥ ८६--८८ ॥ तब तमोगुणमयी छायारूपिणी सीता मृगको देखकर रामसे बोलीं—हे रघूत्तम राम ! इस मृगको पकड़कर मुझे दे दो। मैं उसके साथ क्रीड़ा करूँगी ॥ ८९ ॥ और यदि बाणसे मारकर ला दो तो मैं उसके चमड़ेकी चोली बनाऊँगी। सीताके वचन सुन तथा कुछ सोच-समझकर रघूत्तम राम सीताकी रक्षाके लिये भाई लक्ष्मणको

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सीताया रक्षणे बंधुं संस्थाप्याशु मृगं ययौ । ततः पलायनं चक्रे मृगो रामं विकर्षयन् ॥९१॥
रामबाणेन भिन्नांगः शब्दं दीर्घं चकार सः । हा सौमित्रे समागच्छ हा हतोऽस्म्यद्य कानने ॥९२॥
इत्युक्त्वा रामवद्वाचा ममार रुधिरं वमन् । तं शब्दं जानकी श्रुत्वा चोदयामास लक्ष्मणम् ॥९३॥
सोऽप्याह रामवचनं नेदं सीते भयं त्यज । ततः सा तं पुनः प्राह जानामि तव चेष्टितम् ॥९४॥
भरतस्योपदेशेन मृतिं रामस्य वांछसि । अथवा मेऽभिलाषोस्ति तर्हि प्राणांस्त्यजाम्यहम् ॥९५॥
तत्क्रूरवचनं तस्याः श्रुत्वा ज्ञात्वा महद्भयम् । जानकीं प्राह सौमित्रिर्मातः शृणु वचो मम ॥९६॥
राघवाज्ञां पुरस्कृत्य रक्षतस्त्वां मम त्वया । ताडितं वाक्शरेणाद्य भोक्ष्यस्यस्याचिरात्फलम् ॥९७॥
तथापि शृणु मद्वाक्यं यन्मयाऽत्रोच्यते हितम् । मयैतां धनुषो रेखां कृतां त्वत्परितोऽधुना ॥९८॥
त्वद्रक्षणार्थं दुष्टानां दुर्विलंघ्यां महत्तमाम् । मा त्वमुल्लंघयस्वेमां प्राणैः कंठगतैरपि ॥९९॥
इत्युक्त्वा धनुषः कोट्या कृत्वा रेखां समंततः । बाह्यदेशे पंचवट्याः सौमित्रिः परिघोपमाम् ॥१००॥
नत्वा सीतां ततस्तूष्णीं ययौ रामं त्वरान्वितः । एतस्मिन्नंतरे तत्र रावणो भिक्षुरूपधृक् ॥१०१॥
गत्वा पंचवटीद्वारं रेखायाश्च बहिः स्थितः । नारायणेति वै चोक्त्वा तूष्णीं तस्थौ स रावणः ॥१०२॥
तावच्छायामयी सीता भिक्षां तस्मै समर्पितुम् । ययौ द्वारं दीर्घहस्ता गृह्णीष्वेत्यब्रवीच्च तम् ॥१०३॥
तदा भिक्षुः पुनः प्राह सीतां पंकजलोचनाम् । नांगीकरोम्यंतरेण भिक्षामेतां त्वयार्पिताम् ॥१०४॥
गार्हस्थ्यं चेद्राघवस्य रक्षितुं त्वं समिच्छसि । तर्हि रेखां समुल्लंघ्य मां भिक्षां दातुमर्हसि ॥१०५॥
तद्भिक्षुवचनं श्रुत्वाऽधर्मोऽभून्मेति शंकिता । रेखाबहिः सव्यपादं दत्त्वा दीर्घलसत्करा ॥१०६॥
गृह्णीष्वेमां वरां भिक्षामिति तं प्राह जानकी । ततो दशास्यस्तां धृत्वा भिक्षुरूपं विसृज्य च ॥१०७॥
खरवाहे रथे सीतां संस्थाप्याथ न्यवर्तत । यावद्गच्छति वेगेन तावद्दृष्टो जटायुषा ॥१०८॥

नियुक्त करके शीघ्र मृगके पीछे चल दिये । हरिण भी रामके आगे दौड़ता हुआ उन्हें बहुत दूर जंगलमें दौड़ा ले गया ॥ ९० ॥ ९१ ॥ वहाँ बाणसे घायल होकर वह जोरसे रामके स्वरमें चिल्लाने लगा–'हा लक्ष्मण ! मैं वनमें मारा गया, शीघ्र आओ' ॥ ९२ ॥ इतना कहकर मारीच रक्त वमन करता हुआ मर गया । उस शब्दको सुनकर जानकीने लक्ष्मणको जानेके लिये कहा ॥ ९३ ॥ लक्ष्मण बोले–हे सीते ! यह रामका वाक्य नहीं है, मत डरो । सीता फिर कहने लगीं कि मैं अब तुम्हारे अभिप्रायको जान गयी ॥ ९४ ॥ तुम भरतके कहनेके अनुसार रामका मरण अथवा रामके मर जानेपर मुझे भोगना चाहते हो । परन्तु याद रखो, मैं तुम्हारी अभिलाषा पूरी नहीं होने दूँगी और अभी मर जाऊँगी ॥ ९५ ॥ सीताके इस वचनको सुनकर सुमित्रापुत्र लक्ष्मण जानकीसे बोले—हे माता ! मेरी बात सुनो ॥ ९६ ॥ रामकी आज्ञासे तुम्हारी रक्षामें तत्पर मुझको तुमने जो वाणीरूपी बाणोंसे ताडित किया है, उसका फल तुम शीघ्र पाओगी ॥ ९७ ॥ तो भी मेरे कहे हुए इस हितकारी वचनको सुन लो । मैं धनुषसे तुम्हारे चारों ओर यह रेखा खींचे देता हूँ ॥ ९८ ॥ यह तुम्हारी रक्षाके लिए और दुष्टोंके लिये दुर्लंघनीय तथा महान् भय उत्पन्न करनेवाली होगी । प्राणोंके कण्ठमें आ जानेपर भी तुम इस रेखाका उल्लंघन नहीं करना ॥ ९९ ॥ ऐसा कहकर धनुषकी कोरसे लक्ष्मणने पञ्चवटीके बाहर खाईंकी भाँति सीताकी चारों ओर रेखा खींच दी ॥ १०० ॥ तदनन्तर सीताको प्रणाम करके चुपचाप शीघ्र रामकी ओर चल दिये । इसी समय रावण भिक्षुकका रूप धारण करके पंचवटीके द्वारपर जाकर रेखाके बाहर खड़ा हो गया और "नारायणहरि" कहकर चुप हो रहा ॥ १०१ ॥ १०२ ॥ तब छायामयी सीता उसको भिक्षा देनेके लिये बाहर आयीं और हाथ बढ़ाकर भिक्षुसे 'भिक्षा लो' ऐसा कहा ॥ १०३ ॥ तब कमलके समान नेत्रोंवाली सीतासे भिक्षुने कहा कि मैं रेखाके भीतरसे बँधी हुई भीख नहीं लेता ॥ १०४ ॥ यदि तुम रामके गृहस्थाश्रमकी रक्षा करना चाहती होओ तो रेखाके बाहर आकर भिक्षा दो ॥ १०५ ॥ भिक्षुके इस वचनको सुनकर 'कहीं पाप न लगे' इस शंकासे बायें पावँको रेखासे बाहर रख और लम्बा हाथ करके ॥ १०६ ॥ जानकी 'यह भिक्षा लो' ऐसा बोलीं । तभी रावणने उनको पकड़ लिया और भिक्षुका रूप त्याग तथा सीताको गधोंके रथपर बिठालकर पीछे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चकार तुमुलं युद्धं रावणेन स पक्षिराट् । निजपद्भ्यां मुखेनाथ चूर्णीकृत्य रथोत्तमम् ॥१०९॥
खरानष्टौ विनिष्पिष्य बभंज तद्धनुर्महत् । मुकुटान् दश संछिद्य कृत्वा देहं तु जर्जरम् ॥११०॥
मूर्छितं रावणं कृत्वा तां सीतां संन्यवर्तयत् । स्वस्थीभूतो दशास्योऽपि ताडयामास तं पदा ॥१११॥
क्रोधेन महताविष्टः पक्षिणा जर्जरीकृतः । ततो जटायुः पतितो वमन् रक्तं मुखेन सः ॥११२॥
ततो विहायसा सीतां निनाय रावणः पुनः । रामरामेति जल्पंती सीताऽभून्न्यस्तलोचना ॥११३॥
उत्तरीये बबंधाथ पथि स्वाभरणानि सा । दृष्ट्वाऽधः पर्वते प्रोच्चैः संस्थितान् पंच वानरान् ॥११४॥
प्राक्षिपत्कपिमध्येऽथ सूचनार्थं रघूत्तमम् । ततो दशास्यस्तां नीत्वा ह्यशोके संन्यवेशयत् ॥११५॥
प्रार्थयामास तां सीतां नोत्तरं सा ददौ तदा । तस्याः संरक्षणार्थाय राक्षसीश्च सहस्रशः ॥११६॥
आज्ञापयद्दशास्यः स स्वयं गेहं विवेश ह । तदेन्द्रो ब्रह्मवाक्येन पायसं वर्षतुष्टिदम् ॥११७॥
ददौ रहसि सीतायै तेन तुष्टा बभूव सा । समर्प्य पायसं किंचिद्रामाय लक्ष्मणाय च ॥११८॥
सुरानतिथये दत्त्वा दत्त्वा धेनुं च खेचरान् । दत्त्वाऽथ त्रिजटां किंचिद्भक्षयामास जानकी ॥११९॥
संमंत्र्य रावणेनापि राक्षसांश्चैव षोडश । प्रेषिता रामघातार्थं ते कबंधेन भक्षिताः ॥१२०॥
यत्र यत्र पंचवट्यां रामबाणभयान्मृगः । चचार गौतमीतीरे संस्थानं तत्र तत्र हि ॥१२१॥
स्थानसंज्ञान्यनेकानि जातानि च पुराणि हि । मृगस्य पतितं यत्र नूपुरं परिधावता ॥१२२॥
नूपुराख्यो महाग्रामः प्रोच्यते गौतमीतटे । रामबाणप्रहारेण चपलाक्षोऽपतद्भुवि ॥१२३॥
मृगो यत्र महाँस्तत्र चापल्यग्राम इर्यते । गोदातटे ग्रावभूम्यां रामबाणहतो मृगः ॥१२४॥
पतितो यत्र तच्चिह्नं दृश्यतेऽद्यापि मानवैः । सौमित्रचापजा रेखा पंचवट्याः समन्ततः ॥१२५॥

लौटा। वह भागा जा रहा था, तभी जटायुने उसे देख लिया ॥ १०७ ॥ १०८ ॥ तब पक्षिराज जटायुने रावणके साथ तुमुल युद्ध किया। अपने पाँवों और चोंचसे मार-मारकर उसके रथको चूर-चूर कर दिया ॥ १०९ ॥ आठों गदहोंको पीस डाला। उसका बड़ा भारी धनुष तोड़ दिया। मुकुटोंको काट डाला और उसके शरीरको जर्जरित कर दिया ॥ ११० ॥ इतना ही नहीं, रावणको मूर्छित करके वह सीताको लौटा लाने लगा। तभी रावण भी स्वस्थ होकर उसको पाँवसे मारने लगा ॥ १११ ॥ बड़ा क्रोध करके रावणने पक्षीको और पक्षीने रावणको जर्जर कर दिया। अन्तमें जटायु घायल होकर धरतीपर गिर पड़ा ॥ ११२ ॥ तब रावण सीताको लेकर आकाशमार्गसे लङ्काकी ओर चल पड़ा। बेचारी सीता नीची आँखोंसे 'हा राम-हा राम' चिल्लाने लगीं ॥ ११३ ॥ उसी समय उन्होंने नीचे एक उन्नत पर्वतके शिखरपर बैठे हुए पाँच वानर सुग्रीव-हनुमान् आदिको देखा और अपनी साड़ीको फाड़ तथा उसके टुकड़ेमें अपने गहने बाँधकर वहीं गिरा दिये। उधर दशमुख रावणने सीताको ले जाकर लंकाकी अशोकवाटिकामें रखा ॥ ११४ ॥ ११५ ॥ प्रेम करनेके लिये उसने सीतासे बड़ी प्रार्थना की, परन्तु सीता किसी प्रकार सहमत नहीं हुईं और न उसकी बातोंका कुछ उत्तर ही दिया। उनकी रक्षाके लिये रावणने वहाँ हजारों राक्षसियें नियुक्त कर दीं ॥ ११६ ॥ उनकी रक्षा करनेकी आज्ञा देकर रावण अपने महलमें चला गया। इसी अवसरपर ब्रह्माके कहनेसे इन्द्रने वहाँ जाकर वर्ष भर तक भूखको मिटाकर सन्तुष्ट रखनेवाला पायस (खीर) एकान्तमें सीताको दिया। इससे सीता बड़ी प्रसन्न हुईं। उन्होंने राम तथा लक्ष्मणके नाम उसमेंसे कुछ पायस निकाला ॥ ११७ ॥ ११८ ॥ कुछ देवताओंको दिया। कुछ गौओं तथा पक्षियोंको खिलाया और थोड़ासा त्रिजटाको देकर बादमें बची हुई थोड़ीसी खीर जानकीने स्वयं खाया ॥११९॥ तदनन्तर रावणने सलाह करके सोलह राक्षसोंको रामको मारनेके लिये भेजा, परन्तु वे सब रास्तेमें ही कबन्धके द्वारा खा डाले गये ॥ १२० ॥ उस समय पञ्चवटीमें रामके बाणके भयसे जहाँ-जहाँ मृगरूपी मारीच गया था, गौतमीके किनारे वहाँ सर्वत्र अनेक नामवाले स्थान स्थापित हुए। जिस जगह दौड़ते हुए मृगका नूपुर गिर पड़ा था, वहाँ नूपुरपुर नामका बड़ा भारी गाँव बस गया। रामके बाणसे ताडित होकर चपल नेत्रोंवाला मृग जहाँ पृथ्वीपर गिर गया था, वहाँ बड़ा भारी चापल्य नामका गाँव अब भी बसा हुआ दीखता है। गोदावरीके किनारे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अद्यापि दृश्यते स्पष्टा नदीरूपा भयावहा । पाषाणभूम्यां तत्रैव रावणस्य पदं महत् ॥१२६॥
अद्यापि दृश्यते भीमं गर्तरूपं नरोत्तमैः । खराद्यैर्युद्धसमये पंचवट्यां विदेहजा ॥१२७॥
गुहायां गोपिता भर्त्रा साऽद्यापि तत्र दृश्यते । तथा रामो लक्ष्मणोऽपि पंचवट्यां सदैव हि ॥१२८॥
दृश्यतेऽद्यापि भो देवि तज्ज्ञनैर्ज्ञानदृष्टिभिः । अज्ञानदृष्टिभिस्ते तु दृश्यते ग्रावरूपिणः ॥१२९॥
रामतीर्थं रामकृतं सीतालक्ष्मणसंस्कृते । तीर्थे तत्र तु गौतम्यां दृश्यतेऽद्यापि मानवैः ॥१३०॥
रामेण सीतया यत्र शय्यायां पर्वतोपरि । कृतं पूर्वं तु शयनं रामशय्यागिरिः स्मृतः ॥१३१॥
शय्यारूपाणि दृश्यंतेऽद्यापि तत्र तृणानि हि । रामोऽपि लक्ष्मणं दृष्ट्वा श्रुत्वा सीतावचोऽशुभम् ॥१३२॥
निवेदितं लक्ष्मणेन क्रोधाश्रुस्मयचेतसा । निमित्तान्यतिघोराणि दृष्ट्वा चैव समंततः ॥१३३॥
ययौ पंचवटीं व्यग्रस्तत्र सीता ददर्श न । ततो मानुषभावं तु दर्शयन् सकलाञ्जनान् ॥१३४॥
विचिन्वन्सर्वतः सीतां गृध्रराजं ददर्श सः । ततः स पक्षिवचसा रावणेन हृतां प्रियाम् ॥१३५॥
ज्ञात्वा तं योजयामास वह्निना जीवितक्षये । तत्तुष्ट्यर्थं वन्यमांसं क्षिप्त्वा स्नात्वा रघूत्तमः ॥१३६॥
ययौ दक्षिणमार्गेण विचिन्वन्मूढवत्प्रभुः । पूर्ववदग्निहोत्रं स चकार कुशभार्यया ॥१३७॥
एतस्मिन्नंतरे देवि त्वया प्रोक्तस्त्वहं पुरा । त्वया यस्य जपो नित्यं क्रियते राघवस्य हि ॥१३८॥
सोऽयं स्त्रीविरहात्पश्य मूढवद्भ्रमते वने । तवेति वचनं श्रुत्वा तदा त्वामब्रुवं त्वहम् ॥१३९॥
देवि साक्षान्महाविष्णुस्त्वयं रामो महातले । शिक्षार्थं सकलाँल्लोकान् मूढवद्भ्रमते वने ॥१४०॥
नारीसंगो नरैस्त्याज्यः सर्वदाऽत्रेति शिक्षयन् । नारीविषयजं दुःखमीदृशं भ्रमकारकम् ॥१४१॥
दर्शयन् सकलाँल्लोकानिति सोऽत्राटते वने । इति मद्वचनं श्रुत्वा तत्परीक्षार्थमुद्यता ॥१४२॥

जहाँ ग्रावभूमि (पथरीली धरती) पर रामबाणसे निहत होकर मृग गिरा था ॥ १२१-१२५ ॥ उसका चिह्न वहाँ आज भी मनुष्योंको दिखाई देता है। सुमित्रापुत्र लक्ष्मणके धनुष द्वारा खींची हुई रेखा पंचवटीके चारों ओर आज भी भयानक नदीके रूपको धारण हुए स्पष्ट दिखाई देती है। उस पाषाणमयी भूमिमें रावणका बड़ा भारी पदचिह्न एक बड़े भारी गढ़ेके रूपमें अब भी दिखाई दे रहा है। पहले खरके साथ युद्ध करनेके समय पंचवटीमें विदेहजा सीताको जिस गुफामें उनके पति रामने छिपाया था, वह भी विद्यमान है। हे देवि ! सज्जन तथा ज्ञानी महात्माओंको सदैव राम-लक्ष्मणका वहाँ दर्शन होता है और सीताके स्थापित तीर्थ इस समय भी दिखाई देते हैं ॥ १२६-१३० ॥ जिस पर्वतपर रामने शय्या निर्माण करके सीताके साथ शयन किया था, वह रामशय्यागिरिके नामसे प्रसिद्ध है ॥ १३१ ॥ वहाँके तृण आज भी शय्याकार दिखाई देते हैं। इधर रामने लक्ष्मणको आया देखा तथा उनके मुखसे सीताके कहे दुर्वचनको सुना ॥ १३२ ॥ यह सब हाल लक्ष्मणने क्रोधपूर्वक आँसू बहाते हुए तथा विस्मयके साथ कहा था। राम चारों ओर अत्यन्त भयानक शकुनोंको देख तथा घबराकर शीघ्र ही पंचवटीमें गये तो वहाँ सीता नहीं दिखाई दीं। पश्चात् मनुष्यभावसे वे समस्त वनके पशु-पक्षी तथा जड़ वृक्षों आदिसे सीताका पता पूछने और सीताको सर्वत्र ढूँढने लगे। इतनेमें गृध्रराज जटायु दिखायी दिया। उस पक्षीके मुँहसे सुना कि रावण प्रिया सीताका हरण कर ले गया है ॥ १३३-१३५ ॥ मरणोपरान्त जटायुके कथनानुसार रामने उसका अग्निसंस्कार किया। उसकी शान्ति तथा तुष्टिके लिए रामने वन्य मृग आदिके मांससे पिण्डदान किया और स्नान आदि क्रिया की ॥ १३६ ॥ पश्चात् सर्वेश्वर राम मूढ़ पुरुषकी तरह सीताको खोजते हुए दक्षिणकी ओर चले। रास्तेमें सीताके अभावमें कुशाकी सीता बनाकर उसीके साथ रामने अग्निहोत्र किया ॥ १३७ ॥ इसी बीच हे देवि पार्वती ! तुमने मुझसे प्रश्न किया था--हे प्रभो ! आप नित्यप्रति जिन रामका नाम जपा करते हैं ॥ १३८ ॥ वही राम स्त्रीके विरहसे मूढ़की तरह वनमें मारे-मारे फिर रहे हैं। तुम्हारा यह वचन सुनकर मैंने तुमसे कहा-- ॥ १३९ ॥ हे देवि ! यह साक्षात् विष्णु भगवान् राम बनकर पृथ्वीमण्डलके लोगोंकी शिक्षा देनेके लिए वनमें मूढ़की तरह भ्रमण कर रहे हैं ॥ १४० ॥ वे सबको यह उपदेश देते हैं कि मनुष्यको स्त्रीमें आसक्त नहीं होना चाहिए। स्त्रीविषयक आसक्ति ऐसे ही दुःख

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वं गताऽसि समीपं श्रीराघवस्य तदा वने। सीतारूपेण तं रामं त्वया प्रोक्तं शुभं वचः ॥१४३॥
राम राजीवपत्राक्ष मामग्रे पश्य जानकीम्। क्रीडस्वात्र मया सार्धमेहि शीघ्रं सुखी भव ॥१४४॥
त्वदुक्तं राघवः श्रुत्वा विहस्य त्वां वचोऽब्रवीत्। जानाम्यहं त्वं कासीति सीता त्वं नासि वेद्म्यहम् १४५
त्वं किं सीतास्वरूपेण मोहयस्यत्र मां वने। एवं पुनः पुनः प्रोक्ता यदा त्वं राघवेण हि ॥१४६॥
तदा त्वया तत्स्वरूपं ज्ञातं सत्यं मयेरितम्। ततो नत्वा रामचंद्रं प्रार्थयित्वा पुनः पुनः ॥१४७॥
आगताऽसि पुनर्मां त्वं कैलासशिखरेऽमले। त्वं का त्वं किमिति प्रोक्ता राघवेण पुनः पुनः ॥१४८॥
या त्वं सा दंडके जाता त्वं का नाम्नांबिका वने। त्वं लज्जिताऽसि रामेण यत्र तत्र तव स्थले ॥१४९॥
तल्लज्जापुरनाम्नाऽऽसीन्नगरं दंडके वने। ततस्तौ रामसौमित्री जग्मतुर्दक्षिणां दिशम् ॥१५०॥
बहवो निहता मार्गे राक्षसा घोररूपिणः। एतस्मिन्नंतरेऽरण्ये कबंधेन धृतौ तदा ॥१५१॥
श्रीरामलक्ष्मणौ मार्गे योजनायतबाहुना। दृष्ट्वा तं शिरसा हीनं बाहू चिच्छेदतुस्तदा ॥१५२॥
ततः स दिव्यरूपोऽभून्नत्वा रामं वचोऽब्रवीत्। पुरा गंधर्वराजोऽहं ब्रह्मणो वरदानतः ॥१५३॥
केनाप्यवध्यस्त्वहमष्टावक्रं मुनीश्वरम्। रक्षो भवेति शप्तोऽहं मुनिना प्राह मां पुनः ॥१५४॥
त्रेतायुगे यदा रामलक्ष्मणौ योजनायतौ। छेत्स्यतस्ते महाबाहू तदा शापात्प्रमोक्ष्यसे ॥१५५॥
ततो राक्षसदेहोऽहमिन्द्रमभ्यद्रवं रुषा। सोऽपि वज्रेण मां राम शिरोदेशे ह्यताडयत् ॥१५६॥
तदा कुक्षौ शिरःपादयुगलं च गतं क्षणात्। ब्रह्मदत्तवरान्मृत्युर्नाभून्मे वज्रताडनात् ॥१५७॥
मुखाभावे कथं जीवेदयमित्यमराधिपः। तदा मां प्राह कृपया जठरे ते मुख भवेत् ॥१५८॥
बाहू ते योजनायामावद्य शीघ्रं भविष्यतः। तदारभ्यात्र बाहुभ्यां लब्धं तद्भक्षयाम्यहम् ॥१५९॥

तथा भ्रमका कारण बनती है ॥ १४१ ॥ इन बातोंको बतलाने तथा लोगोंको शिक्षा देनेके लिए राम वनमें इधर-उधर भ्रमण कर रहे हैं। मेरे इस उत्तरको सुनकर तुम उनकी परीक्षा लेनेको उद्यत हुईं ॥ १४२ ॥ उस समय तुम सीताका रूप बनाकर श्रीरामके पास गयीं और उनसे कहा--॥ १४३ ॥ हे कमलसदृश नेत्रोंवाले राम! अपने सामने खड़ी मुझ जानकीको देखो। आओ, मेरे साथ इस वनमें क्रीड़ा करके सुख प्राप्त करो ॥ १४४ ॥ तुम्हारे कथनको सुनकर राम हँसे और कहा—मैं जानता हूँ कि तुम कौन हो ॥ १४५ ॥ व्यर्थ सीताका रूप धारण करके मुझे क्यों मोहित करती हो? इस प्रकार जब रामने बारम्बार कहा ॥ १४६ ॥ तब तुमने मेरे कहनेके अनुसार रामका वास्तविक स्वरूप पहिचान और उनकी पुनः पुनः प्रार्थना करके क्षमा माँगो ॥ १४७ ॥ १४८ ॥ तदनन्तर तुम रमणीक कैलास पर्वतके शिखरपर मेरे पास लौट आयीं। जहाँपर रामने तुमसे पूछा था कि तुम कौन हो? यहाँ क्यों आयी हो और तुम्हारे नामकी अम्बिका तो दण्डकारण्यमें रहती हैं। यह सुनकर तुम लज्जित हुईं। जिससे वहाँपर लज्जापुर नामका एक नगर बस गया। तदनन्तर वे राम-लक्ष्मण दक्षिणकी ओर चल दिये ॥ १४९ ॥ १५० ॥ उन्होंने मार्गमें बहुतसे घोर राक्षसोंको मारा। इसी जङ्गलमें कबंधने उन दोनोंको पकड़ लिया ॥ १५१ ॥ उसके चार-चार कोसके लम्बे हाथ थे। उसे सिरसे रहित देखकर उसके दोनों हाथ राम-लक्ष्मणने काट डाले ॥ १५२ ॥ तब वह दिव्य रूप धारण करके नमस्कारपूर्वक रामसे कहने लगा--पहले मैं गन्धर्वोंका राजा था। ब्रह्माने मुझे वर दिया था कि तुमको कोई नहीं मार सकेगा। इस गर्वसे मैं एक दिन मुनीश्वर अष्टावक्रकी कुरूप देखकर हँस पड़ा। इसपर उन्होंने क्रुद्ध होकर मुझको शाप दिया कि तू राक्षस हो जायगा। मेरे प्रार्थना करनेपर फिर वे बोले—॥ १५३ ॥ १५४ ॥ त्रेता युगमें जब राम-लक्ष्मण तेरी इन योजन भर विस्तारवाली भुजाओंको काटेंगे, तब तू शापसे मुक्त हो जायगा ॥ १५५ ॥ राक्षस होकर एक दिन मैंने इन्द्रके ऊपर धावा किया। उन्होंने कुपित होकर मेरे मस्तकपर वज्र मारा ॥ १५६ ॥ जिससे मेरा सिर और दोनों पाँव पेटमें घुस गये। परन्तु ब्रह्माका वरदान प्राप्त रहनेसे मेरी मृत्यु नहीं हुई ॥ १५७ ॥ तब मैंने देवताओंके अधिपति इन्द्रसे प्रार्थना की कि मैं बिना मुखके किस प्रकार जी सकूँगा। तब उन्होंने कृपा करके कहा कि जा, तेरे पेटमें मुख हो जायगा ॥ १५८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिष्ठन्त्यग्रे मतंगादिमुनीनां परिचारिकाः । शबरीदर्शनार्थं त्वं तत्र याहि रघूत्तम ॥१६०॥
कथयिष्यति सा सीताशुद्धिं ते रघुनंदन । इत्युक्त्वा राघवं नत्वा स्तुत्वा स्वर्गं ययौ मुदा ॥१६१॥
ततो रामो लक्ष्मणेन शबरीसंनिधिं ययौ । साऽपि संपूज्य श्रीरामं विशेषैर्वनसंभवैः ॥१६२॥
चितामारोढुमुद्युक्ता राघवं प्राह हर्षिता । ऋष्यमूकगिरावग्रे सुग्रीवो मंत्रिभिः सह ॥१६३॥
वर्तते तस्य सख्येन सीताशुद्धिं लभिष्यसि । गच्छ राम इतस्त्वग्रे पंपानाम सरोवरम् ॥१६४॥
तत्तटाके तु वृक्षाणां फलानि विविधानि च । भक्षस्व त्वं जलं पीत्वा याहि सुग्रीवसंनिधिम् ॥१६५॥
इत्युक्त्वा शबरी रामं नत्वा वह्निं विवेश सा । रामसंदर्शनान्मुक्तिं प्राप्ता वैकुण्ठमाययौ ॥१६६॥
ततो रामः शनैर्भ्रात्रा ययौ पंपासरोवरम् । फलानि भक्षयामास पीत्वा तज्जलमुत्तमम् ॥१६७॥
ततः शनैर्ययौ मार्गे ऋष्यमूकाचलं प्रति । पश्यन्वनानि सर्वत्र चिंतयामास जानकीम् ॥१६८॥
एवं गिरींद्रजे प्रोक्तमारण्यं चरितं तव । श्रीरामस्य ससीतस्य लक्ष्मणेन युतस्य च ॥१६९॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे
खरादिवधो नाम सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः

(राम-सुग्रीवमैत्री और वालिवध)

श्रीशिव उवाच

अथ रामो लक्ष्मणेन ऋष्यमूकाचलं प्रति । ययौ धृतधनुर्बाणो नेत्रे सर्वत्र चालयन् ॥ १ ॥
ऋष्यमूकगिरेः पार्श्वे गच्छंतौ रामलक्ष्मणौ । सुग्रीवेणाथ तौ दृष्टौ ऋष्यमूकस्थितेन हि ॥ २ ॥
सुग्रीवस्तौ तदा दृष्ट्वा चतुर्भिर्मंत्रिभिर्युतः । संमंत्र्य मारुतिं प्राह बालिना प्रेषितावुभौ ॥ ३ ॥

शीघ्र ही तेरे हाथ भी योजन-योजन भर लम्बे हो जायँगे । तबसे मैं जो कुछ इन हाथोंके बीच आ जाता है, खा लेता हूँ ॥ १५६ ॥ यहाँसे आगे मतङ्ग आदि मुनियोंकी परिचारिकायें रहती हैं । हे रघूत्तम ! आप वहाँ जाकर शबरीसे मिलें ॥ १६० ॥ हे रघुनन्दन ! वह आपको सीताका पता बतायेगी । इतना कहकर उसने रामकी स्तुति की और नमस्कार करके वह सानन्द स्वर्गको चला गया ॥ १६१ ॥ तदनन्तर राम लक्ष्मणको लेकर शबरीके पास गये । शबरीने वनके अच्छे-अच्छे पुष्पों तथा फलोंसे उनका पूजन-सत्कार किया ॥१६२॥ बादमें चितारोहण करते समय हर्षपूर्वक वह रामसे बोली कि आगे ऋष्यमूक पर्वतके शिखरपर मन्त्रियोंके साथ सुग्रीव रहता है ॥ १६३ ॥ उसकी मित्रता प्राप्त करनेसे आपको सीताका पता मिल जायगा । हे राम ! आप यहाँसे चलकर पंपासरोवर जायँ ॥ १६४ ॥ उसके किनारेपर लगे हुए वृक्षोंके विविध फल खा तथा जलपान करके आप सुग्रीवके पास जाइएगा ॥ १६५ ॥ इतना कहकर शबरीने रामको प्रणाम किया और अग्निमें प्रवेश कर गयी । इस प्रकार रामके दर्शनमात्रसे मुक्त होकर वह वैकुण्ठधाम सिधारी ॥१६६॥ तदनन्तर राम भाई लक्ष्मणके साथ पम्पासरोवर गये । वहाँके सुन्दर फल खाकर सरोवरका निर्मल जल पिया ॥ १६७ ॥ पश्चात् धीरे-धीरे ऋष्यमूक पर्वतकी ओर चले । रास्तेमें चारों ओर हरे-भरे वनोंकी शोभा देखकर राम बारम्बार जानकीका स्मरण करने लगे ॥ १६८ ॥ हे गिरीन्द्रजे ! यह मैंने तुमको सीता, लक्ष्मण तथा श्रीरामका किया हुआ चरित्र कह सुनाया ॥ १६९ ॥ इति शतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे पं० रामतेजपाण्डेयकृत'ज्योत्स्ना'भाषाटीकायां सप्तमः सर्गः ॥ ७ ॥

श्रीशिवजी बोले—हे प्रिये ! इस तरह राम हाथमें धनुष-बाण लिये और नेत्रोंसे चारों ओर देखते हुए लक्ष्मणके साथ ऋष्यमूक पर्वतके पास पहुँचे ॥ १ ॥ वहाँ शिखरपर बैठे सुग्रीवने पर्वतके पास आते हुए राम-लक्ष्मणको देख लिया ॥ २ ॥ उन्हें देखकर सुग्रीवने अपने चारों मन्त्रियोंको बुलवाया और उनसे मन्त्रणा

CC-0. In Public Domain. Kirtikant Sharma Najafgarh, Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मां हंतुं धृतकोदंडौ सतूणीरौ नराकृती । इतोऽस्माभिः प्रगंतव्यं मंत्रं शृणु मयोच्यते ॥४॥
गच्छ जानीहि भद्रं ते वटुर्भूत्वा द्विजाकृतिः । ताभ्यां संभाषणं कृत्वा जानीहि हृदयं तयोः ॥५॥
यदि तौ दुष्टहृदयौ संज्ञां कुरु कराग्रतः । साधुत्वे स्मितवक्त्रोऽभूरेवं जानीहि निश्चयम् ॥६॥
तथेति वटुरूपेण गत्वा नत्वा रघूत्तमम् । कौ युवां पुरुषव्याघ्राविति पप्रच्छ मारुतिः ॥७॥
ततस्तं लक्ष्मणः प्राह पूर्ववृत्तं सविस्तरम् । शबरीवचनाद्रामः सख्यं कर्तुं समागतः ॥८॥
सुग्रीवेणाथ तच्छ्रुत्वा स्वरूपं मारुतिस्तदा । चकार नैजं प्रकटं स्वीयं वृत्तं न्यवेदयत् ॥९॥
मत्स्कंधमधिरुह्याद्य पर्वतं गंतुमर्हथः । तथेति मारुतेः स्कंधे संस्थितौ तौ बभूवतुः ॥१०॥
उत्पपात गिरेर्मूर्ध्नि क्षणादेव महाकपिः । वृक्षच्छायां समाश्रित्य तौ स्थितौ रामलक्ष्मणौ ॥११॥
सुग्रीवं मारुतिर्गत्वा रामवृत्तं न्यवेदयत् । ततः प्रज्वाल्य वह्निं स सुग्रीवो राघवेण हि ॥१२॥
चकार सख्यं वेगेन समालिंग्य परस्परम् । वृक्षशाखां स्वयं छित्त्वा विष्टरार्थं ददौ कपिः ॥१३॥
हर्षेण महताविष्टाः सर्व एवात्रतस्थिरे । लक्ष्मणस्त्वब्रवीत्सर्वं सुग्रीवं वृत्तमात्मनः ॥१४॥
तच्छ्रुत्वा सकलं वृत्तं सुग्रीवः स्वं न्यवेदयत् । सखे शृणुष्व मे वृत्तं वालिना यत्कृतं पुरा ॥१५॥
मयपुत्रो दुर्मदश्च किष्किंधामेकदा गतः । कृत्वा स दीर्घशब्दं तु वालिनं समुपाह्वयत् ॥१६॥
तं श्रुत्वा निर्ययौ वाली जघान दृढमुष्टिना । दुद्राव तेन संविग्नो जगाम स्वगुहां प्रति ॥१७॥
अनुदुद्राव तं वाली वालिपृष्ठे त्वहं गतः । वाली ममाह तिष्ठ त्वं बहिर्गच्छाम्यहं गुहाम् ॥१८॥
इत्युक्त्वाऽऽविश्य स गुहां मासमेके न निर्ययौ । गुहाद्वारान्मया रक्तं निर्गतं सन्निरीक्ष्य च ॥१९॥

करके हनुमान्से कहा कि इन दोनोंको वालीने भेजा है, ऐसा ज्ञात होता है ॥ ३ ॥ ये दोनों नररूप धारण कर भाथा बाँध तथा धनुष लेकर मुझे मारने आ रहे हैं। इस कारण हम लोगोंको यहाँसे कहीं अन्यत्र भाग जाना चाहिये। अथवा तुम मेरी बात मानो और ब्राह्मणका रूप धारण करके ब्रह्मचारी बनकर उनके पास जाओ और उनके साथ बातचीत करके उनके हृदयका अभिप्राय जान लो ॥ ४ ॥ यदि उनके हृदयका विचार दूषित हो तो पेड़की आड़में जाकर हाथकी अंगुलीसे संकेत करना और यदि अच्छा विचार रखते हों तो हँसकर मेरी ओर निहारना। बस यही संकेत निश्चित है, याद रखना ॥ ५ ॥ ६ ॥ तदनुसार हनुमान् 'बहुत अच्छा' कह और ब्रह्मचारीका रूप धारण करके रामके पास गये और नमस्कार करके कहा—'पुरुषोंमें सिंहके समान वीर आप दोनों कौन हैं?'॥७॥तब लक्ष्मणने उनको अपना संपूर्ण वृत्तांत कह सुनाया और कहा कि शबरीके कहनेसे ये राम सुग्रीवके साथ मित्रता करनेके लिये यहाँ आये हैं ॥ ८ ॥ यह सुनकर हनुमान्ने अपना असली स्वरूप प्रकट किया और अपना भी सब हाल कह सुनाया ॥ ९ ॥ साथ ही यह भी कहा कि आप दोनों मेरे कन्धेपर बैठकर पर्वतपर चलें। 'तथास्तु' कहकर वे दोनों मारुतिके कन्धेपर चढ़ गये ॥ १० ॥ महाकपि हनुमान्जी कूदकर क्षणभरमें पर्वतके शिखरपर आ गये। वहाँ राम-लक्ष्मण एक वृक्षकी छायामें बैठे ॥ ११ ॥ हनुमान्ने जाकर रामका सब समाचार सुग्रीवको कह सुनाया। पश्चात् सुग्रीवने अग्नि जलायी और उसे साक्षी बनाकर रामके साथ शीघ्र मित्रता कर ली और परस्पर वे दोनों गले मिले। तब स्वयं सुग्रीवने अपने हाथोंसे वृक्षकी शाखा तोड़कर रामको बिछानेके लिए दे दी। तब सब लोग प्रसन्न हुए और बैठ गये। लक्ष्मणने अपना सब वृत्तांत सुग्रीवको सुनाया ॥ १२-१४ ॥ यह सुनकर सुग्रीवने भी अपना सब हाल बताते हुए कहा—हे सखे! पहले बालिने मेरे साथ जो कुछ किया है, वह सब आप सुन लें ॥ १५ ॥ एक समय मय दानवका पुत्र दुर्मद किष्किन्धा नगरीमें गया। वहाँ जाकर वह जोरसे चिल्लाया और वालिको युद्धके लिये ललकारा ॥ १६ ॥ सो सुनकर वालि बाहर आया और दुर्मदको बहुत जोरसे एक मुक्का मारा। इससे घबराकर वह अपनी गुफाकी ओर भागा ॥ १७ ॥ उसके पीछे वालि और वालिके पीछे मैं भी भागा। वहाँ जाकर वालिने मुझसे कहा कि तुम बाहर खड़े रहो, मैं गुफाके भीतर जाता हूँ ॥ १८ ॥ यदि एक महीनेमें मैं बाहर न आऊँ तो मुझे मरा समझ लेना। ऐसा कहकर वह गुफामें चला गया। उसके कथनानुसार एक महीना बीत गया,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निश्चितं मनसा वाली दुर्मदेन हतस्त्विति । एतस्मिन्नंतरे श्रुत्वा किष्किंधां रिपुवेष्टिताम् ॥२०॥
गुहाद्वारि शिलामेकां निधाय दुर्मदस्य च । यत्नतो मार्गरोधार्थं किष्किंधामागतः स्वयम् ॥२१॥
मां दृष्ट्वा रिपवः सर्वे वेगाच्चक्रुः पलायनम् । अनिच्छंतं मंत्रिणो मां तत्पदे सन्यवेशयन् ॥२२॥
ततो हत्वा रिपुं वाली दृष्ट्वा मां स्वपदस्थितम् । संताड्य नगरान्मां स बहिर्न्यष्कासयत्तदा ॥२३॥
ततः स सर्वदेशेषु वादयामास दुन्दुभिम् । भूम्यां सुग्रीवपाता यः स वध्यो भवेदिति ॥२४॥
ततो लोकान्परिक्रम्य ऋष्यमूको मयाऽऽश्रितः । एकदा दुंदुभिर्नाम दैत्यो महिषरूपधृक् ॥२५॥
युद्धाय वालिनं रात्रौ समाह्वयत भीषणः । ततो वाली समागत्य धृत्वा शृंग करेण सः ॥२६॥
हस्ताभ्यां तच्छिरश्छित्वा तोलयित्वाऽक्षिपद्भुवि । पपात तच्छिरो राम मतंगाश्रमसन्निधौ ॥२७॥
रक्तवृष्टिः पपातोच्चैर्मतङ्गोऽप्यशपत्क्रुधा । यद्यागतोऽसि मे वालिन् गिरिं शीघ्र समाप्नुये ॥२८॥
एवं शप्तस्तदारभ्य ऋष्यमूकं न यात्यसौ । प्रतिज्ञां ते करोम्यद्य सीतां शीघ्र समानये ॥२९॥
यदा नीता रावणेन तदा दृष्टा मयाऽत्र खे । बद्ध्वोत्तरीये क्षिप्तानि पश्य त्वं भूषणानि हि ॥३०॥
इत्युक्त्वा दर्शयामास सुग्रीवो भूषणानि हि । तानि दृष्ट्वाऽब्रवीद्बन्धु रामस्त्वं निश्चयं वद ॥३१॥
त्वयादृष्टानि सीतायास्तच्छ्रुत्वा लक्ष्मणोऽब्रवीत् । न वेद्म्यहं समस्तानि वेद्म्यंगुलिभवानि हि ॥३२॥
वंदने यानि दृष्टानि मया नित्यं रघूद्वह । ततो रामोऽतिसंतुष्टो लब्ध्वा सीतामिमन्यत ॥३३॥
सुग्रीववचनाद्रामः प्रत्ययार्थं तदा क्षणात् । पादांगुष्ठेनाक्षिपत्तद्दुंदुभेः शिर उत्तमम् ॥३४॥

किन्तु वह वाहर नहीं आया । मैंने जब गुफामेंसे निकलता हुआ रुधिर देखा तो मनमें निश्चय कर लिया कि दुर्मद दानवने वालीको मार डाला । उसी समय यह सुनकर कि शत्रुओंने किष्किन्धाको घेर लिया है, मैंने गुफाके द्वारको एक बड़ी भारी शिलासे ढाँक दिया और निश्चय कर लिया कि अब दुर्मदका मार्ग रुक गया है । वह यत्न करके भी बाहर नहीं निकल सकेगा । तब मैं अपनी किष्किन्धा नगरीको चला आया ॥ १९–२१ ॥ मुझे देखनेके साथ ही सब शत्रु भाग गये और मेरी इच्छा न रहनेपर भी मन्त्रियोंने मुझे भाई वालीके पदपर बैठा दिया ॥ २२ ॥ पश्चात् वालि भी शत्रुको मारकर घर आया और मुझे अपने पदपर बैठा देखा तो मुझे मार-पीटकर उसी समय नगरसे बाहर निकाल दिया ॥ २३ ॥ साथ ही सब देशोंमें उसने ढिंढोरा पिटवाकर कहला दिया कि "जो कोई सुग्रीवको शरण देकर क्षमा करेगा, वह मेरा अपराधी होगा और मार डाला जायगा" ॥ २४ ॥ तदनन्तर सब देशोंमें घूमकर मैंने इस ऋष्यमूक गिरिका आश्रय लिया । यहाँकी कथा यह है कि एक दिन दुन्दुभी नामक दैत्य भैंसेका रूप धरकर रात्रिके समय वालीके यहाँ गया और उसको युद्धके लिये ललकारा । वालीने आकर अपने हाथसे उसको सींग पकड़ ली और खींचकर उसका सिर धड़से उखाड़ तथा घुमाकर दूर फेंक दिया । हे राम ! उसका वह सिर मतङ्ग ऋषिके आश्रममें जा गिरा ॥ २५–२७ ॥ इससे मतङ्गऋषिके ऊपर भी रुधिर गिरा । तब उन्होंने क्रोध करके उसे शाप दिया कि 'अरे वालि ! यदि मेरे पर्वत तथा आश्रमके पास तू आयेगा तो तुरन्त मर जायगा' ॥ २८ ॥ इस शापसे डरकर वाली यहाँ कभी नहीं आता । हे राम ! मैं प्रतिज्ञा करता हूँ कि सीताको शीघ्र ही ले आऊँगा ॥ २९ ॥ जब रावण उनको ले जा रहा था, तब यहीं बैठे हुए मैंने आकाशमें देखा था । उस समय सीताने अपनी साड़ीमें बाँधकर कुछ आभूषण नीचे फेंके थे। वे यहीं हैं, आप उन्हें देखें ॥ ३० ॥ इतना कहकर सुग्रीवने वे आभूषण दिखलाये । उन्हें देखकर रामने लक्ष्मणसे कहा—हे भाई ! तुम इन्हें देखकर ठीक-ठीक बतलाओ कि ये सीताके हैं या नहीं। क्योंकि तूमने तो सीताके आभूषण देखे ही होंगे । यह सुनकर लक्ष्मणने कहा कि मैं सबको तो नहीं पहचानता, परन्तु पाँवकी अँगुलीके नूपुरके बारेमें अवश्य कह सकता हूँ कि ये सीताके ही हैं । कारण कि मैंने प्रणाम करते समय केवल उनके पाँव देखे हैं —अन्य अङ्ग नहीं देखे । यह सुनकर राम प्रसन्न हुए और 'अब सीता मिल गया' ऐसा समझा ॥ ३१–३३ ॥ तदनन्तर सुग्रीवको विश्वास दिलानेके लिए उसी समय रामने अपने पाँवके अँगूठेसे मारकर दुन्दुभीके बड़े विशाल सिरको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशयोजनपर्यंतं तथा बाणेन वै पुनः । चक्राकारान् सप्त तालान् दृष्ट्वा देहे ह्यहेः प्रभुः ॥३५॥
स्वीयांगुष्ठेन सौमित्रेः पदं किंचिद्विमर्द्य च । ऋजुं कृत्वा पन्नगं तं शेषांशेन स्थितं भुवि ॥३६॥
सुग्रीवप्रत्ययार्थं हि सप्त तालान् बिभेद सः । गुहायामेकदा तालफलानि स्थापितानि हि ॥३७॥
वालिना सप्त नीतानि तेन सर्पं ददर्श सः । तमशपत्त्वयि वृक्षाश्च भविष्यंतीति वानरः ॥३८॥
सर्पोऽप्याहाथ तान् छेत्ता यस्ते हंता न संशयः । तद् दृष्ट्वा रामसामर्थ्यं तस्मिन्प्रत्ययमाप सः ॥३९॥
सुग्रीवस्तं पुनः प्राह राघवं तुष्टमानसः । वालिने सुरनाथेन पुरा दत्ताऽस्ति मालिका ॥४०॥
यां दृष्ट्वा रिपवो युद्धे गतवीर्या भवन्ति हि । या पुरा कश्यपेनैव तपसा दुष्करेण च ॥४१॥
शिवाल्लब्धा पिता पुत्रमिन्द्रं तेनापि वालिने । प्रीत्यार्पिता मालिका सा वाली कंठे दधात्यसौ ॥४२॥
तस्यास्त्वं दर्शनाद्राम गतसत्त्वो भविष्यसि । तत्रोपायं चिन्तयस्व येन तेऽद्य जयो भवेत् ॥४३॥
तत्तस्य वचनं श्रुत्वा रामः सर्पं तमब्रवीत् । यः शापान्मोचितः पूर्वं सप्त तालान्विभिद्य च ॥४४॥
गच्छ त्वं मम वाक्येनकिष्किंधायां च वालिनम् । निशीथे निद्रितं दृष्ट्वा हर तन्मालिकां शुभाम् ॥४५॥
तथेति रामवाक्येन किष्किंधामेत्य पन्नगः । मंचकस्थां जहाराथ तां मालां वासवं ददौ ॥४६॥
ततो रामाज्ञया गत्वा समाहूयाथ वालिनम् । युद्धं चकार सुग्रीवः श्रीरामोऽपि ददर्श तम् ॥४७॥
समानरूपौ तौ दृष्ट्वा मित्रघातविशंकया । न मुमोच तदा बाणं रामः सोऽपि न्यवर्तत ॥४८॥
सुग्रीवो राघवं प्राह मां घातयसि वालिना । यदि मद्धनने वांछा त्वमेव जहि मां विभो ॥४९॥
तत्तस्य वचनं श्रुत्वा सुग्रीवस्य रघूत्तमः । बन्धयामास सुग्रीवकंठे मालां तु बन्धुना ॥५०॥

दूर फेंक दिया ॥ ३४ ॥ वह दस योजनकी दूरीपर जा गिरा। गोल आकारमें सर्पके शरीरपर जमे हुए सात तालवृक्षोंको देखा तो रामने पृथ्वीपर शेषके अंशसे स्थित लक्ष्मणके पाँवको अपने पाँवके अंगूठेसे दबाकर उस सर्पको सीधा किया और बाणसे उन सातों वृक्षोंको एक ही बारमें काट डाला ॥ ३५ ॥ ३६ ॥ ऐसा करके उन्होंने सुग्रीवको विश्वास दिलाया कि राम मेरी सहायता करने और वालीको मारनेमें समर्थ हैं। एक समयकी बात है कि वालीने अपनी गुफामें तालके कुछ फल रक्खे थे। उनमेंसे सात फल कोई उठा ले गया। वालीने देखा तो उसे वहाँ फलकी जगह सर्प दिखायी दिया। तब वालीने सर्पको शाप दे दिया कि जा, तेरे ऊपर सात तालवृक्ष उगेंगे ॥ ३७ ॥ ३८ ॥ तब सर्पने भी कहा कि जो पुरुष वृक्षोंको काटेगा, वही तुझे मारेगा—इसमें सन्देह नहीं है। उसी सामर्थ्यको आज राममें देखकर सुग्रीवको विश्वास हो गया ॥ ३९ ॥ तब प्रसन्न होकर सुग्रीवने कहा – पूर्वकालमें इन्द्रने वालीको एक माला दी थी। ४० ॥ जिसे देखकर उसके शत्रु युद्धमें बलहीन हो जाते हैं। पहिले कठोर तप करनेपर वह माला कश्यपको शिवजीसे मिली थी। कश्यपने उसे लेकर अपने पुत्र इन्द्रको दी और इन्द्रने वालीको अर्पण की। प्रीतिपूर्वक अर्पित की हुई उस मालाको वाली सदा गलेमें पहिने रहता है ॥ ४१ ॥ ४२ ॥ हे राम ! उसको देखनेके साथ ही आप भी बलहीन हो जायँगे। अतएव इस विषयमें कोई उपाय सोचिए। जिससे आपकी विजय हो ॥ ४३ ॥ सुग्रीवके इस वचनको सुनकर रामने, जिसका बाणके द्वारा सात तालवृक्षोंको काटकर शापसे मुक्त किया था, उस साँपसे कहा कि तुम मेरे कथनानुसार किष्किन्धा-में जाकर रात्रिके समय जब कि वाली सोता रहे, तब उसके गलेमेंसे उस सुन्दर मालाको चुरा लाओ ॥ ४४ ॥ ॥ ४५ ॥ 'तथास्तु' कहकर वह साँप रामकी आज्ञाके अनुसार किष्किन्धा नगरीमें गया और पलङ्गपरसे उस मालाको चुराकर इन्द्रको दे आया ॥ ४६ ॥ तदनन्तर रामकी आज्ञासे सुग्रीवने वालीके पास जाकर उसको युद्ध के लिये ललकारा और युद्ध किया। उस युद्धको राम देख रहे थे, किन्तु उन दोनों भाइयोंको समान रूपवान् देख धोखेमें कहीं मित्र सुग्रीव ही न मारा जाय, इस आशंकाके कारण रामने वालीपर बाण नहीं छोड़ा। तब सुग्रीव रामके पास लौट आया और रामसे बोला कि मुझे आप वालीके हाथों क्यों मरवाना चाहते हैं ? यदि मुझे मारनेकी ही इच्छा हो तो हे विभो ! आप ही मार डालें ॥ ४७–४९ ॥ सुग्रीवके इस वचनको सुनकर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जहाँगीराबाद २०२३६४ बुलन्दशहर (उ०प्र०)

पुनस्तं प्रेषयामास सोऽपि वालिनमाह्वयत् । ततः श्रुत्वा ययौ वाली तं ताराऽप्रार्थयत्तदा ॥५१॥
श्रुतमंगदवाक्येन मया रामः समागतः । चकार मैत्रीं किं तेन मा कुरुष्वाद्य संगरम् ॥५२॥
गच्छ नत्वा रमानाथं बंधुं मानय सादरम् । यौवराज्यपदं देहि तस्मै मे वचनं शृणु ॥५३॥
तत्तारावचनं श्रुत्वा वाली तां वाक्यमब्रवीत् । जानाम्यहं राघवं तं नररूपधरं हरिम् ॥५४॥
तस्य हस्तान्मृतिर्मेऽस्ति गच्छामि परमं पदम् । सुखं त्वं तिष्ठ तारेऽत्र सुग्रीवं भज सर्वदा ॥५५॥
यदा त्वया स सुग्रीवः करिष्यति रतिं प्रिये । तदा तत्पत्निभोगस्यानृण्यं गच्छामि भामिनि ॥५६॥
अत एव मालिका मे गुप्ताऽभूत्पश्य मत्प्रिये । अद्याहं रामबाणेन पतिष्यामि रणांगणे ॥५७॥
अद्य धन्योऽस्म्यहं तारे धन्यौ तौ पितरौ मम । योग्यं श्रीरामहस्तेन मरिष्यामि रणागणे ॥५८॥
एवमाश्वास्य तां तारां ययौ वाली त्वरान्वितः । दृष्ट्वा वाली महोत्पातान् सन्तोषं परमं ययौ ॥५९॥
चकार बन्धुना युद्धं तदा बाणेन राघवः । वृक्षषण्डे तिरोभूत्वा पातयामास तं भुवि ॥६०॥
ततस्तारा समागत्य शुशोच वालिनं प्रति । वाली दृष्ट्वा रमानाथं तदा प्राह स गद्गदः ॥६१॥
वृक्षषण्डे तिरोभूत्वा त्वयाऽहं ताडितो हृदि । तवाद्य दुर्यशो जातं मम जातो महोदयः ॥६२॥
किं मयाऽपकृतं ते हि त्वया यस्मान्निपातितः । रामः प्राह वालिनं त्वं रुमायां लम्पटः सदा ॥६३॥
बन्धुभार्यां गृहे स्थाप्य बन्धुं हन्तुं त्वमिच्छसि । दुर्वृत्तं त्वां समालोक्य मया तस्मान्निपातितः ॥६४॥
यथा त्वया रुमा भुक्ता तथा तारां तव प्रियाम् । भोक्ष्यत्ययं हि सुग्रीवो वचनान्मे कपीश्वर ॥६५॥
यद्यपि त्वं दुराचारो निहतोऽसि रणे मया । तथापि भिल्लरूपेण द्वापरान्तेंऽघ्रिणं मम ॥६६॥
भित्त्वा प्रभासे बाणेन पूर्ववैरेण वानर । ततो मद्धस्तमरणस्यास्य कारणगौरवात् ॥६७॥
मुक्तिं गच्छसि त्वं वालिन् शुभां जन्मांतरेण हि । ततः प्राह पुनर्वाली मेऽभविष्यदुदीरितम् ॥६८॥

रघूत्तम रामने भाई लक्ष्मणके द्वारा सुग्रीवके कण्ठमें पहिचानके लिए माला बँधवायी ॥ ५० ॥ तदनन्तर पुनः उसको युद्ध करनेके लिये भेजा । उसने जाकर फिर वालीको ललकारा । सो सुनकर वालीने जानेकी तैयारी की तो ताराने प्रार्थनापूर्वक कहा-॥ ५१ ॥ हे नाथ ! मैंने अङ्गदके मुखसे सुना है कि आजकल राम इस वनमें आये हुए हैं । इसलिये आप सुग्रीवके साथ मित्रता कर लें और लड़नेका विचार त्याग दें ॥ ५२ ॥ आप जाकर रामके चरणोंकी वन्दना करें और मेरा कहना मानकर भाई सुग्रीवको सादर युवराजपद प्रदान करें । ५३ ॥ ताराकी बात सुनकर वालीने कहा कि मैं नररूपधारी साक्षात् नारायण रामको जानता हूँ ॥ ५४ ॥ उनके हाथों यदि मेरी मृत्यु होगी तो परमपद प्राप्त करूँगा । हे तारे ! तुम यहाँ सुखपूर्वक रहकर सुग्रीवकी सेवा करना । हे प्रिये ! सुग्रीव जब तुम्हारे साथ रति करेगा, तभी मैं उसकी पत्नीके भोगसे उऋण होऊँगा ॥ ५५ ॥ ५६ । और हे भामिनि ! देखो, आज मेरी माला भी लापता हो गयी है । अतएव मैं रणभूमिमें रामके बाणसे अवश्य मारा जाऊँगा ॥ ५७ ॥ हे तारे ! मैं तथा मेरे माता-पिता धन्य हैं कि जो आज श्रीरामके हाथों मेरी मृत्यु होगी ॥ ५८ ॥ इस प्रकार ताराको समझाकर वाली तुरन्त चल पड़ा और महान् उत्पातोंको देखकर भी सन्तुष्ट हुआ ॥ ५९ ॥ वह अपने भाई सुग्रीवके साथ लड़ने लगा । उसी समय राम एक वृक्षकी आड़में खड़े हो गये और वालीको बाणसे मारकर पृथ्वीपर गिरा दिया ॥ ६० ॥ तब तारा आकर वालीके लिये अत्यन्त विलाप करने लगी । वाली अपने सामने रामको देखकर गद्गद स्वरसे बोला--॥ ६१ ॥ हे नाथ ! आपने जो आज वृक्षकी आड़में छिपकर मेरे हृदयमें बाण मारा है, इससे मेरे लिये तो यह महान् अभ्युदयकी बात है, परन्तु इससे आपका बड़ा भारी अपयश होगा ॥ ६२ ॥ दूसरी बात यह है कि मैंने आपका कौन-सा अपराध किया था, जो आपने मुझे मारा ? रामने कहा--तू सदा सुग्रीवकी स्त्री रुमामें लिप्त रहता था ॥ ६३ ॥ तू छोटे भाईकी स्त्रीको अपने घरमें रखकर भाईको मार डालना चाहता था । यह दुराचार देखकर मैंने तुझे मारा है, तो भी द्वापरके अन्तमें भील होकर तू पूर्ववैरका स्मरण करके प्रभासक्षेत्रमें अपने बाणसे मेरे पाँवको छेदेगा । तब मेरे

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सीतावृत्तं त्वया पूर्वं क्षणेन रावणेन हि । दत्ताऽभविष्यदानीय सीता तव मया तदा ॥६९॥
अधुना प्रार्थयामि त्वामंगदं परिपालय । इत्युक्त्वा स तदा वाली जहौ प्राणान् रणांगणे ॥७०॥
अङ्गदेन तदा रामः कारयामास तत्क्रियाम् । अथ रामं स सुग्रीवो राज्यार्थं प्रार्थयत्तदा ॥७१॥
रामस्तमेव राजानं चकार लक्ष्मणेन सः । अथ वार्षिकमासान्स वस्तुं रामोऽविचारयत् ॥७२॥
प्रवर्षणगिरेः प्रोच्चशिखरे स्फटिकोद्भवाम् । रम्यां दृष्ट्वा गुहां रामः पत्रपुष्पसमन्विताम् ॥७३॥
निनाय वार्षिकान् मासान् चतुरः श्रीरघूद्वहः । एकदा लक्ष्मणः स्नात्वा यावद्रामं समागतः ॥७४॥
सात्त्विकया सीतया युक्तस्तावद्रामो निरीक्षितः । सौमित्रिणा वन्दिता सा पत्युर्वामे लयं ययौ ॥७५॥
एवं नासीत्तदा सीतावियोगो राघवस्य हि । सुग्रीवोऽथ पुरीमध्ये चकार राज्यमुत्तमम् ॥७६॥
एकदा हनुमद्वाक्याद्वानरान्स समाह्वयत् । प्रवर्षणगिरावास्तां तीर्थे द्वे रामलक्ष्मणे ॥७७॥
एतस्मिन्नन्तरे रामो दृष्ट्वा प्राप्तं शरदृतुम् । क्रोधेन प्रेषयामास सुग्रीवाय लक्ष्मणं च सः ॥७८॥
सोऽपि गत्वाऽथ किष्किंधां भीषयामास वानरान् । आगतं लक्ष्मणं श्रुत्वा सुग्रीवो भयविह्वलः ॥७९॥
मारुतिं प्रेषयामास सांत्वनार्थं हि लक्ष्मणम् । स गत्वा तं सांत्वयित्वा किष्किंधामानयत्तदा ॥८०॥
एतस्मिन्नन्तरे तारां प्रेषयामास वानरः । साऽपि गत्वा मध्यकक्षां संस्थितं तं ददर्श ह ॥८१॥
लक्ष्मणं सांत्वयामास वचोभिर्मधुरैर्निजैः । समाहूतानि सैन्यानि रामार्थं प्लवगेन हि ॥८२॥
सुग्रीवे च त्वया कोपो मा कार्योऽद्य हि देवर । ततो लक्ष्मणहस्ते सा धृत्वा राजगृहं ययौ ॥८३॥
दृष्ट्वा सुग्रीवराजस्तमासनात्स चचाल सः । सुग्रीवं लक्ष्मणः प्राह विस्मृतोऽसि रघूत्तमम् ॥८४॥
वाली येन हतो वीरः स बाणस्त्वां प्रतीक्षते । त्वमद्य वालिनो मार्गं गमिष्यसि मया हतः ॥८५॥

हाथों मरनेके गौरवसे जन्मान्तररहित शुभ गतिको प्राप्त होगा। वालीने फिर कहा--यदि आप मेरे पास आते तो मैं तुरन्त आपको सीताका पता बताता तथा रावणसे सीताको लाकर छीन क्षणभरमें आपको दे देता ॥ ६४-६९ ॥ अस्तु, अब मैं प्रार्थना करता हूँ कि आप अङ्गदकी रक्षा करिएगा। इतना कहकर वालीने उसी समय रणाङ्गणमें प्राण छोड़ दिया ॥ ७० ॥ तदनन्तर रामने अङ्गदसे उसका क्रियाकर्म कराया। बादमें सुग्रीवने रामसे वह राज्य ग्रहण करनेके लिये प्रार्थना की ॥ ७१ ॥ तब रामने लक्ष्मणको भेजकर सुग्रीवको वहाँ-का राजा बना दिया। अब राम बरसातमें कहीं चातुर्मास निवास करनेका विचार करने लगे ॥७२॥ तदनुसार उन्होंने वहीं प्रवर्षणगिरिके उच्च शिखरपर सुन्दर पत्तों-पुष्पोंकी लताओंसे वेष्टित एक रमणीक गुफा देखी ॥ ७३ ॥ बस, राम वहीं रहकर चौमासेके चार महीने बिताने लगे। एक दिन लक्ष्मण स्नान करके जब आये तो रामको सतोगुणमयी सीतासे युक्त देखा। लक्ष्मणने उन्हें प्रणाम किया, तैसे हो सीता अपने पति रामके वामाङ्गमें विलीन हो गयीं ॥ ७४ ॥ ७५ ॥ इस तरह उस समय भी रामसे सीताका वियोग नहीं हुआ था। उधर सुग्रीव अपनी पुरीमें उत्तम रीतिसे राज्य करने लगा ॥७६॥ एक बार हनुमान्के कहनेपर सुग्रीवने वानरोंको बुलवाया। उस समय राम-लक्ष्मण प्रवर्षणगिरिपर रहते थे ॥ ७७ ॥ तभी रामने शरदृतुको प्राप्त देखा तो क्रोधसे लक्ष्मणको सुग्रीवके पास सहायताका स्मरण दिलाने लिये भेजा। उन्होंने वहाँ जाकर किष्किन्धाके वानरोंको डराना आरम्भ किया। लक्ष्मणको आया सुनकर सुग्रीव भी भयसे विह्वल हो उठा ॥ ७८ ॥ ७९ ॥ उसने लक्ष्मणको शान्त करनेके लिये हनुमान्को भेजा। उन्होंने जाकर लक्ष्मणको समझाया और अपने साथ किष्किन्धामें ले आये ॥ ८० ॥ उसी समय वानर सुग्रीवने ताराको भेजा। वह जाकर महलके बीचवाली दालानमें बैठ गयी। इतनेमें उसने लक्ष्मणको आते देखा ॥ ८१ ॥ ताराने अपने मधुर वचनोंसे लक्ष्मणको समझाकर शांत करते हुए कहा—हे देवरजी! वानरोंके राजा सुग्रीवने रामके कामके लिये वानरोंको बुलवा भेजा है। आप कोप न करें। इतना कह तथा लक्ष्मणका हाथ पकड़कर घरमें राजा सुग्रीवके पास ले गयी ॥ ८२ ॥ ८३ ॥ उन्हें देख राजा सुग्रीव सिंहासनसे उठकर खड़े हो गये। तब लक्ष्मणने सुग्रीवसे कहा कि तुम रघुकुलमें उत्तम

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवमत्यन्तपरुषं वदन्तं लक्ष्मणं तदा। उवाच हनुमान् वीरः कथमेवं प्रभाषसे ॥८६॥
रामकार्यार्थमनिशं जागर्ति न तु विस्मृतः। इत्युक्त्वा तं पूजयित्वा सुग्रीवेण स मारुतिः ॥८७॥
चकार लक्ष्मणं शांतं सुग्रीवोऽप्यथ वानरैः। गत्वा तं राघवं नत्वा दर्शयामास वानरान् ॥८८॥
राघवं स तदा प्राह सुग्रीवः प्लवगाधिपः। देव पश्य समायांतीं वानराणां महाचमूम् ॥८९॥
अत्र यूथाधिपतयः पद्मान्यष्टादश स्मृताः। ततो रामाज्ञया सीताशुद्ध्यर्थं तान् दिदेश सः ॥९०॥
दिक्षु सर्वासु विविधान् वानरान् प्रेष्य सत्वरम्। याम्यां दिशं जाम्बवन्तमङ्गदं वायुनन्दनम् ॥९१॥
नलं सुषेणं शरभं मैंदं सम्प्रेषयत्तदा। मासादर्वाङ्निवर्तध्वं नोचेद्वध्या भविष्यथ ॥९२॥
ततो रामो मुद्रिकां स्वां ददौ मारुतिसत्करे। मन्नामाक्षरयुक्तेयं सीतायै दीयतां रहः ॥९३॥
ततो रामो निजं मन्त्रं ददौ तस्मै हनूमते। तन्मन्त्रस्य लक्षमिते कृत्वा तु जपलेखने ॥९४॥
लब्ध्वा सामर्थ्यमतुलं लंकां गन्तुं स मारुतिः। नत्वा रामं परिक्रम्य जगाम कपिभिः सह ॥९५॥
सद्वृत्तं राघवः प्राहः चित्रकूटे पुरा कृतम्। मनःशिलायास्तिलकं सीताभाले विनिर्मितम् ॥९६॥
गण्डयोः पत्रवल्ल्यादि सीतायै कथ्यतां रहः। ततस्ते प्रस्थिताः सर्वे पश्चिमादिषु दिक्षु च ॥९७॥
प्रेषितास्ते समायाता न दृष्टा सेति तं ब्रुवन्। तदांगदाद्याः प्लवगाः सीतार्थं बभ्रमुर्वने ॥९८॥
मत्वाऽयं रावणश्चेति राक्षसमाञ्छ्रशोऽर्दयन्। सार्द्रास्यान्खेचरान्दृष्ट्वा गुहाद्वाराद्विनिर्गतान् ॥९९॥
जलार्थं संप्रविष्टास्ते गुहायां वानरोत्तमाः। तस्यां तान् गच्छतस्तूष्णीं दिनान्यष्टादशैव हि ॥१००॥
अतिक्रांतानि तिमिरे बभ्रमस्तु इतस्ततः। तत्र रत्नमये दिव्ये गेहे दृष्ट्वा स्त्रियं शुभाम् ॥१०१॥

रामको भूल गये हो ॥ ८४ ॥ जिस बाणसे वीर वाली मारा गया था। वही बाण तुम्हारी भी प्रतिक्षा कर रहा है। आज मैं तुम्हें मारकर जिस मार्गसे वाली गया है, उसी मार्गपर भेज दूँगा ॥ ८५ ॥ लक्ष्मण जब स प्रकार अत्यन्त कठोर वचन कहने लगे। तब हनुमान्ने कहा कि आप ऐसे कठोर वचन मुँहसे क्यों निकाल रहे हैं? ॥ ८६ ॥ रामके कार्यके लिए सुग्रीव रात-दिन सचेष्ट रहता है। इतना कहकर हनुमान्ने सुग्रीवसे लक्ष्मणकी पूजा करवायी और उनको शान्त करवाया। पश्चात् सुग्रीव वानरोंको लेकर रामके पास गये। वहाँ जा तथा वानरोंको दिखलाकर प्लवगाधिप सुग्रीवने कहा—हे देव! देखिये, वानरोंकी बड़ी भारी सेना आ रही है ॥ ८७–८९ ॥ इसमें अठारह पद्म सेनापति हैं। तदनन्तर रामकी आज्ञासे सुग्रीवने सीताकी खोज करनेके लिये सब दिशाओंमें बहुतसे वानरोंको उसी समय भेज दिया। उनमेंसे जाम्बवान्, अंगद, हनुमान्, नल, नील, सुषेण तथा मैंदको दक्षिण दिशामें भेजा और कह दिया कि एक मासके भीतर सीताकी सुधि लेकर लौट आओ, नहीं तो तुम सबको मार डाला जायगा ॥ ९०–९२ ॥ तब रामने अपनी अंगूठी हनुमान्के हाथोंमें दी ओर कहा कि यह मेरे नामसे अङ्कित अंगूठी एकान्तमें सीताको देना ॥ ९३ ॥ बादमें अपना मंत्र हनुमान्को दिया। जिसको कि एक लाख बार जप तथा लिखकर लङ्का जानेकी अतुल सामर्थ्य प्राप्त करनेके पश्चात् हनुमान्ने रामको प्रणाम किया और परिक्रमा करके वानरोंके साथ चल दिये ॥ ९४ ॥ ९५ ॥ चलते समय रामने चित्रकूटमें किया हुआ एक चरित्र हनुमान्को सुनाते हुए कहा कि एक समय मैंने सीताके मस्तकमें मैनसिलका तिलक तथा कपोलोंपर पत्रावलीकी रचना की थी। इस बातको तुम सीतासे एकान्तमें कहना। जिससे कि उनको तुम्हारा विश्वास हो जाय। इसके बाद वे सब विभिन्न दिशाओंको चल दिये ॥ ९६ ॥ ९७ ॥ कुछ कालके बाद बहुतेरे वानरोंने आ-आकर सुग्रीवसे कहा कि हमको सीता कहीं नहीं दिखाई दीं। उधर अङ्गदादि वानर भी सीताको खोजते हुए वनमें इधर-उधर भ्रमण कररहे थे। वहाँ उन्होंने गीली चोंचवाले बहुतसे पक्षी देखे ॥ ९८ ॥ ९९ ॥ यह देखकर प्याससे पीडित वानरोंमें उत्तम वे वानर जलकी अभिलाषासे उस गुफामें घुसे। उसमें जाते-जाते उन्हें अठारह दिन बीत गये ॥ १०० ॥ वे उस अंधकारमें इधर-उधर भटकने लगे। अचानक एक रत्नमय दिव्य भवन तथा उनमें एक सुन्दरी स्त्री दिखायी

CC0. In Public Domain. Ratikant Shastri, Gangotri Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संश्राव्यतां निजं वृत्तं त्वद्वृत्तं श्रोतुमुद्यताः । तान्पूज्य कथयामास चैनं वृत्तं तु योगिनी ॥१०२॥
हेमानाम्नो सुता विश्वकर्मणः सा महेश्वरम् । नृत्येन तोषयामास ददौ तस्यै पुरं महत् ॥१०३॥
अत्र स्थित्वा चिरं कालं यदा गंतुं समुद्यता । सा मां प्राहात्र रामस्य प्रतीक्षां कुरु सद्मनि ॥१०४॥
समागच्छस्व रामस्य कृत्वा पूजनमुत्तमम् । इत्युक्त्वा सा दिवं याता राघवं गम्यते मया ॥१०५॥
स्वयंप्रभेति नाम्नाऽहं हेमायाः परिचारिका । अधुना ब्रूत युष्माकं साहाय्यं किं करोम्यहम् ॥१०६॥
ततस्या वचनं श्रुत्वा मत्वा स्वीयदिनव्ययम् । तामूचुर्वानराः सर्वे नस्त्वं कुरु गृहाद्बहिः ॥१०७॥
इत्युक्ता सा क्षणेनैव तैः सहैव ययौ बहिः । तद्गिराच्छादितस्त्रीयनयनैर्वानरैस्तदा ॥१०८॥
न ज्ञातं च तया केन मार्गेण च बहिः कृतम् । साऽपि गत्वा पूज्य रामं देहं त्यक्त्वा दिवं ययौ१०९॥
ततस्ते वानरा ज्ञात्वा गुहायां स्वदिनव्ययम् । विषण्णाः सागरं दृष्ट्वा तस्थुः प्रायोपवेशने ॥११०॥
जटायोः कीर्तनं चक्रू रामकार्ये मृतं पुरा । तच्छ्रुत्वाऽथ स संपातिः तान्हंतुं यः समुद्यतः ॥१११॥
तेभ्यः श्रुत्वा मृतिं बंधोर्दत्त्वा तस्मै जलांजलिम् । तेषां श्रुत्वा पूर्ववृत्तं सीतावृत्तं न्यवेदयत् ॥११२॥
शतयोजनमध्येऽब्धेर्लंकायां वर्ततेऽधुना । अशोकवनिकायां तु तीर्त्वाऽब्धिं तां प्रपश्यथ ॥११३॥
अहं पक्षविहीनोऽस्मि मया गन्तुं न शक्यते । गृध्रत्वाद्दूरदृक्चाऽहं सीता मां दृश्यते गिरौ ॥११४॥
भ्रात्रा जटायुषा पूर्वमुड्डीयाहं बलाद्रविम् । स्प्रष्टुकामस्तदा तप्तस्त्रातो बंधुर्मया सखे ॥११५॥
पक्षाभ्यां भस्मसाज्जातौ मे पक्षौ पतितावुभौ । जटायुः स सपक्षश्च गतो देशांतरं पुनः ॥११६॥
अहं तदा पक्षहीनश्चन्द्रशर्माणमुत्तमम् । मुनिं नत्वा तदा तस्मै निजवृत्तं निवेदितम् ॥११७॥

दी ॥ १०१ ॥ उसके वृत्तान्तको सुननेकी अभिलाषासे वानरोंने कहा—अपना वृत्तान्त सुनाओ, तुम कौन हो और तुम्हारा क्या नाम है ? वह योगिनी उन सबका सम्मान करके कहने लगी—॥ १०२ ॥ विश्वकर्माकी हेमा-नामसे प्रसिद्ध एक कन्या थी। उसने जब महादेवजीको नृत्य-गान करके प्रसन्न किया। तब उन्होंने उसको यह बड़ा भारी नगर दिया ॥ १०३ ॥ यहाँ बहुत कालतक निवास करके जब वह जाने लगी। तब उसने मुझको कहा कि यहाँ बहुत कालतक निवास करती हुई तुम रामके आगमनकी प्रतीक्षा करो ॥ १०४ ॥ उन रामका उत्तम प्रकारसे पूजन करनेके बाद तुम भी चली आना। इतना कहकर वह चली गयी। इसी कारण अब मैं भी रामके पास जाना चाहती हूँ ॥ १०५ ॥ उसी हेमाकी मैं स्वयंप्रभा नामकी दासी हूँ। अब आप लोग यह कहें कि मैं आप लोगोंकी कौन-सी सहायता करूँ ॥ १०६ ॥ उसकी इस बातको सुन तथा बहुत दिन व्यर्थ व्यतीत हुआ देखकर वे सब उससे बोले कि हमको इस मकानसे बाहर कर दो ॥ १०७ ॥ यह सुनकर उसने उन सबको अपनी-अपनी आँखें मूँदनेके लिए कहा। ऐसा करनेपर वानरोंको यह नहीं मालूम हो पाया कि उन्हें किसने और किस मार्गसे बाहर कर दिया। वह भी रामके पास चली गयी तथा उनकी पूजा करके स्वर्ग सिधारी ॥ १०८ ॥ १०९ ॥ पश्चात् वे सब वानर अपनी अवधिके दिनोंको बीते देख उदास हो समुद्रके किनारे गये और उपवास करने लगे ॥ ११० ॥ वार्तालापके प्रसंगमें रामके लिए प्राणतक दे देनेवाले जटायुकी चर्चा चल पड़ी। वहाँ रहनेवाला संपाती जो उनको खा जानेके लिये उद्यत था। वह उनके मुखसे रामके कार्यके लिये जटायुका मरण तथा प्रशंसा सुनकर भाई जटायुको जलाञ्जलि देनेके लिए समुद्रतटपर गया। पश्चात् उन वानरोंका वृत्तान्त सुनकर उनको सीताका समाचार कह सुनाया और कहा—॥ १११ ॥ ११२ ॥ यहाँसे समुद्रको पार करके सौ योजनकी दूरीपर तुम उन्हें देख सकते हो ॥ ११३ ॥ मैं पाँखोंसे रहित हूँ। इस कारण वहाँतक नहीं जा सकता। गृध्रकी दृष्टि तेज होती है। अतएव मैं सीताको पर्वतपर बैठी हुई लङ्कामें यहाँसे देख रहा हूँ ॥ ११४ ॥ मेरे पंख न होनेका कारण यह है कि मैं एक बार अपने बलके दर्पसे भाई जटायुके साथ उड़कर सूर्यका स्पर्श करनेके लिए आकाशमें उड़ा। राहमें सूर्यकी गर्मीसे जटायु जलने लगा। तब मैंने अपनी पाँखोंसे ढाककर उसकी रक्षा की। जिससे कि मेरी दोनों पाँखें भस्म हो गयीं और मैं तथा जटायु दोनों ऊपरसे गिर पड़े। जटायु तब भी सपक्ष था। लुढ़कते-लुढ़कते मैंने चन्द्रशर्मा नामक मुनिके

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदा मां स मुनिः प्राह यदा त्वं वानरोत्तमान् । सीताशुद्धिं कथयसि तदा पक्षौ भविष्यतः ॥११८॥
पश्यतां निर्गतौ पक्षौ कोमलौ मां क्षणादिह । यदा नीता रावणेन पुरा सीता विहायसा ॥११९॥
मत्पुत्रेण तदा दृष्टा कथितं चापि मां तदा । धिक्कृतः स मया क्रोधात्सा त्वया न विमोचिता१२०॥
तदारभ्य गतः क्रोधादद्यापि न समागतः । इत्युक्त्वा तान् कपीन् पृष्ट्वा स संपातिर्गतस्तदा।१२१॥
अथ ते वानराः सर्वे प्रोचुः स्वं स्वं बलं तदा । न कोऽपि गमने शक्तः शतयोजनसागरे ॥१२२॥
तदा स जांबवान् वृद्धः स्तुत्वा तं मारुतिं मुहुः । जन्मकर्मादि संश्राव्य लंकां गंतुं दिदेश तम् ॥१२३॥
सोऽपि श्रुत्वा समुद्योगं चकारारुह्य पर्वतम् । निजभाराद्भूमिगतं कृत्वा सस्मार राघवम् ॥१२४॥
एवं गिरींद्रजे प्रोक्तं किष्किंधाविषये कृतम् । चरितं राघवेणेदं पुरा पापप्रणाशनम् ॥१२५॥

इति श्रीशतकोटिरामचरितान्तर्गते श्रीमदानन्दरामायणे सारकांडे किष्किन्धाचरित्रेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः

(हनुमान्‌का लंकामें जाकर सीताका पता लगाना और लंका जलाना)

श्रीशिव उवाच

अथ उड्डीय हनुमान् ययावाकाशवर्त्मना । तद्दृष्ट्वा तद्बलं ज्ञातुं सुरसां नागमातरम् ॥ १ ॥
प्रेषयामासुरमराः सा शीघ्रं तत्पुरो ययौ । तदा सा मारुतिं प्राह विश त्वं वदनं मम ॥ २ ॥
स प्राह रघुवीरस्य कार्यं कृत्वा विशाम्यहम् । दृष्ट्वा तस्यास्तु निर्बन्धं व्यवर्धत तदा कपिः ॥ ३ ॥
विवर्धितं तयाऽप्यास्यं तदा सूक्ष्मो बभूव ह । अगुष्ठमात्रस्तस्याः स वक्त्रे गत्वा विनिर्गतः ॥ ४ ॥

पास जाकर प्रणाम किया और अपना वृत्तांत उन्हें सुनाया ॥ ११५-११७ ॥ तब मुनिने कहा कि जब तुम वानरोंको सीताकी खबर सुनाओगे। उसी समय तुम्हारी पाँखें पुनः जम जायँगी ॥ ११८ ॥ देखो, मेरे शरीरमें ये कोमल पाँखें क्षणभरमें निकल आयीं। उस समय जब रावण सोताको आकाशमार्गसे ले जा रहा था ॥ ११९ ॥ उसी समय मेरे पुत्रने उनको देखा तो आकर मुझसे कहा। तब मैंने उसको बहुत धिक्कारा और कहा—अरे दुष्ट! तूने सीताको छुड़ाया क्यों नहीं? ॥ १२० ॥ तब वह कुपित होकर मेरे पाससे चला गया और आजतक नहीं लौटा। इतना कह तथा वानरोंसे पूछकर संपाती भी वहाँसे चला गया ॥ १२१ ॥ तब वानरोंने परस्पर एक दूसरेसे अपना-अपना बल पूछा तो पता लगा कि सौ योजन विस्तारवाले समुद्रको लाँघनेके लिये कोई समर्थ नहीं है ॥ १२२ ॥ तब वृद्ध जाम्बवान्‌ने हनुमान्‌को बारंबार प्रशंसा की। उनका जन्म तथा कर्म कह सुनाया और उन्हें लङ्का जानेका आदेश दिया ॥ १२३ ॥ हनुमानजी भी जाम्बवान्‌के वचन सुन तथा अपना पुरुषार्थ स्मरण करके पर्वतपर चढ़कर कूदनेको उद्यत हुए। अपने भारसे उन्होंने पर्वतको जमीनमें धँसा दिया और रामका स्मरण करने लगे ॥ १२४ ॥ हे गिरीन्द्रजे! इस प्रकार पहिले किया हुआ रामका किष्किन्धाचरित्र मैंने तुमको सुना दिया। जो कि श्रवणमात्रसे पापोंका नाश कर देता है ॥ १२५ ॥ इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे सारकाण्डे किष्किन्धाचरित्रे भाषाटीकायामष्टमः सर्गः ॥ ८ ॥

शिवजी बोले—तदनन्तर हनुमान् उड़कर आकाशमार्गसे लंकाको चले। यह देखकर उनके बलकी परीक्षा लेनेके लिये देवताओंने नागोंकी माता सुरसाको भेजा। वह शीघ्र मार्गमें हनुमान्‌जीके सामने जाकर खड़ी हो गयी और मुख फाड़कर हनुमानसे कहने लगी कि तू आकर मेरे मुखमें प्रवेश कर। मैं तुझे खाऊँगी ॥ १ ॥ २ ॥ हनुमान्‌ने उत्तर दिया कि मैं श्रीरामका कार्य संपादन करनेके बाद आकर तुम्हारे मुखमें प्रवेश करूँगा। परन्तु उसका अधिक आग्रह देखकर कपिने अपना शरीर बढ़ाया ॥ ३ ॥ यह देखकर सुरसाने भी अपनी काया और अधिक बढ़ायी। तब हनुमान् अंगुष्ठमात्रका सूक्ष्म रूप धरके उसके मुखमें प्रविष्ट होकर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञात्वा साऽपि बलं तस्य स्तुत्वा तं प्रययौ दिवम्। अथाब्धिवचनान्मार्गे मैनाकः पर्वतो महान् ॥ ५ ॥
जलमध्यात्प्रादुरभूद्विश्रांत्यर्थं हनूमतः । नानामणिमयैः शृङ्गैस्तस्योपरि नराकृतिः ॥ ६ ॥
भूत्वा यान्तं हनूमन्तं प्राह मैनाकपर्वतः । आगच्छामृतकल्पानि जग्ध्वा पक्कफलानि च ॥ ७ ॥
विश्रम्यात्र क्षणं पश्चाद्गमिष्यसि यथासुखम् । पुरा गिरीणामिंद्रेण युद्धमासीत्सुदारुणम् ॥ ८ ॥
तदा दशरथेनाहं मोचितोऽस्म्यत्र संस्थितः । अतस्तदुपकारं हि निस्ततुं निर्गतोऽस्म्यहम् ॥ ९ ॥
गच्छतो रामकार्यार्थं तव विश्रांतिहेतवे । तदा तं हनुमानाह रामकार्ये न मे श्रमः ॥१०॥
विश्रामः स्वामिकार्येऽत्र न करोम्यद्य भक्षणम् । मैनाकस्तं पुनः प्राह स्वस्पर्शात्पावयस्व माम् ॥११॥
तथेति स्पृष्टशिखरः कराग्रेण ययौ कपिः । किंचिद्दूरं गतस्यास्य छायां छायाग्रहोऽग्रहीत् ॥१२॥
सिंहिकानाम सा घोरा जलमध्ये स्थिता सदा । आकाशगामिनां छायामाक्रम्याकृष्य भक्षती ॥१३॥
तया गृहीतो हनुमांश्चिंतयामास वीर्यवान् । केनेदं मे कृतं वेगरोधनं विघ्नकारिणा ॥१४॥
एवं विचिंत्य हनुमानधो दृष्टिं प्रसारयन् । तत्र दृष्ट्वा सिंहिकां तां तदास्ये न्यपतत्कपिः ॥१५॥
तस्यांत्रजालं निष्कास्य तां हत्वाऽग्रे ययौ पुनः । ततोऽब्धेर्दक्षिणे कूले लंकां कृत्वा तु पार्श्वतः ॥१६॥
पश्चात् परलंकायां तत्र तां रावणस्वसाम् । क्रौंचां हत्वा सिंहिकावल्लंकां रात्रौ विवेश सः ॥१७॥
तदा लङ्कापुरी नाम्नी राक्षसी तं व्यतर्जयत् । हनुमानपि तां वाममुष्टिनाऽवज्ञयाऽहनत् ॥१८॥
तदा स्मृत्वा ब्रह्मवाक्यं सा प्राहाश्रुमुखी पुरी । ब्रह्मणोक्ता पुरा चाहं यदा त्वां धर्षयेत्कपिः ॥१९॥
तदा रामो रावणस्य वधार्थमत्र यास्यति । ज्ञातं मया रावणस्य वधं रामः करिष्यति ॥२०॥
जितं त्वया गच्छ लंकामशोके पश्य जानकीम् । ततो विवेश हनुमाँल्लंकां पश्यन्ययौ तदा ॥२१॥

शीघ्र बाहर निकल आये ॥ ४ ॥ तब सुरसा उनका बल जान और स्तुति करके स्वर्गको चली गयी। पश्चात् समुद्रके कहनेसे महान् मैनाक पर्वत जलके बीचमेंसे हनुमान्‌के विश्रामके लिये आश्रय देनेको उठ खड़ा हुआ। नाना मणिमय शिखरोंके ऊपर मनुष्यका रूप धारण करके मैनाक पर्वत आते हुए हनुमान्‌से बोला कि आइए और मेरे अमृततुल्य फलोंको खाइए ॥ ५-७ ॥ तत्पश्चात् क्षणभर विश्राम करके सुखपूर्वक आगे जाइयेगा। पूर्वसमय पर्वतोंका इन्द्रके साथ दारुण युद्ध हुआ था ॥ ८ ॥ उस समय राजा दशरथने मुझे बचाया था। तबसे मैं यहाँ आकर रहता हूँ। मैं उनके उपकारसे उऋण होनेके लिये ही आपके सामने उपस्थित हुआ हूँ ॥ ९ ॥ सो इसलिये कि रामकार्यके लिये जाते हुए आप मेरे ऊपर विश्राम करके जायँ। तब उससे हनुमान्‌ने कहा कि क्या रामके कार्यसे मुझे श्रम होगा? अरे, स्वामीके कार्यमें तो सदा विश्राम ही रहता है। इसलिये मैं यहाँ ठहरकर भोजन आदि नहीं कर सकता। तब फिर मैनाकने कहा—अच्छा, कमसे कम अपने हाथसे स्पर्श करके तो मुझे पवित्र कर दें॥ १० ॥ ११ ॥ 'तथास्तु' कह हनुमान् हाथसे उसके शिखरको छूकर चल पड़े। जब कुछ दूर आगे बढ़े तो उनकी छायाको किसी छायाग्रहने पकड़ लिया ॥ १२ ॥ वह सिंहिका नामकी घोर राक्षसी थी। जो सदा जलमें रहा करती थी और आकाशमार्गमें उड़ते हुए पक्षियोंकी छाया पकड़कर खींच लेती और खा जाती थी ॥ १३ ॥ उसके पकड़नेपर बलवान् हनुमान् सोचने लगे कि किसने रामके काममें विघ्न डालनेके लिए मेरा वेग रोक दिया ॥ १४ ॥ यह विचारकर हनुमान्‌ने नीचे देखा तो सिंहिका राक्षसीको देखकर उसके मुखमें ही कूद पड़े ॥ १५ ॥ उन्होंने उसकी आँतें निकाल लीं और उसे मार डाला। वहाँसे आगे बढ़े तो समुद्रके दक्षिण किनारे स्थित लङ्काकी बगलमें स्थित परलङ्कामें जा पहुँचे। वहाँ रावणकी लड़की क्रौंचाको सिंहिकाके ही समान मारकर रात्रिके समय लङ्कामें प्रवेश किया ॥ १६ ॥ १७ ॥ तब उन्हें लङ्का नामकी राक्षसी डराने लगी। हनुमान्‌ने उसको भी अवज्ञासे बाएँ हाथका एक मुक्का मारा ॥ १८ ॥ उस समय ब्रह्माके वाक्यका स्मरण करके लंका आँखोंमें आँसू भरकर बोली कि पूर्वकालमें ब्रह्माने मुझसे कहा था कि जब कोई वानर तेरा अपमान करेगा ॥ १९ ॥ तब राम रावणका वध करनेके लिए यहाँ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ददर्श लङ्कां तां रम्यां गोपुराट्टालमंडिताम् । हट्टवीथीचतुष्काढ्यां त्रिकूटशिखरस्थिताम् ॥२२॥
पश्यन्समन्ततः सीतां प्रतिगेहं स मारुतिः । गुहायां निद्रितं कुम्भकर्णं दृष्ट्वा भयानकम् ॥२३॥
दृष्ट्वा विभीषणं रामकीर्तने हृष्टमानसम् । दृष्ट्वा सुलोचनायुक्तं निद्रितं मेघनिःस्वनम् ॥२४॥
ययौ राजगृहं रात्रौ रावणं सदसि स्थितम् । दृष्ट्वा स्वयं वायुरूपो दीपराजीर्व्यलोकयत् ॥२५॥
अकरोद्वस्त्रहीनांस्तान् रावणदीन्स मारुतिः । उल्मुकेनाकरोद्भस्म कूर्चं च रावणस्य च ॥२६॥
राक्षसीः कोटिशो नग्नाः कृत्वा तोयघटान्कपिः बभंज लीलया तूष्णीं दूतान्पुच्छेन तर्जयन् ॥२७॥
तदाऽतिविह्वलाः सर्वे प्रोचुस्तेऽथ परस्परम् । क्रुद्धाऽद्य जानकी सत्यं नः प्राणांतमुपागतम् ॥२८॥
तच्छ्रुत्वा तुष्टचित्तः स ययौ रावणसद्गृहम् । अदृष्ट्वा जानकीं तत्र ययौ पुष्पकमुत्तमम् ॥२९॥
रावणं निद्रितं दृष्ट्वा वेष्टितं स्त्रीकदम्बकैः । दृष्ट्वा मन्दोदरीं तत्र सीतेयमिति शंकितः ॥३०॥
लक्ष्मणोक्तानि चिह्वानि पश्यंस्तस्यां ददर्श न । तथापि सीतासदृशीं दृष्ट्वा व्यग्रमनास्त्वभूत् ॥३१॥

पार्वत्युवाच

कथं मन्दोदरी सीतासदृशी राक्षसीरिता । सीतांशांशांशजाः सर्वाः स्त्रियश्चेति श्रुतं मया ॥३२॥

श्रीशिव उवाच

शृणुष्व कारणं देवि सीतेयं विष्णुना चिता । तेनैव विष्णुना पूर्वमियं मन्दोदरी चिता ॥३३॥
एकदा कैकसी माता रावणं प्राह दुःखिता । शेषोच्छ्वासेन तल्लिङ्गं गतं चाद्य रसातलम् ॥३४॥
शिवादानीय मां देहि आत्मलिंगमनुत्तमम् । तन्मातृवचनं श्रुत्वा गायनाद्वरदोन्मुखम् ॥३५॥
मामाह रावणो वाक्यं द्वौ वरौ देहि मां प्रभो । आत्मलिंगं च मन्मात्रे पत्न्यर्थं पार्वतीं मम ॥३६॥

आयेंगे। सो अब मैंने जान लिया कि राम रावणको मारेंगे ॥ २० ॥ तुमने लङ्काको जीत लिया। जाओ, लङ्कामें घुसकर अशोकवाटिकामें जानकीको देखो। तब हनुमान सीताको खोजते हुए लङ्कामें घुसे ॥ २१ ॥ उन्होंने पुरद्वार तथा अटारियोंसे मण्डित रम्य लङ्कापुरीको देखा। वह त्रिकूट पर्वतके शिखरपर स्थित बाजारों, सड़कों तथा चौराहोंसे रमणीक लग रही थी ॥ २२ ॥ हनुमानसे सब ओर प्रत्येक घरमें सीताको ढूँढ़कर गुफामें सोये हुए कुम्भकर्णको देखा ॥ २३ ॥ उन्होंने रामनामके कीर्तनसे प्रसन्नमन विभीषणको और सुलोचनाके साथ सोये हुए मेघनादको देखा ॥ २४ ॥ तदनन्तर राजभवनमें जाकर रात्रिके समय सभामें स्थित रावणको देखा। यह देखकर वायुपुत्र हनुमान्ने दीपकोंको बुझा दिया ॥ २५ ॥ हनुमान्जीने उन रावणादिको नग्न करके रावणकी दाढ़ी-मूछ आदिको लुआठीसे जलाकर भस्म कर दिया ॥ २६ ॥ करोड़ों राक्षसियोंको नग्न कर दिया। खेल-खेलमें जलके घड़ोंको फोड़ डाला और चुपकेसे बहुतेरे सिपाहियोंको पूछसे खूब पीटा ॥ २७ ॥ अतिशय विह्वल होकर वे सब परस्पर कहने लगे कि सचमुच सीताजी हम लोगोंपर क्रुद्ध हुई हैं। अब हम लोगोंका प्राणान्तकाल निकट आ गया है ॥ २८ ॥ यह सुना तो संतुष्टचित होकर हनुमान् रावणके महलमें गये। वहाँ भी जानकीको न देखकर पुष्पकविमानमें गये ॥ २९ ॥ वहाँ रावणको स्त्रियोंके झुण्डसे वेष्टित होकर सोता हुआ देखा। साथ ही मन्दोदरीको देखकर 'यही सीता है क्या ?' ऐसी आशंका करने लगे। ॥ ३० ॥ परन्तु जब लक्ष्मणके कथनानुसार सीताकी मुखाकृति मिलाने लगे तो नहीं मिली। फिर भी उसको सीताके समान देखकर आश्चर्यचकित हुए ॥ ३१ ॥ पार्वतीजीने पूछा—हे सदाशिव ! राक्षसी मन्दोदरी सीताके सदृश कैसे थी ? मैंने तो सुना है कि संसारकी सब स्त्रियें सीताके अंशांशसे उत्पन्न हुई हैं ॥ ३२ ॥ श्रीशिवजी कहने लगे—एक बार रावणकी माता कैकसीने दुःखित होकर रावणसे कहा कि शेषनागके उच्छ्वाससे मेरा नित्य पूजा करनेका शिवलिंग पातालमें चला गया है ॥ ३३ ॥ ३४ ॥ सो तुम एक उत्तम लिङ्ग शिवजीसे माँगकर मुझे ला दो। माताके वचनको सुना तो अपने गायनसे वरदान देनेके लिए राजी करके मुझसे रावणने कहा—हे प्रभो! मुझको दो वर दीजिए। एकसे मेरी माताके लिए आत्मलिङ्ग और दूसरेसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्तस्य वचनं श्रुत्वा त्वं दत्ताऽसि गिरींद्रजे । दत्त्वाऽऽत्मलिंगं संप्रोक्तो मया त्वं यदि रावण ॥३७॥
मार्गे लिंगं भूमिसंस्थं करोषि तर्ह्यहं पुनः । नाग्रे गच्छामि तत्स्थानात्तत्रैव च वसाम्यहम् ॥३८॥
तथेति रावणश्चोक्त्वा देव्या लिंगेन सो ययौ । तदा त्वया स्मृतो विष्णुस्तेनाङ्गचन्दनादिना ॥३९॥
कृत्वा मन्दोदरी नारी मयहस्तेऽर्पिता शुभा । तां निनाय मयः शीघ्रं पाताले स्वीयसद्गृहम् ॥४०॥
ततो द्विजस्वरूपेण विष्णुः प्राह दशाननम् । प्रतारितः शिवेन त्वं दत्त्वा दुर्गां तु कृत्रिमाम् ॥४१॥
पाताले मयगेहे सा गोपिताऽस्ति शिवेन हि । विविच्यसि त्वं स्वर्लोकं भूलोकं चेति शंकया ॥४२॥
स्वीयं मत्वा तु पातालं तत्र त्वं न गवेष्यसि । त्यजेमां कृत्रिमां दुर्गां पश्य तां मयसद्मनि ॥४३॥
गिरींद्रजां महारम्यां पत्नीं कृत्वा सुखं भज । तद्विप्रवचनं सत्यं मत्वा मामेत्य वै पुनः ॥४४॥
विहस्य रावणः प्राह ज्ञातं तेऽन्तर्गतं मया । अर्पिता कृत्रिमा देवी मां तां गोप्य रसातले ॥४५॥
तवैवास्त्वधुना चेयं त्वहं नेष्यामि गोपिताम् । इत्युक्त्वा त्वां विसृज्याथ पातालं गन्तुमुद्यतः ॥४६॥
तावन्मार्गे ह्यल्पशंकाग्रस्तः प्राह द्विजं तदा । आत्मलिंगं क्षणं हस्ते गृह्णीष्व वचनान्मम ॥४७॥
यावन्निवर्त्य शंकां स्वामहमेष्यामि वेगतः । द्विजवेषधरो विष्णुस्तदा प्राह दशाननम् ॥४८॥
अतिक्रांते मुहूर्तेऽथ लिङ्गं स्थाप्य व्रजाम्यहम् । तथेति रावणश्चोक्त्वा तत्करे लिंगमर्पयत् ॥४९॥
ततो मूत्रस्य सा धाराऽखंडिताऽभूच्चिरं प्रिये । अतिक्रान्ते मुहूर्तेऽथ लिंगं सागररोधसि ॥५०॥
पश्चिमे स्थाप्य भूम्यां स ययौ स्वीयस्थलं हरिः । ततः स रावणश्चापि मूत्रं कृत्वा यथाविधि ॥५१॥
लिंगं दृष्ट्वा भूमिसंस्थं तच्छिरश्चालयत्तदा । तदा भूम्यां गतं लिङ्गं शिरः किंचिच्चचाल न ॥५२॥
अभूद्गर्ता कर्णरंध्रसदृशी तच्छिरःस्थले । गर्तायां तच्छिरश्चापि कर्णशंकूपमं कृशम् ॥५३॥

पत्नी बनानेके लिए मुझे पार्वतीको दे दीजिए ॥ ३५ ॥ ३६ ॥ हे गिरीन्द्रजे ! उसकी वरयाचना सुनकर मैंने तुमको उसे दे दिया और आत्मलिङ्ग भी देकर उससे कहा—हे रावण ! देख, यदि तूने इस लिङ्गको मार्गमें कहीं भी रख दिया तो मैं आगे न जाकर वहीं रह जाऊँगा ॥ ३७ ॥ ३८ ॥ 'बहुत अच्छा' कहकर रावण देवी पार्वती तथा लिङ्गको लेकर चला गया। उस समय तुमने विष्णुभगवानका स्मरण किया । तब उन्होंने अपने अङ्गके चन्दन आदिसे मन्दोदरीको सुन्दरी स्त्री बनाकर मय दानवको दिया। उसे लेकर मयदानव पातालके अपने मनोहर भवनको चला गया ॥ ३९ ॥ ४० ॥ तब विष्णुभगवान्‌ने ब्राह्मणका रूप धारण करके रास्तेमें रावणसे कहा-हे दशानन ! शिवजीने तुमको ठग लिया । उन्होंने यह नकली पार्वती तुमको दी है ॥ ४१ ॥ असलीको तो शिवजीने पातालमें मयदानवके घरमें छिपा रखा है । उन्होंने यह सोचा कि तुम स्वर्ग तथा भूलोकमें ही खोजोगे ॥ ४२ ॥ अपना समझकर पातालमें न खोजोगे। इस कारण तुम इस कृत्रिम दुर्गाको तो छोड़ दो और मय-दानवके घर जाकर यथार्थ पार्वतीको ढूँढ़ निकालो ॥ ४३ ॥ उस अत्यन्त सुन्दरी पार्वतीको पत्नी बनाकर सुख भोगो। विप्रके उस वचनको सच मानकर पुनः रावण मेरे पास आया ॥ ४४ ॥ वह हँसकर बोला कि मैंने आपके हृदयगत अभिप्रायको जान लिया है । आपने असली पार्ववीको रसातलमें छिपाकर मुझे नकली पार्वती दे दी है ॥ ४५ ॥ इसको अब अपने पास ही रखिए । मैं तो उस छिपी हुई पार्वतीको ही ले जाऊँगा। इतना कह तथा तुमको वही छोड़कर वह पातालमें जानेके लिए उद्यत हुआ ॥ ४६ ॥ रास्तेमें लघुशङ्का करनेकी इच्छावश उसने ब्राह्मणसे कहा—हे द्विज ! मेरी प्रार्थना स्वीकार करके क्षणभरके लिए इस शिवलिङ्गको अपने हाथमें लिये रहो ॥ ४७ ॥ मैं अभी लघुशङ्का करके तुम्हारे पास आ रहा हूँ । द्विजवेष धारण करनेवाले विष्णुने कहा—हे दशानन ! यदि अधिक देर लगेगी तो मैं लिङ्गको यहींपर रखकर चला जाऊँगा । अच्छी बात है, कहकर रावणने शिवलिङ्ग उनके हाथमें दे दिया ॥ ४८ ॥ ४९ ॥ रावण जब लघुशङ्का करने लगा तो बहुत देर तक मूत्रकी अखण्ड धारा चलती रही । अधिक समय बीत जानेपर सागरके पश्चिम किनारे लिङ्गको रखकर विष्णुभगवान अपने स्थानको चले गये। उसके पश्चात् रावण भी विधिवत् मूत्रत्याग करके वहाँ आया ॥ ५० ॥ ५१ ॥ लिङ्गको जमीनपर रक्खा देखकर उसके सिरको हिलाया, परन्तु भूमिगत लिङ्गका सिर नहीं हिला

CC0. In Public Domain Kirtikant Sharma Rajatgam Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुवः कर्णोपमं लिंगं गोकर्णं तद्वदंति हि । ततः खिन्नमनास्तूष्णीं पातालं रावणो ययौ ॥५४॥
मयगेहे निरीक्ष्याथ देवीं मंदोदरीं वराम् । मयं संप्रार्थयामास ददौ तां रावणाय सः ॥५५॥
ततो विवाहं निर्वर्त्य पारिबर्हं ददौ मयः । रावणाय दृढां शक्तिममोघां शत्रुघातिनीम् ॥५६॥
दृष्ट्वा मन्दोदरं तस्याः प्राह मन्दोदरीमिति । तां नाम्ना रावणस्तुष्टस्तया स्वीयस्थलं ययौ ॥५७॥
ततो मात्रा धिकृतः स पुनस्तप्तुं त्वरान्वितः । गोकर्णं रावणो गत्वा तप्त्वा लब्ध्वा विधेर्वरान् ॥५८॥
त्रैलोक्यं स्ववशे कृत्वा लंकायां राज्यमाप सः । तस्मात्सीतासमानेयं दृष्टा मन्दोदरा प्रिये ॥५९॥
लंकायां वायुपुत्रेण रावणाग्रे विनिद्रिता । मयोऽप्यासीत्स लंकायां गृहं कृत्वा यथासुखम् ॥६०॥
मयबंधुर्गयो नाम महान् वीरः प्रतापवान् । रात्रौ विनिद्रितो गेहे ब्रह्मदत्तवरात्सुधीः ॥६१॥
दशास्यहस्तात्तन्मृत्युर्विधिनोक्तं विचिंत्य च । तस्य वस्त्रं मारुतिना हृतं सदसि वै पुरा ॥६२॥
तत्क्षिपद्धेमपर्यङ्के रावणस्य कपिस्तदा । विभीषणस्य पर्यंके वसनं रावणस्य च ॥६३॥
क्षिप्त्वापश्यज्जानकीं स लंकायां च मुहुः कपिः । ययावशोकवनिकां वृक्षप्रासादमंडिताम् ॥६४॥
ददर्श तत्र प्रांशुं च शिंशपानाम पादपम् । तन्मूले राक्षसीमध्ये ददर्शावनिकन्यकाम् ॥६५॥
एकवेणीं कृशां दीनां मलिनांबरधारिणीम् । भूमौ शयानां शोचंतीं रामरामेति भाषिणीम् ॥६६॥
कृतार्थोऽहमिति प्राह दृष्ट्वा सीतां स मारुतिः । शिंशपानगशाखाग्रपल्लवाभ्यंतरे स्थितः ॥६७॥
पुरा दृष्टानलंकारान् तस्य देहे ददर्श न । ततः किलकिलाशब्दैर्ययौ तत्र दशाननः ॥६८॥
ददर्श रावणः स्वप्ने कपिः कश्चित्समागतः । अशोकवनिकायां सा दृष्टा तेन विदेहजा ॥६९॥

॥५२॥ उसके शिरोभागकी जगह कानके छेदकी तरह गड़हा हो गया । गड़हेसे सिर भी कर्णशंकुकी तरह कृश हो गया ॥ ५३ ॥ अतएव पृथ्वीके कर्णके सदृश वह लिङ्ग गोकर्ण नामसे विख्यात हुआ । तब खिन्नमन होकर रावण चुपचाप पाताल चला गया ॥ ५४ ॥ मयके घरमे सुन्दरी मन्दोदरीको देखकर मयसे रावणने प्रार्थना की । तब मयने रावणको वह कन्या दे दी ॥ ५५ ॥ इस प्रकार मयने कन्याका विवाह करके रावणको दहेजमें बहुत सा वस्त्र-आभूषण आदि दिया और शत्रुघातिनी, अमोघ दृढ़ शक्ति भी दी ॥ ५६ ॥ उस देवीका उदर मन्द अर्थात् सूक्ष्म देखकर रावणने उसका नाम मन्दोदरी रखा और उसके लाभसे सन्तुष्ट होकर रावण अपने स्थानको चला गया ॥५७॥ वहाँ माताके धिक्कारनेपर रावण फिर गोकर्णके पास जाकर तप करने लगा । अन्तमें अपनी तपस्याके बलसे रावणने ब्रह्मासे वर प्राप्त करके तीनों लोक वशमें कर लिया और लङ्कामें राज्य करने लगा। हे प्रिये पार्वती ! इसी कारण हनुमान्‌ने सीताके समान मन्दोदरीको रावणके पास लङ्कामें सोते हुए देखा था । बादमें तो मय दानव भी लङ्कामें घर बनाकर सुखपूर्वक रहने लगा ॥ ५८-६० ॥ प्रतापी मयका भाई गय रात्रिके समय अपने भवनमें सो रहा था । विचारशील हनुमान्‌ने ब्रह्माके वरसे गयका रावणके हाथों मृत्यु करानेके विचारसे उसके वस्त्रोंको ले जाकर सभागृहमें रावणके पलंगपर और बादमें रावणके वस्त्र ले जाकर विभीषणके पलंगपर रख दिया ॥ ६१-६३ ॥ पुनः हनुमान् लङ्कामें जानकीजीको खोजने लगे । खोजते-खोजते वृक्षों तथा प्रासादोंसे सुशोभित अशोकवाटिकामें गये ॥ ६४ ॥ वहा उन्हें एक अच्छा शिशपा (शीशम) का वृक्ष दिखायी दिया। उसके नीचे राक्षसियोके बीचमें अवनि-कन्या जानकीजीको विराजमान देखा ॥ ६५ ॥ उस समय शुष्क तथा दीन मुख होकर मलीन वस्त्र धारण किये हुए भूमिपर सोयी हुई सीता दुःखित मनसे रामका नाम जप रही थीं । उनके सिरके बालोंमें मिट्टी आदि भर जानेसे लेटुरी बँध गयी थी ॥ ६६ ॥ सीताके दर्शनसे अपनेको कृतार्थ समझते हुए हनुमान्‌जी उसी शिशपावृक्षकी एक शाखाके अग्रभागके पत्तोंमें छिपकर बैठ गये ॥ ६७ ॥ उस समय सीताके शरीरपर वे अलङ्कार नहीं दिखायी दिये, जिनको कि हनुमान्‌ने पहिले सुग्रीवके पास देखा था । इतनेमें कुछ कोलाहलके साथ रावण वहाँ जा पहुँचा ॥ ६८ ॥ क्योंकि रावणको स्वप्नमें दिखायी दिया कि कोई वानर आया है और उसने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रामहस्तान्मृतिः शीघ्रं लब्धुं तां धर्षयाम्यहम् । कपिर्दृष्ट्वा राघवाय निवेदयतु मत्कृतम् ॥७०॥
आगमिष्यति तच्छ्रुत्वा रामो मां निहनिष्यति । इति निश्चित्य स ययौ स्त्रीभिः संवेष्टितो मुदा ॥७१॥
नूपुराणां ध्वनिं श्रुत्वा विह्वलाऽऽसीद्विदेहजा । रावणो जानकीमाह मां दृष्ट्वा किं विलज्जसे ॥७२॥
रामं वनचरं राज्यभ्रष्टं त्यक्तसुहृज्जनम् । पित्रा हीनं भोगहीनं सदा त्वय्यतिनिष्ठुरम् ॥७३॥
एकांतवासिनं पिंगजटावल्कलधारिणम् । तं त्यक्त्वा मां भजस्वाद्य त्रैलोक्येशं महाबलम् ॥७४॥
अप्सरोभिः सेवितं मां भाग्ययुक्तं पदस्थितम् । स्त्रियो मन्दोदरीमुख्यास्त्वां भजिष्यंत्यहर्निशम् ॥७५॥
मया राज्यं त्वदधीनं कृतमस्ति भजस्व माम् । मया स्वजीवितं चापि त्वदधीनं कृतं महत् ॥७६॥
इति नानाविधैर्वाक्यैः प्रार्थयामास रावणः । उवाचाधोमुखी सीता निधाय तृणमन्तरे ॥७७॥
राघवाद्बिभ्यता नूनं भिक्षुरूपं धृतं त्वया । रहिते राघवाभ्यां त्वं शुनीव हविरध्वरे ॥७८॥
हृतवानसि मां नीच तत्फलं प्राप्स्यसेऽचिरात् । यदा रामशराघातविदारितवपुर्भवान् ॥
भविष्यसि रणे रामं जानीषे मानुषं तदा ॥७९॥
श्रुत्वा रक्षोऽधिपः क्रुद्धो जानक्याः परुषाक्षरम् । वाक्यं क्रोधसमाविष्टः पुनर्वचनमब्रवीत् ॥८०॥
भवित्री लंकायां त्रिदशवदनग्लानिर्श्चिरात्स रामोऽपि स्थाता न युधि पुरतो लक्ष्मणसखः ।
तथा यास्यत्युच्चैर्विपदमनुजेनात्र जटिलो जयः श्रीरामे स्यान्न मम बहुतोषोऽत्र तु भवेत् ॥८१॥
तद्रावणवचः श्रुत्वा जानकी प्राह तं पुनः । षष्ठाक्षरपराण्येव चतुर्षु चरणेष्वपि ॥८२॥
त्वमक्षराणि चत्वारि लोप्य श्लोकममुं पठ । एवं तया जितो वाक्यमार्गणैः स दशाननः ॥८३॥

अशोकवनमें जाकर राजा विदेहकी पुत्री सीताको देख लिया है ॥ ६९ ॥ "रामके हाथोंसे शीघ्र मरनेके लिए मैं चलकर सीताका तिरस्कार करूँगा तो मेरी करतूत देखकर वह वानर रामसे कहेगा ॥ ७० ॥ सो सुनकर राम यहाँ आयेंगे और मुझे मारेंगे" । ऐसा निश्चय करके रावण स्त्रियोंको साथ लेकर सानन्द उधर चल पड़ा ॥ ७१ ॥ नूपुरोंकी ध्वनि सुनते ही सीताजी घबड़ा गयीं और उन्होंने मुख नीचे कर लिया । तब रावणने सीतासे कहा-तू मुझसे लजाती क्यों है ? ॥ ७२ ॥ वनमें भ्रमण करनेवाले, राज्यसे भ्रष्ट सुहृज्जनोंसे रहित, पितृहीन, भोगहीन, सदा तेरे लिए निर्दय, ॥ ७३ ॥ एकान्तसेवी, पीली जटा और बल्कल (भोजपत्र आदि वृक्षके छिलकोंको) धारण करनेवाले रामको छोड़कर तू त्रिलोकपति और महाबलवान् मुझ रावणका आश्रय ले और मेरी सेवा कर ॥ ७४ ॥ मैं अप्सराओंसे सेवित और भाग्यवान् होकर महान् पदपर स्थित हूँ । मेरी सेवा करनेसे मेरी मन्दोदरी आदि स्त्रियें भी रात-दिन तेरी दासियाँ बनकर रहेंगी ॥ ७५ ॥ मैंने अपना राज्य तथा अपना जीवन तुझको दे दिया है । तू मेरी बनकर रह ॥ ७६ ॥ इस तरह अनेक प्रकारके वाक्योंसे रावण प्रार्थना करने लगा । तब बीचमें तिनकेका आड़ करके तथा नीचे मुख किये हुए सीताने कहा-॥ ७७ ॥ अरे पापी ! क्यों डींग हाँकता है । रामके डरसे तू भिक्षुका रूप धारण करके और राम-लक्ष्मणकी अनुपस्थितिमें यज्ञसे जैसे कुत्ता हवि अर्थात् हवनकी सामग्री घृत-खीर आदि लेकर भागे, उसी प्रकार तू मुझे लेकर भाग आया है । अरे नीच ! उसका फल तुझको शीघ्र मिल जायगा । जब रामके बाणोंसे विदारितशरीर होकर तू गिरेगा, तब तुझे यह पता लग जायेगा कि राम मनुष्य हैं या और कोई। यह सुना तो राक्षसाधिप रावण कुपित होकर जानकीजीको कठोर वचन कहता हुआ बोला-॥ ७८-८० ॥ "इस लङ्कामें आकर देवताओंके भी मुख मलीन हो जायँगे। लक्ष्मणसहित वह राम भी मेरे समक्ष युद्धमें नहीं खड़ रह सकेगा । यहाँ आया तो अनुजके सहित वह बड़ी भारी विपत्तिमें पड़ जागा । यहाँ उस जटाधारी रामकी जीत नहीं होगी और मुझे भी आनन्द न प्राप्त होगा" ॥ ८१ ॥ रावणकी इस बातको सुनकर जानकीने कहा-चारों चरणोंमें छठे अक्षर तथा आगेवाले चारों सप्तम अक्षरोंका लोप करके तुम इसी श्लोकको फिरसे पढ़ो । वही हाल तुम लोगोंका होगा । कहनेका आशय यह है कि ८१वें श्लोकमेंसे चारों चरणोंके त्री न वि और न ये चार अक्षर निकल जानेसे यह अर्थ होगा कि लङ्कामें दशवदन रावणके ऊपर शीघ्र ही विपत्ति आयेगी अर्थात् वह हार जायगा । लक्ष्मणके साथ राम युद्धमें आ डटेंगे ।
CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुद्राव भीषयन्सीतां खड्गमुद्यम्य सत्वरः । धृत्वा करेण तत्पाणिं मन्दोदर्या निषेधितः ॥८४॥
मादृश्यः सति बह्वयश्च त्यजैनां कृपणां कृशाम् । ततोऽब्रवीद्दशग्रीवो राक्षसीर्विकृताननाः ॥८५॥
यथा मे वशगा सीता भविष्यति सकामना । तथा यतध्वं त्वरितं तर्जनादरणादिभिः ॥८६॥
यदि मासद्वयादूर्ध्वं मच्छय्यां नाभिनन्दति । तदा मे प्रातराशाय हत्वा कुरुत मानुषीम् ॥८७॥
तदा सीता पुनः प्राह वचनं तं दशाननम् । बाल्यत्वेऽहं समानीता पेटिकास्था त्वया पुरा ॥८८॥
तदा मया वचः प्रोक्तं तत्त्वं किं विस्मृतोऽसि हि । अधुनाऽहं गमिष्यामि यास्यामि त्वरितं पुनः ॥८९॥
त्वां बंधुपुत्रसैन्याद्यैर्निहन्तुं च मयेरितम् । तत्स्वीयं वचनं सत्यं कर्तुमत्रागताऽस्म्यहम् ॥९०॥
त्वां बन्धुपुत्रसैन्याद्यैर्निहत्य रामहस्ततः । ततोऽयोध्यापुरीं गत्वा पुनर्यास्यामि त्वत्पुरीम् ॥९१॥
निकुम्भजं पौंड्रकं तं मातामहगृहे स्थितम् । शतशीर्षं रावणं च द्वीपांतरनिवासिनम् ॥९२॥
साहाय्याहार्थं पौंड्रकेन लंकायामागतं पुनः । अहं तृतीयवेलायां संवधिष्यामि तावुभौ ॥९३॥
ततः स्वीयस्थलं गत्वा पुनर्यास्याम्यहं जवात् । कुम्भकर्णोद्भवं वीरं मूलकासुरनामकम् ॥९४॥
अत्रैव तुर्यवेलायामागत्य पुष्पकेण हि । अहमत्र हनिष्यामि शितबाणै रणांगणे ॥९५॥
अन्यच्चापि स्मराद्य त्वं पुरा यद्विधिनोदितम् । यद्वाक्याच्च त्वया गत्वा कौसल्यानृपती हृतौ ॥९६॥
पेटिकास्थौ पुनस्त्यक्तौ साकेते दैवयोगतः । अतस्त्वं मर्तुकामोऽसि यतोऽहमाहृता त्वया ॥९७॥
गच्छ गेहे सुखं भुंक्ष्व रामः शीघ्रं हनिष्यति । इति सीतावाक्यबाणभिन्नमर्मस्थलोऽपि सः ॥९८॥
ययौ तूष्णीं निजं गेहं लज्जितश्च दशाननः । एवं दशानने याते राक्षस्यो रावणाज्ञया ॥९९॥
जानकीं तां स्वशब्दैश्च तथा क्रूरोक्तिभिर्मुहुः । आस्यैर्विदीर्णखड्गाद्यैर्भीषयन्त्यः करादिभिः ॥१००॥

अनुज सहित राम उच्च पदको प्राप्त करेंगे । जटाधारी रामकी विजय होगी, तब मुझे बड़ा हर्ष होगा । इस प्रकार वाक्यका संशोधन करके सीताने दशाननको जीत लिया ॥ ८२ ॥ ८३ ॥ तब रावण तलवार उठाकर सीताको डराते हुए उनपर झपटा । उस समय मन्दोदरीने उसका हाथ पकड़कर रोका और कहा कि तुम्हारे पास ऐसी बहुत-सी स्त्रियें है । तुम इस बेचारी कमजोर तथा गरीब मानुषी नारीको छोड़ दो । तब रावणने भयानक मुखवाली राक्षसियोंको आज्ञा दी कि सीता जिस तरह कामभावसे मेरे वशमें हो, वैसा तुमलोग डराकर अथवा समझाकर शीघ्र यत्न करो ॥ ८४-८६ ॥ यदि दो महानेके भीतर यह मेरा शय्यापर न आये तो इस मानुषीको मारकर मेरे जलपानके लिए तैयार करना, तब मैं इसे खा जाऊँगा ॥ ८७ ॥ सीता फिर दशमुख रावणसे कहने लगी—जब तू बाल्यावस्थामें मुझे पिटारी सहित यहाँ ले आया था ॥ ८८ ॥ उस समय जो वात मैंने कही थी, क्या उसे भूल गया ? मैंने कहा था कि अभी मैं जाती हूँ, परन्तु फिर यहाँ शीघ्र ही आऊँगी ॥ ८९ ॥ और वह इसलिए कि मैं भाई, पुत्र तथा सेना सहित तुझे मार डालूंगी । अब मैं अपने वचन सत्य करने आयी हूँ ॥ ९० ॥ रामके हाथों तुझको और तेरे बन्धुओं तथा सेनाको मरवाकर अयोध्यापुरी जाऊँगी । पुनः मैं तीसरी वार भी तेरी नगरीमें आऊँगी ॥ ९१ ॥ उस समय मातामह अर्थात् नानाके घरमें स्थित निकुम्भके पुत्र पौण्ड्रकको तथा द्वीपांतरमें रहनेवाले सौ सिरवाले रावणको जो कि पौण्ड्रककी सहायतार्थ लङ्कामें आयेगा, तीसरी बार आकर उन दोनोंको मारूँगी ॥ ९२ ॥ ९३ ॥ पश्चात् अपने स्थानको जाकर फिर चौथी बार मैं शीघ्र आऊँगी और कुम्भकर्णके पुत्र वीर मूलकासुरका वध करूँगी ॥ ९४ ॥ पुष्पक विमानसे यहाँ आकर मैं उसे रणांगणमें मारूँगी ॥ ९५ ॥ पूर्वकालमें जो ब्रह्माजीने कहा था, वह भी स्मरण कर ले । जिनके कहनेसे तूने कौसल्या और राजा दशरथका हरण किया था ॥ ९६ ॥ देवयोगसे फिर तूने उन्हें अयोध्यामें छुड़वा दिया था । इससे पता लगता है कि तू मरना चाहता है । इसीलिए तूने मुझसे प्रेम करना चाहा है ॥ ९७ ॥ अब घर जा और सुखसे भोजन कर । राम तुझे शीघ्र मारेंगे । इस प्रकार सीताके वाक्यरूपी बाणोंसे विदीर्णहृदय होकर दशानन लज्जासे चुपचाप अपने घर चला गया । दशाननके चले जानेपर उसकी आज्ञासे राक्षसियें अपने भयानक शब्दोंसे, क्रूर वाक्योंसे, मुँह फाड़कर, तलवार तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निवार्य त्रिजटानाम्नी विभीषणप्रियाऽनुगा । ताः सर्वा राक्षसीर्वेगाद्वाक्यमाहाथ सादरम् ॥१०१॥
न भीषयध्वं रुदतीं नमस्कुरुत जानकीम् ।सुचिह्नै राघवः स्वप्ने मया दृष्टोऽद्य जानकीम् ॥१०२॥
मोचयामास दग्ध्वेमां लंकां हत्वा तु रावणम् । रावणो गोमयह्रदे तैलाभ्यक्तो दिगंबरः ॥१०३॥
मयाऽद्य दृष्टः स्वप्ने हि तस्मादेनां न साहसम् । कार्यं सेव्या सदा चेयं शमादभयदायिनी ॥१०४॥
युष्माभिर्दुःखिता चेद्वो भर्त्रेयं घातयिष्यति । इति तत्त्रिजटावाक्यं श्रुत्वा तस्थुर्भयाकुलाः॥१०५॥
तूष्णीमेव तदा सीता दुःखात्किंचिदुवाच सा । इदानीमेव मरणं केनोपायेन मे भवेत् ॥१०६॥
दीर्घा वेणी ममात्यर्थमुद्बन्धाय भविष्यति । यन्मया स्वीयवाग्बाणैर्लक्ष्मणस्ताडितः पुरा । १०७॥
तस्मादिमाः पीडयंति भोक्ष्यते स्वकृतं मया । मया विरागः सौमित्रिस्त्रासितो गौतमीतटे ॥१०८॥
प्रायश्चित्तं करोम्यद्य तस्य त्यक्त्वा स्वजीवितम् । एवं निश्चितबुद्धिं तां मरणायाथ जानकीम् ॥१०९॥
दृष्ट्वा शनैर्वायुपुत्रो रामवृत्तं न्यवेदयत् । आसाकेतनिर्गमाच्च स्वसीतादर्शनावधि ॥११०॥
सविस्तारं क्रमेणात्र सीतातोषार्थमादरात् । सीता क्रमेण तत्सर्वं श्रुत्वा साश्चर्यमानसा ॥१११॥
किं मयेदं श्रुतं व्योम्नि स्वप्नो दृष्टोऽथवा निशि । येन मे कर्णपीयूषवचनं समुदीरितम् ॥११२॥
स दृश्यतां महाभागः प्रियवादी ममाग्रतः । तच्छ्रुत्वा तत्पुरो गत्वा नत्वा तामब्रवीत्पुनः ॥११३॥
रामदूतो ददौ तस्यै राघवस्यांगुलीयकम् । तां राममुद्रिकां दृष्ट्वा नत्वा तामब्रवीत्कपिम् ॥११४॥
सर्वं कथय तद्वृत्तं यथा दृष्टं त्वयाऽत्र हि । तदा तां सांत्वयामास रामो मत्स्कंधसंस्थितः॥११५॥
वानरेंद्रैः समागत्य हत्वा रावणमाहवे । त्वां नेष्यति भयं सीते त्यज त्वं मम वाक्यतः॥११६॥

अँगुलियोंके संकेतोंसे सीताको डराने लगीं ॥ ९८-१०० ॥ उसी समय विभीषणकी प्रिया अनुगामिनी त्रिजटा राक्षसीने उन सबको ऐसा करनेसे रोका और उन सबको समझाकर कहा कि इस रोती हुई जानकीजीको तुम लोग डराओ नहीं, प्रत्युत नमस्कार करो । मैंने आज स्वप्नमें रामको सुन्दर चिह्नोंसे युक्त देखा है और यह भी देखा है कि उन्होंने जानकीको छुड़ाकर लङ्काको जलाया तथा रावणको मार डाला है । तेल लगाये हुए रावण गोबरके गड्ढेमें गिर गया है ॥ १०१-१०३ ॥ मैंने आज यह स्वप्न देखा है । इस कारण इन्हें सतानेका साहस नहीं करना चाहिए । रामसे अभय दिलानेवाली इस जानकीकी तुम्हें सेवा करनी चाहिए ॥ १०४ ॥ यदि तुम लोग इसे दुःख दोगी तो यह अपने पति रामके द्वारा तुम्हें मरवा डालेगी । त्रिजटाके इस वाक्यको सुनकर सब राक्षसियें व्याकुल होकर चुप हो गयीं ॥ १०५ ॥ उन सबके सो जानेपर दुःखित होकर सीता धीरे-धीरे कहने लगीं कि इसी समय मेरा मरण किस उपायसे हो सकता है ॥ १०६ ॥ हाँ, यह मेरे सिरके बालकी लम्बी लट फाँसो लगानेके लिए बहुत अच्छी तरह काम आयेगी । उस समय जो मैंने वचनरूपी बाणों-से लक्ष्मणको बींधा था ॥ १०७ ॥ उसीके फलस्वरूप ये राक्षसियें मुझे सता रही हैं । यह मैं अपने किये हुए कर्मोंका फल भोग रही हूँ । मैंने गोमती नदीके किनारे सुमित्राके निर्दोष पुत्र लक्ष्मणको जो धमकाया था ॥१०८॥ उसका मैं आज प्राण देकर प्रायश्चित्त करूँगी । इस प्रकार मरनेका निश्चय किये हुए जानकीको देखकर वायुपुत्र हनुमान्ने धीरे धीरे रामका वृत्तान्त सुनाना प्रारम्भ किया । उन्होंने रामके अयोध्यासे चलनेके समयसे लेकर सीताको देखने तकका सारा वृत्तान्त विस्तारपूर्वक क्रमसे सीताके संतोषके लिए सुना दिया । वह सब वृत्तान्त सुनकर सीता आश्चर्यचकित होकर सोचने लगीं कि क्या यह मैं कोई आकाशवाणी सुन रही हूँ अथवा रात्रिके समयका स्वप्न देख रही हूँ । जिसने मेरे कानोंके लिए अमृतके समान यह वचन सुनाया है । १०९-११२ ॥ वह प्रियवादी मेरे सामने आकर दर्शन दे । यह सुना तो हनुमान् उनके सामने प्रकट हो गये और नमस्कार करके उन्हें रामका वृत्तान्त पुनः सुनाया ॥ ११३ ॥ फिर विश्वास दिलानेके लिए रामकी अंगूठी निकाल-कर सीताको दी । रामकी मुद्रिकाको देख तथा नमस्कार करके सीता बोलीं --॥ ११४ ॥ हे कपि ! जैसा कि तुमने देखा है, मेरा सब हाल जाकर रामसे कह देना । तब हनुमान् सीताको आश्वासन देकर कहने लगे कि राम मेरे कन्धेपर सवार होके वानरसेनापतियोंके साथ यहाँ आकर युद्धमें रावणको मारेंगे और आपको

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः सीताप्रत्ययार्थं रूपं स्वं दर्शयन् कपिः । ततः पुनः प्रत्ययार्थं सीतायै राघवोदितम् ॥११७॥
मनःशिलायास्तिलकं चित्रकूटगिरौ कृतम् । कपिस्तत्कथयामास पूर्ववृत्तं सविस्तरम् ॥११८॥
ततस्तुष्टां जानकीं तां मारुतिर्वाक्यमब्रवीत् । अनुज्ञां देहि मे मातस्त्वभिज्ञानं ददस्व माम् ॥११९॥
सा तं चूडामणिं पित्रा दत्तं केशांतरस्थितम् । निष्कास्य तत्करे दत्त्वा पूर्वं काकेन यत्कृतम् ॥१२०॥
चित्रकूटगिरौ वृत्तं कथयामास तत्कपिम् । ततो नत्वा रामपत्नीं चिंतयामास चेतसि ॥१२१॥
स्वामिकार्यं कृतं चैतदन्यत्किञ्चित्करोम्यहम् । इति निश्चित्य मनसा जानकीं पुनरब्रवीत् ॥१२२॥
मातर्मेऽतीव क्षुद्बोधस्त्वद्य विक्लवदो महान् । अस्मिन्वनेऽतिमधुरः फलसंघोऽतिदुर्लभः ॥१२३॥
तवाज्ञयाऽद्य सीतेऽहं करिष्ये भक्षणं ध्रुवम् । इति तद्वचनं श्रुत्वा जानकी स्वीयकंकणम् ॥१२४॥
निष्कास्य हस्तात्तं प्राह गृह्णीष्वेदं प्लवंगम । अनेन फलसंभारान् लंकाहट्टात्प्रगृह्य च ॥१२५॥
भुक्त्वापीत्वासुखंगच्छवनेऽस्मिन्त्रोटयस्व मा । तदा कपिः पुनः प्राह परहस्तफलानि हि ॥१२६॥
नाहं भुंजामि सीते मे व्रतमस्ति व्रजाम्यहम् । व्रजंतं मारुतिं दृष्ट्वा सीता वचनमब्रवीत् ॥१२७॥
भो बालक कपिश्रेष्ठ रावणोऽस्ति वनाधिपः । न शक्तिर्न च शक्यं ते कथं त्वं भक्षयिष्यसि ॥१२८॥
तत्तस्या वचनं श्रुत्वा मारुतिः प्राह जानकीम् । श्रीरामेति परं मंत्रशस्त्रं मे हृदयांतरे ॥१२९॥
तेन सर्वाणि रक्षांसि तृणरूपाणि सांप्रतम् । तदा तं जानकी प्राह पतितान्यत्र वै भुवि ॥१३०॥
भुंक्ष्वैतानि फलानि त्वं तूष्णीं मा त्रोटयात्र वै ।तथेति मारुतिश्चोक्त्वा वृक्षान्पुच्छेन चालयन्॥१३१॥
वृक्षांदोलनमात्रेण निपेतुश्च फलानि हि । भक्षयामास तान्येव सुफलानि क्षणेन सः ॥१३२॥
ततो वृक्षान्समुत्पाट्य लांगूलेन स मारुतिः । क्षिप्त्वा तानन्यवृक्षेषु समस्तानि फलानि वै ॥१३३॥
पातयामास भूम्यां तु भक्षयामास तानि सः । भक्षितानि समस्तानि फलानि वनजानि हि ।१३४॥

छुड़ा ले जायँगे । हे सीते ! मेरे कहनेसे आप निर्भय रहें ॥ ११५ ॥ ११६ ॥ तब हनुमान्‌ने सीताको विश्वास दिलानेके लिए अपना असली स्वरूप दिखाया । तदनन्तर और भी विश्वासके लिए सीताको रामका कहा और चित्रकूटपर किया मैंनसिलके तिलक आदिका किस्सा भी सुना दिया । साथ ही और भी पहलेका वृत्तान्त सीताको सुनाया ॥ ११७ ॥ ११८ ॥ तब भली-भाँति संतुष्ट जानकीसे हनुमान्‌ने कहा—हे माता ! अब आप मुझे जानेकी आज्ञा दें तथा अपना कोई चिह्न भी दे दें ॥ ११९ ॥ तब सीताने पिताकी दी हुई चूडामणि सिरके बालोंमें-से निकालकर उनके हाथोंमें दी और पूर्वमें चित्रकूटगिरिपर काक (जयन्त) का किया हुआ वृत्तान्त हनुमान्‌को सुनाया । तदनन्तर रामपत्नी सीताको नमस्कार करके हनुमान् मनमें सोचने लगे—॥ १२० । १२१ ॥ मैने स्वामीका कहा हुआ काम तो कर दिया, पर और भी कुछ करते चलना चाहिए । ऐसा निश्चय करके वे जानकीसे बोले—॥ १२२ ॥ हे माता ! आज थकावटके साथ बड़ी भूख लगी हुई है । इस वनमें अतिशय दुर्लभ एवं अति मधुर फलोंका समूह लगा हुआ है ॥ १२३ ॥ सो आपकी आज्ञासे मैं इनको अवश्य खाऊँगा । यह सुना तो जानकीने हाथसे उतारकर अपना कंकण उनको दिया और कहा—हे प्लवङ्गम ! यह लो और लङ्काकी दूकानोंपरसे फलोंके ढेर खरीद लो और उन्हें खाकर जाओ । परन्तु इस वनके फल न तोड़ना । तब हनुमान्‌ने कहा कि दूसरोंके हाथसे तोड़े फल मैं नहीं खाता । हे सीते ! ऐसा मेरा व्रत है । अच्छी बात है, रहने दो । मैं ऐसे ही जाता हूँ । जाते हुए मारुतिको देखकर सीताने कहा—॥ १२४–१२७ ॥ हे बालक ! हे कपियोंमें श्रेष्ठ कपि ! इस उपवनका अधिपति रावण है । तुम्हारेमें इतनी शक्ति नहीं है कि तुम उसको जीत सको तो फल कैसे खाओगे ? ॥ १२८ ॥ यह सुनकर मारुतिने जानकीसे कहा कि मेरे हृदयमें 'श्रीराम' यह मंत्ररूपी अमोघ शक्ति विद्यमान है ॥ १२९ ॥ उसके बलपर मैं इन सब राक्षसोंको तृणवत् समझता हूँ । तब जानकीने कहा कि जो फल पृथ्वीपर गिर पड़े हों ॥ १३० ॥ उनको तुम चुपचाप खा लो, पेड़परसे न तोड़ना । 'बहुत अच्छा' कहकर हनुमान्‌ने अपनी पूँछसे बाँधकर वृक्षोंको हिलाया ॥ १३१ ॥ वृक्षोंको हिलानेसे सब फल नीचे गिर पड़े । उन्होंने उन सब सुन्दर फलोंको क्षणभरमें खा लिया ॥ १३२ ॥ फिर हनुमान्‌ने उन वृक्षोंको

CC0. In Public Domain.Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृष्ट्वा तं दुद्रुवुर्धर्तुं मारुतिं वनरक्षकाः । राक्षसानागतान् दृष्ट्वा वृक्षैस्तांस्ताडयत्कपिः ॥१३५॥
उत्पाट्याशोकवनिकां निर्वृक्षामकरोत्क्षणात् । सीताश्रयनगं त्यक्त्वा वनं शून्यं चकार सः ॥१३६॥
बभंज चैत्यप्रासादं हत्वा तद्रक्षकान् क्षणात् । ततस्ता राक्षसीः सर्वा वनभंगं निरीक्ष्य च ॥१३७॥
पप्रच्छुर्जानकीं सर्वाः कोऽयं कस्य कुतस्त्विह । ताः सर्वा जानकी प्राह राक्षसाः कामरूपिणः ॥१३८॥
विचरंति मुदा भूम्यां वेद्म्यहं भिक्षुरूपिणा । तदा हृता पंचवट्यां रावणेन हि तद्वनात् ॥१३९॥
तस्माज्ज्ञेयस्तु युष्माभिः कोयं मां पृच्छतेद्य किम् । इति तस्या वचः श्रुत्वा राक्षस्यो भयविह्वलाः ॥१४०॥
दशाननं हि तद्वृत्तं ययुः शीघ्रं निवेदितुम् । एतस्मिन्नंतरे प्रातर्मंचके कटिबंधनम् ॥१४१॥
निरीक्ष्य रावणश्चाथ गयस्य चकितस्तदा । भुक्तां मंदोदरीं ज्ञात्वा तां हंतुं खड्गमाददे ॥१४२॥
तदा निवारितः स्त्रीभिः स्त्रीहत्यां माकरोत्विति । तदा क्रुद्धो दशग्रीवस्तूष्णीं गत्वा गयगृहम् ॥१४३॥
अवधीन्निद्रितं वीरं खड्गेन स्वगृहं ययौ । तदा विभीषणः प्रातर्बन्धोर्वस्त्रं स्वमंचके ॥१४४॥
दृष्ट्वा तां स रमां हंतुं दुद्रुवे वर्जितस्तदा । स्त्रीभिर्धृत्वा तस्य स्त्रीहत्या गर्हिता त्विति ॥१४५॥
विभीषणस्तदारभ्य बंधोस्त्रासममन्यत । एवमासीच्च लंकायां कौतुकं कपिना कृतम् ॥१४६॥
अथ वेगेन राक्षस्यः सभासंस्थं दशाननम् । वृत्तं निवेदयामासुः स्खलद्वाण्या वनोद्भवम् ॥१४७॥
तच्छ्रुत्वा रावणः क्रोधात्कपिनोत्पाटितं वनम् । वनपालं समाहूय जम्बुमालिनमब्रवीत् ॥१४८॥
राक्षसैर्नियुतैर्गच्छ कीशं धृत्वा समानय । तथेति स ययौ वेगादशोकवनिकां प्रति ॥१४९॥
दृष्ट्वा सैन्यं दीर्घनादं चकार कपिकुंजरः । ततस्ते राक्षसाः शस्त्रैर्निजघ्नुर्वानरोत्तमम् ॥१५०॥

पूँछसे बाँध-बाँधकर गिरा दिया । उनको गिराकर दूसरे वृक्षोंके फल खाये ॥ १३३ ॥ उन्हें भी गिराकर तीसरे वृक्षके समस्त फल खा लिये । ऐसा करके उन्होंने उस उपवनके सब फलोंको खा डाला ॥ १३४ ॥ यह देखकर वनके रक्षकगण उन्हें पकड़ने दौड़े । हनुमान्ने राक्षसोंको आते देखकर उन्हें वृक्षोंसे ही पीटना आरम्भ कर दिया ॥ १३५ ॥ इस प्रकार क्षणभरमें उन्होंने सारे अशोकवनको वृक्षोंसे रहित कर दिया । केवल सीताके आश्रयभूत एक वृक्षको छोड़ और सब उपवनको उजाड़ डाला ॥ १३६ ॥ बादमें उन्होंने वहाँके बड़े-बड़े महलोंको गिरा दिया और उनके रक्षकोंको मार भगाया । उधर वे राक्षसियें वनभङ्गको देखकर सीतासे पूछनें लगीं कि यह कौन है, किसका दूत है और कहाँसे आया है ? सीताने उन सबसे कहा कि बहुतसे यथेच्छ रूप धारण करनेवाले राक्षस पृथ्वीपर आनन्दसे घूमा करते हैं। उन्हीमेंसे कोई होगा। इस बातका पता मुझे तबसे लगा है, जब भिक्षुकका रूप धारण करके रावण मुझे पंचवटीके वनसे हर लाया ॥ १३७–१३९ ॥ सो तुम्हीं लोग इसका पता लगाओ कि यह कौन है । मुझसे क्या पूछती हो ? उनके इस वचनको सुनकर राक्षसियें भयसे विह्वल हो गयीं ॥ १४० ॥ वह हाल कहनेके लिए वे शीघ्र दशाननके पास दौड़ीं। इधर प्रातःकालके समय रावण अपनी शय्यापर गयका कमरबन्द देखकर चकित हो गया। रावणने सोचा कि गयने यहाँ आकर मन्दोदरीको भोगा है । यह शंका करके उसने मन्दोदरीको मारनेके लिये तलवार उठायी ।। १४१ ।। १४२ ।। तब दूसरी स्त्रियोंने 'स्त्रीकी हत्या नहीं करनी चाहिए' यह कहकर उसे रोका । तब क्रुद्ध रावणने चुपकेसे गयके घर जाकर सोये हुए ही वीर गयको तलवारसे काट डाला और अपने घर लौटा। उधर विभीषणने प्रातःकाल अपने अपने भाई रावणका वस्त्र अपने पलङ्गपर देखा ॥ १४३ ॥ १४४ ॥ यह देखकर वह अपनी स्त्री रमाको मारने दौड़ा। तब अन्य स्त्रियोंने उसका हाथ पकड़कर रोक लिया और कहा कि स्त्री-हत्या करना बडा भारी निन्दित कर्म है ॥ १४५ ॥ तथापि विभीषण उस दिनसे अपने भाईसे डरने लगा । इस प्रकार लङ्कामें हनुमान्ने बड़े बड़े कौतुक किये ॥ १४६ ॥ उन राक्षसियोंने भी दौड़ी-दौड़ी जाकर सभामें स्थित रावणको घबराहटके कारण टूटे-टूटे शब्दोंमें अशोकवनके विनाशका सब वृत्तान्त सुनाया ॥ १४७ ॥ कपिके द्वारा वनभङ्गका समाचार सुनकर क्रुद्ध रावणने उस वनके रक्षक जम्बुमालीको बुलाकर कहा—॥ १४८ ॥ तुम बीस हजार राक्षसोंको लेकर जाओ और उस वानरको पकड़ लाओ। 'तथास्तु' कहकर वह शीघ्र अशोकवनको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत उत्प्लुत्य हनुमान् तोरणेन समंततः। निष्पिपेष क्षणादेव मशकानिव यूथपः ।।१५१।।
हत्वा तान् राक्षसान् सर्वांस्ततो वेगेन मारुतिः। तालवृक्षं समुत्पाट्य जघान जंबुमालिनम् ।।१५२।।
तान् सर्वान्निहतांछ्रुत्वा पञ्चसेनापतीन्पुनः। रावणः प्रेषयामास हतास्ते तोरणेन च ।।१५३।।
वायुपुत्रेण वेगेन लक्षराक्षससंयुताः । स तानपि मृतांछ्रुत्वाऽक्षं पुत्रं प्रैषयत्तदा ।।१५४।।
कपिना मारितः सोऽपि ससैन्यो मुद्गरेण च। ततः स प्रेषयामास पुत्रमिंद्रजितं पुनः ।।१५५।।
ततः स रथमारूढः कोटिराक्षसवेष्टितः। युद्धं चकार कपिना शस्त्रैरस्त्रैः सुदुर्धरैः ।।१५६।।
तदा पुच्छेन सैन्याय कृत्वा प्राकारमुत्तमम्। निष्पिपेष तोरणेन राक्षसान्मारुतिः क्षणात् १५७।।
ततो वृक्षं समुत्पाट्य मेघनादमताडयत्। वृक्षेण भिन्नसर्वांगो मेघनादोऽविशद्गुहाम् ।।१५८।।
एतस्मिन्नंतरे ब्रह्मा प्रार्थयामास मारुतिम्। ब्रह्मास्त्रं मानयन्मेऽद्य त्वं लङ्कां याहि रावणम् ।।१५९।।
तथेत्यंगीचकारासौ मेघनादं ययौ विधिः। विधिः प्राह मेघनादं क्व गतोऽद्य पराक्रमः ।।१६०।।
गच्छ मेऽस्त्रेण तं बद्ध्वा पितुरग्रे समानय। स ब्रह्मवचनं श्रुत्वा मेघनादः पुनर्ययौ ।।१६१।।
ब्रह्मास्त्रेणाथ बद्ध्वा तमानयामास रावणम्। ततो रावणवाक्येन प्रहस्तः प्राह मारुतिम् ।।१६२।।
कस्त्वं कुतः समायातः प्रेषितः केन वा वद। ततः स रामवृत्तं हि कथयामास विस्तरात् ।।
ततस्तं बोधयामास रावणं वायुनन्दनः ।।१६३।।
विसृज्य मौर्ख्याद्धृदि शत्रुभावनां भजस्व रामं शरणागतप्रियम्।
सीतां पुरस्कृत्य सपुत्रबान्धवो रामं नमस्कृत्य विमुच्यसे भयात् ।।१६४।।
यावन्नगाभाः कपयो महाबला हरींद्रतुल्या नखदंष्ट्रयोधिनः।

गया ।। १४९ ।। उसकी सेनाको देखकर कपियोंमें कुञ्जर (हाथी)के समान वीर हनुमान्ने बहुत जोरसे गर्जन किया। तब राक्षसोंने वानरोत्तम हनुमान्को शस्त्रोंसे मारना आरम्भ कर दिया ।। १५० ।। हनुमान् भी रणमें कूद पड़े और मच्छरोंकी तरह उन सेनापतियों तथा राक्षसोंको चारों ओरसे तोरणके द्वारा क्षणभरमें पीस डाला ।। १५१ ।। उन सबको मारनेके बाद मारुतिने वेगसे एक ताड़का वृक्ष उखाड़कर उससे जम्बुमालीको समाप्त कर दिया ।। १५२ ।। उन सबको मारे गये सुनकर रावणने पाँच और सेनापतियोंको भेजा। हनुमान्ने तोरण (मुग्दर) से उन्हें भी मार डाला ।। १५३ ।। वायुपुत्र हनुमान्ने लाखों राक्षसोंके साथ उन पाँच सेनापतियोंको भी मार डाला, यह सुनकर रावणने अपने अक्षयनामक पुत्रको भेजा ।। १५४ ।। तब हनुमान्ने उसको भी मुग्दरसे मार डाला। अब रावणने अपने इन्द्रजित् सुत मेघनादको भेजा ।। १५५ ।। वह एक करोड़ राक्षसोंसे वेष्टित हो तथा रथपर सवार होकर वहाँ आया। वह अपने दुर्धर्ष शस्त्रास्त्रोंसे हनुमान्के साथ युद्ध करने लगा ।।१५६।। हनुमान्ने सेनाको रोकनेके लिए अपनी पूँछका ही गढ़ बनाया और तोरणसे उन सबको क्षणभरमें पीस डाला ।। १५७ ।। बादमें एक वृक्ष उखाड़कर उससे मेघनादको मारा। जिससे घायल होकर वह एक गुफामें जा घुसा ।। १५८ ।। उस समय ब्रह्माने हनुमान्से प्रार्थना की कि तुम मेरे ब्रह्मास्त्र (ब्रह्मपाश) का मान रक्खो और उसमें बँधकर लंकामें रावणके पास जाओ ।। १५९ ।। उन्होंने 'तथास्तु' कहकर अङ्गीकार कर लिया। तब ब्रह्मा मेघनादके पास गये और कहा—हे मेघनाद ! तुम्हारा पराक्रम आज कहाँ चला गया ? ।। १६० ।। अब मेरे पाशसे उन वानरको बाँधकर अपने पिताके पास ले जाओ। ब्रह्माके वचनको सुनकर मेघनाद फिर वहाँ गया और हनुमान्को ब्रह्मपाशसे बाँधकर रावणके पास ले आया। तब रावणके कथनानुसार प्रहस्त उनसे पूछने लगा—।। १६१ ।। १६२ ।। बतला तू कौन है, कहाँसे आया है और तुझे किसने भेजा है ? तब विस्तारसे रामका वृत्तान्त सुनाकर हनुमान् रावणको समझाने लगे—।। १६३ ।। ओ रावण ! मूर्खतासे प्राप्त शत्रुभावको तू हृदयसे निकाल दे और शरणागतोंके प्रिय रामका भजन कर। यदि सीताको आगे करके पुत्र तथा बान्धवोंके साथ जाकर रामको नमस्कार करेगा तो तू निर्भय हो जायगा ।। १६४ ।। सिंहके समान महाबलवान्

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लंकां समाक्रम्य विनाशयंति ते तावद्द्रुतं देहि रघूत्तमाय ताम् ॥१६५॥
जीवन्न रामेण विमोक्ष्यसे त्वं गुप्तः सुरेंद्रैरपि शंकरेण ।
न देवराजांकगतो न मृत्योः पातालल़ोकानपि संप्रविष्टः ॥१६६॥
शुभं हितं पवित्रं च वायुपुत्रवचः खलः । प्रतिजग्राह नैवासौ म्रियमाण इवौषधिम् ॥१६७॥
इति तद्वचनं श्रुत्वा मारुतिं प्राह रावणः । विनिर्जिता येन देवास्तस्य मे पौरुषं त्वया ॥१६८॥
न दृष्टं बल्गसे व्यर्थं शृणु किंचिद्वदामि ते । पंचाङ्गपाठकश्चायं पश्य ब्रह्मा कृतो मया ॥१६९॥
प्रतीहारस्त्वयं सूर्यः शशी छत्रधरः कृतः । वरुणोऽयं जलग्राही मार्जकः पवनस्त्विह ॥१७०॥
अग्निः कृतोऽयं रजको मालाकारः शचीपतिः । दंडपाणिर्यमश्चात्र दास्यश्चात्र सुरस्त्रियः ॥१७१॥
मार्तंडो नापितश्चायं गणपः खररक्षकः । मंगलाद्या ग्रहाः सप्त मे सोपानायितासने ॥१७२॥
शिशुसेवातत्परेण षष्ठी देवी मया कृता । आंदोलितश्च कैलासः कुबेरोऽपि विनिर्जितः ॥१७३॥
कथं ममाग्रे विलपस्यभीतवत्प्लवंगमानामधमोऽसि दुष्टधीः ।
क एष रामः कतमो वनेचरो निहन्मि सुग्रीवयुतं नराधमम् ॥१७४॥
इत्युक्त्वा हंतुमुद्युक्तस्तं दशास्यः सभास्थितः । तदा निवारयामास रावणं स विभीषणः ॥१७५॥
परदूतो न हन्तव्य इत्यादिवचनैस्तदा । ततः क्रोधसमाविष्टो रावणो लोकरावणः ॥१७६॥
दूतानाज्ञापयामास छेदनीयं तु लांगुलम् । तद्रावणवचः श्रुत्वा राक्षसास्ते सहस्रशः ॥१७७॥
स्वायुधैश्च्छेदयामासुः कुठारक्रकचादिभिः । आयुधान्येव शतशस्तत्पुच्छाघातमात्रतः ॥१७८॥
बभूवुः शतचूर्णानि तस्य रोम्णोऽपि न व्यथा । तन्निरीक्ष्य दशास्यः स मारुतिं वाक्यमब्रवीत् ॥१७९॥
न वीरा गोपयंत्यत्र स्वीयं मृत्युमपि क्वचित् । अतस्त्वं वद पुच्छस्य येन घातोऽद्य ते भवेत् ॥१८०॥

और नखों तथा दाँतोंसे लड़नेवाले वानर आकर लंकामें प्रवेश नहीं करते, उसके पहले ही तू सीताको ले जाकर रामको दे दे ॥ १६५ ॥ अब तुझे राम जीवित नहीं छोड़ेंगे । चाहे तेरी रक्षा सुरेंद्र करें, चाहे शंकर करें, चाहे तू अपना प्राण बचानेके लिये देवराजकी शरणमें जा । चाहे यमलोक या पातालल़ोकमें जाकर छिप, चाहे कुछ कर ले ॥ १६६ ॥ किन्तु उस दुष्ट रावणने हनुमान्‌की शुभ, हितकारी तथा पवित्र बातको नहीं माना । जैसे मुमूर्षु पुरुष औषधि नहीं खाता ॥ १६७ ॥ रावणने हनुमान्‌की बात सुनकर कहा कि मैंने सब देवताओंको जीत लिया है । मेरे पुरुषार्थको तू नहीं जानता । इसीलिये व्यर्थ बकवास कर रहा है । सुन, मैं तुझे कुछ सुनाता हूँ । देख, ब्रह्माको मैंने पञ्चाङ्गपाठक बना दिया है ॥ १६८ ॥ १६९ ॥ सूर्यको प्रतिहारी, चन्द्रमाको छत्रधारी, वरुणको जल भरनेवाला, पवनको झाड़ू लगानेवाला, अग्निको धोबी, शचीपति इंद्रको माली, दण्डधारी यमराजको द्वारपाल, देवताओंकी स्त्रियोंको दासियें, मार्तण्डको नाई, गणपतिको गधोंका रक्षक सईस और मंगल-बुध आदि सातों ग्रहोंको मैंने अपने आसनकी सीढ़ियें बना लिया है । षष्ठी देवी कात्यायनीको मैंने बच्चोंको खेलानेवाली धाई बनाया है । कैलासको मैंने ही हिलाया था । कुबेरको भी मैंने जीत लिया है ॥१७०-१७३॥ हे प्लवङ्गमोंमें अधम वानर ! तू मेरे आगे क्यों वृथा प्रलाप करता है ? तू बड़ा ही मूर्ख दीखता है । अरे ! वनवासी राम मेरे सामने क्या चीज है । मनुष्योंमें नीच रामको तो सुग्रीव सहित मैं मार ही डालूँगा ॥ १७४ ॥ इतना कहकर दशानन रावण बीच सभामें उनको मारने दौड़ा । तब विभीषणने उसको रोककर कहा कि दूसरेके दूतको मारना अन्याय है । पश्चात् लोगोंको रुलानेवाले रावणने क्रोध करके सिपाहियोंको आज्ञा दी कि इस वानरकी पूँछ काट डालो । रावणकी आज्ञा पाकर हजारों राक्षस अपने-अपने कुल्हाड़ों और क्रकच (आरा) आदि हथियारोंसे उनकी पूँछ काटने लगे । इसी समय हनुमान्‌जीने तनिक अपनी पूँछ हिला दी । उसके हिलनेमात्रसे उन हथियारोंके सैकड़ों टुकड़े होकर गिर पड़े ॥१७५-१७८॥ वे चूर-चूर हो गये, परन्तु हनुमानजीका बाल भी बाँका नहीं हुआ । यह देखकर दशानन मारुतिसे कहने लगा---॥ १७९ ॥ वीर पुरुष अपनी मृत्युके उपायको भी छिपाकर नहीं रखते । इसलिए साफ-साफ बता दे कि तेरी पूँछ किस उपायसे नष्ट होगी ॥१८०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदाऽमरत्वं स्वं प्राह कपिस्तच्च मृषेति सः । मत्वा दशास्यस्तं प्राह पुनः सत्यं वदेति च ॥१८१॥
तदा स मारुतिस्तूष्णीं क्षणं चित्ते व्यचिंतयत् । मत्पितुश्च सखा वह्निस्तस्मान्नास्ति भयं मम ॥१८२॥
तस्मात्पुच्छं दीपयित्वा लंकां दग्धां करोम्यहम्। ततस्तं रावणं प्राह मारुतिः सदसि स्थितः ॥१८३॥
पुच्छं मे वह्निना दग्धं भविष्यति न संशयः । तत्तस्य वचनं श्रुत्वा रावणो निजकिंकरान् ॥१८४॥
आज्ञापयामास पुच्छं दीपयित्वा प्रयत्नतः । लङ्कायां दर्शनीयोऽयं दृष्ट्वैनं मद्भयं भवेत् ॥१८५॥
सर्वेषां मद्रिपूणां च तथा चक्रुस्त्वरान्विताः । तैलाक्तैः शणपट्टैश्च राक्षसा वसनैरपि ॥१८६॥
पुच्छं संवेष्टयामासुस्तदा पुच्छं व्यवर्द्धत । ततो वसनहट्टात्तु वस्त्रकोशान्विलुण्ठ्य च ॥१८७॥
तत्पुच्छं वेष्टयामासुर्गृहवस्त्रैरनेकशः । ततः पुरुषनारीणां लंकास्थानां नृपाज्ञया ॥१८८॥
बलादाच्छिद्य वस्त्राणि चक्रुः सर्वान्दिगम्बरान्। ततः शय्यामंडपांश्च कंचुकीः कंचुकानपि ॥१८९॥
पौराणां राजगेहाच्च ते वस्त्राणि समानयन् । दृष्ट्वाऽपूर्तिं तु पुच्छस्य सभास्थानां नृपस्य च ॥१९०॥
वस्त्रमात्रैः समस्तैश्च लांगूलं वेष्टयंस्तदा । ध्वजोष्णीषपताकाभिर्विप्राणां वसनैरपि ॥१९१॥
मंदोदर्यादिवस्त्रैश्च भिक्षूणां वसनादिभिः । वेष्टयन्कपिलांगूलं ततः सीतां ययुश्चराः ॥१९२॥
तज्ज्ञात्वा मारुतिश्चापि पुच्छपूर्तिं अदर्शयत् । तदा कोलहलश्चासीद्वस्त्रार्थं प्रतिसद्मनि ॥१९३॥
तैलार्थं च घृतार्थं च स्नेहपाशं समानयन् । नासीन्निशायां दीपार्थं शिशूनामपि नो घृतम् ॥१९४॥
आसन्स्त्रीपुरुषा नग्ना लज्जा नासीत्परस्परम् । ततस्तद्दीपयामासुर्वह्निना भस्त्रकंपनैः ॥१९५॥
प्रदीप्तं नाभवत्पुच्छं ततो मारुतिरब्रवीत् । यदा स्वीयमुखेनायं लज्जमानोऽद्य रावणः ॥१९६॥
वह्निं प्रज्वालयेदत्र तदा ज्वाला भविष्यति । तन्मारुतिवचः श्रुत्वा ययावग्रे दशाननः ॥१९७॥
यावत्फूत्कारयामास तत्पुच्छानलमाननैः । तावत्तच्छिरजाः श्मश्रुकूर्चा दग्धा तदाऽभवन् ॥१९८॥

तिसपर जब हनुमान्ने अपनेको अमर बतलाया तो भी बातको सच न मानकर रावणने फिरसे कहा कि सच-सच बतला ॥ १८१ ॥ तब मारुति मनमें विचारने लगे कि अग्नि मेरे पिताके मित्र हैं। इसलिये मुझे डरनेकी कोई बात नहीं है ॥ १८२ ॥ इसलिए अपनी पूँछ जलवाकर मैं लङ्काको ही जला डालूँगा। यह विचारकर सभामें स्थित रावणसे हनुमान्ने कहा—॥ १८३ ॥ मेरी पूँछ अग्निसे जल सकती है, यह पक्की बात है। यह सुनकर रावणने अपने नौकरोंको बुलाकर आज्ञा दी कि प्रयत्नपूर्वक इसकी पूँछ जलाकर इसे नगरभरमें घुमाकर दिखला दो। जिससे कि समस्त शत्रुओंको मेरा डर लगने लगे। नौकरोंने भी वैसा ही किया और शीघ्र ही राक्षसोंने सन तथा वस्त्रोंको तेलमें भिगोकर पूँछपर लपेट दिया। वस्त्र जब कुछ कम पड़ गये, तब बाजारके गोदामोंसे कपड़े चुराकर घरके वस्त्र लाकर और रावणकी आज्ञासे उन्होंसे लंकाके नर-नारियोंके वस्त्र छीनकर हनुमान्की पूँछमें लपेटा। ऐसा करके उन्होंने सारे नगरके लोगोंको नंगा कर दिया। तथापि जब पूँछ नहीं ढँकी तो शय्याके मण्डप (मशहरी), कंचुकियोंके चोंगे, पुरवासियों तथा राजाके महलोंके वस्त्र लाकर लपेट दिये। तिसपर भी जब पूरा नहीं पड़ा तो सभासदों तथा राजाके वस्त्र लाकर लपेट दिये गये। ध्वजाएँ तथा पताकाएँ ला-लाकर लपेटी गयीं। रानी मन्दोदरी, साधु-महात्माओं तथा भिक्षुकोंके वस्त्र उतार-उतारकर लपेट दिये और सीताकी भी साड़ी उतारनेके लिए कुछ दूत दौड़े ॥ १८४–१९२ ॥ यह देखकर हनुमान्ने पूँछ बढ़ाना बन्द कर दिया। तब प्रत्येक घरमें तेल आदिके लिए कोलाहल होने लगा। वे दैत्य सबके यहाँका घी तथा तेल उठा लाये। यहाँ तक कि किसी घरमें दीपकके लिए तेल और बालकोंके लिए भी घी नहीं बच पाया ॥ १९३ ॥ १९४ ॥ समस्त स्त्री-पुरुषोंको लज्जा छोड़कर नङ्गा होना पड़ा। तब वे हनुमान्की पूँछ धौंकनीसे धौंककर अग्निके द्वारा जलाने लगे ॥ १९५ ॥ परन्तु अग्नि प्रदीप्त नहीं हुई। उस समय हनुमान्ने कहा कि यदि लज्जित रावण स्वयं अपने मुखसे फूँककर जलाये तो अग्नि जल सकती है। हनुमान्की बात सुनकर रावण तुरन्त आगे बढ़ा ॥ १९६ ॥ १९७ ॥ ज्यों ही उसने अपने मुखसे अग्निको फूँकना प्रारम्भ किया, त्यों ही उसके सिरके बाल तथा दाढ़ी-मूँछ जल गयी ॥१९८॥ रावण जब अपने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदा विंशद्भुजैः स्वीयमुखोपरि दशाननः । ताडयद्वह्निशांत्यर्थं जहसू राक्षसास्तदा ॥१९९॥
हास्यं चकार हनुमांस्तदा क्रुद्धः स रावणः । नीयतां मर्कटश्चायमिति दूतान्वचोऽब्रवीत् ॥२००॥
ततो दूताः कपिं निन्युर्लङ्कायां ते समंततः । शृंखलाभिर्दृढं बद्ध्वा भ्रामयामासुरादरात् ॥२०१॥
वाद्यघोषैर्दीर्घशब्दैर्वेष्टितं शस्त्रधारिभिः । एवं दिवा सर्वलङ्कां दृष्ट्वोड्डीय स मारुतिः ॥२०२॥
धृत्वाऽतिसूक्ष्मरूपं तु दृढबंधविनिर्गतः । यथास्थानं ब्रह्मणोऽस्त्रं तद्ययौ पूर्वमेव हि ॥२०३॥
ततः पश्चिमदिक्संस्थं लंकाद्वारं समानयत् । निष्कास्य तोरणं द्वाराज्जघान द्वाररक्षकान् ॥२०४॥
हत्वा स्वरक्षकांश्चापि प्रासादेषु समंततः । ददावग्निं स्वपुच्छेन लङ्कां दग्धां चकार सः ॥२०५॥

तदा कोलाहलश्चासील्लंकायाः प्रतिसद्मनि ।
निद्रितानपि बालाँश्च त्यक्त्वा नार्यो गृहाद्बहिः ॥२०६॥

दुद्रुवुः प्राणरक्षार्थं दग्धवस्त्रालकास्तदा । क्रमेण रावणादीनां प्रासादान् ज्वालयन् कपिः ॥२०७॥
तां रावणसभां दग्ध्वा जनान् पुच्छेन ताडयत् । अभवन् राक्षसा दग्धा मुखवाद्यानि चक्रिरे ॥२०८॥
तदा स रावणः क्रुद्धो राक्षसैर्दशकोटिभिः । ययौ योद्धुं मारुतिना तान् सर्वान् तोरणेन सः॥२०९॥
घातयामास पुच्छेन बद्ध्वा चैकत्र कोटिशः । तथैव लीलया पुच्छं रावणस्य च मस्तके ॥२१०॥
संताड्य तत्त्वचं दग्धामकरोन्मारुतिः क्षणात् । तत्पुच्छवह्निना दग्धो मूर्छितोऽभूद्दशाननः ॥२११॥
कपिः श्रीरामकीर्त्यर्थं रावणं न जघान सः । पतितं पितरं दृष्ट्वा दृष्ट्वा दग्धान्स्वराक्षसान् ॥२१२॥
आत्मनः प्राणरक्षार्थमिंद्रजिद्विवरं ययौ । कपिर्लक्ष्मणप्रीत्यर्थं मेघनादं जघान न ॥२१३॥
एवं सर्वान्विनिर्जित्य गोपुराट्टालमंडिताम् । दग्ध्वा लङ्कां सविस्तारां ययौ सागरमुत्तमम् ॥२१४॥

बीसों हाथोंसे आग बुझानेके लिए अपने मुखोंपर पटापट थप्पड़ मारने लगा। तब राक्षस जोरोंसे खिलखिलाकर हँस पड़े ॥ १९९ ॥ हनुमान् भी हँसने लगे। यह देखकर रावण बड़ा क्रुद्ध हुआ और आज्ञा दी कि इस दुष्ट वानरको पकड़ ले आओ ॥ २०० ॥ तब दूत लोग हनुमान्को बड़ी मजबूत साँकलोंसे बाँधकर ले गये और नगरमें चारों ओर घुमाया ॥ २०१ ॥ घुमाते समय उनके साथ बड़े बड़े बाजे बज रहे थे। बहुतसे बालक तथा शस्त्रधारी लोग उनको घेरे हुए थे। इस प्रकार दिनमें सारी लंका देखकर सायंकालके समय हनुमान् सूक्ष्म रूप धारण करके झटपट बन्धनमेंसे निकल गये और कूदकर दरवाजेपर जा चढ़े। उसके पूर्व ही ब्रह्मपाश भी अपने स्थानपर लौट गया ॥ २०२ ॥ २०३ ॥ वहांसे चलकर वे पश्चिमी द्वारपर आये। वहाँ फाटकका खम्भा उखाड़कर उससे समस्त द्वारपालोंको मार डाला ॥ २०४ ॥ अनेक रक्षक राक्षसोंको भी मार गिराया और अपनी पूँछकी अग्निसे सब महलोंमें आग लगाकर सारी लंकाको जला दिया ॥ २०५ ॥ उस समय लंकाके प्रत्येक घरमें बड़ा भारी कोलाहल होने लगा। स्त्रियें अपने बालकोंको सोते हुए छोड़कर ही घरोंसे बाहर निकल पड़ीं ॥ २०६ ॥ उनके वस्त्रों तथा बालोंमें आग लगी हुई थी और वे अपने प्राण बचानेके लिए इधर-उधर भागने लगीं। हनुमान्ने क्रमशः आगे जाकर रावणके महलोंमें भी आग लगा दी ॥ २०७ ॥ रावणकी सभाको जलाकर वहाँके राक्षसोंको अपनी पूँछसे खूब पीटा और सब राक्षस जलने तथा अनेक प्रकारके शब्द करके चिल्लाने लगे ॥ २०८ ॥ तब रावण क्रुद्ध हो दस करोड़ रासक्षोंको साथ लेकर हनुमान्से लड़नेके लिए गया। हनुमान्ने उन सबको उसी लोहेके खंभेसे मार डाला और करोड़ोंको एक साथ पूँछमें बाँधकर लीलापूर्वक रावणके सिरपर दे मारा ॥ २०९ ॥ २१० ॥ इस प्रकार मारनेसे उसकी चमड़ी क्षणभरमें जल उठी। उनकी पूँछकी अग्निसे जलकर दशानन मूर्छित हो गया ॥ २११ ॥ परन्तु हनुमान्ने यह सोचकर उसको जानसे नहीं मारा कि यदि रामके हाथसे मारा जायगा तो उनका यश बढ़ेगा। पिताको गिरा हुआ तथा अपने राक्षसोंको जलते देख इन्द्रजीत मेघनाद अपने प्राणोंकी रक्षाके लिए एक गुफामें घुस गया। हनुमान्ने लक्ष्मणकी प्रसन्नताके लिए उसको भी जीवित छोड़ दिया—मारा नहीं ॥ २१२ ॥ २१३ ॥ इस तरह सबको जीत तथा गोपुर और अटारियोंसे मंडित विस्तृत लंकाको जलाकर हनुमान् उत्तम

CC-0. In Public Domain. Krishan Sharma, Najafgarh, Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तटे पुच्छं स्थापयित्वा जलजान् रक्षयन् कपिः । तत्तरंगैः शीतलं स्वं कृत्वा लांगूलमुत्तमम् ॥२१५॥
निजकण्ठाच्च धूम्रेण श्लेष्माणं सागरेऽक्षिपत् ।ततः कपिः क्षणं तूष्णीं स्थित्वा सीतां विचिन्त्य च२१६
ताडयामास हृदये मत्वा दग्धां विदेहजाम् । आत्मानं गर्हयामास स्थित्वा सागररोधसि ॥२१७॥
धिग्धिङ्मां वानरं मूढं स्वामिपत्न्याश्च दाहकम् । निश्चयेन मया दग्धा जानकी रामतोषदा ॥२१८॥
न विचारः कृतः पूर्वं लङ्कादाहेऽविवेकिना । आत्मघातं करोम्यद्य पुच्छबंधेन चात्र वै ॥२१९॥
किं रामायेदृशं स्वास्यं दर्शयेऽद्य विगर्हितम् । रामस्तु श्रुत्वा सीताया वृत्तं शीघ्रं मरिष्यति ॥२२०॥
तद्दुःखेन स सौमित्रिर्मरिष्यति न संशयः । तयोर्दुःखेन सुग्रीवस्तदर्थं सा च वै रुमा ॥२२१॥
तं श्रुत्वा सोऽङ्गदश्चापि मरिष्यत्यतिलालितः । ताराऽपि पुत्रशोकेन नृपे नष्टेऽथ वानराः ॥२२२॥
प्राप्ते पंचदशे वर्षे भरतोऽपि मरिष्यति । रामदुःखेन कौसल्या सुमित्रा पुत्रदुःखतः ॥२२३॥
तथा सा कैकेयी दुष्टा सर्वानर्थकरी तु या । शत्रुघ्नो बंधुदुःखेन रामार्थं मुनयश्च ते ॥२२४॥
राघवा रामभक्ताश्च मंत्रिणः सुहृदस्तथा । सीतापितुः कुलं सर्वं कौसल्याः पितुः कुलम् ॥२२५॥
सुमित्रायाश्च कैकेय्यास्तेषां संबंधिनस्तथा । नष्टे राजकुले जाते प्रजा स्वेच्छानुवर्तिनी ॥२२६॥
मरिष्यति न संदेहस्ततः स्थावरजंगमम् । भूमिस्थाः प्राणिनः सर्वे यदा नष्टास्तदा दिवि॥२२७॥
हव्यकव्यविहीनास्ते देवा नाशं गता इव । अकाले प्रलयं दृष्ट्वा नष्टां सृष्टिं स्वनिर्मिताम् ॥२२८॥
पश्चात्तापेन धाताऽपि मरिष्यति न संशयः । एवं क्रमेण ब्रह्मांडं नश्यत्येव न संशयः ॥२२९॥
एतद्घातनिमित्तोऽहं विधिना निर्मितः पुरा । इत्युक्त्वाथ खेदेन देहत्यागार्थमुद्यतम् ॥२३०॥
दृष्ट्वा साऽऽकाशजा वाणी बभूव बहुहर्षदा । मा कुरुष्व कपे खेदं न दग्धा जानकी शुभा ॥२३१॥

सागरके किनारे गये ॥ २१४ ॥ वहाँ लम्बी पूछके बड़े भागको किनारेपर रखकर जलजन्तुओंको बचाते हुए हनुमान्ने समुद्रकी तरङ्गोंसे अपनी दीर्घ तथा उत्तम पूछको शीतल किया ॥ २१५ ॥ वहाँ उन्होंने धुएँसे गलेमें जमे कफका भी त्याग किया। तदनन्तर वे क्षणभर शान्त रहे। बादमें वे सीताको सोच तथा उनको जल गयी समझकर जोर-जोरसे छाती पीटने लगे । समुद्रतटपर खड़े होकर उन्होंने अपनी निन्दा की ॥ २१६ ॥ २१७ ॥ स्वामीकी स्त्री सीताको जलानेवाले मुझ सरीखे मूर्ख वानरको बारम्बार धिक्कार है। रामको संतोष देनेवाली जानकीको मैंने धोखेमें जला दिया ॥ २१८ ॥ अविवेकी मैंने लङ्का जलानेसे पहिले यह विचार नहीं किया । अब मैं गलेमें पूछ बाँधकर आत्मघात कर लूँगा ॥ २१९ ॥ मैं अब अपने इस निन्दित मुखको कैसे दिखाऊँगा। राम सीताका यह हाल सुनते ही प्राण त्याग देंगे ॥ २२० ॥ उनके दुःखसे दुःखित सुमित्रापुत्र लक्ष्मण भी अवश्य मर जायँगे। उन दानोंके दुःखसे सुग्रीव और सुग्रीवके दुःखसे उनको स्त्री रुमा भी प्राण त्याग देगी ॥ २२१ ॥ यह समाचार सुननेके साथ ही अत्यन्त प्यारसे पला हुआ अंगद भी प्राण छोड़ देगा। तब पुत्रशोकसे तारा और राजाके वियोगसे सब वानर भी प्राण दे देंगे ॥ २२२ ॥ पन्द्रह वर्ष बीत जानेपर भरत भी मर जायँगे। रामके वियोगसे कौसल्या, पुत्रवियोगसे सुमित्रा तथा भरतके वियोगसे वह अनर्थकारिणी तथा दुष्टा कैकेयी भी मर जायगी। भाईके दुःखसे शत्रुघ्न, रामके दुःखसे मुनिलोग एवं रघुवंशी रामके भक्त मन्त्रिजन तथा मित्रवर्ग भी प्राण दे देंगे। सीताके पिता जनकका कुल, कौसल्याके पिताका कुल, सुमित्राके पिताका कुल, कैकेयीके पिताका कुल तथा उनके भी सगे-सम्बन्धी लोग प्राण त्याग देंगे। राजकुल नष्ट हो जानेपर प्रजा स्वेच्छाचारिणी हो जायगी ॥ २२३–२२६ ॥ तब वह निःसन्देह स्थावर-जङ्गम सभी प्राणियोंका नाश करने लगेगी। जब पृथ्वीपर सब प्राणी मार डाले जायँगे। तब स्वर्गलोकवासी देवता और पितर भी हव्य-कव्यसे वंचित होकर मृतक सरीखे हो जायँगे। असमयका प्रलय तथा अपनी रची सृष्टिका विनाश देखकर पश्चात्तापसे निःसन्देह विधाता भी मर जायगा। इस प्रकार क्रमशः समस्त ब्रह्माण्ड ही नष्ट हो जायगा। इसमें सन्देह नहीं है ॥ २२७–२२९ ॥ ब्रह्माजीने इनके विनाशका कारण मुझे ही बनाया। हनुमान् ऐसा खेदपूर्वक कहने लगे और मरनेके लिए उद्यत हो गये ॥ २३० ॥ उसी समय यह आनन्ददायिनी आकाशवाणी हुई कि हे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मानं दर्शयित्वा तां शीघ्रं गच्छ रघूद्वहम् । तां वाणीं हनुमाञ्छ्रुत्वा बभूव हर्षपूरितः ॥२३२॥
द्रुतं तां जानकीं द्रष्टुमशोकवनिकां ययौ । तावद्ददर्श लंकायां सुवर्णवेष्टितां भुवम् ॥२३३॥
तत्कारणं वदाम्यद्य तच्छृणुष्व गिरींद्रजे । आसीद्गिरिवरो देवि त्रिकूट इति विश्रुतः ॥२३४॥
क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः । तावता विस्तृतः पर्यक् त्रिभिः शृंगैः पयोनिधिम् २३५
दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः । तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥२३६॥
उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् । तस्मिन्सरः सुविपुलं लसत्कांचनपंकजम् ॥२३७॥
कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितम् । नैतत्कृतघ्नाः पश्यंति न नृशंसा न नास्तिकाः॥२३८॥
तस्मिन्सरसि दुष्टात्मा विरूपोऽन्तर्जलाशयः । आसीद्ग्राहो गजेन्द्राणां दुराधर्षो महाबलः ॥२३९॥
अथ दंतोज्ज्वलमुखः कदाचिद्गजयूथपः । आजगाम तृषाक्रांतः करेणुपरिवारितः ॥२४०॥
तृषितः पानकामोऽयमवतीर्णश्च तत् सरः । पिबतस्तस्य तत्तोयं ग्राहस्तमुपपद्यत ॥२४१॥
सुलीनः पंकजवृते यूथमध्यगतः करी । गृहीतस्तेन रौद्रेण ग्राहणातिबलीयसा ॥
गजो ह्याकर्षते तीरं ग्राह आकर्षते जलम् ॥२४२॥
पश्यंतीनां करेणूनां क्रोशंतीनां सुदारुणम् । नीयते पंकजवने ग्राहेणाव्यक्तमूर्तिना ॥२४३॥
तथाऽऽतुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ।
विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ॥२४४॥
तयोर्युद्धमभूद्घोरं दिव्यवर्षसहस्रकम् । वारुणैः संयतः पाशैर्निष्प्रयत्नगतिः कृतः ॥२४५॥
वेष्टयमानः सुघोरैस्तु पाशैर्नागैदृढैस्तथा । विस्फूर्जितमहाशक्तिर्विक्रोशश्च महारवान् ॥२४६॥

कपिश्रेष्ठ ! खेद न करो। कल्याणकारिणी जानकीजी नहीं जली हैं॥ २३१॥ उनसे मिलकर तुम शीघ्र रघूद्वह रामके पास जाओ। उस गगनवाणीको सुनकर हनुमान् बहुत प्रसन्न हुए॥ २३२॥ वे जानकीको देखनेके लिए शीघ्र अशोकवनमें गये। वहाँ जाकर हनुमान्‌ने कुछ सुवर्णवेष्टित धरती देखी॥ २३३॥ हे गिरीन्द्रजे! उसका कारण मैं बताता हूँ, सुनो-हे देवि! त्रिकूट नामसे प्रसिद्ध एक श्रेष्ठ पर्वत था॥ २३४॥ वह चारों ओर क्षीरसागरसे घिरा हुआ सुन्दर शोभायुक्त तथा दस हजार योजन ऊँचा था। वह उतना ही गोलाईमें भी था। वह चाँदी, लोहे और सोनेके तीन शिखरोंसे दसों दिशाओं तथा आकाशको व्याप्त किये हुए था। उसके एक भागमें महात्मा भगवान् वरुणका ऋतुमान् नामक देवस्त्रियोंका क्रीड़ास्थान एवं उद्यान था। उसमें विशाल सुवर्णकमलोंसे सुशोभित एक तालाब था॥ २३५-२३७॥ जो कि कुँइयाँ, लाल कमल, श्वेत कमल तथा आतपत्र जैसे कमलोंसे अतीव सुन्दर प्रतीत होता था। उनको कृतघ्न, क्रूर और नास्तिक लोग नहीं देख सकते थे॥ २३८॥ उसी जलाशयमें छिपा हुआ महाबलवान्, बड़ी कठिनाईसे पकड़ा जानेवाला तथा गजेन्द्रोंको भी ग्रस लेनेवाला एक दुष्ट मगरमच्छ रहता था॥ २३९॥ किसी समय श्वेत दाँत तथा श्वेत मुखवाला गजोंमें मुख्य एक गजराज प्याससे व्याकुल होकर हथिनियोंसे घिरा हुआ वहाँ आया॥ २४०॥ वह पानी पीनेकी इच्छासे ज्यों ही पानीमें उतरा और पानी पीने लगा, त्यों ही ग्राह उसके पास जा पहुँचा॥ २४१॥ कमलवनसे ढँके तथा हाथियोंके झुण्डके बीचमें स्थित उस हाथीको उस भयानक तथा अति बलवान् ग्राहने पकड़ लिया॥ २४२॥ अब वह हाथी ग्राहको तीरकी ओर खींचने लगा। उसके साथकी हथिनियाँ देखती और दुःखसे चिल्लाती ही रह गईं और जलमें छिपा हुआ ग्राह हाथीको कमलके वनमें दूर खींच ले गया॥२४३॥ जब घबराये हुए उस यूथपति गजको ग्राह बलपूर्वक वेगसे जलमें खींच रहा था, तब हथिनियें मलीन मुखसे क्रन्दन करने लगीं और दूसरे तथा पीछे रहनेवाले हाथी दीन होकर चिल्लाने लगे, पर कोई उसे बचा नहीं सका॥ २४४॥ उस गज तथा ग्राह दोनोंमें देवताओंके हजार वर्ष तक घोर युद्ध होता रहा। अन्तमें गजराज जैसे वरुणपाश तथा अति भयानक एवं दृढ़ नागपाशमें बँधकर सर्वथा असमर्थ हो गया। तब उज्ज्वल वर्ण तथा महाशक्तिसम्पन्न होता हुआ भी वह गजराज चिल्लाने तथा महान् चीत्कार

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यथितः स निरुत्साहो गृहीतो घोरकर्मणा। परामापदमापन्नो मनसाऽचिंतयद्धरिम् ॥२४७॥
एकाग्रो निगृहीतात्मा विशुद्धेनांतरात्मना। प्रगृह्य पुष्कराग्रेण कांचनं कमलोत्तमम् ॥२४८॥
नैवेद्यं मनसा ध्यात्वा पूजयित्वा जनार्दनम्। आपद्विमोक्षमन्विच्छन्गजः स्तोत्रमुदीरयत् ॥२४९॥
तत्कृतेन स्तवेनैव सुप्रीतः परमेश्वरः। आरुह्य गरुडं विष्णुराजगाम सुरोत्तमः ॥२५०॥
ग्राहग्रस्तं गजेन्द्रं च तं ग्राहं च जलाशयात्। उज्जहाराप्रमेयात्मा तरसा मधुसूदनः ॥२५१॥
जलस्थं दारयामास नक्रं चक्रेण माधवः। मोचयामास नागेंद्रं पाशेभ्यः शरणागतम् ॥२५२॥
आसीद्गजः पुरा पांड्य इन्द्रद्युम्न इति श्रुतः। एकदा स तपोनिष्ठो बभूव ध्यानतत्परः ॥२५३॥
यदृच्छया ययौ तत्र कुम्भजन्मा नृपांतिकम्। ध्यानस्थः स नृपो नैव मुनिं वेद समागतम् ॥२५४॥
ददौ शापं मुनिर्भूपं दृष्ट्वात्मानं तु नोत्थितम्। तपोमदेनसंभ्रांतस्त्वं यस्मान्नोत्थितोऽसि माम् २५५॥
अतो भव गजो भ्रांतो मदेन विपिनेऽचिरात्। तं श्रुत्वा नृपतिः शापं तं प्रणम्य पुनः पुनः ॥२५६॥
विशापं प्रार्थयामास मुनिः प्राह हरेः करात्। भविष्यति विमुक्तिस्ते यदा ग्राहो धरिष्यति ॥२५७॥
पुरा तदैव गंधर्वस्त्वप्सरोगणसेवितः। सरस्यस्मिञ्जलक्रीडां कर्तुं हूहूः समागतः ॥२५८॥
सरस्यघमर्षणार्थं तं दृष्ट्वा स देवलं चिरम्। संस्थितं च बहिः कर्तुं गन्धर्वः स व्यचिंतयत् ॥२५९॥
स्वयं भूत्वा जले लीनस्तत्पादौ स्वकरेण हि। दृढं धृत्वा कर्षयंतं ज्ञात्वा तमशपन्मुनिः ॥२६०॥
ग्राहवन्मे धृतौ पादौ तस्माद्ग्राहो भवात्र वै। तेन संप्रार्थितः प्राह हरिस्त्वामुद्धरिष्यति ॥२६१॥
एवं तौ पूर्वशापेन पतितावतिसंकटे। हरिरुद्धृत्य तौ ताभ्यां ययौ स्त्रीयस्थलं पुनः॥२६२॥

करने लगा ॥ २४५ ॥ २४६ ॥ उस घोर पराक्रमी ग्राहसे ग्रस्त होकर गजराज दुःखी और निरुत्साह हो गया। उस समय इस प्रकारकी परम विपत्तिको प्राप्त होकर वह श्रीहरिका चिन्तन करने लगा ॥ २४७ ॥ तदनन्तर इन्द्रियोंका निग्रह करके उसने एकाग्र मन तथा शुद्ध अन्तःकरणसे सुवर्णके समान उत्तम एक कमलपुष्प सूँड़के अग्रभागसे पकड़कर शान्त भावसे मन ही मन जनार्दन भगवान्‌का आवाहन, पूजन, ध्यान तथा नैवेद्य अर्पण करके विपत्तिसे छुटकारा पानेके हेतु स्तोत्रपाठ किया ॥ २४८ ॥ २४९ ॥ उसकी स्तुतिसे प्रसन्न परमेश्वर सुरोत्तम भगवान् विष्णु स्वयं गरुड़पर सवार होकर वहाँ आये ॥ २५० ॥ उन अप्रमेय आत्मा मधुसूदन भगवान्‌ने उस ग्राह तथा गजेन्द्रको जलसे शीघ्र ही बाहर निकाला ॥ २५१ ॥ उन्होंने जलमें रहनेवाले ग्राहको अपने चक्रसे मार डाला और शरणागत गजराजको पाशोंसे छुड़ा दिया ॥ २५२ ॥ वह हाथी पूर्व जन्ममें पांड्यवंशी इन्द्रद्युम्न नामका राजा था। एक बार उसने ध्यान धरके तप करना आरम्भ किया ॥ २५३ ॥ जब वह तप कर रहा था, तभी उसके पास अगस्त्य मुनि एकाएक जा पहुँचे। ध्यानमें स्थित राजाको मुनिके आनेका कुछ पता न था। २५४ ॥ मुनिने अपने आनेपर राजाको खड़े होते न देखकर शाप दे दिया कि तपके घमण्डसे मेरे आनेपर भी तुम खड़े नहीं हुए ॥ २५५ ॥ इसलिए शीघ्र ही तुम वनमें मदोन्मत्त हाथी हो जाओ। यह सुनकर राजा इन्द्रद्युम्न बारम्बार मुनिको प्रणाम करके शापसे मुक्त करनेकी प्रार्थना करने लगा। तब मुनिने कहा कि तुमको ग्राह (मगरमच्छ) पकड़ेगा, तब प्रभुके हाथसे तुम्हारी मुक्ति होगी ॥ २५६ ॥ २५७ ॥ उन्हीं दिनों हूहू नामक गन्धर्व विशिष्ट अप्सराओंको साथ लेकर उस तालाबमें जलक्रीड़ा करनेके लिए आया ॥ २५८ ॥ उसने देखा कि उस सरोवरके जलमें खड़े होकर देवल मुनि बहुत देरसे अघमर्षण अर्थात् सम्पूर्ण पापोंको नष्ट करनेवाले मन्त्रका जप कर रहे हैं और अभी बाहर निकलना नहीं चाहते। तब वह उनको बाहर निकालनेका उपाय सोचने लगा ॥ २५९ ॥ तदनन्तर स्वयं जलमें डुबकी मारकर वह अपने हाथसे उनके पाँवोंको पकड़कर खींचने लगा। यह देखकर मुनि उसको पहिचान गये और शाप दिया—॥ २६० ॥ तूने ग्राहकी तरह मेरे पावँ पकड़े हैं, इसलिए तू यहाँपर मगरमच्छ बनेगा। पुनः गन्धर्वके प्रार्थना करनेपर मुनिने कहा कि श्रीहरि तेरा इस शापसे उद्धार करेंगे ॥ २६१ ॥ इस प्रकार पूर्व जन्ममें प्राप्त शापके कारण अतिशय भीषण संकटमें पड़े हुए उन गज-ग्राहका भगवानने उद्धार

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षुधितेनाथ तार्क्ष्येण प्रार्थितः प्राह तं हरिः । गच्छ भक्षस्व पतिते गजग्राहकलेवरे ॥२६३।
ययौ तार्क्ष्यः सरः पुण्यं तावद्भ्रूभंगगृध्रराट् । कलेवरांतिकं प्राप्तस्तं निहत्य खगेश्वरः ॥२६४॥
पदेनैकेन भ्रूभंगमपरेण कलेवरे । धृत्वा तार्क्ष्यः शुद्धदेशं भक्षणार्थमपश्यत् ॥२६५॥
तावत्क्षीरार्णवे जांबूनदवृक्षं समीक्ष्य सः । आयामविस्तरोच्चैस्तु सहस्रयोजन शुभम् ॥२६६॥
तच्छाखायां विशालायां यावत्तस्थौ स पक्षिराट । तावद्बभंज तच्छाखा बालखिल्यैरधोमुखैः ॥२६७॥
तपद्भिः षष्टिसाहस्रैश्चिरकालं समाश्रिताः । तांस्तादृशान्विलोक्याथ तच्छापभयशंकितः ॥२६८॥
धृत्वा स्वचंचुना शाखां बभ्राम गगने पुनः । ततो दृष्ट्वा कश्यपं स्वतातं नत्वा व्यजिज्ञपत् ॥२६९॥
वद शुद्धां भुवं मेऽद्य कुर्वेऽहं यत्र भोजनम् । तदा तं कश्यपः प्राह शतयोजनसागरे ॥२७०॥
लंकानाम्नी शुद्धभूमिस्तत्र त्वं कुरु भोजनम् । तत्पितुर्वचनाल्लङ्कां ययौ तार्क्ष्यः क्षणेन सः ॥२७१॥
प्रोच्चयोः पक्षयोः शाखां स्थाप्य तान्भक्षयन्मुदा । तत्त्यक्तैरस्थिभिस्तत्र शृंगाणि त्रीणि चाभवन् ॥२७२॥
त्रिकूट इति नाम्ना स लङ्कायां गिरिराडभूत् । तेषु शृंगेषु तां शाखां तार्क्ष्यः संस्थाप्य संययौ ॥२७३॥
वालखिल्यास्तपोऽन्ते ते ययुर्विष्णोः परं पदम् । आसीच्छाखाऽन्तराले सा लङ्कायां शृंगमूर्द्धसु ॥२७४॥
ग्रावभूतां शैवलेन न विदुस्तां तु राक्षसाः । लङ्काऽग्निना द्रवीभूता मर्दयन्ती क्षपाचरान् ॥ ७५॥
पपात तद्रसेनासील्लङ्काभूमिर्हिरण्मयी । तां दृष्ट्वा चकितो वेगाद्वने सीतां ययौ कपिः ॥२७६॥
दृष्ट्वाऽशोके पुनः सीतां तामाह कपिकुञ्जरः । मत्स्कन्धसंस्थिता रामम् अद्य पश्यसि जानकि ॥२७७।
सा प्राह मोचितामन्यैर्मां रामो न सहिष्यति । नीत्वा पुनर्मुद्रिकां त्वं राघवाय समर्पय ॥२७८॥

किया और दोनोंको साथ लेकर अपने धाम पधारे ॥२६२॥ तदनन्तर भूखे गरुडने श्रीहरिसे आहारकी प्रार्थना की । श्रीहरिने कहा कि जाओ, सरोवरके तटपर पड़े हुए गज-ग्राहके शरीरको खा लो ॥ २६३ ॥ गरुड़ वहां गये तो उन कलेवरोंके पास भ्रूभङ्ग नामके एक गृध्रराजको देखा । देखते ही पक्षियोंके ईश गरुड़ने उसे मार डाला ॥ २६४ ॥ तत्पश्चात् एक टाँगसे भ्रूभङ्गको तथा दूसरी टाँगसे गज-ग्राहके शरीरोंको पकड़कर उन्हें खानेके लिए कोई शुद्ध स्थान खोजने लगे ॥ २६५ ॥ इतनेमें गरुड़को क्षीरसागरमें एक जाम्बूनद (सुवर्ण) का वृक्ष दिखायी दिया । वह लम्बाई-चौड़ाई तथा ऊँचाईमें हजार योजन परिमाणवाला था और देखनेमें बड़ा ही सुन्दर लगता था ॥२६६॥ पक्षिराज गरुड़ जाकर ज्यों ही उसकी एक शाखापर बैठे, तैसे ही उसकी वह शाखा टूट पड़ी। उसके टूटनेसे उसपर बहुत कालसे रहनेवाले साठ हजार बालखिल्य ऋषि अधोमुख होकर गिरने लगे । उनकी यह दशा देखकर पक्षिराज गरुड़के मनमें ऋषियोंके शापकी शंका समा गयी ॥ २६७ ॥ २६८ ॥ अतएव उस शाखाको चोंचमें पकड़कर वे आकाशमें फिर भ्रमण करने लगे । तभी उन्हें अपने पिता कश्यप दिखायीं पड़े । तब नमस्कार करके उनसे निवेदन किया-॥ २६९ ॥ आप कोई ऐसी पवित्र जगह बतलाएँ, जहाँ मैं भोजन कर सकूँ । तब कश्यपने कहा कि सौ योजन विस्तृत लंका नामकी विशुद्ध भूमि है, वहाँ जाकर तुम भोजन कर सकते हो । अपने पिताकी बात अङ्गीकार करके गरुड़ क्षणभरमें लङ्का जा पहुँचे ॥ २७० ॥ ॥ २७१ ॥ वालखिल्य ऋषियों सहित शाखाको अपनी ऊँची पाँखोंपर धरे हुए वे आनन्दसे उन मृत शरीरों-को खाने लगे, जिन्हें पाँवोंसे पकड़ लाये थे । उन गज-ग्राह तथा गीधके शरीरसे निकली हुई हड्डियोंसे वहाँ तीन बड़े भारी शिखर खड़े हो गये ॥ २७२॥ उन तीनोंका लङ्कामें पर्वतराज त्रिकूट नाम पड़ गया । गरुडने उन्हीं शिखरोंपर उस शाखाको रख दिया और चले गये ॥ २७३ ॥ वहींपर तपस्या पूरी करके वे बालखिल्य ऋषि विष्णुके परम पदको प्राप्त हो गये । लंकामें उन शिखरोंके मध्यमें स्थित शाखा पाषाणके समान हो गयी थी । इसी कारण राक्षस लोग उसे नहीं पहचान पाये थे । जब हनुमान्‌ने लङ्काको अग्निसे जलाया, तब वह द्रवित होकर राक्षसोंका मर्दन करती हुई गिर पड़ी । उसके रससे लंकाकी भूमि सुवर्णमयी हो गयी । यह लीला देखकर हनुमान् चकित हो गये और शीघ्र ही सीताके समीप आये ॥ २७४-२७६ ॥ अशोकवनमें सीताको पूर्ववत् स्थित देखकर कपिकुञ्जर हनुमान् सीतासे बोले-हे जानकी ! आप मेरे कन्धे-

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्त्वा तत्करे सीता ददौ श्रीराममुद्रिकाम् । ततस्तां मारुतिः पृष्ट्वा नत्वां शीघ्रं ययौ पुनः ॥२७९॥
आरुरोह सुबेलाद्रिं चूर्णं तमकरोद्गिरिम् । एतस्मिन्नतरे ब्रह्मा ददौ पत्रं सविस्तरम् ॥२८०॥
यद्यत्कृतं मारुतिना लंकायां तस्य सूचकम् । तद्गृह्य मारुतिर्वेगान्नत्वा पृष्ट्वा विधिं पुनः ॥२८१॥
तत उड्डीय वेगेन ययावाकाशवर्त्मना । कुर्वन् शब्दं महाघोरं कपीनामूर्ध्वतस्तदा ॥२८२॥
उदग्दिश्यंतरा किंचित्पपात भुवि मारुतिः । ततो दृष्ट्वा कपींस्तत्र दृष्ट्वैकं मुनिसत्तमम् ॥२८३॥
किंचिद्गर्वसमाविष्टस्तं मुनिं प्राह मारुतिः । मया श्रीरामकार्यं तु कृतमस्ति मुनीश्वर ॥२८४॥
पानीयं पातुमिच्छामि दर्शयस्व जलाशयम् । तर्जन्या दर्शयामास मुनिस्तस्मै जलाशयम् ॥२८५॥
ततः स मारुतिर्मुद्रां मणिं पत्रं मुनेः पुरः । संस्थाप्य नीरं पातुं वै ययौ कासारमुत्तमम् ॥२८६॥
ततस्तत्र कपिः कश्चिन्मुद्रिकां मुनिसंनिधौ । कमंडलौ प्राक्षिपत्स ययौ तावच्च मारुतिः ॥२८७॥
गृहीत्वा तं मणिं पत्रं मुनिं पप्रच्छ मुद्रिकाम् । मुनिर्भ्रूसंज्ञया तस्मै कमंडलुमदर्शयत् ॥२८८॥
ततः कमंडलौ तूर्णीं मुद्रिकामवलोकयत् । तावद्दर्शाञ्जनेयस्तस्मिन् श्रीराममुद्रिकाः ॥२८९॥
दृष्ट्वा सहस्रशस्तत्र चकितः प्राह तं मुनिम् । कुतस्त्विमा मुद्रिकाश्च वद का मम मुद्रिका ॥२९०॥
एतासु त्वं मुनिश्रेष्ठ तदा तं मुनिरब्रवीत् । यदा यदा वायुपुत्रः सीतां तां राघवाज्ञया ॥२९१॥
लंकां गत्वा समानीता शुद्धिमुद्रास्तदा तदा । मदग्रे स्थापितास्ताश्च कपिभिश्च कमंडलौ ॥२९२॥
निक्षिप्तास्तास्त्विमाः सर्वा पश्यैतासु स्वमुद्रिकाम् । तन्मुनेर्वचनं श्रुत्वा गतगर्वस्तमब्रवीत् ॥२९३॥
कियंतो राघवाश्चात्र समायाता मुनीश्वर । मुनिस्तं प्राह निष्कास्य गणयस्वाद्य मुद्रिकाम् ॥२९४॥

पर सवार हो जायँ, तो मैं आपको ले चलकर आज ही रामका दर्शन करा दूँ ॥ २७७ ॥ जानकीने कहा—मुझे दूसरा कोई छुड़ाकर ले जाय, इस बातको भगवान राम सहन नहीं कर सकेंगे। इसलिए तुम इस अंगूठीको ले जाकर रामको दे दो ॥ २७८ ॥ इतना कहकर सीताजीने हनुमानके हाथोंमें वह मुद्रिका दे दी। तब हनुमानजी सीताकी आज्ञा ले तथा नमस्कार करके शीघ्र ही लौट पड़े ॥ २७९ ॥ उन्होंने समुद्रके किनारे-वाले पर्वतपर चढ़कर उसे चूर्ण कर डाला। उस समय ब्रह्माजीने विस्तारपूर्वक एक पत्र लिखकर उन्हें दिया ॥ २८० ॥ जिसमें यह लिखा था कि लंकामें जाकर मारुतिने क्या-क्या काम किया है। उसको लेकर ब्रह्माकी आज्ञा ले तथा उन्हें नमस्कार करके हनुमान् पुनः वहाँसे उड़कर आकाशमार्गसे घोर तथा महान् वानरोंकी तरह शब्द करते हुए जोरोंसे चल पड़े ॥ २८१ ॥ २८२ ॥ उत्तर दिशाकी ओर कुछ दूर आगे जाकर नीचे उतरे तो वहाँ उन्होंने एक मुनिको विराजमान देखा ॥ २८३ ॥ तब कुछ गर्वसे मारुतिने कहा—हे मुनीश्वर! मैं श्रीरामका काम करके आ रहा हूँ ॥ २८४ ॥ यहाँ मैं पानी पीनेकी इच्छासे आया हूँ। मुझे कोई जलाशय बतलाइये। तब मुनिने उन्हें तर्जनी अँगुलीसे जलाशय बतला दिया ॥ २८५ ॥ तदनन्तर हनुमान् अंगूठी, चूडामणि तथा पत्र मुनिके पास रखकर उस उत्तम तालाबकी ओर जल पीने गये ॥ २८६ ॥ इतनेमें किसी बन्दरने आकर रामकी मुद्रिकाको मुनिके पास रक्खे कमण्डलुमें डाल दिया। उधरसे हनुमान्जी भी आ पहुँचे ॥ २८७ ॥ चूड़ामणि तथा पत्रके विषयमें उन्होंने मुनिसे पूछा कि मुद्रिका कहाँ गयी? मुनिने भौंहोंके संकेतसे कमण्डलु दिखाया ॥ २८८ ॥ जब हनुमान्ने कमण्डलुमें देखा तो उसमें श्रीरामकी हजारों मुद्रिकाएँ दिखायी दीं। तब हनुमान्ने आश्चर्यचकित होकर मुनिसे पूछा कि इतनी अंगूठियें कहाँसे आयीं, सो बताइए ॥ २८९ ॥ २९० ॥ हे मुनिश्रेष्ठ! आप यह भी कहिये कि इनमेंसे मेरी मुद्रिका कौन-सी है? मुनिने उत्तर दिया कि जब-जब श्रीरामकी आज्ञासे हनुमान्ने लंकामें जाकर सीताका पता लगाया है और अंगूठियें मेरे सामने रक्खी हैं, तब-तब बन्दरोंने उन्हें इस कमण्डलुमें डाल दी हैं। वे ही ये सब हैं। इनमेसे तुम अपनी अंगूठी खोज लो। मुनिके इस वाक्यको सुनकर हनुमान्का गर्व खर्व हो गया। तब उन्होंने मुनिसे कहा—॥ २९१ ॥ २९२ ॥ हे मुनीश्वर! यहाँ कितने राम आये हैं? मुनिने कहा—कमण्डलुमेंसे अंगूठियें निकालकर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कमंडलोरंजलिभिस्तदाऽथ मुद्रिका मुहुः । बहिः क्षिपन्मारुतिः स नांतं तासां ददर्श सः ॥२९५॥
पुनः कमंडलौ कृत्वा मुनिं नत्वा कपिः क्षणम् । चिंतयामास मनसि मादृशैः शतशः पुरा ॥२९६॥
समानीतास्ति सीतायाः शुद्धिः का गणनाऽद्यमे। इति निश्चित्य मनसि गतगर्वस्तदा कपिः ॥२९७॥
पुनर्दक्षिणमार्गेण ययौ यत्रांगदादयः । प्रायोपवेशनस्थास्ते तं दृष्ट्वा तुष्टमानसाः ॥२९८॥
बभूवुर्वानराः सर्वे समालिंग्याथ तं मुहुः । ज्ञात्वा तन्मुखतः सीता दृष्टाऽशोकवने त्विति ॥२९९॥
ययुस्ते राघवं शीघ्रं मार्गे सुग्रीवपालितम् । दृष्ट्वा मधुवनं सर्वे दृष्ट्वा तं वालिनंदनम् ॥३००॥
फलानि भक्षयामासुर्दधिवक्त्रो न्यषेधयत् । ततस्ते ताडयामासुर्दधिवक्त्रं कपीश्वरम् ॥३०१॥
ज्ञात्वा तं मातुलमपि सुग्रीवस्यांगदादयः । स गत्वा सकलं वृत्तं सुग्रीवाय न्यवेदयत् ॥३०२॥
सोऽपि श्रुत्वा जनकजा दृष्टा तैरित्यमन्यत । नोचेन्मधुवनं रम्यं कथमश्नन्ति वानराः ॥३०३॥
ततो विसर्जयामास दधिवक्त्रं कपीश्वरः ।मा निषेधस्त्वया कार्यस्त्वं शीघ्रं प्रेषयस्व तान् ॥३०४॥
मर्मांतिकं ततो गत्वा दधिवक्त्रस्तथाऽकरोत् । ततः सुग्रीववचनं श्रुत्वा तेन समीरितम् ॥३०५॥
युयुस्ते वानराः सर्वे रामं नत्वा पुरःस्थिताः । ततो हर्षान्मारुतिः स ब्रह्मपत्रं न्यवेदयत् ॥३०६॥
दत्त्वा चूडामणिं रामं काकवृत्तं न्यवेदयत् । तच्छ्रुत्वा सकलं वृत्तं ज्ञात्वा मारुतिना कृतम् ॥३०७॥
लंकायां वायुपुत्रेण रामस्तुष्टो बभूव सः । समालिंग्य हनूमंतं राघवो वाक्यमब्रवीत् ॥३०८॥
तवोपकारिणश्चाहं न पश्याम्यद्य मारुते । कर्तुं प्रत्युपकारं ते धन्योऽसि जगतीतले ॥३०९॥
परिरंभो हि मे लोके दुर्लभः परमात्मनः । अतस्त्वं मम भक्तोऽसि प्रियोऽसि हरिपुङ्गव ॥३१०॥

यत्पादपद्मयुगलं तुलसीदलाद्यैः संपूज्य विष्णु पदवीमतुलां प्रयाति ।

गिन लो ॥ २९३ ॥ २९४ ॥ अब हनुमान् कमण्डलुसे अंजली भर-भरकर बारम्बार अंगूठियें बाहर निकालने लगे। पर कहीं उनकी अन्त नहीं हुआ ॥ २९५ ॥ तब फिरसे उन्हें कमण्डलुमें भर दिया और मुनिको नमस्कार करके क्षणभरके लिए वे मनमें विचार करने लगे कि ओह ! पहिले मेरे जैसे सैकड़ों हनुमान् जाकर सीताकी खबर ले आये हैं तो मेरी कौन-सी गिनती है। यह निश्चय करके वीर मारुति घमण्डको त्याग-कर दक्षिणमार्गमें जहाँ अङ्गदादि वानर बैठे थे, वहाँ गये। उपवासी दशामें बैठे हुए वे सब वानर हनुमानको देखकर बहुत प्रसन्न हुए ॥ २९६-२९८ ॥ वे सब उनको बार-बार हृदयसे लगाने लगे और उनके मुखसे यह सुनकर कि मैं सीताको अशोकवाटिकामें देख आया हूँ ॥ २९९ ॥ तब सबके सब तुरन्त रामकी ओर चल पड़े। रास्तेमें उन्हें सुग्रीवका सुरक्षित मधुवन दिखाई दिया। तब सब वानर वालिके पुत्र अङ्गदसे पूछकर ॥ ३०१ ॥ उस वनके फल खाने लगे। जब उसके रक्षक दधिमुखने रोका तो वे उसको मारने लगे ॥ ३०० ॥ यह जाननेपर भी कि यह सुग्रीवका मामा है, तथापि उसे पीटकर ही छोड़ा। तदनन्तर दधिमुखने जाकर सब हाल सुग्रीवको कह सुनाया। यह सुनकर सुग्रीवने समझ लिया कि उन्होंने जनकतनयाका पता पा लिया है, नहीं तो वे लोग मधुवनके फल क्योंकर खाते ॥ ३०२ ॥ ३०३ ॥ पश्चात् कपीश्वर सुग्रीवने दधिमुखको समझा-बुझाकर लौटाया और कहा कि उन्हें रोको मत, यहाँ भेज दो ॥ ३०४ ॥ सुग्रीवकी बात मानकर उसने वैसा ही किया। पश्चात् वे सब वानर दधिमुखसे सुग्रीवका आदेश सुनकर ॥ ३०५ ॥ रामके पास गये तथा नमस्कार करके उनके सामने खड़े हो गये। तब हनुमान्ने सहर्ष ब्रह्माका दिया हुआ पत्र रामको अर्पण किया और चूडामणि देकर जयन्त कौवेका वृत्तान्त कह सुनाया। सो सुनकर राम लङ्कामें हनुमान्का किया हुआ समस्त कार्य जान गये ॥ ३०६ ॥ ३०७ ॥ ब्रह्माके पत्रसे राम अतिशय सन्तुष्ट हुए। तदनन्तर राम हनुमान्का आलिंगन करके बोले—॥ ३०८ ॥ हे मारुते ! तुमने मेरा बड़ा उपकार किया है। इस उपकारका प्रत्युपकार करनेके लिये मुझे कुछ नहीं सूझता । सचमुच तुम संसारमें धन्य हो ॥ ३०९ ॥ इस संसारमें साक्षात् परमात्माका (मेरा) परिरम्भ (आलिङ्गन) दुर्लभ है, वह तुमको प्राप्त हो गया। इस कारण हे हरि-पुङ्गव ! तुम प्रिय भक्त हो ॥ ३१० ॥ जिन विष्णुके दोनों चरणकमलोंका तुलसीपत्र तथा जल आदिसे पूजन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेनैव किं पुनरसौ परिरब्धमूर्ती रामेण वायुतनयः कृतपुण्यपुंजः ॥३११॥

रामं स मारुतिः प्राह भीतभीतोऽतिकंपितः । मयाऽपराधितमिति मुद्रावृत्तं मुनेर्वचः ॥३१२॥

तच्छ्रुत्वा रामचंद्रोऽपि विहस्योवाच मारुतिम् । मयैव दर्शितं मार्गे कौतुकं मुनिरूपिणा ॥३१३॥

त्वद्गर्वपरिहारार्थं मुद्रिकां मत्करे त्विमाम् । कनिष्ठिकायां त्वं पश्य समानीता त्वयाद्य वै ॥३१४॥

तां राममुद्रिकां दृष्ट्वा श्रीरामस्य करांगुलौ । ननाम गतवर्गः स रामं विष्णुममन्यत ॥३१५॥

मय्यप्यस्यैव कृपया पौरुषं चेत्यमन्यत । एवं गिरींद्रजे प्रोक्तं चरित्रं सुंदराभिधम् ॥३१६॥

रामार्थं वायुपुत्रेण कृतं सर्वार्थदायकम् ॥३१७॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे सुन्दरचरित्रे सीताशुद्धिर्नाम नवमः सर्गः ॥ ९ ॥

दशमः सर्गः

(राम-रावणसेनाका संघर्ष)

श्रीशिव उवाच

अथाह मारुतिं रामो मां वदस्व सविस्तरम् । लंकास्वरूपं ज्ञात्वा च प्रतीकारं करोम्यहम् ॥ १ ॥

तद्रामवचनं श्रुत्वा कथयामास मारुतिः । लंका दिव्यपुरी देव त्रिकूटशिखरे स्थिता ॥ २ ॥

स्वर्णप्राकारसहिता स्वर्णाट्टालकसंयुता । परिखाभिः परिवृता पूर्णाभिर्निर्मलोदकैः ॥ ३ ॥

नानोपवनशोभाढ्या दिव्यवापीभिरावृता । गृहैर्विचित्रशोभाढ्यैर्मणिस्तंभमयैः शुभैः ॥ ४ ॥

पश्चिमद्वारमासाद्य गजवाहाः सहस्रशः । उत्तरद्वारि तिष्ठन्ति वाजिवाहाः सपत्तयः ॥ ५ ॥

दशकोटिमिता सेना विविधायुधमण्डिता । लंकायाः परितो व्याप्ता सतर्का रक्षते पुरीम् ॥ ६ ॥

करके मनुष्यमात्र विष्णुके अनुपम पदको प्राप्त करता है। उन्हीं साक्षात् रामके द्वारा आलिङ्गित होकर वायुपुत्र हनुमान् यदि महान् पुण्यशाली बन जायँ तो इसमें आश्चर्य ही क्या है ॥ ३११ ॥ तदनन्तर डरके मारे काँपते हुए मारुतिने रामसे अपना गर्वरूपी अपराध, मुद्रिकाका वृत्तान्त तथा मुनिका वचन कह सुनाया ॥ ३१२ ॥ यह सुना तो रामचन्द्रने हँसकर कहा कि यह कौतुक मैंने ही मार्गमें मुनिरूप धारण करके दिखलाया था ॥ ३१३ ॥ यह काम मैंने तुम्हारे गर्वको छुड़ानेके लिये ही किया था। यह देखो, जिस मुद्रिकाको तुम ले आये थे, वह तो मेरे हाथकी कनिष्ठिका अंगुलीमें विद्यमान है ॥ ३१४ ॥ रामके हाथमें रामकी अंगूठी देखी तो गर्व छोड़कर हनुमान्ने नमस्कार किया और उन्हें साक्षात् विष्णु माना ॥ ३१५ ॥ और यह भी माना कि इन्हींकी कृपासे मुझमें भी पौरुष आ गया है। हे गिरींद्रजे ! रामके लिये वायुपुत्रके द्वारा किया हुआ सर्वार्थसाधक सुन्दर चरित्र मैंने तुमको इस प्रकार कह सुनाया ॥ ३१६ ॥ ३१७॥ इति शतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे भाषाटीकायां सुन्दरचरित्रे सीताशुद्धिर्नाम नवमः सर्गः ॥ ९ ॥

शिवजी बोले—हे पार्वती ! रामने मारुतिसे कहा—तुम हमको विस्तारसे लंकाका स्वरूप बताओ। लङ्काका स्वरूप जानकर मैं प्रतीकारका उपाय सोचूँगा ॥ १ ॥ रामकी बात सुनकर मारुतिने कहा—हे देव ! त्रिकूट पर्वतके शिखरपर वह लङ्का नामकी दिव्य पुरी बसी हुई है ॥ २ ॥ उसके चारों ओर सोनेका गढ़ है तथा वह सोनेकी अँटारियोंवाले भवनोंसे सुशोभित है। निर्मल जलसे परिपूर्ण खाईंसे वह नगरी घिरी हुई है ॥ ३ ॥ अनेकानेक उपवनोंसे सुन्दर, दिव्य बावलियोंसे आवृत तथा चित्र-विचित्र शोभावाले मणियोंके खम्भोंवाले सुन्दर महलोंसे सजी हुई है ॥ ४ ॥ उसके पश्चिमी द्वारपर हजारों गजारूढ़ तथा अश्वारूढ़ सिपाही खड़े रहते हैं ॥ ५ ॥ दस करोड़ सेना नाना प्रकारके शस्त्रास्त्रोंसे सुसज्जित होकर लङ्काको

CC-0. In Public Domain. Rahikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिष्ठंत्यर्बुदसंख्याता गजाश्वरथपत्तयः । रक्षयंति सदा लंकां नानास्त्रकुशलाः प्रभो ॥ ७ ॥
संक्रमैर्विविधैर्लंका शतघ्नाभिश्च संयुता । एवं स्थितायां देवेश शृणु त्वद्दासचेष्टितम् ॥ ८ ॥
दशाननबलौघस्य चतुर्थांशो मया हतः । दग्धा लंकापुरी स्वर्णप्राकारा धर्षिता मया ॥ ९ ॥
शतघ्न्यः संक्रमाश्चैव नाशिता मे रघूद्वह । देव त्वद्दर्शनादेव लंका भस्मीभवेत्पुनः ॥१०॥
सुबेलाद्रिश्चोत्तरेऽस्ति परलंकाऽस्ति पश्चिमे । निकुंभिला दक्षिणेऽस्ति तत्रास्ते योगिनीवटः ॥११॥
पूर्वे च लघुलंकाऽस्ति सा मध्ये कांतिमंडिता । त्रिकूटशिखरे रम्ये मत्पुच्छानलधर्षिता ॥१२॥
प्रस्थानं कुरु देवेश गच्छामो लवणार्णवम् । तन्मारुतेर्वचः श्रुत्वा सुग्रीवं प्राह राघवः ॥१३॥
सुग्रीवसैनिकान् सर्वान्प्रस्थानायाभिनोदय । इदानीमेव विजयो मुहूर्तस्त्वद्य वर्तते ॥१४॥
आश्विनी शुक्लदशमी श्रवणर्क्षसमन्विता । शुभाऽद्य वानरश्रेष्ठ गच्छामो लवणार्णवम् ॥१५॥
रक्षन्तु यूथपाः सेनामग्रे पृष्ठे च पार्श्वयोः । नलो भवत्वग्रसरः पृष्ठे नीलोऽथ रक्षतु ॥१६॥
सुषेणः सव्यपार्श्वे मे जांबवानितरे मम । गजो गवाक्षो गवयो मैंदश्चैतेऽद्य वानराः ॥१७॥
वह्निनैरितवाय्वीश चतुर्दिक्षु समन्ततः । रक्षन्तु वानरीं सेनां द्विविदाद्यास्तथाऽपरे ॥१८॥
सर्वे गच्छन्तु सर्वत्र सेनायाः शस्त्रघातिनः । आरुह्य मारुतिं चाहं गच्छाम्यग्रेऽङ्गदं ततः ॥१९॥
आरुह्य लक्ष्मणो यातु सुग्रीव त्वं मया सह । आगच्छस्वेति चाज्ञाप्य हरीन् रामः सलक्ष्मणः ॥२०॥
प्रतस्थे दक्षिणाशायां सेनामध्यगतो विभुः । तदा ते कपयश्चक्रुर्भुभुःकारान् भयानकान् ॥२१॥
वादयामासुर्वाद्यानि पणवानकगोमुखैः । वारणेंद्रनिभाः सर्वे वानराः कामरूपिणः ॥२२॥
गतास्तदा दिवारात्रं क्वचित्तस्थुर्न ते क्षणम् । अभवञ्छकुना लंकां गच्छतो राघवस्य हि ॥२३॥
ते सह्यं समतिक्रम्य मलयं च तथा गिरिम् । आययुश्चानुपूर्व्येण ते सर्वे दक्षिणार्णवम् ॥२४॥

चारों ओरसे रक्षा कर रहे हैं ॥ ६ ॥ उनमें विविध सुरंगें लगी हैं और उसके गढ़पर अनेक तोपें भी रखी हुई हैं । हे देवेश ! इस दशामें भी आपके इस दासने वहाँ जाकर जो कुछ किया, सो सुनिये ॥ ७ ॥ ८ ॥ मैंने वहाँ जाकर रावणकी चौथाई सेना मार डाली है। लङ्कापुरीको जलाकर स्वर्णप्राकार गिरा दिया है ॥ ९ ॥ हे रघूद्वह ! मैंने तोपें तथा सुरंगें तोड़ डाली हैं। हे देव ! अब आपके जानेमात्रसे ही लंका पुनः भस्म हो जायगी ॥ १० ॥ उस लंकाके उत्तर सुवेलाद्रि है। पश्चिम परलंका है। दक्षिण निकुम्भिला है। जहाँपर योगिनीवट विद्यमान है ॥ ११ ॥ पूर्वकी ओर लघु लंका है, जिसका मध्यभाग बड़ा ही रमणीक है। उस त्रिकूटके शिखरपर बसी हुई लंकाको मैंने अपनी पूँछकी आगसे जला दिया है ॥ १२ ॥ हे देवेश ! अब आप प्रस्थान करें। हम लोग क्षार समुद्रकी ओर चलें। मारुतिकी बात सुनकर रामने सुग्रीवसे कहा—॥ १३ ॥ हे सुग्रीव ! समस्त सैनिकोंको प्रस्थान करनेके लिए आज्ञा दे दो । आज इसी समय विजयप्राप्तिका शुभ मुहूर्त है ॥ १४ ॥ आज श्रवणनक्षत्रसे युक्त आश्विन शुक्ल दशमीकी शुभ तिथि है। हे वानरश्रेष्ठ ! हमलोग आज लवणसागरकी ओर अवश्य प्रस्थान कर दें ॥ १५ ॥ बड़े-बड़े यूथपति वानर सेनाकी आगे-पीछे और बगलसे रक्षा करें। आगे नल तथा पीछे नील रक्षा करें ॥ १६ ॥ सुषेण मेरी बाईं ओर तथा जाम्बवान् मेरी दाहिनी बगलमें रहें। गज, गवाक्ष, गवय और मैंद ये सब वानर अग्निकोण, नैर्ऋत्यकोण, वायव्यकोण तथा ईशानकोणमें रहकर वानरी सेनाकी चौतरफा रक्षा करें । शत्रुओंको मारनेमें निपुण द्विविद आदि वानर भी सेनाको सब ओरसे घेरकर चलें। मारुतिके कन्धेपर सवार होकर मैं आगे चलता हूँ और मेरे पीछे अंगदके कन्धेपर सवार होकर लक्ष्मण चलें। हे सुग्रीव ! तुम भी मेरे साथ चलो। इसी प्रकार अन्य सब वानरोंको 'चलो' ऐसी आज्ञा देकर लक्ष्मण सहित राम सेनाके बीच होकर दक्षिण दिशाकी ओर चल दिये। उस समय वे वानर भयानक भूभूकार करने लगे ॥ १७–२१ ॥ वे ढोल, मृदंग तथा गौके सुख सदृश बाजे बजाने लगे। ऋक्षरूप धारण करनेवाले तथा श्रेष्ठ हाथियोंके समान वीर सब वानर क्षणभर भी विश्राम न करके चलने लगे। लंकाके लिए प्रस्थित रामको अच्छे-अच्छे शकुन दीख पड़े ॥ २२ ॥ २३ ॥ वे सह्यपर्वत तथा

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतः सेनानिवासश्च राघवेणाब्धिसैकते । चक्रुर्मन्त्रं सागरस्य तरणार्थं प्लवंगमाः ॥२५॥
लंकायां वायुपुत्रेण कृतं दृष्ट्वा स रावणः । प्रहस्तादींस्तदा प्राह कथमग्रे भविष्यति ॥२६॥
एकेन कपिनाऽस्माकं पुरतो ज्वालिता पुरी । दृष्टा सीता वनं भग्नं राक्षसा निहता रणे ॥२७॥
ममातिलालितः पुत्रः कनीयान्निहतो रणे । तदा ते मन्त्रिणः सर्वे ददुर्धैर्यं दशाननम् ॥२८॥
राजन्नुपेक्षितोऽस्माभिर्मर्कटोऽयमिति स्फुटम् । वयं तवाज्ञया कुर्मो जगत् कृत्स्नमवानरम् ॥२९॥
कुम्भकर्णस्तदा प्राह रावणं राक्षसेश्वरम् । त्वया योग्यं कृतं नैतद्यद्गत्वा जानकी हृता ॥३०॥
यद्यप्यनुचितं कर्म त्वया कृतमजानता । सर्वं समं करिष्यामि स्वस्थचित्तो भव प्रभो ॥३१॥
देहि देव ममानुज्ञां हत्वा रामं सलक्ष्मणम् । सुग्रीवं वानरांश्चैवागमिष्यामि पुनः क्षणात् ॥३२।
कुम्भकर्णवचः श्रुत्वा तदा प्राह विभीषणः । महाभागवतः श्रीमान् रामभक्त्यैकतत्परः ॥३३॥

विलोक्य कुम्भश्रवणादिदैत्यान्मत्तप्रमत्तानतिविस्मयेन ।
विलोक्य कामातुरमप्रमत्तो दशाननं प्राह विशुद्धबुद्धिः ॥३४॥
न कुम्भकर्णेन्द्रजितौ च राजंस्तथा महापार्श्वमहोदरौ तौ ।
निकुम्भकुम्भौ च तथाऽतिकायः स्थातुं न शक्ता युधि राघवाग्रे ॥३५॥
सीतां च सत्कृत्य महाधनेन दत्त्वाऽभिरामाय सुखी भव त्वम् ।
नोचेन्न रामेण विमोक्ष्यसे त्वं गुप्तः सुरेन्द्रैरपि शंकरेण ॥३६॥

एवं शुभं रावणः स विभीषणवचो हितम् । आत्मनः प्रतिजग्राह नैवासौ सौख्यकारणम् ॥३७॥
कालेन नोदितो दैत्यो विभीषणमथाब्रवीत् । बंधुरूपेण शत्रुस्त्वं जातो नास्त्यत्र संशयः ॥३८॥
योऽन्यस्त्वेवंविधं ब्रूयाद्वाक्यं हन्मि तदैव तम् । उत्तिष्ठ गच्छ दुर्बुद्धे धिक् त्वां रक्षःकुलाधम ॥३९॥
रावणेनैवमुक्तः स परुषेण विभीषणः । चतुर्भिर्मन्त्रिभिर्युक्तो ययौ श्रीराघवांतिकम् ॥४०॥

मलयाचल होते हुए क्रमशः दक्षिण समुद्रपर जा पहुँचे ॥ २४ ॥ रामने उस वानरी सेनाको समुद्रके किनारे बालूमें ठहरा दिया और सब वानर मिलकर समुद्रका पार करनेकी समस्यापर विचार करने लगे ॥ २५ ॥ उधर लङ्कामें वायुपुत्र हनुमान्के कृत्यको देखकर रावणने प्रहस्तादि मन्त्रियोंको बुलाकर पूछा कि अब आगे क्या होगा। २६ ॥ एक ही वानरने हमारी सम्पूर्ण लंका नगरी जला दी। उसने सीताको देख लिया, वनको उजाड़ा और राक्षसोंको मार डाला ॥ २७ ॥ मेरे अतिशय प्रिय छोटे पुत्रको भी रणमें उसने समाप्त कर दिया। वे सब मन्त्री दशाननको धैर्य दिलाते हुए कहने लगे-॥ २८ ॥ हे राजन्! यह तो हम लोगोंने वानर समझकर उसकी उपेक्षा कर दी थी। अब यदि आप आज्ञा दें तो हम समस्त संसारको वानरशून्य कर दें ॥ २९ ॥ कुम्भकर्णने राक्षसेश्वर रावणसे कहा—आपने यह उचित नहीं किया, जो जाकर जानकीको उठा लाये ॥ ३० ॥ यद्यपि आपने अनजानमें यह अनुचित काम किया है। तथापि मैं सब कुछ ठीक कर दूँगा। हे प्रभो! आप निश्चिन्त रहे ॥ ३१ ॥ आप मुझको आज्ञा दें तो लक्ष्मणसहित राम, सुग्रीव और सब वानरोंको मारकर क्षणभरमें लौट जाऊँ ॥ ३२ ॥ कुम्भकर्णकी बात सुनकर भगवद्भक्तोंमें श्रेष्ठ तथा श्रीमान् रामकी भक्तिमें लौलीन विभीषणने प्रमत्त कुम्भकर्ण आदि दैत्योंकी ओर दृष्टि डालते हुए कामातुर दशाननसे विचारपूर्वक कहा—॥ ३३ ॥ ३४ ॥ हे राजन्! कुम्भकर्ण, महापार्श्व, महोदर, निकुम्भ, कुम्भ और अतिकाय भी युद्धमें रामके सामने नहीं ठहर सकते ॥ ३५ ॥ इसलिए आप रामका प्रचुर धनसे सत्कार करें और उन्हें सीता समर्पण करके सुखसे रहें। नहीं तो सुरेन्द्र तथा शंकरका शरणमें जानेपर भी आपको वे जीवित नहीं छोड़ेंगे ॥ ३६ ॥ इस प्रकार शुभ तथा हितभरे विभीषणके वाक्यको भी रावणने अपने प्रतिकूल ही समझा ॥ ३७ ॥ कालसे प्रेरित दैत्य रावणने विभीषणसे कहा—निःसन्देह तू बंधुरूपमें मेरा शत्रु है ॥ ३८ ॥ यदि और कोई मुझसे ऐसा कहता तो मैं उसको अभी मार डालता। ओ दुर्बुद्धे! अरे राक्षसाधम! तुझे धिक्कार

CC-0. In Public Domain. Kirtikant Sharma, Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रावणश्चापि तं ज्ञात्वा तेन सख्यं चकार सः । हनूमतोदधेस्तीरे लंकां च सिकतोद्भवाम् ॥४१॥
कारयित्वा रघुश्रेष्ठस्तत्र मित्रं विभीषणम् । लंकायाश्चैव राज्यार्थं वानरैरभ्यषेचयत् ॥४२॥
तदा विभीषणं प्राह रामचन्द्रो विहस्य च । न्यासभूता त्वियं लंका तावत्कालं तवास्ति मे ॥४३॥
यावता रावणं हत्वा तव दास्याम्यहं शुभाम् । हनूमतास्त्वयं नाम्ना लङ्का ख्यातिं गमिष्यति ॥४४॥
हनुमल्लङ्काऽब्धेस्तीरे वर्ततेऽद्यापि पार्वति । विभीषणाद्रावणान्ते रामस्तां मोचयिष्यति ॥४५॥
एतस्मिन्नन्तरे तत्र गगनस्थः शुकोऽब्रवीत् । प्रेषितो रावणेनैव सुग्रीवं प्राह वेगतः ॥४६॥
त्वामाह रावणो राजा तव नास्त्यर्थविप्लवः । अहं यद्यहरं भार्यां राजपुत्रस्य किं तव ॥४७॥
किष्किन्धां याहि हरिभिस्त्वं वैरं कुरु मा मया । तं धृत्वा वानराः शीघ्रं बबन्धुर्लोहबंधनैः ॥४८॥
शार्दूलश्चापि सेनां तां दृष्ट्वाऽधिपमभाषत । तच्छ्रुत्वा रावणश्चापि दीर्घचिंतापरोऽभवत् ॥४९॥
रामः संमंत्रयामास तदैकान्ते स्थितः क्षणम् । विभीषणेन सुग्रीवमारुतिभ्यां समन्वितः ॥५०॥
तीर्त्वार्धं जलधेर्गुल्मं संस्थितो बन्धुना युतः । सर्वेषां वचनं श्रोतुं राघवेणाथ सागरः ॥५१॥
मेघवद्गर्जनां कुर्वन् वामहस्तेन धिक्कृतः । अद्यापि सागरस्तत्र तूष्णीमेव स विद्यते ॥५२॥
ततः संमंत्र्य रामस्तु तदा सागररोधसि । प्रायोपवेशनं चक्रे दर्भानास्तीर्य वेगतः ॥५३॥
दिनद्वयमतिक्रम्य तृतीयदिवसे तदा । उत्थाय दर्भशयनात्पुनलक्ष्मणमब्रवीत् ॥५४॥
पश्य लक्ष्मण दुष्टोऽसौ वारिधिर्मामुपागतम् । नाभिनन्दति दुष्टात्मा दर्शनार्थं ममानघ ॥५५॥
जानाति मानुषोऽयं मां किं करिष्यंति वानरैः । अद्य पश्य महाबाहो शोषयिष्यामि वारिधिम् ॥५६॥
पद्भ्यामेवाद्य गच्छंतु वानरा विगतज्वराः । इत्युक्त्वा चापमाकृष्य सदधे बाणमुत्तमम् ॥५७॥

है । उठ, यहाँसे निकल जा ॥ ३९ ॥ रावणके इस प्रकार धिक्कारनेपर विभीषण अपने चार मन्त्रियोंको साथ लेकर श्रीरामके समीप चला गया ॥ ४० ॥ रामने परिचय पूछकर उसके साथ मित्रता कर ली । तदनन्तर रामने हनुमान्‌से समुद्रके किनारे रेतोकी लंका बनवाकर उसमें अपने मित्र विभीषणका लंकाराज्यके राजाके पदपर वानरों द्वारा अभिषेक करवा दिया ॥ ४१ ॥ ४२ ॥ तब रामने हँसकर विभीषणसे कहा—मित्र ! यह लंका तुम्हारे पास तबतक धरोहररूपसे रहेगा ॥ ४३ ॥ जबतक मैं रावणको मारकर तुम्हें लंका न दे दूँ, यह लंका हनुमान्‌के नामसे प्रसिद्ध होगी ॥ ४४ ॥ हे पार्वती ! वह हनुमान्‌की लंका अभी भी समुद्रके किनारे विद्यमान है । रावणका अन्त हो जानेपर राम उसे विभीषणसे छुड़ा लेंगे ॥ ४५ ॥ तदनन्तर आकाशमें स्थित शुक बोला—हे सुग्रीव ! मुझे बड़ी शीघ्रतासे रावणने तुम्हारे पास भेजा है ॥ ४६ ॥ राजा रावणने कहा है कि हमने तुम्हारी कोई हानि नहीं की है । यदि मैं राजपुत्र रामकी स्त्रीका हरण कर लाया तो इससे तुम्हारी क्या हानि हुई ॥ ४७ ॥ उन्होंने कहा है कि तुम हमारे साथ शत्रुता न करके बंदरोंको लेकर किष्किन्धा लौट जाओ । इतना कहना था कि वानरोंने उस राक्षसको पकड़कर लोहेकी जंजीरोंसे जकड़ दिया ॥ ४८ ॥ उसके साथ गुप्तरूपसे आया हुआ दूसरा शार्दूल नामका राक्षस उस विशाल सेनाको देखकर रावणके पास गया और वानरी सेनाका पराक्रम कह सुनाया । सो सुनकर रावण बड़ी भारी चिन्तामें पड़ गया ॥ ४९ ॥ इधर रामचन्द्रजी भी एकान्तमें जाकर विभीषण, सुग्रीव तथा हनुमान्‌के साथ मंत्रणा करने लगे ॥ ५० ॥ तदनन्तर वे समुद्रके जलमें कुछ दूर जाकर सबकी बात सुननेके लिये खड़े हो गये । बादमें रामने मेघकी तरह गर्जन करके बायें हाथसे सागरको धिक्कारा और कहा कि तू अभी तक चुप ही है ॥ ५१ ॥ ५२ ॥ मंत्रणा पूरी करके राम सागरके किनारेपर आगये और कुशा बिछाकर अनशन करने लगे ॥ ५३ ॥ दो दिन बिताकर तीसरे दिन कुशासनसे उठ खड़े हुए और लक्ष्मणसे कहा—॥ ५४ ॥ हे अनघ लक्ष्मण ! देखो, यह दुष्टात्मा वारिधि मुझे यहाँ आया जानकर भी मुझसे मिलने या मेरा दर्शन करने नहीं आया ॥ ५५ ॥ यह समझता है कि यह मनुष्यमात्र है । यह मेरा क्या कर लेगा और ये वानर भी क्या कर लेंगे । हे महाबाहो ! देखो, मैं आज इसको सोख लूँगा ॥ ५६ ॥ तब वानर बिना किसी कठिनाईके पाँवसे चलकर उस पार

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदा चचाल वसुधा दिशश्च तमसावृताः । चुक्षुभे सागरो वेलां भयाद्योजनमत्यगात् ॥५८॥
तिमिनक्रझषा मीनाः प्रतप्ताः परितत्रसुः । एतस्मिन्नंतरे साक्षात्सागरो दिव्यरूपधृक् ॥५९॥
शनैरुपायनं रामं समर्प्य प्रणनाम सः । अथ तुष्टाव दीनात्मा प्रार्थयामास राघवम् ॥६०॥
अभयं देहि मे राम लंकामार्गं ददामि ते । इति तद्वचनं श्रुत्वा राघवः प्राह सागरम् ॥६१॥
अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यताम्। लक्ष्यं दर्शय मे शीघ्रं बाणस्यास्य पयोनिधे ॥६२॥

सागर उवाच

रामोत्तरप्रदेशेऽस्ति द्रुमकल्प इति श्रुतः । प्रदेशस्तत्र बहवः पापात्मानो दिवानिशम् ॥६३॥
बाधन्ते मां रघुश्रेष्ठ तत्र ते पात्यतां शरः । रामेण मुक्तो बाणोऽसौ क्षणादाभीरमंडलम् ॥६४॥
हत्वा पुनः समागत्य तूणीरे पूर्ववत्स्थितः । ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः ॥६५॥
मयि सेतुं कारयस्व नलेनोपलनिर्मितम् । विश्वकर्मसुतश्चायं वरो लब्धोऽस्त्यनेन हि ॥६६॥
द्विजस्य जाह्नवीतोये शालिग्रामस्त्वनेन हि । त्यक्तस्तदा तेन शप्तः पाषाणादि तरिष्यति ॥६७॥
त्वद्धस्तादिति शापोऽयं वर एवात्र स स्मृतः । इत्युक्त्वा राघवं नत्वा ययौ सिंधुरदृश्यताम् ॥६८॥
नलमाज्ञापयामास सेत्वर्थं रघुनन्दनः । सेतुमारभमाणस्तु विघ्नेशं स्थाप्य राघवः ॥६९॥
नवग्रहाणां पूजार्थं पाषाणान्नव सादरम् । नलहस्तेन संस्थाप्य पूर्वं तत्र महोदधौ ॥७०॥
ततः सागरसंयोगे स्वनाम्ना लिङ्गमुत्तमम् । स्थापयामीति निश्चित्य मारुतिं वाक्यमब्रवीत् ॥७१॥
काशीं गत्वा शिवाल्लिंगमानर्नीयमनुत्तमम् । मुहूर्तमध्ये नोचेन्मे मुहूर्तातिक्रमो भवेत् ॥७२॥
तद्रामवचनं श्रुत्वा तथेत्युक्त्वा स मारुतिः । ययावाकाशमार्गेण क्षणाद्वाराणसीं मम ॥७३॥

जा सकेंगे। इतना कहकर रामने धनुषपर बाण चढ़ाकर डोरी खींची ॥ ५७ ॥ उस समय पृथ्वी काँप उठी, सब दिशाओंमें अँधेरा छा गया, समुद्र भयसे क्षुब्ध होकर अपने किनारेसे चार कोस आगे बढ़ गया ॥ ५८ ॥ मीन, तिमि तथा झष नामकी मछलियें और मगरमच्छ आदि जलजन्तु सन्तप्त तथा व्याकुल हो गये। तब समुद्र दिव्य रूप धारण करके प्रकटा और रामको रत्नोंकी भेंट दे तथा नमस्कार करके दीनभावसे प्रार्थना करके कहने लगा-॥ ५९ ॥ ६० ॥ हे राम ! कृपा करके आप मुझे अभयदान दें। मैं आपको लङ्का जानेका रास्ता अभी देता हूँ। उसके वचनको सुनकर रामने कहा-॥ ६१ ॥ हे पयोनिधे ! यह मेरा महाबाण अमोघ है, व्यर्थ नहीं जा सकता। बतलाओ, इसे कहांपर गिराऊँ। इस बाणका कोई लक्ष्य बताओ ॥ ६२ ॥ सागरने कहा—हे राम ! उत्तर दिशामें द्रुमकल्प नामका देश है। वहाँ बहुतेरे पापी आभीर रहते हैं। वे मुझको रात-दिन सताते हैं। हे रघुश्रेष्ठ ! आप इस बाणको वहाँ ही गिराइए। तदनुसार रामने बाण छोड़ा तो उसने जाकर क्षणभरमें समस्त आभीरमण्डलको मार डाला और पुनः वापस लौटकर रामके तरकसमें पूर्ववत् स्थित हो गया। बादमें सागरने विनयपूर्वक रघुश्रेष्ठ रामजीसे कहा-॥ ६३ -६५ ॥ हे राघव ! आप मेरे ऊपर नलके द्वारा पत्थरोंका पुल बँधवाएँ। नल विश्वकर्माका पुत्र है। उसने जलपर पत्थर तैरानेका वर प्राप्त किया है ॥ ६६ ॥ एक बार इसने एक ब्राह्मणका पूज्य शालिग्राम उठाकर गङ्गाजीके जलमें फेंक दिया था। तब उसने शाप दिया कि जा, तेरा फेंका पत्थर भी पानीमें तैरेगा ॥ ६७ ॥ वह शाप भी वर माना जायगा। इतना कह तथा रामको नमस्कार करके समुद्र अदृश्य हो गया ॥ ६८ ॥ तदनन्तर रघुनन्दन रामने नलको पुल बाँधनेकी आज्ञा दी। सेतु बाँधते समय पहिले गणेशजीकी स्थापना की गयी ॥ ६९ ॥ पश्चात् नवग्रहोंकी पूजाके लिए नलके हाथसे सादर नौ पाषाणोंकी समुद्रमें स्थापना करवाई गयी ॥ ७० ॥ इसके बाद 'अपने नामसे मैं सागरके सङ्गमपर उत्तम शिवलिंग स्थापित करूँगा' ऐसा निश्चय करके रामने मारुतिसे कहा-॥ ७१ ॥ हे हनुमान् ! तुम काशी जाकर शिवजीसे एक उत्तम लिंग मुहूर्तमात्रमें माँग ले आओ। नहीं तो मेरा यह शुभ मुहूर्त टल जायगा ॥ ७२ ॥ रामकी आज्ञा सुनकर हनुमान्ने 'तथास्तु' कहा और क्षणभरमें उड़कर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्रागत्याथ मां नत्वा रामकार्यं न्यवेदयत् । तच्छ्रुत्वाऽथ मया देवि राघवाय हनूमते ॥७४॥
द्वे लिंगे ह्यर्पिते श्रेष्ठे ततोऽहं कपिमब्रुवम् । मयाऽपि दक्षिणे गंतुं पूर्वमेव विनिश्चितम् ॥७५॥
अगस्तिना विशेषेण यास्यामि राघवाज्ञया । एवं तद्वचनं श्रुत्वा मारुतिः प्राह मां पुनः ॥७६॥
कदा विनिश्चितं पूर्वं त्वयाऽत्र कुम्भजन्मना । तत्सर्वं मां वदस्वाद्य कृपां कृत्वा ममोपरि ॥७७॥
तन्मारुतिवचः श्रुत्वा ततोऽहमब्रुवं कपिम् । मारुते त्वं शृणुष्वाद्य पूर्ववृत्तं वदामि ते ॥७८॥
कदाचिन्नारदः श्रीमान्स्नात्वा श्रीनर्मदांभसि । श्रीमदोंकारमभ्यर्च्य सर्वदं सर्वदेहिनाम् ॥७९॥
व्रजन्विलोकयांचक्रे पुरो विंध्यं धराधरम् । संसारतापसंहारि रेवावारिपरिष्कृतम् ॥८०॥
रूपद्वयेन कुर्वंतं स्थावरेण चरेण च । साभिख्येन यथार्थाख्यामुच्चैर्वसुमतीमिमाम् ॥८१॥
अथ तं नारदं दृष्ट्वा विन्ध्यः प्रत्युज्जगाम सः । गृहमानीय विधिवत्पूजयामास सादरम् ॥८२॥
गतश्रममथालोक्य बभाषेऽवनतो गिरिः । अघसंघः परिहृतस्त्वदंघ्रिरजसा मम ॥८३॥
त्वदंगसंगिमहसा सहसाप्यांतरं तमः । सकलर्धिकरं चाद्य सुदिनं चाद्य मे मुने ॥८४॥
प्राकृतैः सुकृतैरद्य फलितं मे चिरार्जितैः । धराधरत्वं कुलिषु मान्यं मेऽद्य भविष्यति ॥८५॥
इति श्रुत्वा तदा किंचिदुच्छ्वस्य स्थितवान्मुनिः । पुनरूचे कुलिवरः संभ्रमापन्नमानसः ॥८६॥
उच्छ्वासकारणं ब्रह्मन् ब्रूहि सर्वार्थकोविद । तवाहं मार्जयाम्यद्य हृत्खेदं क्षणमात्रतः ॥८७॥
धराधरणसामर्थ्यं मेर्वादौ पूर्वपूरुषैः । वर्ण्यते समुदायात्तदहमेको दधे धराम् ॥८८॥
गौरीगुरुत्वाद्धिमवानाधिपत्याच्च भूभृताम् । सम्बन्धित्वात्पशुपतेः स एको मानभृत्सताम् ॥८९॥
न मेरुः स्वर्णपूर्णत्वाद्रत्नसानुतयाऽथवा । सुरसद्मतया वाऽपि क्वापि मान्यो मतो मम ॥९०॥

आकाशमार्गसे (शिवकी) वाराणसी (काशी) नगरीमें आगये ॥ ७३ ॥ वहाँ आकर उन्होंने मुझको नमस्कार करके रामके कार्यके लिये निवेदन किया। हे देबि ! उस निवेदनको सुनकर मैंने रामके लिए हनुमान्‌को दो उत्तम लिंग दिये और कहा कि हे कपि ! मैंने भी दक्षिण दिशामें जानेका बहुत दिनोंसे निश्चय कर रक्खा है ॥ ७४ ॥ ७५ ॥ यह निश्चय अगस्त्य मुनिके साथ हुआ था। पर बादमें सोचा कि जब विशेष-रूपसे रामकी आज्ञा होगी, तभी जाऊँगा। मेरे मुखसे यह सुनकर मारुतिने मुझसे फिर प्रश्न किया—॥ ७६ ॥ आपने पहिले कब और कहाँपर कुम्भजन्म (अगस्त्य) के साथ यह निश्चय किया था। यह सब हाल कृपा करके कहें ॥ ७७ ॥ मारुतिकी बात सुनकर मैंने कहा—हे मारुते ! मैं तुमको पूर्ववृत्तान्त बताता हूँ, सुनो ॥ ७८ ॥ एक समय श्रीमान् नारदमुनि नर्मदा नदीके पवित्र जलमें स्नान करके समस्त देहधारी प्राणियोंको सब कुछ देनेवाले ओंकारेश्वर शिवकी पूजा करके जा रहे थे। रास्तेमें संसार भरके तापको दूर करने-वाला तथा रेवाके जलसे परिप्लुत विंध्यपर्वत सामने दिखाई दिया ॥ ७९ ॥ ८० ॥ वह स्थावर तथा जंगम इन दो रूपोंसे इस वसुमती पृथ्वीको यथार्थ नाम प्रदान कर रहा था ॥ ८१ ॥ नारदको देखकर वह पर्वत सामने आया तथा उन्हें अपने घरपर ले जाकर सादर विधिवत् पूजन किया ॥ ८२ ॥ नारदजीका श्रम दूर हो जानेपर विन्ध्याचल विनम्र होकर कहने लगा कि आपके चरणरजसे मेरा पापपुञ्ज नष्ट हो गया ॥ ८३ ॥ हे महामुने ! आपके दैहिक तेजके संसर्गसे अनेक मनोव्यथा पैदा करनेवाला मेरे हृदयका अन्धकार दूर हो गया। आज मेरे लिए बड़ा शुभ दिन है ॥ ८४ ॥ चिरकालसे उपार्जित मेरे प्राक्तन पुण्य आज सफल हो गये। आजसे मैं पर्वतोंमें माननीय पर्वत माना जाऊँगा ॥ ८५ ॥ यह सुनकर मुनिने कुछ लम्बी साँस ली। यह देखा तो घबराकर पर्वतने कहा—हे सब अर्थोंको जाननेवाले ब्रह्मन् ! इस उच्छ्वासका क्या कारण है ? आपके हृदयका खेद मैं क्षणभरमें मार्जित कर दूँगा ॥ ८६ ॥ ८७ ॥ पूर्व पुरुषोंने मेरु आदि सब पर्वतोंको मिलाकर पृथ्वीको धारण करनेमें समर्थ बतलाया है, पर मैं अकेला ही उसको धारण कर सकता हूँ ॥ ८८ ॥ अभी गौरीका पिता होनेसे, पर्वतोंका अधिपति होनेसे तथा पशुपति शिवका सम्बन्धी होनेके कारण केवल हिमालय ही सज्जनोंके मानका पात्र है ॥ ८९ ॥ मेरी समझमें तो सोनेसे भरा हुआ तथा रत्नमय शिखरोंवाला

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परं शतं न किं शैला इलाकलनकेलयः । इह संति सतां मान्या मान्यास्ते तु स्वभूमिषु ॥९१॥
मंदेहदेहसंदोहा उदयैकयाश्रिताः । निषधश्चौषधिधरोऽप्यस्तोऽप्यस्तमितप्रभः ॥९२॥
नीलश्च नीलनिलयो मंदरो मंदलोचनः । सर्पालयः स मलयो रायं नावाप रैवतः ॥९३॥
हेमकूटत्रिकूटाद्याः कूटोत्तरपदास्तु ते । किष्किंधक्रौंचसह्याद्या भारसह्या न ते भुवः ॥९४॥
इति विंध्यवचः श्रुत्वा नारदो हृद्यचिंतयत् । अखर्वगर्वसंसर्गो न महत्त्वाय कल्पते ॥९५॥
श्रीशैलमुख्याः किं शैला नेह संत्यमलश्रियः । येषां शिखरमात्रादिदर्शनं मुक्तये सताम् ॥९६॥
अथास्य बलमालोच्यमिति ध्यात्वाऽब्रवीन्मुनिः । सत्ययुक्तं हि भवता गिरिसारं विवृण्वता ॥९७॥
परः शैलेषु शैलेन्द्रो मेरुस्त्वामवमन्यते । मया निःश्वसितं चैतत्त्वयि चापि निवेदितम् ॥९८॥
अथवा मद्विधानां हि केयं चिंता महात्मनाम् । स्वस्त्यस्तु तुभ्यमित्युक्त्वा ययौ स व्योमवर्त्मना ९९॥
गते मुनौ निनिंद स्वमतोवोद्विग्नमानसः । चित्ते विचारयामास मेरोः श्रैष्ठ्यं कथं त्विति ॥१००॥
मेरुं प्रदक्षिणं कुर्यान्नित्यमेष दिवाकरः । सग्रहर्क्षगणो नूनं मन्यमानो बलाधिकम् ॥१०१॥
इति निश्चित्य विंध्याद्रिर्ववृधे स मृधेक्षणः । निरुध्य ब्राध्नमध्वानं स्वस्थोऽभूद्गगनांगणे ॥१०२॥
ततः प्रभाते सूर्योऽसौ दिशि याम्यां समुद्यतः । गंतुं रुद्धं स्वपंथानं दृष्ट्वाऽस्वस्थोऽभवच्चिरम् ॥१०३॥
योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । यः स्वस्थश्च निमेषार्द्धाद्याति नापि चिरं स्थितः ॥१०४॥
गते बहुतिथे काले प्राच्योदीच्या भृशार्दिताः । चण्डरश्मेः करव्रातपातसंतापतापिताः ॥१०५॥
पाश्चात्या दाक्षिणात्याश्च निद्रामुद्रितलोचनाः । श्रमिता एव दृश्यंते सतारग्रहमंबरम् ॥१०६॥
स्वाहास्वधावषट्कारवर्जिते जगतीतले । पंचयज्ञक्रियालोपाच्चकम्पे भुवनत्रयम् ॥१०७॥

तथा देवताओंका निवासस्थान होनेपर भी मेरु विशेष माननीय नहीं है ॥ ९० ॥ क्या पृथ्वीको धारण करनेवाले अन्य सैकड़ों पर्वत इस संसारमें नहीं हैं? क्या वे सभी पर्वत सज्जनोंके मान्य हैं? नहीं, यदि हैं भी तो केवल अपने-अपने स्थानोंपर ॥ ९१ ॥ उदयाचल मन्द है। वह राक्षसोंको आश्रय देनेकी कृपा करनेमें ही समर्थ है। निषधगिरि औषधिमात्र धारण करता है। अस्ताचल निस्तेज हो गया है ॥ ९२ ॥ नीलगिरि नीले पत्थरोंका समूहमात्र है। मन्दराचल मन्दहृष्टि है। मलय पर्वत सर्पोंका घर है। रैवत निर्धन है ॥ ९३ ॥ हेमकूट तथा त्रिकूट आदि केवल कूट उत्तरपदवाले ही हैं। किष्किंधा, क्रौञ्च और सह्य पर्वत भी पृथ्वीके बोझको धारण करनेमें समर्थ नहीं हैं ॥ ९४ ॥ विन्ध्याचलकी इस बातको सुनकर नारदने मनमें विचार किया कि गर्वीला प्राणी महत्त्वके योग्य नहीं होता ॥ ९५ ॥ क्या इस संसारमें श्रीशैल आदि पर्वत निर्मल, कान्तिसम्पन्न तथा यशस्वी नहीं हैं? जिनके शिखरको देखनेमात्रसे शुद्ध अन्तःकरणवाले महान् पुरुषोंको मुक्ति मिल जाती है ॥ ९६ ॥ अतएव आज इसके बलकी परीक्षा करनी चाहिए। ऐसा विचार करके नारद मुनिने कहा—तुमने पर्वतोंका बल ठीक वर्णन किया है ॥ ९७ ॥ पर पर्वतोंमें श्रेष्ठ मेरुपर्वत तुम्हारा अपमान करता है। वह तुमसे भी अपनेको बढ़कर मानता है। बस, यही कारण है कि मैंने लम्बा श्वास लिया था और यह बात तुमसे भी कह दी ॥ ९८ ॥ अथवा हम जैसे महात्माओंको इस बातकी क्या चिंता है। तुम्हारा कल्याण हो। इतना कहकर वे व्योममार्गसे चले गये ॥ ९९ ॥ नारद मुनिके चले जानेपर अतिशय चिन्ताकुल होकर विन्ध्यपर्वतने अपने आपको बड़ी निन्दा की और सोचने लगा कि मेरुकी इतनी वड़ी महिमा क्यों है? ॥ १०० ॥ ग्रहों तथा नक्षत्रों सहित सुर्यनारायण प्रतिदिन उसकी परिक्रमा करते हैं। सम्भवतः इसीसे उसको अपने बलाधिक्य तथा महत्त्वका अभिमान है ॥ १०१ ॥ ऐसा निश्चय करके विन्ध्याचलने उसकी समृद्धि देखनेकी इच्छासे अपना शरीर बहुत ऊपरको बढ़ाया और सूर्यके रास्तेको रोककर आकाशरूपी आँगनमें खड़ा हो गया ॥ १०२ ॥ प्रातःकाल सूर्यने दक्षिण दिशाकी ओर जानेको प्रस्थान किया। तब रास्ता रुका देखकर वे वहीं रुक गये। जब बहुत दिन बीत गये, तब सूर्यके प्रचण्ड किरणसमूहके तापसे पूर्व तथा उत्तर दिशाके लोग जलने लगे ॥ १०३–१०५ ॥ पश्चिम तथा दक्षिण दिशाके लोगोंकी आँखें निद्रासे मुँदी रहीं। वे जब

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः सुरा विधेर्वाक्यादगस्तिं तद्गिरेर्गुरुम् । प्रार्थयामासुश्चात्रैत्य स मुनिर्विह्वलोऽभवत् ॥१०८॥
तदाऽगस्तिर्मयोक्तःस गच्छ त्वं दक्षिणांदिशम्।वाक्पाशेन गिरिं बद्ध्वा मा खिद त्वं भजस्व माम्१०९
अहमप्यचिरेणैव तव खेदापनुत्तये । सेतौ श्रीरामपूजार्थं यास्यामि दक्षिणां दिशम् ॥११०॥
इति मद्वचनं श्रुत्वाऽगस्तिस्तुष्टमनास्तदा । मुक्त्वा काशीं ययौ विंध्यं लोपामुद्रासमन्वितः॥१११॥
तमगस्त्यं सपत्नीकं दृष्ट्वा विंध्योऽतिकंपितः । अतिखर्वतरो भूत्वा विविक्षुरवनीमिव ॥११२॥
आज्ञाप्रसादः क्रियतां किं करोमीति चाब्रवीत् । तद्विन्ध्यवचनं श्रुत्वाऽगस्तिः प्राह च सादरम् ॥११३॥
विन्ध्य साधुरसि प्राज्ञो मां च जानासि तत्त्वतः । पुनरागमनं चेन्मे तावत्खर्वतरो भव ॥११४॥
इत्युक्त्वा दक्षिणामाशामगस्तिः स ययौ तदा । वेपमानो गिरिः प्राह पुनर्जन्माद्य मेऽभवत् ॥११५॥
उच्छिरो द्वादशाब्दैः स मुनिं पश्यति दक्षिणे । नागतं तं मुनिं दृष्ट्वा पुनः खर्वोऽत्रतिष्ठते ॥११६॥
अद्य श्वो वा परश्वो वा ह्यागमिष्यति वै मुनिः । इति चिन्तामहाभारैर्गिरिराक्रांतवत्स्थितः ॥११७॥
नाद्यापि मुनिरायाति नाद्यापि गिरिरेधते । अरुणोऽपि च तत्काले कालज्ञोऽश्वानकालयत् ॥११८॥
जगत्स्वास्थ्यमवापोच्चैः पूर्ववद्भानुसंचरैः । स मुनिर्दण्डकं गत्वा मद्वाक्यं संस्मरन्हृदि ॥११९॥
करोति मत्प्रतीक्षां च तस्माद्यास्याम्यहं कपे । इत्युक्तो मारुतिः काश्यां मया देवि विसर्जितः॥१२०॥
जगामाकाशमार्गेण शीघ्रं रामं स मारुतिः । किंचिद्गर्वसमाविष्टो लिंगद्वयसमन्वितः ॥१२१॥
तद्गर्वं राघवो ज्ञात्वा सुग्रीवादीन् वचोऽब्रवीत् । मुहूर्तातिक्रमो मेऽद्य भविष्यति ततस्त्वहम् ॥१२२॥
कृत्वा लिंगं सैकतं च सेत्वादौ स्थापयामि वै । इत्युक्त्वा वानरान् सर्वान्मुनिभिः परिवेष्टितः ॥१२३॥

भी देखते तो आकाशमें ग्रह और नक्षत्र ही विद्यमान दिखायी देते थे ॥ १०६ ॥ संसारमें स्वाहा, स्वधाकार, वषट्कार, अग्निहोत्र तथा पंचयज्ञकी क्रियाओंके लोप हो जानेसे तीनों लोक काँप उठे ॥ १०७ ॥ पश्चात् ब्रह्माजीके कहनेसे देवताओंने जाकर विन्ध्य पर्वतके गुरु अगस्त्य मुनिसे प्रार्थना की। तब मुनि घबराकर यहाँ काशीमें आये ॥ १०८ ॥ मैंने (शिवजीने) अगस्त्य मुनिसे कहा कि तुम दक्षिण दिशाकी ओर जाओ। वहाँ जाकर विन्ध्याचलको अपने वाग्जालमें बाँधकर निश्चिन्त भावसे मेरा भजन करना ॥ १०९ ॥ कालान्तरमें मैं भी तुम्हारा खेद दूर करनेके लिए सेतुबन्धपर रामकी पूजा प्राप्त करनेके लिए शीघ्र ही दक्षिण प्रदेशमें आऊँगा ॥ ११० ॥ मेरे इस कथनको सुनकर अगस्त्यमुनि प्रसन्नतापूर्वक उसी समय काशी छोड़कर अपनी स्त्री लोपामुद्राके साथ विन्ध्यपर्वतकी ओर चल पड़े ॥ १११ ॥ सपत्नीक मुनिको देखकर विन्ध्याचल काँपने लगा और मानो पृथ्वीमें घुस जाना चाहता हो, इस प्रकार अतिशय छोटा रूप धारण करके बोला कि मैं आपका दास हूँ। मुझे कुछ आज्ञा देनेकी कृपा करें। विन्ध्यकी बात सुनकर अगस्त्य मुनि बोले—॥ ११२ ॥ ॥ ११३ ॥ हे विन्ध्य ! तुम साधु पुरुष तथा बुद्धिमान् हो और मुझे भली भाँति जानते हो। अतः जबतक मैं उधरसे लौटकर पुनः यहाँ न आऊँ, तब तक तुम इसी प्रकार वामनरूपसे नीचा सिर किये खड़े रहो ॥११४॥ इतना कहकर अगस्त्य दक्षिणकी ओर चले गये। तब कम्पित होकर विन्ध्यने कहा कि आजके दिन मेरा पुनर्जन्म हुआ है ॥ ११५ ॥ बारह वर्ष बाद जब उसने सिर उठाकर दक्षिणकी ओर देखा तो मुनि नहीं दिखायी दिये। तब फिर उसने वैसे ही नीचा सिर कर लिया ॥ ११६ ॥ आज, कल या परसोंतक मुनिको यहाँ अवश्य आ जाना चाहिये। इस प्रकार सोचता हुआ विन्ध्य बड़ी चिन्ता करने लगा ॥ ११७ ॥ पर न वे मुनि आज तक आये और न पर्वत खड़ा हुआ। कालकी गतिको जाननेवाले सूर्यके सारथी अरुणने भी उसी समय अपने घोड़ोंको हाँक दिया ॥ ११८ ॥ तब सूर्यके संचारसे जगत् पूर्ववत् पुनः स्वस्थ हुआ। वे अगस्त्य मुनि दण्डकवनमें जाकर मेरे वचनका स्मरण करते हुए मेरी प्रतीक्षा कर रहे हैं। इस कारण हे कपि हनुमान् ! मैं वहाँ अवश्य जाऊँगा। हे देवि ! इतना कहकर मैंने मारुतिको काशीसे विदा किया ॥ ११९ ॥ १२० ॥ तब मारुति शीघ्र आकाशमार्गसे रामके पास चले। उस समय मेरे दो लिंग प्राप्त करके उनके मनमें कुछ अभिमान हुआ ॥ १२१ ॥ रामने इस गर्वको जान लिया और सुग्रीव आदिसे कहा कि प्रतिष्ठाका मुहूर्त बीता जा रहा है। इसलिए मैं बालूका लिंग बनाकर सेतुके इस छोरपर स्थापित किये देता हूँ। तदनुसार सब मुनियों और

CC0. In Public Domain Kritikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सैकतं स्थापयामास लिङ्गं रामो विधानतः। तदा सस्मार मनसि कौस्तुभं रघुनन्दनः ॥१२४॥
तावद्ययौ मणिः शीघ्रं खात्कोटितपनोपमः। तं बबंध मणिं कण्ठे कौस्तुभं रघुनन्दनः ॥१२५॥
मण्युद्भवैर्धनैर्वस्त्रैरश्वाभरणधेनुभिः। दिव्यान्नैः पायसाद्यैश्च पूजयामास तान् मुनीन् ॥१२६॥
ततस्ते मुनयस्तुष्टा राघवेणातिपूजिताः। ययुः स्वीयाश्रमान् मार्गे तान्ददर्श स मारुतिः ॥१२७॥
पप्रच्छ मारुतिर्विप्रान् यूयं केन प्रपूजिताः। तेऽप्यूचुर्लिङ्गमाराध्य राघवेणैव पूजिताः ॥१२८॥
तत्तेषां वचनं श्रुत्वा क्रोधाविष्टोऽभ्यचिंतयत्। वृथाऽहं श्रमितस्तेन रामेणाद्य प्रतारितः ॥१२९॥
इत्थं वदन्ययौ रामं क्रोधात्स्वीयं पदद्वयम्। भुवि संताड्य पतितस्तदा भूम्यां पदद्वयम् ॥१३०॥
गतं कपिस्तदा राममब्रवीत्किं न मे स्मृतः। सीताशुद्धिर्मया लंकां गत्वानीतेति साऽद्य हि ॥१३१॥
तस्य मेऽद्योपवासोऽत्र काशीं प्रेष्य त्वया कृतः। किमर्थं श्रमितश्चाहं यदीत्थं ते हृदि स्थितम् ॥१३२॥
अभविष्यन्मया ज्ञातं चेत्पूर्वं हृद्गतं तव। काशीमहं तर्हि गत्वा किमर्थं लिंगमानये ॥१३३॥
एकं त्वदर्थमानीतमपरं लिंगमुत्तमम्। मयाऽऽत्मार्थं समानीतं तवाग्रे किं करोम्यहम् ॥१३४॥
एवं क्रोधयुतं वाक्यं किंचिद्गर्वसमन्वितम्। रामः श्रुत्वा कपिं प्राह कपे त्वं सत्यवागसि ॥१३५॥
यथैतत्स्थापितं लिंगं समुत्पाटय त्वं बलात्। स्थापयामि त्वयानीतं काश्या विश्वेश्वराभिधम् ॥१३६॥
तथेत्युक्त्वा मारुतिः स सैकतस्येश्वरस्य च। संवेष्ट्य मस्तके पुच्छं बलेनान्दोलयन्मुहुः ॥१३७॥
त्रुटितं तत्कपेः पुच्छं पपात भुवि मूर्छितः। जहसुर्वानराः सर्वे न चचालेश्वरस्तदा ॥१३८॥
स्वस्थो भूत्वा मारुतिः स गतगर्वस्तदाऽभवत्। ननाम परया भक्त्या प्रार्थयामास तं मुहुः ॥१३९॥
मायाऽपराधितं राम तत्क्षमस्व कृपानिधे। तदाह मारुतिं रामस्त्वं मल्लिंगोत्तरे त्विदम् ॥१४०॥

वानरोंको बुलाकर रामने विधिवत् बालूके लिंगको स्थापित कर दिया। पश्चात् भगवान् रामने कौस्तुभ मणिका स्मरण किया ॥ १२२–१२४ ॥ स्मरण करते ही करोड़ों सूर्यके समान प्रभाशाली वह मणि आकाशमार्गसे आ गया। तब रघुनन्दन रामने उस मणिको कंठमें बाँध लिया ॥ १२५ ॥ उस मणिसे प्राप्त धन, वस्त्र, आभरण, अश्व, धेनु, दिव्य पकवान तथा पायस आदिसे रामने मुनियोंका पूजन-सत्कार किया ॥ १२६ ॥ श्रीरामसे पूजा प्राप्त करके प्रसन्न वे मुनि अपने-अपने आश्रमोंको जा रहे थे, तभी रास्तेमें उन्हें मारुतिने देख लिया ॥ १२७ ॥ तब हनुमान्‌ने उनसे पूछा कि आपकी पूजा किसने की है? उन्होंने उत्तर दिया कि रामने शिवलिंगकी आराधना तथा स्थापना करके हम लोगोंकी पूजा की है ॥ १२८ ॥ हनुमान्‌ने उनकी बात सुनी तो क्रुद्ध होकर विचारने लगे कि रामने आज मुझसे व्यर्थ इतना परिश्रम कराके ठगा है ॥ १२९ ॥ यह विचारते हुए वे क्रोधसे रामके पास गये और जोरसे उन्होंने अपने दोनों पाँवोंको जमीनपर पटका। इससे उनके दोनों पाँव पृथ्वीमें धँस गये। बादमें हनुमान्‌ने रामसे कहा कि क्या आपको मेरा स्मरण नहीं था? जिस हनुमान्‌ने लंकामें सीताकी खोज की थी और लौटकर आपको उनकी खबर दी थी ॥ १३० ॥ १३१ ॥ उसी हनुमान्‌को आज आपने काशी भेजकर ऐसा उपहास किया? यदि आपके मनमें यही था तो फिर मुझे इस तरह व्यर्थ क्यों सताया? ॥ १३२ ॥ यदि मुझे आपका अभिप्राय ज्ञात हो जाता तो मैं कभी काशी जाकर ये दो शिवलिंग न लाता ॥ १३३ ॥ इनमेंसे एक आपके लिए और दूसरा उत्तम शिवलिंग अपने लिये ले आया हूँ। अब मैं इस आपवाले शिवलिंगको क्या करूँ! ॥ १३४ ॥ इस प्रकार कुछ क्रोध तथा गर्वयुक्त हनुमान्‌का वाक्य सुनकर रामने कहा कि हे कपे! तुम्हारा कहना सत्य है ॥ १३५ ॥ अब तुम यदि इस मेरे स्थापित लिंगको पूँछमें लपेटकर उखाड़ लो तो मैं तुम्हारे काशीसे लाये हुए विश्वेश्वरलिंगको यहाँ पुनः स्थापित कर दूँ ॥ १३६ ॥ 'बहुत अच्छा' कहकर हनुमान्‌ने उस बालूके लिंगके ऊपरी भागमें पूँछ लपेटकर बारम्बार खूब जोरसे हिलाया ॥ १३७ ॥ जिससे सहसा उनकी पूँछ टूट गयी। वे जमीनपर गिर पड़े और मूर्छित हो गये। परन्तु बालूका लिंग तनिक भी नहीं हिला। यह देखकर सब वानर हँसने लगे ॥ १३८ ॥ पश्चात् मारुति स्वस्थ हो तथा गर्व छोड़कर भक्तिसे रामको नमस्कार करके प्रार्थना करने लगे— ॥ १३९ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वनाथाभिधं लिंगं स्वीयं संस्थापयाधुना । तथेति मारुतिर्लिङ्गं स्थापयामास सादरम् ॥१४१॥
मारुतेश्चैव लिंगाय ददौ रामो वरं तदा । असंपूज्य विश्वनाथं मारुते त्वत्प्रतिष्ठितम् ॥१४२॥
मत्पादौ पूजयंत्यत्र ये नरा लिङ्गमुत्तमम् । रामेश्वराभिधं सेतौ तेषां पूजा वृथा भवेत् ॥१४३॥
इत्युक्त्वा तं पुनः प्राह रामो राजीवलोचनः । मदर्थं यत्समानीतं त्वया लिङ्गं महत्तमम् ॥१४४॥
विश्वनाथस्य तत्तूष्णामस्तु देवालये चिरम् । अनर्चितमवन्यां तदप्रतिष्ठितमुत्तमम् ॥१४५॥
अग्रे कालान्तरेणाहं तच्चापि स्थापयामि वै । तत्तत्र वर्ततेऽद्यापि लिङ्गं विश्वेश्वरान्तिके ॥१४६॥
अप्रतिष्ठापितं भूम्यां न केनापि प्रपूजितम् । पुनः प्राह कपिं रामस्त्वमत्र छिन्नलांगुलः ॥१४७॥
वस भूम्यां गुप्तपादः स्मरन्स्वगर्वितं त्विदम् । ततः कपिः स्वीयमूर्तिं स्थापयामास स्वांशतः ॥१४८॥
छिन्नपुच्छा गुप्तपादा सा तत्राद्यापि वर्तते । पतितो मूर्च्छितो यत्र मारुतिस्तत्र तद्वरम् ॥१४९॥
बभूव मारुतेर्नाम्ना तीर्थं पापप्रणाशनम् । रामस्तत्राकरोत्पुण्यं स्वनाम्ना तीर्थमुत्तमम् ॥१५०॥
स्वांशेन स्थापयामास मूर्तिं तत्र रघूद्वहः । सेतुमाधवनाम्नी सा वर्ततेऽद्यापि पार्वति ॥१५१॥
स्वनाम्ना लक्ष्मणश्चापि चकार तीर्थमुत्तमम् । ततो रामः स्वहस्तेन स्पृष्ट्वा मारुतिलांगुलम् ॥१५२॥
चकार पूर्ववद्रम्यं दृढसन्धिप्रसादितः । तत्पुच्छवेष्टनाज्जातः कृशो रामेशमस्तकः ॥१५३॥
स तथैव कृशोऽद्यापि तत्रास्ति शिवमस्तकः । तदारभ्य त्यक्तगर्वश्चाभूद्रामे स मारुतिः ॥१५४॥
ततोऽहं सैकताल्लिङ्गादाविर्भूय रघूद्वहम् । अब्रुवं देवि तत्सर्वं शृणुष्व ते वदाम्यहम् ॥१५५॥
राघवेन्द्र रघुश्रेष्ठ शृणु वृत्तं पुरातनम् । एकदाऽहं पुरा भूम्यां मलिनाम्बरसंयुतः ॥१५६॥
भिक्षार्थं कौतुकाद्विप्ररूपेणाविचरं सुखम् । ऋषीणामाश्रमाद्येषु ह्यटंतं मां विलोक्य च ॥१५७॥

हे राम ! मेरा जो अपराध हुआ हो, उसे क्षमा करें। क्योंकि आप कृपानिधि हैं। तदनन्तर रामने कहा—हे मारुति ! तुम मेरे स्थापित लिङ्गसे उत्तरकी ओर इस विश्वनाथ नामके अपने लिङ्गको स्थापित करो। 'तथास्तु' कहकर मारुतिने सादर शिवलिङ्गकी स्थापना कर दी ॥१४०॥१४१॥ तब रामने उस मारुतिलिङ्गको वरदान देते हुए कहा—हे मारुते ! तुम्हारे द्वारा स्थापित विश्वनाथलिङ्गकी पूजा किये बिना जो सेतुबंधरामेश्वरकी पूजा करेगा, उसकी पूजा व्यर्थ हो जायगी ॥ १४२ ॥ १४३ ॥ इतना कहकर रामने फिर हनुमान्से कहा कि जो तुम मेरे लिए उत्तम लिङ्ग लाये हो ॥ १४४ ॥ वह विश्वनाथलिङ्ग यों ही इस देवालयमें पड़ा रहे। बहुत कालतक यह उत्तम लिङ्ग धरतीपर अपूजित ही पड़ा रहेगा ॥ १४५ ॥ आगे चलकर बहुत दिनों बाद उसकी भी मैं अवश्य स्थापना करूँगा। वह लिङ्ग अभी भी वहाँ विश्वेश्वरलिङ्गके पास पड़ा हुआ है ॥ १४६ ॥ न अभी उसकी प्रतिष्ठा हुई है और न कोई उसकी पूजा ही करता है। रामने फिर हनुमान्से कहा कि तुम्हारी पूँछ यहींपर छिन्न हुई है। अतः तुम यहींपर भूमिमें छिन्नपुच्छ तथा गुप्तपाद होकर अपने गर्वका स्मरण करते हुए पड़े रहो। तब हनुमान्ने अपने अंशसे वहीं अपनी मूर्ति स्थापित कर दी ॥ १४७ ॥ १४८ ॥ अभी भी वहाँ हनुमान्की छिन्नपुच्छ और गुप्त पाँवकी मूर्ति विद्यमान है। जहाँपर मारुति मूर्छित होकर गिरे थे, वह उत्तम स्थान मारुतिके नामसे पवित्र तथा पापोंको नष्ट करनेवाला तीर्थ प्रसिद्ध हुआ। वहाँ ही रामने भी अपने नामसे एक उत्तम तीर्थ बनाया ॥ १४९ ॥ १५० ॥ रामने वहाँ अपने अंशकी एक मूर्ति भी स्थापित कर दी। सेतुमाधव नामकी वह मूर्ति अभी भी वहाँ प्रस्तुत है ॥ १५१ ॥ हे पार्वति ! लक्ष्मणने भी वहाँ अपने नामका उत्तम तीर्थ स्थापित किया। पश्चात् रामने अपने हाथसे छूकर हनुमान्की पूँछको पूर्ववत् सुन्दर तथा दृढ़ सन्धियुक्त बनाकर हनुमान्को प्रसन्न कर लिया। पूँछसे लपेटे जानेके कारण रामेश्वरका मस्तक कुछ दब गया था ॥ १५२ ॥ १५३ ॥ वह शिवमस्तक अभी भी वैसा ही चिपटा है। तबसे हनुमान् रामके समक्ष सर्वथा गर्वरहित हो गये ॥ १५४ ॥ हे देवि ! उस समय बालूके लिङ्गमेंसे प्रकट होकर मैंने रघुद्वह रामसे जो कुछ कहा था, वह सब तुमको सुनाता हूँ। ध्यान देकर सुनो ॥ १५५ ॥ मैंने कहा—हे राघवेन्द्र ! हे रघुश्रेष्ठ ! तुम्हें मैं एक प्राचीन इतिहास सुनाता हूँ। एक समय कौतुकवश मैं पुराने कपड़े पहिन तथा ब्राह्मणका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मद्रूपमोहिताः सर्वा ऋषिपत्न्यः सहस्रशः । मत्पृष्ठे ताः समाजग्मुर्भर्तृभिर्वारिता अपि ॥१५८॥
तदा ते चुक्षुभुः सर्वे मामज्ञात्वा मुनीश्वराः । ददुः शापं महाघोरं क्रोधसंविग्नमानसाः ॥१५९॥
रत्यर्थं मोहिता नार्यस्त्वया तस्माद्द्विजाधम । पतत्वद्य रतेरंग लिंगं भुवि च नो गिरा ॥१६०॥
एवं द्विजैर्यदा शप्तोऽपतल्लिंगं तदा भुवि । द्विजच्छद्मस्य मे राम गतोऽहं गुप्ततां तदा ॥१६१॥
द्विजनार्योऽप्यदृष्ट्वा मां जग्मुः स्वं स्वं गृहं प्रति । तल्लिंगं ववृधे भूम्यां गगनं व्याप्य संस्थितम् ॥१६२॥
तद्दृष्ट्वा चकितो वेधास्तस्यांत द्रष्टुमुद्यतः । पश्यतस्तस्य कोट्यब्दैर्नान्तमसीच्च वेधसः ॥१६३।
तदा मामेत्य स विधिर्भयाद्वृत्तं न्यवेदयत् । अकाले प्रलयस्त्वद्य शम्भोऽनेन भविष्यति ॥१६४॥
तदा मया पूर्ववृत्तं विधिं सश्राव्य सादरम् । त्रिशूलो वेधसे दत्तस्तं छेत्तुं सोऽब्रवीच्च माम् ॥१६५॥
कथं तेऽङ्गं दारयेऽहं त्वमेव छेत्तुमर्हसि । ततो मयार्कखंडानि कृतानि तस्य राघव ॥१६६॥
त्रिशूलेनापि क्षिप्तानि भूम्यां निपतितानि हि । तज्ज्ञातान्यत्र लिंगानि ज्योतिःसंज्ञानि द्वादश ॥१६७॥
ॐकारः सोमनाथश्च त्र्यम्बको मल्लिकार्जुनः । नागेशो वैद्यनाथश्च काशीविश्वेश्वरस्त्वहम् ॥१६८॥
केदारेशो महाकालो भीमेशो घूसृणेश्वरः । एवमेकादश ज्ञेया ज्योतिर्लिङ्गमयाः शुभाः ॥१६९॥
गन्धमादननाम्नेशो मेरोरीशानदिक्स्थितः । आसीच्चिरं न कस्यापि मानवस्याक्षिगोचरः ॥१७०॥
तदा ते मुनयः सर्वे शिवं बुद्ध्वा तु लिङ्गतः । ददुर्वरं पुनर्लिङ्गं तवास्तु गिरिजाप्रिय ॥१७१॥
ततः प्रलयवातेन गन्धमादननामकम् । तन्मेरोरुत्तरे शृङ्गमेकदाऽत्रापतद्भुवि ॥१७२॥
तदिदं ह्यब्धिसंयोगे दक्षिणे सागरांभसि । गन्धमादननाम्नेदं शृंगं पश्यात्र राघव ॥१७३॥
गन्धमादननाम्नेशं लिंगं द्वादशमं त्विदम् । त्वत्प्रतिष्ठितलिंगस्य हीशान्यामन्तिके स्थितम् ॥१७४॥

रूप धरकर आनन्दसे भिक्षाके लिए पृथिवीपर विचर रहा था। इस प्रकार ऋषियोंके आश्रममें घूमता हुआ मुझे देखकर सैकड़ों ऋषिपत्नियाँ मेरे रूपपर मोहित हो गयीं। पतियोंके रोकनेपर भी वे नहीं रुकी और मेरे पीछे-पीछे घूमने लगीं ॥ १५६-१५८ ॥ तब वे सब मुनीश्वर मुझे न पहिचानकर बहुत चकराये और क्रुद्ध होकर उन्होंने मुझे बड़ा भयानक शाप दे दिया ॥ १५९ ॥ उन्होने कहा—अरे अधम ब्राह्मण ! तूने रति करनेके लिए हमारी स्त्रियोंको मोहित कर लिया है। इससे तेरे रतिका साधन अङ्ग अर्थात् लिङ्ग हमारे कहनेसे कटकर जमानपर गिर पड़े ॥ १६० ॥ हे राम ! उनके शापसे द्विजवेशधारी मेरा लिङ्ग कटकर तुरन्त जमीनपर गिर पड़ा। बादमें मैं अन्तर्धान हो गया ॥ १६१ ॥ मुझे न देखकर वे द्विजोंकी स्त्रियें भी अपने-अपने घर चली गयीं। तदनन्तर वह लिङ्ग इस प्रकार बढ़ा कि आकाश तक व्याप्त हो गया ॥१६२॥ यह देखकर ब्रह्मा बहुत चकित हुए और उसका अन्त देखनेके लिए उद्यत हो गये। करोड़ों वर्ष तक पता लगानेपर भी ब्रह्माको जब मेरे लिङ्गका अन्त नहीं मिला ॥ १६३ ॥ तब मेरे पास आकर डरते हुए उन्होंने कहा—हे शंभो ! इससे तो अकालमें ही प्रलय होना चाहता है ॥ १६४ ॥ मैंने ब्रह्माको पूर्व वृत्तांत सुनाकर सादर उनके हाथमें उस लिङ्गको काटनेके लिए अपना त्रिशूल दे दिया। तब ब्रह्माने कहा—॥ १६५ ॥ मैं भला आपके अगका कैसे काट सकता हूँ। आप ही इसे काटें। हे राघव ! तब मैंने उस लिंगके बारह टुकड़े कर डाले ॥ १६६ ॥ फिर त्रिशूलसे ही उठाकर उनको पृथ्वीपर इधर-उधर फेंक दिया। वे ही बारहों टुकड़े यहाँपर बारह ज्योतिर्लिङ्ग नामसे विख्यात हुए ॥ १६७ ॥ ओंकारनाथ, सोमनाथ, त्र्यम्बकेश्वर, मल्लिकार्जुन, नागेश, वैद्यनाथ, काशीविश्वनाथ, केदारनाथ, केदारेश्वर, महाकाल, और घुसृणेश्वर ये ग्यारह शुभ ज्योतिर्लिङ्ग है ॥ १६८ ॥ १६९ ॥ बारहवाँ लिङ्ग गंधमादन पर्वतके ईशान कोणवाले शिखरपर बहुत काल तक स्थित रहकर भी किसी मनुष्यको दृष्टिमें नहीं आया ॥ १७० ॥ तब मुनियोंने लिंगके द्वारा शिवको पहिचानकर पुनः वर दिया—हे गिरिजाप्रिय ! तुम्हारे फिर लिंग हो जाय ॥ १७१ ॥ तदनन्तर एक समय वह मेरुका गंधमादन नामक उत्तरी शिखर प्रलयवायुसे उड़कर यहाँ आ गिरा ॥ १७२ ॥ हे राघव ! उस गंधमादन शिखरको तुम यहाँ दक्षिणी समुद्रके संगमपर जलमें देख सकते हो ॥ १७३ ॥ बारहवाँ गंधमादन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतावत्कालपर्यंतं नेदं कैश्चिद्विलोकितम् । अद्य त्वया वानराद्यैर्दृष्टं स्पृष्टं विमोक्षदम् ॥१७५॥
त्वत्प्रतिष्ठितलिंगस्य प्रसादादवनीतले । ख्यातिं गतं त्विदं लिंगं यस्मात्तस्माद्रघूत्तम ॥१७६॥
अस्य लिंगस्य यज्ज्योतिर्मदीयं त्वत्प्रतिष्ठिते । यास्यत्यद्य सैकतेऽत्र लिंगे सेतौ गिरा मम ॥१७७॥
ज्योतिर्लिङ्गं द्वादशमं तव रामेश्वराभिधम् । वदंत्यत्र जनाः सर्वे ह्यद्यारभ्य रघूत्तम ॥१७८॥
पूजोत्सवादिकं कर्म यद्यत्किंचिद्गिरा मम । तवैव लिंगे तत्सर्वमस्तु रामेश्वरे सदा ॥१७९॥
अहं चापि मुनेर्वाक्यादगस्तेस्त्वद्गिरापि च ।त्यक्त्वा काशीमागतोऽस्मि त्वल्लिङ्गेऽस्मिन्वसाम्यहम् ॥
प्रणमेत्सेतुबंधे यः पुमान् रामेश्वरं शिवम् । ब्रह्महत्यादिपापेभ्यो मुच्यते तदनुग्रहात् ॥१८१॥
त्वं वदाद्य रघुश्रेष्ठ वरं येन जनाः सदा । स्नानार्थमानयिष्यन्ति मणिकर्णिजलं मम ॥१८२॥
ममैतद्वचनं श्रुत्वा प्रसन्नो रघुनायकः । जगाद स्नात्वा सेतुबंधे रामेशं परिपश्यति ॥१८३॥
संकल्प्य नियतो भूत्वा गृहीत्वा सेतुबालुकाम् । करंडिकाभिर्यत्नेन गत्वा वाराणसीं शुभाम् ॥१८४॥
क्षिप्त्वा तां बालुकां त्यक्त्वा वेण्यां बालुकरंडिकाम् ।
आनीय गंगासलिलं रामेशमभिषिच्य च ॥१८५॥
समुद्रे त्यक्तत्द्भारो ब्रह्म प्राप्नोत्यसंशयम् । संकल्पेन बिना गंगा रामेशं नागमिष्यति ॥१८६॥
आगता चेत्तदा ज्ञेयः संकल्पः पूर्वजन्मनि । कुतोऽस्तीत्यत्र मद्वाक्यान्नात्र कार्या विचारणा ॥१८७॥
एवं नानावरान्रामो यावल्लिंगाय सोऽब्रवीत् । तावत्तत्र समायातः कुम्भजन्मा मुनीश्वरः ॥१८८॥
ननाम शंकरो रामं रामोऽपि प्रणनाम तम् । तदा मुनिः प्राह रामं प्रसादात्तव राघव ॥१८९॥
दर्शनं विश्वनाथस्य जातं मेऽद्यात्र वै चिरात् । अद्यात्र तुष्टिर्जाता मे लिंगमत्र करोम्यहम् ॥१९०॥
इत्युक्त्वा स्थापयामास स्वनाम्ना लिंगमुत्तमम् । रामेश्वराग्निदिग्भागे कुंभजन्मा मुदान्वितः ॥१९१॥

लिंग तुम्हारे प्रतिष्ठित लिंगकी ईशानदिशामें पास ही विद्यमान है ॥ १७४ ॥ इतने समय तक इसको किसीने नहीं देखा था। पर आज वानरसहित तुमने इस मोक्षप्रद लिंगको स्पष्ट देख लिया है ॥ १७५ ॥ तुम्हारे द्वारा स्थापित लिंगकी महिमासे ही पृथ्वीपर इसकी प्रसिद्धि हुई है। इस कारण हे रघूत्तम ! इस लिंगकी जो ज्योति है, वह ज्योति तुम्हारे द्वारा स्थापित बालुकामय लिंगमें मेरे कहनेसे आज ही चली आयगी ॥ १७६ ॥ १७७ ॥ हे रघूत्तम ! आजसे बारहवाँ ज्योतिर्लिङ्ग तुम्हारा स्थपित रामेश्वर ही दुनियाँके सब मनुष्योमें प्रसिद्ध होगा ॥ १७८ ॥ मेरे वचनसे पूजा आदि सब उपचार सदा तुम्हारे रामेश्वर लिंगका ही होगा ॥ १७९ ॥ मैं भी अगस्त्य मुनिके तथा तुम्हारे कहनेसे काशी छोड़कर यहाँ आ गया हूँ और अब तुम्हारे इस लिंगमें ही निवास करूँगा ॥ १८० ॥ जो मनुष्य सेतुबन्ध रामेश्वरको प्रणाम करेगा, वह मेरी कृपासे ब्रह्महत्या आदि भयानक पापोंसे भी मुक्त हो जायगा ॥ १८१ ॥ हे रघुश्रेष्ठ ! आप मुझे यह वर दें कि सब लोग मुझे स्नान करानेके लिए सदा काशीकी मणिकर्णिकाका जल लाकर चढ़ाया करें ॥ १८२ ॥ हे पार्वती ! मेरे इस वचनको सुनकर श्रीराम हर्षित होकर बोले कि जो मनुष्य सेतुबंधमें स्नान करके रामेश्वर शिवका दर्शन करेंगे ॥ १८३ ॥ फिर दृढ़ संकल्पसे सेतुकी बालुकाको काँवरमें रखकर प्रेम तथा यत्नसे काशीमें ले जाकर गंगाके प्रवाहमें डालेंगे और उस काँवरको वहीं छोड़कर दूसरी काँवरके द्वारा गंगाजल लाकर उससे रामेश्वरका अभिषेक करेंगे ॥ १८४ ॥ १८५ ॥ वहाँ उस काँवरको भी समुद्रमें फेंककर निःसंदेह ब्रह्मपदको प्राप्त होंगे। जबतक दृढ़ संकल्प न होगा, तब तक रामेश्वर आना न होगा ॥ १८६ ॥ कदाचित् कोई आगया तो यही जानना चाहिए कि उसके पूर्वजन्मका संकल्प था। मेरे कहनेसे आप इस बातमें तनिक भी संदेह न करें ॥ १८७ ॥ इस प्रकार राम जब अनेक वर दे रहे थे, तभी वहाँ कुम्भजन्म (अगस्त्य) मुनि आ पहुँचे ॥ १८८ ॥ उन्होंने वहाँ आकर शिव तथा रामको प्रणाम किया। तब रामने भी मुनिको प्रणाम किया। अगस्त्य मुनिने रामसे कहा— हे राघव ! आपके अनुग्रहसे मुझे आज बहुत दिनके बाद विश्वनाथका दर्शन प्राप्त हुआ है। इससे मुझे बड़ी प्रसन्नता हो रही है। इसलिए मैं भी यहाँ एक लिंग स्थापित करता हूँ ॥ १८९ ॥ १९० ॥ इतना कहकर अगस्त्य मुनिने भी अपने नामसे एक उत्तम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूजयामास तल्लिंगमगस्तीश्वरनामकम् । नत्वा स्तुत्वा विश्वनाथं रामं रामेश्वरं तथा ॥१९२॥
दृष्ट्वा पुरातनं लिंगं गंधमादननामकम् । ययौ स्वीयाश्रमं तुष्टः कुंभजन्मा मुनीश्वरः ॥१९३॥
सेतौ रामेश्वरस्यैव देवि देवालये शुभे । दिश्याग्नेय्यामगस्तीशमीशान्यां गंधमादनम् ॥१९४॥
वर्तें तेऽद्यापि द्वे लिंगे कश्चिज्जानाति वा न वा । प्रसिद्धोऽभूच्च रामेशः स्वर्गमृत्युरसातले ॥१९५॥
ततो रामाज्ञया सेतुं नलः कर्तुं मनो दधे । किंचिद्गर्वसमाविष्टस्तज्ज्ञातं राघवेण हि ॥१९६॥

यावदेकां शिलां त्यक्त्वा नलोऽन्यां प्राक्षिपच्छिलाम् ।
तावत्तरंगकल्लोलैः सागरस्य इतस्ततः ॥१९७॥

गच्छंतिस्म शिलाः सर्वास्ता दृष्ट्वा खिन्नमानसः। गतगर्वस्तदा रामं नलो वृत्तं न्यवेदयत् ॥१९८॥
रामः श्रुत्वा नलं प्राह रामेति द्वेऽक्षरे मम । दृषदोः संधिसिद्ध्यर्थं पृथग्विलिखतां द्वयोः ॥१९९॥
सर्वत्रैवं लिखित्वा हि दृढ़ः संधिर्भविष्यति । तथेति रामवचनात्तथा चक्रे नलस्तदा ॥२००॥
कृतः पंचदिनैः सेतुः शतयोजनमुत्तमः । कृतानि प्रथमेनाह्ना योजनानि चतुर्दश ॥२०१॥
द्वितीयेन तथा चाह्ना योजनानां च विंशतिः । तृतीयेन तथा चाह्ना योजनान्येकविंशतिः ॥२०२॥
चतुर्थेन तथा चाह्ना द्वाविंशतिरिति श्रुतम् । पंचमेन त्रयोविंशद्योजनानां शतं त्विति ॥२०३॥
विस्तृतो द्वादश प्रोक्तो योजनानि दृषन्मयः । एवं बबंध सेतुं स नलो वानरसत्तमः । २०४॥
ये मज्जंति निमज्जयंति च परान् ते प्रस्तरा दुस्तरे वार्धौ येन तरंति वानरभटान् संतारयंतेऽपि च ।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते२०५॥
तेनैव जग्मुः कपयो योजनानां शतं द्रुतम् । आरुह्य मारुतिं रामो लक्ष्मणोऽप्यंगदं तथा ॥२०६॥
जगाम वायुवल्लंकासंनिधिं सेनया वृतः । असंख्याताः सुवेलाद्रिं रुरुहुः प्लवगोत्तमाः ॥२०७॥

लिङ्ग स्थापित किया । मुनिने आनन्दके साथ रामेश्वरके अग्निकोणमें उसकी स्थापना की ॥ १९१ ॥ इस प्रकार मुनिने अगस्तीश्वर नामक लिंगकी पूजा करके विश्वनाथ, रामेश्वर एवं श्रीरामकी स्तुति तथा प्रणाम करनेके अनन्तर पुरातन गंधमादन लिंगका दर्शन किया और प्रसन्न होकर अपने आश्रमको चले गये ॥ १९२ ॥ १९३ ॥ हे देवि ! सेतुबंध रामेश्वरके देवालयमें ही आग्नेयकोणमें अगस्तीश्वर तथा ईशानकोणमें गन्धमादनेश्वरका लिंग अभी भी विद्यमान है । उन्हें कोई इन नामोंसे जानता है और कोई नहीं भी जानता । रामेश्वरका लिंग स्वर्ग, पाताल तथा मृत्यु इन तीनों लोकोंमें प्रसिद्ध हो गया ॥ १९४ ॥ तदनन्तर रामकी आज्ञासे नलने कुछ गर्वयुक्त होकर पुल बाँधना आरम्भ कर दिया । रामको इस गर्वका पता लग गया ॥ १९५ ॥ १९६ ॥ इसके बाद नलने जलमें एक पत्थर डालकर दूसरा ज्यों ही डाला, त्यों ही समुद्रकी तरंगित लहरियोंसे सब शिलाएँ इधर-उधर छितराने लगीं । यह देखा तो खिन्नमन हो तथा गर्व त्यागकर नल रामके पास गये और सब वृत्तान्त निवेदन किया ॥ १९७ ॥ १९८ ॥ यह सुनकर रामने नलसे कहा कि मेरे नामके 'रा म' ये दो अक्षर पत्थरोंको एक साथ मिलानेके लिये दोनों शिलाओंकी बगलमें लिख दो ॥ १९९ ॥ ऐसा लिख देनेसे सब एक दूसरेके साथ दृढ़तासे जुड़ जायँगे और संधि (साँस) न रहेगी । नलने भी 'तथास्तु' कहकर रामके कथनानुसार ही किया ॥ २०० ॥ ऐसा करनेपर पाँच दिनमें सौ योजन लम्बा, सुन्दर और दृढ़ सेतु बन गया । पहिले दिन चौदह योजन, दूसरे दिन बीस, तीसरे दिन इक्कीस, चौथे दिन बाईस और पाँचवें दिन तेईस योजन पुल बँधा । इस प्रकार सौ योजन पूरे हो गये ॥ २०१–२०३ ॥ उसमें भी बारह योजन एकमात्र पत्थरका ही पक्का पुल बनाया गया । इस तरह वानरोत्तम नलने सेतु बाँधकर तैयार किया ॥ २०४ ॥ जो पत्थर स्वयं डूबते और दूसरोंको डुबाते हैं, वे ही दुस्तर समुद्रमें स्वयं तैरने तथा दूसरोंको तारने लग गये । यह गुण न पत्थरका है, न समुद्रका और न वानरोंका । परन्तु यह गुण तो केवल दशरथतनय रामका ही है । जिनकी महिमा सर्वत्र व्याप्त हो रही है ॥ २०५ ॥ उस पु के द्वारा वानरगण सौ योजन सागर शीघ्र ही पार कर गये । राम हनुमान्‌के कंधे तथा लक्ष्मण अंगदके कंधेपर चढ़कर वायुवेगसे सेनाके साथ लंकाके पास

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः सैन्ययुतो रामः सुवेलाद्रिं ययौ मुदा । दिदृक्षू राघवो लंकामारुरोहाचलं शुभम् ॥२०८॥
सुवेलाद्रिं महारम्यं तरुवल्लिविराजितम् । ददर्श लंकां विस्तर्णां रामश्चित्रध्वजाकुलाम् ॥२०९॥
चित्रप्रासादसंबाधां स्वर्णप्राकारतोरणाम् । परिखाभिः शतघ्नीभिः संक्रमैश्च विराजिताम् ॥२१०॥
प्रासादोपरि विस्तीर्णप्रदेशे दशकन्धरम् । पश्यंतं कपिसैन्यं तं सन्ददर्श रघूद्वहः ॥२११॥
ततो रामेण मुक्तः स शुको गत्वा दशाननम् । कपिसैन्यं दर्शयंस्तं बोधयामास रावणम् ॥२१२॥
सीतां प्रयच्छ रामाय लंकाराज्ये विभीषणम् । कृत्वा तं शरणं याहि नो चेद्रामान्न मोक्ष्यसे ॥२१३॥
तच्छ्रुत्वा रावणः क्रोधाच्छुकं धिक्कृत्य वै मुहुः। दूतैर्गेहाद्बहिः कृत्वा रामसेनां व्यलोकयत् ॥२१४॥
शुकोऽपि ब्राह्मणः पूर्वं वरिष्ठो ब्रह्मवित्तमः । अयजत् क्रतुभिर्देवान् विरोधो राक्षसैरभूत् ॥२१५॥
वज्रदंष्ट्र इति ख्यातस्तदैको राक्षसो महान् । मांसान्नं याचितं दृष्ट्वा मुनिना कुंभजन्मना ॥२१६॥
शुकभार्यावपुर्धृत्वा नरमांसं समर्पयत् । तदा शप्तः शुकस्तेन त्वं रक्षो भव मा चिरम् ॥२१७॥
रक्षःकृतं पुनर्ध्यानाज्ज्ञात्वा तत्प्रार्थितोऽब्रवीत् । रामस्य दर्शनं कृत्वा बोधयित्वा दशाननम् ॥२१८॥
त्वं प्राप्स्यसि निजं रूपं तस्माज्जातः शुको द्विजः। सुवेलशिखरे संस्थः संमंत्र्य कपिभिस्ततः ॥२१९॥
सूचनार्थं रिपुं रामोऽङ्गदं लंकामचोदयत् । सोऽपि रामाज्ञया गत्वा नानानीत्युक्तैस्तदा ॥२२०॥
रावणं बोधयामास सभायां लांगुलासने । संस्थितोऽभीतवद्वालितनयः स्वस्थमानसः ॥२२१॥
शृणु रावण मद्वाक्यं हितं ते प्रवदाम्यहम् । सीतां सत्कृत्य सधनां प्रयच्छ राघवं जवात् ॥२२२॥
रामं नारायणं विद्धि विद्वेषं त्यज राघवे । यत्पादपोतमाश्रित्य ज्ञानिनो भवसागरम् ॥२२३॥
तरन्ति भक्तिपूतास्ते ह्यतो रामो न मानुषः । मद्वाक्यं कुरु राजेन्द्र कुलकौशलहेतवे ॥२२४॥

जा पहुँचे । वानरोंमें उत्तम असंख्य वानर सुवेल पर्वतपर जा चढ़े ॥ २०६ ॥ २०७ ॥ उनके पीछे राम भी अपनी सेनाके साथ सहर्ष सुवेलगिरिपर गये। वहाँ जाकर राम लंकाको देखनेके लिए उसके एक सुन्दर शिखरपर चढ़े ॥ २०८ ॥ वह पर्वत बड़े मनोहर वृक्षों तथा लताओंसे मंडित था। वहाँ रामने बड़ी विस्तृत, रंग-विरंगी ध्वजाओंसे व्याप्त, अनेक प्रकारके भवनोंसे सघन, स्वर्णके गढ़ तथा तोरण युक्त खाईं, सुरंगों तथा तोपोंसे विराजित लंकाको देखा ॥ २०९ ॥ २१० ॥ वहाँसे रामने एक प्रासाद (महल) के ऊपर विस्तीर्ण प्रदेशमें बैठकर कपिसेनाको देखते हुए दशकन्धर रावणको देखा ॥ २११ ॥ तदनन्तर रामने कैद किये हुए शुकको छुड़वा दिया। उसने जाकर रावणको वानरी सेना दिखायी और समझाया—॥ २१२ ॥ तुम सीता रामको दे दो, लङ्काका राज्य विभीषणको दे दो और रामकी शरणमें चले जाओ। नहीं तो राम तुमको जीवित नहीं छोड़ेंगे ॥ २१३ ॥ यह सुनकर क्रोधसे पागल रावणने शुकको बार-बार धिक्कारा और दूतोंसे बाहर निकलवाकर रामकी सेना देखने लगा ॥ २१४॥ शुक पहिले एक श्रेष्ठ ब्राह्मण था। उसने यज्ञ द्वारा देवताओंको प्रसन्न किया था। इस कारण राक्षसोंसे उसका विरोध हो गया ॥ २१५ ॥ तदनन्तर एक दिन वज्रदंष्ट्र नामक राक्षसने अगस्त्य मुनिको शुकसे मांसान्न माँगते देखकर शुककी स्त्रीका रूप धारण करके मनुष्यका मांस पकाकर मुनिको परोस दिया। तब मुनिने क्रुद्ध होकर शुकको शाप दे दिया कि जा, तू शीघ्र राक्षस हो जा ॥ २१६ ॥ २१७॥ पुनः शुकके प्रार्थना करनेपर मुनिने ध्यान धरके देखा तो मालूम हुआ कि यह तो एक राक्षसका कृत्य है। तब मुनिने कहा–हे शुक ! तू रामका दर्शन करके और रावणको समझाकर फिरसे अपने स्वरूपको प्राप्त हो जायगा। इसी कारण अब वह शुक पुनः ब्राह्मण हो गया। इधर रामने सुवेल पर्वतके शिखरपर बैठकर वानरोंको आमन्त्रित किया और शत्रुको सूचना देनेके लिए अंगदको लंका भेजा। उसने जाकर रामकी आज्ञासे अनेक नीतिवाक्यों द्वारा रावणको समझाया ॥ २१८–२२० ॥ सभामें अपनी पूँछका मोढ़ा बनाकर उसपर बैठे हुए अंगदने निर्भय होकर स्वस्थ मनसे रावणको समझाते हुए कहा—॥ २२१ ॥ हे रावण ! मैं तुमको हितका उपदेश देता हूँ, सुनो। मेरी सलाह मानो और धनसे सीताका सत्कार करके झटपट रामको दे आओ ॥ २२२ ॥ रामको साक्षात् नारायण समझो

CC0: In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं नानाविधैर्वाक्यैरंगदेनातिबोधितः । सोऽथ नीत्युत्तराण्यस्य नाशृणोद्वानरस्य च ॥२२५॥
उवाच क्रोधसंयुक्तो वानरं स दशाननः । भीषयसेऽद्य किं मां त्वं रावणं लोकरावणम् ॥२२६॥
येन सर्वे जिता देवाः कैलासः कंपितो मया । तस्य मेऽग्रे मर्कट त्वं कत्थसे किं मुधाऽद्य हि ॥२२७॥
क्षणेन राघवौ हत्वा हत्वा सुग्रीवमारुती । हत्वा विभीषणं त्वां च वानरान् भक्षयाम्यहम् ।२२८॥
रावणस्य वचश्चेत्थं श्रुत्वा प्राहांगदश्च तम् । जानाम्यहं पौरुषं ते वलिपाशविचूर्णित । २२९॥
शिवपादांगुष्ठ भारनम्रकैलासपीडित । सहस्रार्जुनवीरात्मसंभवक्रीडनमृग ॥२३०॥
श्वेतद्वीपस्थप्रमदाकरताडितसन्मुख । विष्णुपुत्रोऽथ वै ब्रह्मा मरीचिस्तत्सुतः स्मृतः ॥२३१॥
तत्सुतः कश्यपस्तस्य पुत्रोऽभूदिंद्रनामकः । तेनैव युद्धकाले तु बद्ध्वा कारागृहस्थित ॥२३२॥
पर्यंकोपरि संबद्धमन्मूत्रक्षालिताननं । इति तद्वाक्यशराघाततर्जितः स दशाननः ॥२३३॥
दूतानाज्ञापयामास ताडनीयो मुखे त्वयम् । तथेत्युक्त्वा राक्षसास्ते शस्त्रहस्ताः सहस्रशः ॥२३४॥
अंगदं दुद्रुवुः शीघ्रं तान् दृष्ट्वा वानरोत्तमः । मर्दयामास पुच्छेन तान्सर्वान् क्षणमात्रतः ॥२३५॥
रावणास्येषु संताड्य स्वकराभ्यां मुहुर्मुहुः । तद्धस्तपादौ पुच्छेन पूर्वं बद्ध्वा सविस्तरम् ॥२३६॥
ततश्चोड्डीय वेगेन ययौ प्रासादमस्तकः । सुवेलाद्रौ राघवेंद्रं तारेयः स विहायसा ॥२३७॥
अंगदं राघवो दृष्ट्वा प्रासादान्वितमस्तकम् । उवाच किं कृतं बाल प्रासादोऽयं त्वया कथम् ॥२३८॥
समानीतोऽत्र लंकाया मित्रायेयं पुरी मया ।अर्पिताऽस्ति ततो मित्रवस्त्विदं न स्पृशाम्यहम् ।२३९॥
तद्राघववचः श्रुत्वा चकितः स तदांगदः । प्रासादं मस्तके दृष्ट्वोर्ध्वाक्षिभ्यामाह राघवम् । २४०॥

और उनसे द्वेष करना छोड़ दो। जिनके चरणकमलरूपी जहाजका आश्रय लेकर ज्ञानी लोग भक्ति से पवित्र मन होकर इस संसाररूपी समुद्रको अनायास पार कर जाते हैं, वे राम मनुष्यमात्र नहीं हैं। हे राजेन्द्र ! यदि अपने कुलकी कुशलता चाहते होओ तो मेरा कहा करो॥ २२३॥ २२४॥ इस प्रकार विविध वाक्योंसे अङ्गदने उसे बहुत समझाया, परन्तु उसने अङ्गदका एक भी नीतिपूर्ण वाक्य नहीं सुना॥ २२५॥ प्रत्युत क्रुद्ध होकर रावणने अङ्गदसे कहा—अरे नीच ! तू आज सब लोकोंको रुलानेवाले मुझ रावणको डराने आया है ? ॥ २२६॥ अरे ! मैंने संपूर्ण देवताओंको जीतकर कैलास तकको कँपा दिया है। ऐसे मुझ वीरके सामने अरे मर्कट ! तू क्यों व्यर्थका बकवास कर रहा है॥ २२७॥ मैं क्षणभरमें राम, लक्ष्मण, सुग्रीव, हनुमान्, विभीषण, तुझे और सब वानरोंको मारकर खा सकता हूँ॥ २२८॥ इस प्रकार रावणका गर्वभरा वाक्य सुनकर अङ्गदने कहा—हे वलिपाशसे विचूर्णित ! हे शिवपादांगुष्ठसे आनम्र कैलाससे पीडित ! हे वीरात्मा कार्तवीर्यके क्रीडामृग ! हे श्वेतद्वीपकी स्त्रियोंके हाथसे ताडित मुखवाले रावण ! मैं तेरे बलको जानता हूँ। यह भी मुझे मालूम है कि विष्णुके पुत्र ब्रह्मा, ब्रह्माके पुत्र मरीचि, मरीचिके पुत्र कश्यप, कश्यपके पुत्र इन्द्र और इन्द्रके पुत्र बालिने तुमको युद्धके समय बाँधकर कारागारमें डाल रक्खा था। वहाँ तुम्हारा मुख चारपाईमें बधे रहनेके कारण मेरे मल-मूत्रसे भर जाता था। अङ्गदके इन वाक्यरूपी बाणोंसे विद्ध होकर रावण उत्तेजित हो उठा॥ २२९–२३३॥ उसने दूतोंको आज्ञा दी कि मार-मारकर इसका मुँह लाल कर दो। तब 'तथास्तु' कहकर हजारों राक्षस हाथमें शस्त्र लेकर अङ्गदकी ओर झपटे। उन्हें देखकर वानरोत्तम अङ्गदने अपनी पूँछकी मारसे उन सबको क्षणभरमें धराशायी कर दिया॥ २३४॥ २३५॥ तदनन्तर पूँछसे रावणके हाथ पाँव भली-भाँति बाँधकर अंगदने उसके मुखोंपर खूब तमाचे लगाये॥ २३६॥ तत्पश्चात् वहाँसे उड़कर तारापुत्र अंगद आकाशमार्गसे सुवेल पर्वतपर रामके पास लौट गये। उड़ते समय रावणका महल भी उनके सिरपर बैठकर चला आया॥ २३७॥ रामने अंगदको मस्तकपर महल लिये आते देखकर कहा—हे बालिपुत्र ! तुम इस महलको क्यों उठा लाये ? ॥ २३८॥ मैंने लंकापुरी मित्र विभीषणको अर्पण कर दी है। इसलिए मैं तो मित्रकी इस वस्तुको छू भी नहीं सकता॥ २३९॥ रामकी यह बात सुनकर अङ्गद चकित हो गये। जब अङ्गदने ऊपरकी ओर आँखें कीं तो अपने सिरपर मकान देखकर रामसे

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न ज्ञातोऽयं मया राम प्रासादो मस्तकेन मे । उत्पाटितश्च लंकायाः समानीतस्तवांतिकम् ॥२४१॥
पुनर्नीत्वाऽद्य लंकायामेनं संस्थापयाम्यहम् । इत्युक्त्वा परिवृत्याथ राघवस्याज्ञयांगदः ॥२४२॥
प्रासादं पूर्ववत्स्थाप्य लंकायां स ययौ पुनः । सुवेलाद्रौ राघवेंद्रं नत्वा वृत्तं न्यवेदयत् ॥२४३॥
यद्यत्कृतं तु लंकायां संवादं रावणस्य च । रामोऽपि श्रुत्वा तत्सर्वं स्मित्वा तं परिषस्वजे॥२४४॥
अथ श्रीरामचंद्रोऽपि सुवेलाद्रौ स्थितस्तदा । लीलया चापमादाय मुमोच शरमुत्तमम् ॥२४५॥
तेन छत्रसहस्राणि किरीटदशकं तथा । लंकायां राक्षसेंद्रस्य प्रासादे संस्थितस्य च ॥२४६॥
चिच्छेद निमिषार्धेन कपीनां पश्यतां प्रभुः । एतस्मिन्नंतरे तत्र रामाग्रे संस्थितो महान् ॥२४७॥
न दत्तां जानकीं श्रुत्वा रावणेनांगदास्यतः । क्रोधेन महताविष्टः सुग्रीवः प्लवगाग्रणीः ॥२४८॥
ययावुड्डीय लङ्कायां दशास्यं राक्षसैर्युतम् । प्रासादसंस्थितं छत्रहीनं प्रव्यग्रमानसम् ॥२४९॥
सुग्रीवो रावणं गत्वा जघान दृढमुष्टिना । पातयामास भूम्यां तं वरसिंहासनात्तदा ॥२५०॥
चक्रतुस्तौ बाहुयुद्धं तुमुलं रोमहर्षणम् । उर्ध्वांघ्रिकरहृद्धस्तैः कपीशराक्षसेश्वरौ ॥२५१॥
तदासीज्जर्जरांगः स रावणः कपिघाततः । दुद्रुवे बाहुयुद्धं तत्त्यक्त्वा गेहं विलज्जितः ॥२५२॥
तदाऽऽच्छिद्य तन्मुकुटं ययौ रामं कपीश्वरः । ननाम राघवं भक्त्या वृत्तं सर्वं न्यवेदयत् ॥२५३॥
तं समालिंग्य रामोऽपि सुग्रीवं प्राह सादरम् । मामपृष्ट्वा कथं बन्धो गतस्तूर्ष्णीं दशाननम् ॥२५४॥
त्वज्जीवितं विपन्नं चेत्तर्हि किं सीतया मम । भविष्यति न सौख्यं हि मेदृशं साहसं कुरु ॥२५५॥
ततो भेरीमृदंगाद्यैर्वाद्यैस्ते वानरोत्तमाः । लङ्कां संवेष्टयामासुश्चतुर्द्वारेषु संस्थिताः ॥२५६॥
तदा तं मुकुटं रामोऽङ्गदाय रावणस्य च । ददौ तुष्टो दशेशाय लङ्कां रोद्धुं प्रचोदयत् ॥२५७॥

बोले—॥ २४० ॥ हे राम ! मुझे तो इस बातका पता भी नहीं था कि मेरे मस्तकपर मकान है और लंकासे उखड़कर यहाँ आपके पास तक चला आया है ॥ २४१ ॥ मैं इसको फिरसे जाकर लङ्कामें रख आता हूँ। इतना कह और रामकी आज्ञा पाकर अंगद तुरन्त लौटे ॥ २४२ ॥ वे उस प्रासादको पूर्ववत् लङ्कामें रखकर पुनः रामके पास आ गये और नमस्कार करके सब वृत्तान्त निवेदन किया ॥ २४३ ॥ लङ्कामें जाकर उन्होंने जो कुछ किया था और रावणके साथ जो संवाद हुआ था, वह सब रामसे कहा । सो सुनकर रामने उनको हृदयसे लगा लिया ॥ २४४ ॥ तदनन्तर श्रीरामचन्द्रजीने सुवेलाद्रिपर खड़े होकर लीलापूर्वक एक उत्तम बाण धनुषपर चढ़ाकर छोड़ा ॥ २४५ ॥ उससे लंकाके महलपर स्थित राक्षसेश्वर रावणके दसों मुकुट तथा हजारों छत्र कटकर क्षणभरमें वानरोंके समक्ष आ गिरे । इतनेमें रामके आगे खड़े सुग्रीवने जब अंगदके मुखसे यह सुना कि रावण सीताको देनेके लिये तैयार नहीं है। तब अतिशय कुपित होकर वानरोंमें अग्रणी सुग्रीव उड़कर लंकामें वहाँ जा पहुँचे, जहाँ कि महलपर छत्र तथा किरीटरहित अत्यन्त व्यग्र मनसे रावण बैठा था ॥ २४६–२४९ ॥ वहाँ जाकर सुग्रीवने रावणको जोरसे एक मुक्का मारा । जिससे दशानन सिंहासनसे जमीनपर गिर पड़ा ॥ २५० ॥ तदनन्तर कपीश सुग्रीव तथा राक्षसेश्वर रावणका आपसमें घोर मल्लयुद्ध होने लगा। वे एक दूसरेको उठा-उठाकर चित्त-पट करने लगे । जिससे कि उनके हाथ-पाँव तथा छाती द्वारा निर्मम प्रहारके कारण बड़ी चोट लगती थी ॥ २५१ ॥ अन्तमें सुग्रीवकी मारसे रावणके सब अंग जर्जरित हो गये। तब रावण बाहुयुद्ध करके लज्जाके मारे घरमें भाग गया॥ २५२ ॥ उसी समय उसका मुकुट छीनकर कपीश्वर सुग्रीव रामके पास आ गये और भक्तिपूर्वक नमस्कार करके सब समाचार कहा ॥ २५३ ॥ रामने आदरके साथ सुग्रीवका आलिंगन किया और कहा—हे बन्धो ! तुम हमसे बिना कहे चुपकेसे रावणके साथ युद्ध करने क्यों चले गये ?॥२५४॥ कहीं तुम्हारे प्राण संकटमें पड़ जाते तो हम सीताको पा करके भी कौन-सा सुख भोगते। अबसे कभी ऐसा साहस नहीं करना ॥ २५५ ॥ बादमें नगाड़ा मृदंग तथा तुड़ही आदि बाजे बजाते हुए सब वानरयोद्धाओंने लंकाको घेर लिया और चारों दरवाजोंको रोककर खड़े हो गये ॥ २५६ ॥ तत्पश्चात् रामने वह रावणका मुकुट प्रसन्न होकर सेनापति अंगदको दे दिया और लंकाको घेरनेके लिये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अङ्गदं दक्षिणद्वारं वायुपुत्रं तु पश्चिमम् । नलं सैन्येन प्राग्द्वारं सुषेणं द्वारमौत्तरम् ॥२५८॥
ययुस्ते राघवं नत्वा लंकां स्वस्वबलैर्युताः । तां लंकां रुरुधुः सर्वे चतुर्द्वारेषु वानराः ॥२५९॥
दशास्योऽपि गृहं गत्वा सुग्रीवजर्जरीकृतः । तस्थौ तूष्णीं स रहसि स्मरन्सुग्रीवपौरुषम् ॥२६०॥
माली सुमाली च तथा माल्यवान्बान्धवास्त्रयः । मातामहा रावणस्य ते संमन्त्र्य परस्परम् ॥२६१॥
दशाननं बोधयितुं तेभ्यस्त्वेको ययौ जवात् । माल्यवानिति नाम्ना यो बुद्धिमान्स्नेहसंयुतः२६२॥
प्राह तं राक्षसं वीरं प्रशांतेनांतरात्मना । शृणु राजन् वचो मेऽद्य श्रुत्वा कुरु यथेप्सितम्॥२६३॥
यदा प्रविष्टा नगरीं जानकी रामवल्लभा । तदादि पुर्यां दृश्यंते निमित्तानि दशानन ॥२६४॥
घोराणि नाशहेतूनि तानि मे वदतः शृणु । खराः स्तनितनिर्घोषा मेघाः प्रतिभयंकराः ॥२६५॥
शोणितान्यभिवर्षन्ति लंकामुष्णेन सर्वदा । सीदन्ति देवलिङ्गानि स्विद्यन्ति प्रचलंति च ॥२६६॥
कालिका पांडुरैर्दंतैः प्रहसंतेऽग्रतः स्थिताः । खरा गोषु प्रजायंते मूषका नकुलैः सह ॥२६७॥
मार्जारेण तु युध्यंते पन्नगा गरुडेन च । करालो विकटो मुंडः पुरुषः कृष्णपिंगलः ॥२६८॥
कालो गृहाणि सर्वेषां काले काले त्ववेक्षते । एतान्यन्यानि दृष्टानि निमित्तान्युद्भवंति च ॥२६९॥
अतः कुलस्य रक्षार्थं शांतिं कुरु दशानन । सीतां सत्कृत्य सधनां रामायाशु प्रयच्छ भोः ॥२७०॥
मातामहवचश्चेत्थं श्रुत्वा तं रावणोऽब्रवीत् । रामेण प्रेषितो नूनं भाषसे त्वमनर्गलम् ॥२७१॥
गच्छ वृद्धोऽसि बंधुस्त्वं सोढं सर्वं त्वयोदितम् । इतो वा कर्णपदवीं दहत्येतद्वचस्तव ॥२७२॥
इत्युक्तः स रावणेन माल्यवान्स गृहं ययौ । रावणोपि सभां गत्वा चोदयामास राक्षसान् ॥२७३॥
पूर्वद्वारं तु धूम्राक्षं वज्रदंष्ट्रं तु पश्चिमम् । नरांतकं दक्षिणं तमुत्तरं च महोदरम् ॥२७४॥

भेजा ॥ २५७ ॥ अङ्गदको दक्षिणी दरवाजेपर, वायुपुत्र हनुमानको पश्चिम द्वारपर, नलको सेनाके साथ पूर्वद्वारपर और सुषेणको उत्तरी दरवाजेपर जानेको कहा ॥ २५८ ॥ वे सब रामको नमस्कार करके अपनी-अपनी सेना लेकर गये और लंकाके चारों दरवाजोंको रोककर खड़े हो गये ॥ २५९ ॥ उधर रावण भी सुग्रीवके हाथसे मार खाकर घायल हो घर जाकर एकान्तमें मन मारके बैठ गया और सुग्रीवके पुरुषार्थका स्मरण करने लगा ॥ २६० ॥ तब रावणके नाना माली, सुमाली तथा माल्यवान् इन तीनों भाइयोंने आपसमें राय की और रावणको समझानेके लिए इन तीनोंमेंसे बुद्धिमान् तथा स्नेही माल्यवान् उसके पास गया ॥ २६१ ॥ ॥ २६२ ॥ वह शान्तिपूर्वक वीर राक्षसेश्वर रावणको समझाते हुए कहने लगा—हे राजन् ! मेरी बात सुन लें, फिर जैसी आपकी इच्छा हो वैसा करिएगा ॥ २६३ ॥ हे दशानन ! जबसे रामकी प्यारी सीता लंकामें आयी है, तबसे यहाँ बराबर अपशकुन ही देखनेमें आते हैं ॥ २६४ ॥ वे सब भयानक और नाशके निमित्त हैं । उनको मैं कहता हूँ, आप सुनें । मेघ तीव्र गर्जनके शब्द करते हुए लंकामें गरम खूनकी सतत वर्षा करते हैं । शिवलिंग खिन्न देखनेमें आते हैं । वे कभी पसीजते हैं और कभी काँपने लगते हैं ॥ २६५ ॥ २६६ ॥ आगे खड़ी कालीकी मूर्तिएँ पीले-पीले दाँत निकालकर हँसती हैं । गायोंके पेटसे गधे पैदा होते हैं । चूहे न्योलों तथा बिल्लियोंसे लड़ते हैं । साँप गरुडके साथ युद्ध करते हैं । कभी-कभी कराल काल सिर मुड़ाए काले-पीले पुरुषका रूप धारण करके लोगोंको पकड़ता हुआ दीखता है । इनके अतिरिक्त और भी अनेक अशकुन प्रकट होते दीखते हैं ॥ २६७-२६९ ॥ इसलिए हे दशानन ! कुलकी रक्षाके लिये शान्ति धारण करो और सीताका आदर-सत्कार करके प्रचुर धनके सहित शीघ्र रामको सौंप आओ ॥२७०॥ यह सुनकर रावणने अपने नानासे कहा कि अवश्य तुम रामके द्वारा यहाँ इस प्रकार अनर्गल (ऊटपटांग) बातें करनेके लिये भेज गये हो । अस्तु, जो हुआ सो हुआ । अब तुम यहाँसे निकल जाओ । वृद्ध तथा सगे नाना होनेके नाते इतनी बातें मैंने सह ली । तुम्हारा बातें हमारे कानोंको जलाये दे रही हैं ॥ २७१ ॥ २७२ ॥ रावणके ऐसा कहनेपर माल्यवान् अपने घर चला गया । रावणने भी सभामें जाकर राक्षसोंको आज्ञा दी ॥ २७३ ॥ तदनन्तर लंकाके पूर्वद्वारपर धूम्राक्षको पश्चिमी द्वारपर वज्रदंष्ट्रको, दक्षिणी द्वारपर नरांतकको और उत्तरी

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रेषयामास सैन्येन वस्त्राद्यैस्तोषितान् जवात् । चत्वारस्तेऽपि नत्वा तं रावणं संगरं ययुः ॥२७५॥
एवं रामरावणयोः सैन्यानि च परस्परम् । ययुस्तानि सम्मुखानि संगरार्थं महास्वनैः ॥२७६॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकाण्डे युद्धचरिते रामरावणसेनासंयोगो नाम दशमः सर्गः ॥ १० ॥

एकादशः सर्गः

(श्रीरामके द्वारा रावणका वध)

श्रीशिव उवाच

अथ ते राक्षसाः सर्वे द्वारेभ्यः क्रोधमूर्च्छिताः । निर्गत्य भिंदिपालैश्च खड्गैः शूलैः परश्वधैः ॥ १ ॥
कुन्तैः शरैः शतघ्नीभिः संक्रमैः शक्तिभिर्दृढम् । निजघ्नुर्वानरानीकं महाकाया महाबलाः ॥ २ ॥
राक्षसांश्च तदा जघ्नुर्वानरा जितकाशिनः । वृक्षैर्ग्रावैः पर्वतैश्च मुष्टिभिः करताडनैः ॥ ३ ॥
ते हयैश्च गजैश्चैव रथैः कांचनसन्निभैः । रक्षोव्याघ्रा युयुधिरे नादयन्तो दिशो दश ॥ ४ ॥
एवं परस्परं चक्रुर्युद्धं वानरराक्षसाः । नलो जघान धूम्राक्षं वज्रदंष्टं स मारुतिः ॥ ५ ॥
नरांतकं स तारेयः सुषेणस्तं महोदरम् । चतुर्थांशावशेषेण निहतं राक्षसं बलम् ॥ ६ ॥
तदांगदाद्याश्चत्वारो महावाद्यमहोत्सवैः । प्रणेमू राममागत्य जयघोषप्रपूरिताः ॥ ७ ॥
स्वसैन्यं निहतं दृष्ट्वा मेघनादो ययौ तदा । सर्पास्त्राद्व्याकुलं रामं चकार बंधुवानरैः ॥ ८ ॥
रामः सस्मार तार्क्ष्यं स तार्क्ष्यः सार्पं न्यवारयत् । ततः स्वस्थो ब्रह्मवरादंतर्धानं गतोऽसुरः ॥ ९ ॥
सर्वास्त्रकुशली व्योम्नि ब्रह्मास्त्रेण समन्ततः । ववर्ष शरजालानि ब्रह्मास्त्रं मानयंस्तदा ॥१०॥
क्षणं तूष्णीमुवासाथ रामः स बंधुवानरैः । ततः स्वस्थो रघुश्रेष्ठो ददर्श पतितं बलम् ॥११॥
मूर्छागतं ब्रह्मपाशैस्तदा लक्ष्मणमब्रवीत् । चापमानय सौमित्रे ब्रह्मास्त्रेणासुरान् क्षणात् ॥१२॥

द्वारपर महोदरको वस्त्रादिके दानसे सन्तुष्ट करके शीघ्र सेनाके साथ भेज दिया। वे लोग भी रावणको नमस्कार करके युद्धभूमिपर गये ॥ २७४ ॥ २७५ ॥ इस प्रकर राम-रावणकी सेनाएँ परस्पर युद्ध करनेके लिए भीषण गर्जन करती हुइ एक दूसरेके सामने जा डटीं ॥ २७६ ॥ इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकांडे 'ज्योत्स्ना' भाषाटीकायांरामरावणसेनासंयोगो नाम दशमः सर्गः ॥ १० ॥

शिवजी बोले—बादमें वे सब महाकाय तथा महाबली राक्षस वड़े क्रोधके साथ दरवाजोंसे निकल-निकल कर बर्छी, तलवार, त्रिशूल, भाला, वाण, तोप तथा शक्तियें लेकर वानरी सेनाको दृढ़ताके साथ मारने लगे ॥ १ ॥ २ ॥ विजयी वानर भी वृक्ष, पत्थर, पर्वत, मुक्के तथा थप्पड़ोंसे राक्षसोंको पीटने लगे ॥ ३ ॥ उधर राक्षस भी दशों दिशाओंको गुन्जाते हुए घोड़े, हाथी तथा सुवर्णसदृश रथोंपर आरूढ़ होकर युद्ध करने लगे ॥ ४ ॥ इस प्रकार वानर और राक्षस आपसमें लड़ने लगे। नलने धूम्राक्षको और मारुतिने वज्रदंष्ट्रको मारा ॥ ५ ॥ तारासुत अङ्गदने नरान्तकको मारा और सुषेणने महोदरको मार डाला। इस प्रकार राक्षसोंकी सेना चार भागोंमेंसे केवल एक भाग बाकी रही और सब मार दी गयी ॥ ६ ॥ तब अंगदादि चारों वीरोंने जयध्वनि करते हुए सोत्साह बाजे-गाजेके साथ रामके पास जाकर प्रणाम किया ॥ ७ ॥ अपने सैन्यको निहत देखकर मेघनादने सर्पास्त्रसे बाँधकर भाई लक्ष्मण तथा वानरों सहित रामको व्याकुल कर दिया ॥८॥ तब रामने गारुडास्त्रका स्मरण किया। उसने आकर उस सर्पास्त्रका निवारण किया। तब वह असुर मेघनाद ब्रह्माके वरके प्रतापसे अन्तर्धान हो गया और सभी शस्त्रास्त्रोंको चलानेमें कुशल इन्द्रजित् अलक्षित होकर आकाशसे चारों तरफ ब्रह्मास्त्र द्वारा वाणोंकी वर्षा करने लगा। उस समय ब्रह्मास्त्रकी मर्यादा रखनेके लिये बन्धु तथा वानरों सहित राम क्षणभरके लिए चुप हो गये। तदनन्तर जब स्वस्थ होकर रामने निहारा तो अपनी सेनाको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भस्मीकरोमि तच्छ्रुत्वा लङ्कामिंद्रजयो ययौ । बिलपंतौ स्वसान्निध्ये यत्र वायुजराक्षसौ ।।१३।।
वरदानाद्ब्रह्मणस्तौ दृष्ट्वा रामः स जीवितौ । तावुवाच रघुश्रेष्ठो युवाभ्यां बांधवान् रणे ।।१४।।
गत्वाऽस्ति जीवितश्चेद्धि वाच्यस्तर्हि गिरा मम। उपायं चिंतयस्वाद्य वानराणां सुजीवने ।।१५।।
तद्रामवचनं श्रुत्वा तौ विभीषणमारुती । निशीथे तौ विचिन्वंतौ जांबवंतं प्रजग्मतुः ।।१६।।
उल्मूकहस्तौ तं दृष्ट्वा प्रोचतू राघवेरितम् । जांबवानपि तां रामगिरं श्रुत्वाऽतिहर्षितः ।।१७।।
निमीलिताक्षः प्रोवाच कौ युवां वायुजो रणे । चेदस्ति जीवितस्तर्हि जीवयिष्यति वानरान् ।।१८।।
तदा विभीषणः प्राह त्वया त्यक्त्वांगदादिकान्। पृच्छयतेऽद्य कथं वायुपुत्रस्य परमादरात् ।। १९।।
तदा विभीषणं प्राह जांबवानृक्षसत्तमः । रुद्रावतारः संजज्ञे वायुपुत्रः प्रतापवान् ।।२०।।
न ज्ञेयः कपिरेवात्र तस्मात्त त्वं विलोकय । तदाऽब्रवीज्जांबवंतं नत्वा स वायुनन्दनः ।।२१।।
यं त्वं पृच्छसि सोऽद्याहं जीवितोऽस्म्यद्य मारुतिः । विभीषणो द्वितीयोऽयं यस्त्वया परिभाषते ।।२२।।
तदा स जांबवांस्तुष्टो मारुतिं वाक्यमब्रवीत् । गत्वा क्षीरनिधिं वेगाद्द्रोणाद्रिं त्वं समानय ।।२३।।
तथेत्युक्त्वा त्वरन् गत्वा गंधर्वैर्गोपितं नगम्। कामधेन्वा स्वोयधर्मनेत्रलेपात्प्रदर्शितम् ।।२४।।
उत्पाट्य पुष्पवद्भूत्वाऽऽनयामास कपिर्जवात् । पर्वतोद्भववल्लीनामवघ्रायामृतोपमम् ।।२५।।
सुगंधं जीवयिष्यंति राक्षसाश्चेति शंकया । निहतान् राक्षसान्सर्वांस्तदा तार्क्ष्यविभीषणौ ।।२६।।
चिक्षिपतुः सागरे तान् राघवस्याज्ञया क्षणात् । तदानीं तं गिरिं दृष्ट्वा सुषेणः स भिषग्वरः ।।२७।।
पर्वतोद्भववल्लीभिर्जीवयामास तान् कपीन् । ततः शाखामृगाः सर्वे समुत्तस्थुर्विजृम्भिताः ।।२८।।
द्रोणाचलं यथास्थाने स्थापयामास मारुतिः । कुबेरार्पितदिव्यांभः प्रमृज्य नयनेषु च ।।२९।।

ब्रह्मपाशसे मूर्छित होकर जमीनपर पड़ी देखा। सो देखकर उन्होंने लक्ष्मणसे कहा—हे सौमित्रे ! धनुष लाओ, मैं इन सब असुरोंको भस्म कर दूँगा। यह सुनकर मेघनाद लङ्काको भाग गया। उस समय रामने अपने पास ही विलाप करते हुए तथा ब्रह्माके वरदानसे जीवित वायुपुत्र और विभीषणको देखकर उन दोनोंसे कहा—तुम लोग रणांगणमें जांबवान्के पास जाओ और यदि वे जीवित हों तो उन्हें मेरा सन्देश सुनाते हुए कहो कि वानरोंके जीवित होनेका कोई उपाय हो सके तो सोचें। ९-१५॥ रामका आज्ञा सुनकर मारुति तथा विभीषण अर्धरात्रिके समय जांबवान्को खोजने निकले ॥ १६ ॥ दोनोंने हाथोंमें मशालें ले लीं। खोजते-खोजते जब जम्बवान् मिले तो उन्हें रामका संदेश सुना दिया। जांबवान् यह सुनकर बहुत प्रसन्न हुए ॥ १७ ॥ आँखोंको निमीलित किये हुए ही वे बोले कि तुम दोनों कौन हो ? यदि वायुपुत्र हनुमान् इस रणक्षेत्रमें जीवित हों तो वे सब वानरोंको जिला लेंगे ॥ १८ ॥ तब विभीषणने कहा—हे जांबवान् ! तुमने अंगद आदि वीरोंको छोड़कर बड़े आदरके साथ वायुपुत्रको ही क्यों पूछा ?॥ १९ ॥ ऋक्षोंमें श्रेष्ठ जांबवान्ने विभीषणको उत्तर दिया कि प्रतापी वायुपुत्र हनुमान् साक्षात् रुद्रके अंशसे उत्पन्न हुए हैं ॥ २० ॥ उनको केवल कपि ही न समझो। अब तुम उनका पता लगाओ। तब हनुमान्ने नमस्कार करके जांबवान्से कहा—॥ २१ ॥ जिसको आप पूछ रहे हैं, वह मारुति जीवित खड़ा है। दूसरा जो आपसे बातें कर रहा है, वह विभीषण है ॥ २२ ॥ तदनन्तर प्रसन्न होकर जांबवान्ने मारुतिसे कहा—तुम क्षीरसागर जाकर शीघ्र द्रोणाचलको ले आओ ॥ २३ ॥ 'तथास्तु' कहकर हनुमान् शीघ्र चल दिये और गन्धर्वों द्वारा सुरक्षित तथा कामधेनुका पसीना लगे नेत्रोंसे दिखाई देते हुए उस पर्वतको उखाड़कर फूलकी तरह शीघ्र उठा ले आये। इधर इस शङ्कासे कि पर्वतोत्पन्न वल्लियोंकी अमृतोपम सुगन्धिसे राक्षस भी जी जायँगे, गरुड तथा विभीषणने उन्हें रामकी आज्ञासे उठा-उठाकर समुद्रमें फेंक दिया। अब वैद्यवर सुषेणने द्रोणगिरिको देखकर पर्वतोत्पन्न बूटियोंसे उन मरे हुए वानरोंको जिलाना आरम्भ किया। सहसा वे सब वानर जँभाई ले लेकर खड़े होने लगे ॥ २४-२८ ॥ तदनन्तर मारुति पुनः द्रोणाचलको यथास्थान रख आये और कुबेरके दिये हुए दिव्य जलको आँखोंमें लगाकर वे रणमें राम आदि अन्तर्हितोंको देखने लगे। उसी समय रावणने भी अतिनाद, प्रहस्त,

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्तर्हितानां रामाद्या दर्शनं प्रापुराहवे । ततः संप्रेषयामास रावणः स्वीयमंत्रिणः ॥३०॥
अतिनादः प्रहस्तश्च महानाददरीमुखाः । देवशत्रुर्निकुम्भश्च देवांतकनरान्तकौ ॥३१॥
सारणाद्या बलैरन्ये युयुधुर्वानरैः सह । तान्सर्वानंगदाद्यास्ते हत्वा तस्थुर्विगर्जिताः ॥३२॥
तदा कुंभनिकुंभौ द्वौ कुंभकर्णसुतोत्तमौ । रावणः प्रेषयामास युद्धार्थं तौ प्रजग्मतुः ॥३३॥
तदा कुंभो जम्बवता निहतश्च रणाजिरे । अंगदेन निकुम्भश्च हतः श्रुत्वा दशाननः ॥३४॥
अतिकायं स्वीयपुत्रं प्रेषयामास संगरम् । अतिकायेन सौमित्रिः कृत्वा संगरमुल्बणम् ॥३५॥
शरेण पातयामास लङ्कायां तच्छिरो महत् । तदा ययौ रावणः स स्वयं युद्धाय वेगतः ॥३६॥
सुहृन्मित्रजनैर्युक्तो वेष्टितः पुरवासिभिः । रणे विभीषणं दृष्ट्वा कोपाच्छक्तिं मुमोच सः ॥३७॥
पृष्ठे विभीषणं कृत्वा ययावग्रे स लक्ष्मणः । हृदि सताडितः शक्त्या पपात भुवि लक्ष्मण ॥३८॥
लक्ष्मणं नगरीं नेतुं तं ययौ स दशाननः । न चचाल भुजस्तस्य सौमित्रेः शेषरूपिणः ॥३९॥
तं नेतुकामं हनुमान् हृदि मुष्ट्या व्यताडयत् । तेन मुष्टिप्रहारेण पपात रुधिरं वमन् ॥४०॥
आनयामास सौमित्रिं मारुतिः कपिवाहिनीम् । रथारूढो रावणोऽपि विव्याध मारुतिं शरैः ॥४१॥
ततः क्रुद्धेन रामेण बाणेन हृदि ताडितः । साश्वध्वजं रथं सूतं राघवो धनुरोजसा ॥४२॥
छत्रं पताकां तरसा चिच्छेद शितसायकैः । अर्धचन्द्रेण चिच्छेद तत्किरीटं रविप्रभम् ॥४३॥
ततस्तं व्याकुलं दृष्ट्वा रामो रावणमब्रवीत् । गच्छाद्य लङ्कामाश्वस्तः श्वस्त्वं पश्य बलं मम ॥४४॥
ततो लज्जानतशिरा ययौ लङ्कां दशाननः । रामोऽपि लक्ष्मणं दृष्ट्वा मूर्च्छितं प्राह मारुतिम् ॥४५॥
द्रोणाचलं समानीय जीवयैनं तथा कपीन् । तथेति स ययौ वेगात्तज्ज्ञात्वा स दशाननः ॥४६॥
प्रार्थयित्वा कालनेमिं तद्विघ्नार्थमचोदयत् । स गत्वा हिमवत्पार्श्वे तपोवनमकल्पयत् ॥४७॥
तत्र शिष्यैः परिवृतो मुनिवेषधरः स्थितः । मारुतिश्चाश्रमं दृष्ट्वा जलं पातुं विवेश तम् ॥४८॥

महानाद, दरीमुख, देवशत्रु, निकुम्भ, देवान्तक तथा नरान्तक आदि मंत्रियोंको भेजा ॥ २९-३१ ॥ सारणादि दैत्योंने भी बहुत-सी सेना लेकर वानरोंके साथ युद्ध किया । अङ्गद आदि वानर उन सबको मारकर गर्जन करने लगे ॥ ३२ ॥ तब कुम्भकर्णके पुत्र कुम्भ तथा निकुम्भको रावणने युद्धके लिए भेजा ॥ ३३ ॥ सुमित्रापुत्र लक्ष्मणने उनके साथ घोर युद्ध करके उनके सिरोंको बाणसे काटकर लङ्कामें फेंक दिया । तब रावण स्वयं लड़नेके लिए निकल पड़ा ॥ ३४-३६ ॥ उसके साथ मित्र सुहृद् तथा पुरवासी लोग भी गये । रावणने रणमें विभीषणको देखकर उसपर शक्तिका प्रहार किया ॥ ३७ ॥ यह देखकर लक्ष्मणने विभीषणको पीछे कर लिया और स्वयं आगे खड़े हो गये । जिससे वह शक्ति लक्ष्मणके हृदयमें लगी और वे धड़ामसे पृथ्वीपर गिर पड़े ॥ ३८ ॥ उन्हें नगरमें उठा ले जानेके लिये दशानन आगे बढ़ा और उनको उठाना चाहा, पर शेषावतारस्वरूप लक्ष्मणका एक हाथ भी रावणसे नहीं हिला ॥ ३९ ॥ उस समय अवसर देखकर हनुमान्ने रावणकी छातीमें एक मुक्का मारा । उस मुष्टिप्रहारसे रावणके मुखसे रुधिर निकलने लगा और वह धरतीपर गिर पड़ा ॥ ४० ॥ तदनन्तर मारुति लक्ष्मणको कपिसेनामें उठा ले आये । तभी रावण रथपर सवार होकर मरुतिको बाणोंसे बींधने लगा ॥ ४१ ॥ यह देखकर क्रुद्ध रामने रावणके हृदयमें बाण मारा और अश्व तथा ध्वजा सहित रथको, सारथीको, धनुषको, छत्रको तथा पताकाको अपने तीक्ष्ण बाणोंसे काट गिराया । अर्धचन्द्राकर बाणसे उन्होंने उसका सूर्यके समान तेजस्वी किरीट भी काट डाला ॥ ४२ ॥ ४३ ॥ पश्चात् रावणको व्याकुल देखकर रामने कहा—जा, लङ्कामें भाग जा और आश्वस्त होकर कल फिर मेरा बल देखना ॥ ४४ ॥ तब रावण नीचा मुख किये लङ्कामें चला गया । रामने लक्ष्मणको मूर्छित देखकर मारुतिसे कहा—॥ ४५ ॥ पूर्ववत् द्रोणाचल लाकर लक्ष्मणको जिलाओ । 'तथास्तु' कहकर हनुमान् चल पड़े । इस बातका पता लगनेपर दशाननने कालनेमिसे प्रार्थना करके उसको हनुमान्के रास्तेमें विघ्न डालनेके लिए भेजा । उसने जाकर हिमवान् पर्वतके पास एक तपोवनकी रचना की ॥ ४६ ॥ ४७ ॥ वहाँ बहुतसे शिष्योंको साथ लेकर वह स्वयं मुनिवेष धारण करके बैठ गया ।

CC0. In Public Domain. Kamlesh Kumar Sharma, Rajasthan Digital Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुनिना मानितश्चापि जलकुम्भः प्रदर्शितः । मारुतिः प्राह तृप्तिर्मे नैवानेन भविष्यति ॥४९॥
तं पुनः प्राह स मुनिस्तटाकं निकटस्थितम् । गच्छाक्षिणी पिधाय त्वं जलं पिब यथासुखम् ॥५०॥
आगच्छाशु पुनश्चात्र सुखं तिष्ठ ममान्तिकम् । जानामि ज्ञानदृष्ट्याऽहं लक्ष्मणश्चोत्थितस्त्विति ॥५१॥
गृहाण मंत्रान् मत्तस्त्वं यैश्च पश्यसि तं गिरिम् । गोपितं त्वद्य गधर्वैर्यं तं त्वं नेतुमिच्छसि ॥५२॥
प्लवंगानां जीवनार्थं लङ्कायां वेगतः कपे । मत्तस्त्वं लब्धविद्यः सन् ददस्व गुरुदक्षिणाम् ॥५३॥
तथेति मारुतिर्गत्वा कासारमपिबज्जलम् । पिधाय नेत्रे तावत्तमग्रसन्मकरी तदा ॥५४॥
सोऽपि तां दारयामास धृत्वास्ये सा ममार ह । ततोऽन्तरिक्षे सा प्राह दिव्यरूपा तु मारुतिम् ॥५५॥
पुराऽहं मुनिना स्पृश्या प्रार्थिता न रतिर्मया । दत्ता शप्ताऽस्मि त्वत्तो मे निष्कृतिस्तेन कीर्तिता ॥५६॥
धान्यमालीति विख्याताऽप्सराः पूर्वं भवांतरे । आश्रमे यस्त्वया दृष्टः कालनेमिर्महासुरः ॥५७॥
रावणप्रेषितो मार्गे स्थितस्तं जहि वेगतः । तथेति मारुतिर्गत्वा मुनिं प्राह त्वरान्वितः ॥५८॥
मुष्टिं बद्ध्वा दृढां घोरां गृहाण गुरुदक्षिणाम् । इत्युक्त्वा ताडयामास हृदि तं मुष्टिना तदा ॥५९॥
पपात भुवि रक्तं स वमन् प्राणान् जहौ क्षणात् । ततः क्षीरनिधिं गत्वा जित्वा गंधर्वसत्तमान् ॥६०॥
द्रोणाचलं गृहीत्वा स यावद्गच्छति मारुतिः । विहायसाऽतिवेगेन लङ्कां तावच्च वै पथि ॥६१॥
भरतेन शरं मुक्त्वा पर्वतो भुवि पातितः । भरतं मारुतिर्दृष्ट्वा रामोऽयमिति विह्वलः ॥६२॥
उवाच मधुरं वाक्यं कथमत्र समागतः । जितः किं रावणेन त्वं रणं त्यक्त्वा पलायितः ॥६३॥
एवमुक्तोऽपि भरतः पुनस्तं मारुतिं वरम् । मत्वाऽयं राक्षसश्चेति संदधे निशितं शरम् ॥६४॥

मारुति रास्तेमें मुनिका आश्रम देखकर उसमें जल पीनेके लिए गये ॥ ४८ ॥ मुनिने मारुतिका सम्मान किया और जल पीनेके लिये उनको एक भरा घड़ा दिखाया । तब हनुमान्ने कहा कि इतनेसे मेरी तृप्ति नहीं होगी ॥ ४९ ॥ तब मुनिने उन्हें एक तालाब दिखाया और कहा कि वहाँ जाकर तुम आँखोंको वन्द करके आनन्दपूर्वक जल पी लो ॥ ५० ॥ बादमें आकर यहाँ मेरे पास शान्तिसे बैठो। मुझे ज्ञानदृष्टिसे पता लग गया है कि लक्ष्मण उठ खड़ा हुआ है । इसलिए अब चिन्ताकी कोई बात नहीं है ॥ ५१ ॥ दूसरी बात यह है कि मैं तुम्हें कुछ ऐसे मन्त्र बताऊँगा कि जिनसे तुम्हें गन्धर्वों द्वारा रक्षित वह पर्वत दिखलाई दे जायगा, जिसको कि तुम ले जाना चाहते हो ॥ ५२ ॥ उसको लङ्कामें ले जाकर तुम वानरोंको शीघ्र जिला सकते हो। इस प्रकारकी विद्या मुझसे ग्रहण करनेके बाद तुम्हें मुझे गुरुदक्षिणा भी देनी होगी ॥ ५३ ॥ 'बहुत अच्छा' कहकर मारुतिने तालाबपर जाकर जल पिया, परन्तु नेत्र बन्द होनेके कारण उस समय एक मकरीने आकर उन्हें पकड़ लिया ॥ ५४ ॥ तब मारुतिने उसका मुँह पकड़कर चीर डाला। जिससे वह मकरी मर गयी । पश्चात् वह दिव्य रूप धारण करके आकाशमें जाकर मारुतिसे बोली–॥ ५५ ॥ पूर्वकालमें एक मुनिने मुझको दुराचार करनेके लिए कहा, परन्तु जब मैंने उन्हें रति नहीं दी । तब उन्होंने मुझे मकरी होनेका शाप देकर कहा कि तेरा निस्तार मारुतिसे होगा ॥ ५६ ॥ पूर्वजन्ममें मैं धान्यमाली नामको विख्यात अप्सरा थी। यहाँ आश्रममें जो एक मुनि बैठा हुआ आपने देखा है, वह कालनेमि नामका महान् राक्षस है ॥ ५७ ॥ रावणने उसको आपके मार्गमें विघ्न डालनेके लिए भेजा है। आप शीघ्र जाकर उसको मार डालें। 'अच्छी बात है' कहकर मारुति तुरन्त वहाँ पहुँचे ॥ ५८ ॥ उन्होंने दृढ़ मुक्का बाँधकर 'यह लो अपनी गुरुदक्षिणा' ऐसा कहते हुए उसकी छातीमें जोरसे मुक्का मारा। ॥ ५९ ॥ उस प्रहारसे वह जमीनपर लुढ़क पड़ा । उसके मुँहसे रक्त बहने लगा और क्षणभरमें वह मर गया । तदनन्तर क्षीरसागर जा तथा गन्धर्वोंको जीतकर द्रोणाचलको लिये हनुमान् आकाशमार्गसे जा रहे थे कि रास्तेमें भरतने बाण मारकर उनके हाथसे वह पर्वत गिरा दिया। हनुमान् भरतको देख उन्हें भ्रमवश राम समझकर घबरा गये ॥ ६०–६२ ॥ उन्होंने मधुर वाणीमें कहा—हे राम ! आप यहाँ कहाँसे और क्यों आ गये ? क्या आपको रावणने जीत लिया ? अथवा रण छोड़कर आप यहाँ भाग आये हैं ॥ ६३ ॥ मारुतिके इतना कहनेपर भी भरतने उन्हें राक्षस समझकर मारनेके लिए एक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बाणहस्तं तमालोक्य भुभुकारं विधाय सः । नैवायं राघवश्चेति मत्वा ध्यात्वा क्षणं हृदि ॥६५॥
भरतं मारुतिः प्राह रामदूतोऽद्य मे बलम् । पश्यसि त्वं तद्गिरं तां श्रुत्वा तं भरतोऽब्रवीत् ॥६६॥
बंधुना मम रामेण कुतो वद समागमः । तव जातं सविस्तारं दंडकारण्यवासिना ॥६७॥
ततस्तं मारुतिर्वृत्तं संश्राव्य राघवस्य तु । भरतेनेषुणा दत्तं गिरिं धृत्वा ययौ पुनः ॥६८॥
लङ्कां गत्वा स वल्लीभिर्जीवयामास लक्ष्मणम् । वानरांश्च भरतस्य रामं वृत्तं न्यवेदत् ॥६९॥
पुनर्नीत्वा यथास्थानं तं संस्थाप्य महाचलम् । लक्ष्मणो जीवितश्चेति संश्राव्य भरतं पुनः ॥७०॥
ययावाकाशमार्गेण लङ्कां गन्तुं मनो दधे । नृपानाकारयामास साकेतं भरतोऽपि सः ॥७१॥
साहाय्यार्थं राघवस्य लंकां गन्तुं मनो दधे । ततः सभायामासीनो रावणः प्राह राक्षसान् ॥७२॥
गच्छध्वं त्वरितं दूताः पाताले तौ महाबलौ । ऐरावणो महानुग्रस्तथा मैरावणो महान् ॥७३॥
तयोर्मे कथनीयं हि युद्धवृत्तं वयस्ययोः । तथेति ते गता दूतास्तौ तद्वृत्तं न्यवेदयन् ॥७४॥
तौ श्रुत्वा विह्वलात्मानौ लङ्कायां समवस्थितौ । रामं च लक्ष्मणं हंतुं निशायां तौ समागतौ ॥७५॥
ददर्शतुस्तौ पुच्छस्य परिघ हि हनूमतः । कपीनां तत्र सेनायास्तदाकाशान्महाबलौ ॥७६॥
निपेततुः कपीनां तु सेनायां रामलक्ष्मणौ । किंचिद्विनिद्रितौ दृष्ट्वा शिलायां संगरश्रमात् ॥७७॥
निन्यतुस्तौ शिलां शीघ्रं पातालं निजमन्दिरम् । एतस्मिन्नंतरेऽदृष्ट्वा सेनायां रामलक्ष्मणौ ॥७८॥
मारुतिः पादमार्गेण तयोः पातालमाययौ । एतस्मिन्नन्तरे मार्गे लङ्कादक्षिणदिक्तटे ॥७९॥
निकुंभिलायां स्वपतिं कपोती प्राह गुर्विणी । नाथाद्य नरमांसं मे भोक्तुं स्पृहयते मनः ॥८०॥
स प्राहाद्य समानीतौ वर्तेते रामलक्ष्मणौ । रसातलं हि दैत्याभ्यां देव्यग्रेतौ वधिष्यतः ॥८१॥
अथ श्वस्तद्वधे जाते मांसमानीय तेऽर्पये । तद्वाक्यं मारुतिः श्रुत्वा किंचित्तोषयुतो ययौ ॥८२॥

और तेज बाण धनुषपर चढ़ाया ॥ ६४ ॥ उनको हाथमें बाण लिये देख मारुति भू-भू करके मनमें यह सोचकर कि ये राम नहीं हैं ॥ ६५ ॥ भरतसे बोले कि 'मैं रामका दूत हूँ । आज तुम देख लो।' उनका यह वाक्य सुनकर भरतने कहा - ॥ ६६ ॥ दण्डकारण्यवासी मेरे भाई रामके साथ तुम्हारा समागम कहाँ हुआ ? सो विस्तारपूर्वक कहो । तब मारुति भरतको सब हाल सुनाकर भरत द्वारा दिये हुए उस पर्वतको पुनः उठाकर चल पड़े ॥ ६७ ॥ ६८ ॥ लङ्कामें जा तथा जड़ियोंसे लक्ष्मण तथा वानरोंको जीवित करके उन्होंने रामको भरतका समाचार कह सुनाया ॥ ६९ ॥ फिर वहाँसे ले जाकर द्रोणाचलको उसके स्थानपर रख आये और भरतको लक्ष्मणके जीवित हो उठनेका शुभ समाचार भी सुना दिया ॥ ७० ॥ इतना काम करके हनुमान् पुनः बड़ी तेजीके साथ लङ्कामें लौट आये । उधर भरतने अयोध्यामें सब राजाओंको एकत्र करके लङ्कामें जाकर रामको सहायता देनेका विचार किया । तभी सभामें वैठे रावणने भी राक्षसोंको बुलाकर कहा-॥ ७१ ॥ ७२ ॥ हे दूतों ! तुम लोग शीघ्र पातालमें जाकर वहाँ रहनेवाले महान् उग्र ऐरावण तथा महान् मैरावण इन दोनों मेरे मित्रोंको यहाँके युद्धका समाचार सुनाओ । 'तथाऽस्तु' कहकर वे दूत वहाँ गये और उन दोनोंको सव वृत्तांत निवेदन कर दिया ॥ ७३ ॥ ७४ ॥ यह सुनकर वे दोनों वड़ी आतुरताके साथ लङ्कामें आ पहुँचे और रात्रिके समय राम-लक्ष्मणका हरण करनेके लिये रामके शिविरमें गये ॥ ७५ ॥ वहाँ उन दोनोंने वानरोंकी सेनाके चारों ओर हनुमान्की पूँछका बना हुआ दुर्गम परिघ देखा। तब महाबलान् उन दैत्योंने आकाश-मार्गसे कूदकर कपियोंकी सेनामें प्रवेश किया । वहाँ राम-लक्ष्मणको एक शिलापर युद्धश्रमसे थककर सोते हुए देख उन दोनोंने उस शिला समेत राम-लक्ष्मणको उठा लिया और पातालमें ले गये । रास्तेमें लङ्काके दक्षिण किनारे निकुम्भिला गुफामें स्थित एक गर्भवती कपोतिका अपने पतिसे कह रही थी कि हे नाथ ! आज मुझे नरमांस खानेकी इच्छा हो रही है ॥ ७६-८० ॥ पतिने कहा-आज दो दैत्य राम-लक्ष्मणको रसातलमें ले आये हैं । वे दोनों देवीके सम्मुख मारे जायँगे ॥ ८१ ॥ कल उनका वध हो जानेपर मैं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तावद्ददर्श तद्द्वारि संस्थितं मकरध्वजम् । स धृत्वा तं हनूमन्तं पप्रच्छ मकरध्वजः ॥८३॥
कस्त्वं कुतः समायातः स्ववृत्तं प्राह मारुतिः । रामदूतस्तु लङ्कायाश्चानीतौ रामलक्ष्मणौ ॥८४॥
निद्रितौ निशि दैत्याभ्यामत्र पातालमद्य हि । तयोः शोधार्थमायातश्चेत्त्वं वेत्सि वदस्व तौ ॥८५॥
तन्मारुतिवचः श्रुत्वा तं प्राह मकरध्वजः । पिता मे वर्तते तत्र क्षेमेणांजनिसंभवः ॥८६॥
तच्छ्रुत्वा चकितः प्राह हनुमान् मकरध्वजम् । हनूमतः कुतः पत्नी सोऽब्रवीन्मारुतिं पुनः ॥८७॥
लङ्कादाहं पुरा कृत्वा सागरे शीतलं कृतम् । यदा पुच्छं मारुतिना तदा तद्धूमपूरितात् ॥८८॥
कंठाच्छ्लेष्मा बहिस्त्यक्तः सागरे सोऽपतत्तदा ।
मकर्या भक्षितः सोऽपि तस्यां जातः सुतोऽस्म्यहम् ॥८९॥
तच्छ्रुत्वा मारुतिः प्राह सोऽयमेव न संशयः । तदा ननाम पितरं तथा वृत्तं न्यवेदयत् ।९०॥
कामाक्ष्याश्च बलिं कर्तुं निश्चितौ पूर्वमेव हि । तावानेतुं यदोद्युक्तौ लङ्कां गत्वा सुरोत्तमौ ॥९१॥
श्वः कामाक्ष्याः पुरः कर्तुं तयोर्दानं विनिश्चितम् । गच्छ देवालये गत्वा तत्र स्थित्वा हरस्व तौ ॥९२॥
ततः स मारुतिर्गत्वा त्रसरेणुस्वरूपधृक् । देवालये प्रविश्याथ कपाटानि बबंध सः ॥९३॥
तावद्दैत्यौ समायातौ पूजार्थं द्वारि संस्थितौ । शनैर्देव्याः स्वरेणैव मारुतिस्तौ वचोऽब्रवीत् ॥९४॥
पूजा कार्या गवाक्षेण सजीवौ रामलक्ष्मणौ । वनोद्भवैः फलैः पुष्पादिभिः सम्यक् प्रपूजितौ ॥९५॥
धृतकोदण्डतूणीरौ वन्यपुष्पैश्च शोभितौ । देवालयस्य किंचिद्धि द्वारमुद्घाट्य वै शनैः ॥९६।
मत्तुष्ट्यर्थं प्रेषणीयावत्र मामद्य मानवौ । येन केन प्रकारेण यो मामद्य प्रपश्यति ।।९७॥
भविष्यति निश्चयेन सोऽन्धो नास्त्येव संशयः । तद्देव्या वचनं श्रुत्वा तुष्टां ज्ञात्वाऽम्बिकां मुदा ॥९८॥

तेरे लिए नरमांस ला दूँगा। इस बातको सुनकर मारुति कुछ संतुष्ट होकर आगे बढ़े ॥ ८२ ॥ आगे जाकर उन्होंने उसके द्वारपर मकरध्वजको बैठे देखा। उस मकरध्वजने मारुतिको पकड़ लिया और पूछा—॥ ८३ ॥ तुम कौन हो और कहाँसे आये हो? मारुतिने अपना परिचय दिया कि मैं रामका दूत हूँ। सोते हुए राम-लक्ष्मणको लङ्कासे दो राक्षस उठाकर यहाँ पातालमें आज ही ले आये हैं। मैं उन दोनोंकी खोज करने यहाँ आया हूँ। यदि तुमको उनका कुछ पता हो तो बताओ ॥ ८४ ॥ ८५ ॥ मारुतिके इस वचनको सुनकर मकरध्वजने पूछा कि मेरे पिता अञ्जनीकुमार हनुमान् वहाँ कुशल-क्षेमसे हैं? ॥ ८६ ॥ यह सुना तो हनुमान्ने चकित होकर पूछा—अरे! हनुमान्की स्त्री ही कौन सी थी कि जिससे तू पैदा हुआ? उसने मारुतिको उत्तर दिया—॥ ८७ ॥ जब हनुमान्ने लंकाको जलाकर अपनी पूँछ समुद्रमें ठण्डी की थी। उस समय उन्होंने धुएँसे जमा हुआ कंठका कफ जलमें थूक दिया था। उसे एक मछलीने खा लिया। बस, उसीसे उत्पन्न मैं उनका पुत्र हूँ ॥ ८८ ॥ ८९ ॥ यह सुनकर मारुतिने कहा कि यदि ऐसा है, तब तो मैं ही अञ्जनीपुत्र हूँ। यह बात सर्वथा सत्य है। तब मकरध्वजने अपने पिता हनुमान्को प्रणाम किया और सब समाचार भी कह सुनाया ॥ ९० ॥ उसने कहा कि जब वे दोनों असुर यहाँसे राम-लक्ष्मणको लेनेके लिए लंका गये थे, उससे पूर्व ही उन दोनोंने राम-लक्ष्मणको कामाक्षी देवीके सामने बलिदान देनेका निश्चय कर लिया था। तदनुसार कल उन दोनोंका देवीके सम्मुख बलिदान देना निश्चित हो चुका है। जाओ, देवालयमें जाकर खड़े हो जाओ और वहाँसे उन दोनोंको उठा ले जाना ॥ ९१ ॥ ९२ ॥ तत्पश्चात् हनुमान् त्रसरेणुके समान छोटा रूप धारण करके देवालयमें घुस गये तथा अन्दर जाकर चुपचाप खड़े हो गये। उसी समय मारुतिने भीतरसे देवीके जैसा स्वर बनाकर कहा—॥ ९३ ॥ ९४ ॥ आज तुम लोग झरोखेमेंसे ही मेरी पूजा कर लो और बादमें धनुष तथा तूणीरको धारण करनेवाले राम-लक्ष्मण नामके दोनों मनुष्योंको वनफूल तथा फलों और पुष्पमालाओंसे सुशोभित करके जीवित ही मेरी प्रसन्नताके लिए तनिक-सी किवाड़ खोलकर धीरेसे भीतर कर दो। कोई मनुष्य यदि आज किसी प्रकार तनिक भी मुझको देखेगा तो वह अवश्य अन्धा हो जायगा। देवीके इस आदेशको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततस्तौ पूजनं दैत्यौ गवाक्षेणैव चक्रतुः । पक्वान्नपायसादीनां राशींस्तौ प्रमुमोचतुः ॥९९॥
पंचामृतघटांश्चापि कोटिशस्तौ मुमोचतुः । कोटिशः फलभारैश्च गवाक्षेण मुमोचतुः ॥१००॥
तत्सर्वं भक्षयित्वा स मारुतिः प्राह तौ पुनः । किं दत्तं ग्रासमात्रं मे भोजनं क्षुधिताऽस्म्यहम् ॥१०१॥
तद्देव्या वचनं श्रुत्वा तौ दैत्यावतिस्मितौ । दूतैर्विलुंब्य हट्टांश्च तथा स्वीयपुरौकसाम् ॥१०२॥
भक्षणीयपदार्थांस्तौ गिरीनिव मुमोचतुः । राजगृहादिषु स्वेषु यद्यद्वस्त्वस्ति संचितम् ॥१०३॥
तच्चापि दूतैरानीय देव्यै शीघ्रं मुमोचतुः । तदा कोलाहलश्चासीत्प्रतिगेहे पुरौकसाम् ॥१०४॥
नासीच्छेषं बालकानां भक्ष्यवस्त्वण्वपि क्वचित् । ततस्तौ वन्यपुष्पाद्यैर्भूषितौ रामलक्ष्मणौ ॥१०५॥
धृतकोदंडतूणीरौ द्वारेणैवार्पितौ श्रियै । तौ दृष्ट्वा मारुतिर्नत्वाऽऽलिंग्य श्रीरामलक्ष्मणौ ॥१०६॥
कपाटानि तदोद्घाट्य दैत्ययोः स न्यतर्जयत् । ततो रामो लक्ष्मणेन बहिर्देवालयात्तदा ॥१०७॥
निर्गत्य शरजालैस्तौ जघान क्षणमात्रतः । सेवकान् सुहृदादींश्च तयोर्बाणैर्जघान सः ॥१०८॥
पुनस्तौ जीवितौ दैत्यौ पुनस्तेन निपातितौ । शतवारं हतावेवं नासीन्मृत्युस्तयोस्तदा ॥१०९॥
ततोऽतिविस्मितो भूत्वा त्वरन्गत्वा स मारुतिः । इतस्ततो भ्रमन्पुर्यां नारीं रहसि संस्थिताम् ॥११०॥
ऐरावणभोगपत्नीं पप्रच्छ मरणं तयोः । सा प्राह नागकन्याऽहं बलेनानेन धर्षिता ॥१११॥
मैरावणोऽपि मां नित्यं दुष्टबुद्ध्याऽत्र पश्यति । उभाभ्यामपि च क्रीडां दातुं नास्ति बलं मयि ॥११२॥
मित्रं त्वेको रिपुस्त्वेकस्तिष्ठति दुःखं तयोर्मम । अतस्तयोर्वधे तुष्टिर्मम चापि भविष्यति ॥११३॥
मारुते यदि रामो मां स्वस्त्रियं हि करिष्यति । तर्ह्यहं कथयाम्यद्य तयोर्मृत्युर्यतो भवेत् ॥११४॥
तच्छ्रुत्वा मारुतिः प्राह यदि श्रीरामभारतः । न भविष्यति भग्नस्ते मंचकस्तर्हि ते पतिः ॥११५॥

सुनकर दोनों दैत्योंने समझ लिया कि आज देवी भली भाँति हमपर प्रसन्न हुई हैं ॥ ९५-९८ ॥ बादमें दोनोंने गवाक्षमार्गसे ही देवीका पूजन किया। बताशे, मिठाई, मालपूए तथा खीर आदि भी झरोखेसे भीतर डाल दिया ॥ ९९ ॥ करोड़ों पञ्चामृतके घड़े अन्दर उँड़ेले और करोड़ों फलोंके ढेर वहींसे भीतर डाल दिये ॥ १०० ॥ वह सब खाकर मारुति पुनः उनसे कहने लगे—क्या तुमने कवलमात्र भोजन दिया है। मैं तो अभी बहुत भूखी हूँ ॥ १०१ ॥ देवीके इस वचनको सुनकर वे दोनों दैत्य बड़े विस्मयमें पड़ गये और अपने दूतों द्वारा दूकानोंका माल तथा नगरवासियोंके सब खाद्य पदार्थ लुटवाकर उसके पर्वतसदृश ढेरको भीतर डाल दिया। अपने राजगृहोंमें भी जो कुछ खाने-पीनेकी चीजें संचित कर रक्खी थीं, वे भी नौकरोंसे मँगवाकर देवीको समर्पण कर दीं। इससे पुरवासियोंके प्रत्येक घरमें बड़ा भारी कोलाहल मच गया। बच्चोंको खानेके लिए भी कहीं कुछ नहीं बचा। तदनन्तर कोदण्ड (धनुष) तथा तूणीर (तरकस) धारण किये हुए राम-लक्ष्मणकी वन्य पुष्पोंसे पूजा करके द्वारके रास्ते धीरेसे देवीको अर्पण कर दिया। उन्हें देखकर मारुतिने नमस्कार किया और उन दोनोंने हनुमान्को हृदयसे लगाया। तब हनुमान् किवाड़ खोलकर बाहर आये और उन दोनों दैत्योंको ललकारा। बादमें राम-लक्ष्मण भी देवालयसे बाहर निकल आये और उन्होंने शरसमुदायकी वर्षा करके उन दोनों राक्षसोंको क्षणभरमें मार डाला। ॥ १०२-१०८ ॥ पर वे दोनों राक्षस फिर जी गये। रामने फिर उन्हें मारा तो फिर जी गये और फिर मारा। इस प्रकार उन दोनोंको उन्होंने सौ बार मारे। परन्तु उनकी मृत्यु नहीं हुई ॥ १०९ ॥ तब चकित होकर मारुति उनकी मृत्युके उपायकी खोजमें इधर-उधर भ्रमण करने लगे तो नगरीके एक एकान्त स्थानमें स्थित ऐरावणकी भोगपत्नी (रखैल) को देखा और उससे उन दोनोंके मरणका उपाय पूछा। उसने कहा कि मैं एक नागकन्या हूँ। मेरे साथ ऐरावणने बलात्कार किया है ॥ ११० ॥ १११ ॥ मैरावण भी मुझे कुदृष्टिसे देखता है। इन दोनोंको रतिदान देनेकी सामर्थ्य मेरेमें नहीं है ॥ ११२ ॥ एक मेरा मित्र है और एक शत्रु है। पर उन दोनोंसे मुझे दुःख ही मिलता है। अतः इन दोनोंके मारे जानेपर मुझको तो आनन्द ही होगा ॥ ११३ ॥ किन्तु हे मारुते ! यदि राम मुझे अपनी स्त्री बनायें तो मैं वह उपाय बतला सकती हूँ, जिससे कि वे दोनों मारे जा सकें ॥ ११४ ॥ यही

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भविष्यति रामचन्द्रस्तथेत्युक्त्वा तमाह सा । भ्रमरानेकदा पूर्वं बालैः कंटकरोपितान् ॥११६॥
मोचयामासतुस्तौ हि तेन तुष्टाश्च षट्पदाः । तावूचुस्ते युवाभ्यां हि मरणाद्रक्षिता वयम् ॥११७॥
यथा तथा युवां चापि रक्षामो मरणाद्वयम् ।इत्युक्त्वा ते स्थिताश्चात्र ते नीत्वाऽमृतमुत्तमम्॥११८॥
तद्रक्तबिंदून् स्पृष्ट्वा ते प्रकुर्वंति सजीवितौ । भ्रमरास्ते तयोर्निद्रास्थाने संत्यधुना कपे ॥११९॥
कोटिशस्तान्मर्दयस्व सोऽपि तान्मर्दयत्क्षणात् । तत्रैकं शरणं प्राप्तं भ्रमरं प्राह मारुतिः ॥१२०॥
कुरु मंचकगर्भं त्वं गजभुक्तकपित्थवत् । ऐरावणभोगपत्न्याः षट्पदोऽपि तथाऽकरोत् ॥१२१॥
ततो निहत्य तौ दैत्यौ पुनर्बाणै रघूद्वहः । अभिषिच्य तयोः स्थाने राज्ये तं मकरध्वजम् ॥१२२॥
यावद्गंतुं मनश्चक्रे तावन्मारुतिनाऽर्थितः । नागकन्यागृहं गत्वा नानाचित्रविचित्रितम् ॥१२३॥
दृष्ट्वा तां चारुवदनां वस्त्रालङ्कारमण्डिताम् ।धृत्वा करेण तद्धस्तं किंचित्कृत्वा स्मिताननम् ॥१२४॥
चकार मञ्चकं भग्नं स्वभारेण रघूत्तमः । ततस्तया प्रार्थितः स रामस्तां पुनरब्रवीत् ।१२५॥
त्यक्त्वा देहं भुवं गत्वा भूत्वा ब्राह्मणकन्यका । तपस्तप्त्वा चिरं कालं तृतीये त्वं तु जन्मनि ॥१२६ ।
द्वापरे द्वारकायां हि मम पत्नी भविष्यसि । तद्रामवचनं श्रुत्वा रामाग्रेऽग्नि प्रविश्य सा ॥१२७॥
कन्याकुमारी नाम्नासीद्द्विजकन्याऽब्धिरोधसि। मारुतेः स्कंधसंस्थोऽभूत्तदा रामो मुदान्वितः ॥१२८॥
राज्ये कृत्वा मन्त्रिणं स्वं लक्ष्मणं मकरध्वजः । अकरोत्तं स्कंधसंस्थं शेषं ब्रह्माण्डधारकम् ॥१२९॥
ततः क्षणाज्जग्मतुस्तौ लंकां श्रीरामलक्ष्मणौ । श्रीरामलक्ष्मणौ दृष्ट्वा सुग्रीवाद्याश्च वानराः ॥१३०॥
तावालिंग्य मुहुर्नत्वा बभूवुस्तोषपूरिताः । रामोऽपि सकलं वृत्तं सुग्रीवादीन्न्यवेदयत् ॥१३१॥

सुनकर मारुतिने कहा कि यदि श्रीरामके भारसे तुम्हारा पलंग नहीं टूटेगा तो राम तुम्हारे पति बनेंगे ॥११५॥ तब 'तथास्तु' कहकर उसने कहा कि पूर्व समयमें एक बार बालकोंके द्वारा काँटोंपर आरोपित भ्रमरोंको उन ऐरावण-मैरावणने छुड़ा दिया था। इससे सन्तुष्ट होकर उन भ्रमरोंने उन दोनोंसे कहा कि तुम दोनों-ने हम लोगोंको मरनेसे बचाया है ॥ ११६ ॥ ११७ ॥ इसलिए जैसे भी होगा, हम तुम दोनोंकी मृत्युसे रक्षा करेंगे। इतना कहकर वे सब भँवरे वहीं रहने लगे। बस, ये भँवरे ही इस समय उत्तम अमृत लाकर उसकी बिन्दुओंसे इन दोनोंके रक्तको स्पर्श कराके बारम्बार सजीव कर दिया करते हैं। हे कपे ! वे भँवरे अभी भी उन दोनोंके शयनगृहोंमें विद्यमान हैं ॥ ११८ ॥ ११९ ॥ वे करोड़ोंकी संख्यामें हैं। तुम उन्हें मार डालो। उसके कथनानुसार हनुमान्ने जाकर क्षणभरमें उन सब भँवरोंको मार डाला। उनमेंसे शरणमें आये हुए एक भँवरेसे मारुतिने कहा–॥ १२० ॥ तुम जाकर ऐरावणकी भोगपत्नीके पलंगको भीतरसे खाकर हाथीके द्वारा खाये हुए कैथेकी तरह अन्दर ही अन्दरसे खोखला कर दो। भँवरेने वैसा ही किया । १२१॥ बादमें राम-चन्द्रने बाणसे उन दोनों राक्षसों को मार डाला और उनके स्थानमें राज्यासनपर मकरध्वजको अभिषिक्त कर दिया ॥ १२२ ॥ इतना करके उन्होंने ज्यों ही वहाँसे चलनेकी तैयारी की, त्यों ही मारुतिने रामसे प्रार्थना की कि आप नागकन्याके घर चलकर अनेक चित्र-विचित्र शोभा देखें ॥ १२३ ॥ वस्त्रों तथा अलङ्कारोंसे मण्डित सुन्दर मुखवाली उस कन्याका हाथ पकड़े तथा कुछ हँसकर उसके पलङ्गपर बैठकर अपने भारसे उसके पलङ्गको तोड़ आएँ। यह सब कर लेनेके बाद उस कन्यासे प्रार्थित रामने उनसे कहा–॥ १२४ ॥ १२५ ॥ तू इस देहको छोड़-कर पृथ्वीपर जा । वहाँ ब्राह्मणकन्याका शरीर धारण करके बहुत कालतक तप करनेके बाद तीसरे जन्म तथा द्वापरके युगमें तू मेरी पत्नी बनेगी। रामके सुन्दर तथा मधुर वाक्यको सुनकर वह रामके सामने ही अग्निमें प्रवेश कर गयी ।। १२६ ॥ १२७ ॥ जन्मान्तरमें वह कन्याकुमारी नामकी द्विजकन्या होकर पृथ्वीपर उत्पन्न हुई। तब राम मारुतिके कन्धेपर प्रसन्नतापूर्वक आरूढ़ हुए ॥ १२८ ॥ मारुतितनय मकरध्वजने भी अपने राज्यका भार मन्त्रीको सौंप दिया और ब्रह्माण्डको धारण करनेवाले शेषके अवतारस्वरूप लक्ष्मणको अपने कन्धेपर बिठा लिया ॥ १२९ ॥ इस प्रकार दोनों भाई राम-लक्ष्मण क्षणभरमें लङ्का जा पहुँचे। श्रीराम तथा लक्ष्मणको देखकर सुग्रीव आदि सब वानर बड़े प्रसन्न हुए और बारम्बार आलिङ्गन तथा प्रणाम करने लगे। रामने भी

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दैत्यौ रामेण निहतौ श्रुत्वा सदसि रावणः । राक्षसांश्चकितः प्राह पूर्ववृत्तं भयान्वितः ॥१३२॥
मानुषेणैव मृत्युर्मे ह्याह पूर्वं पितामहः । अतो नारायणः साक्षान्मानुषोऽभून्न संशयः ॥१३३॥
रामो दाशरथिर्भूत्वा मां हंतुं समुपस्थितः । यदाऽनरण्यः पूर्वं हि स हतो दीक्षितो मया ॥१३४॥
शप्तश्चाहं तदा तेन सूर्यवंशोद्भवेन हि । उत्पत्स्यते च मद्वंशे परमात्मा सनातनः ॥१३५॥
स एव त्वां पुत्रपौत्रैर्बांधवैर्निहनिष्यति । इत्युक्त्वा स ययौ नाकं सोऽधुना समयो मम ॥१३६॥
समागतो राघवो मां समरे स हनिष्यति । विबोध्य कुम्भकर्णं तमानयध्वं त्वरान्विताः ॥१३७॥
ततस्ते तां गुहां गत्वा तच्छ्वासेन विकर्षिताः । यातायाते प्रचक्रुस्ते कुम्भकर्णोदरे मुहुः ॥१३८॥
तदैकत्र बाहुपाशैर्बलं कृत्वाऽथ राक्षसाः । गत्वा तदंतिकं भीत्या निजघ्नुस्तं द्रुमैः पदैः ॥१३९॥
शिलाभिस्ताडयामासुश्चाश्वैरुष्ट्रैर्व्यचूर्णयन् । काष्ठभारैर्महादाहं देहे चक्रुर्नृपाज्ञया ॥१४०॥
तदा प्रबुद्धश्चोत्थाय सूकरान् महिषान् वरान् । कोटिशः स्वमुखे क्षिप्त्वा जलवापीर्विशोष्य सः॥१४१॥
गत्वा नत्वा राक्षसेन्द्रं बोधयामास रावणम् । एकदाऽहं वनं गत्वा दृष्ट्वा तं नारदं मुनिम् ॥१४२॥
पृष्टवाँस्त्वं कुत्र यासि कुतश्चागमनं कृतम् । स मां प्राह देवलोकादयोध्यां प्रति गम्यते ॥१४३॥
रावणादीन् रणे हंतुं विष्णुर्जातोऽत्र मानुषः । देववाक्यात्त्वरयितुं रामं गच्छाम्यहं जवात् ॥१४४॥
इत्युक्त्वा मां गतः सोऽथ प्रेषयामास राघवम् । इति श्रुतं मया पूर्वं तवाग्रे तन्निवेदितम् ॥१४५॥
अतोऽर्पयाद्य रामाय सीतां सख्यं कुरु प्रभो । इति तद्वचनं श्रुत्वा रावणस्तं वचोऽब्रवीत् ॥१४६॥
निद्राव्याप्तेऽक्षिणी तेऽद्य गच्छ निद्रां सुखं कुरु । तद्बंधोः क्रूरवचनं श्रुत्वा नत्वाऽथ रावणम् ॥१४७॥

वहाँका सब समाचार सुग्रीव आदिको कह सुनाया ॥ १३० ॥ १३१ ॥ उधर भरी सभामें रावणने जब ऐरावण तथा मैरावणकी मृत्युका समाचार सुना तो घबराकर भयभीत भावसे अपना पूर्ववृत्तान्त राक्षसोंसे कहने लगा ॥ १३२ ॥ उसने कहा कि पितामह ब्रह्माने मुझे पहले ही कह रक्खा है कि तेरा मरण मनुष्यके द्वारा होगा। इससे ज्ञात होता है कि ये राम साक्षात् नारायण ही मनुष्यरूप धारण करके आये हैं। इसमें संदेह नहीं है॥ १३३ ॥ इन रामने मुझे मारनेके लिए ही दशरथपुत्र बनना स्वीकार किया है और यहाँ आकर उपस्थित हुए हैं। जब मैंने पूर्वकालमें (दीक्षाको प्राप्त या सत्सङ्कल्पनिरत) अनरण्य नामके सूर्यवंशी राजाको मार डाला था ॥ १३४ ॥ उस समय राजाने मुझे शाप दिया था कि मेरे वंशमें सनातन पुरुष परमात्मा उत्पन्न होंगे॥ १३५ ॥ वे तुम्हें पुत्र-पौत्र तथा बान्धवों सहित मारेंगे। इतना कहकर राजा स्वर्ग चले गये। बस, अब वही समय आ गया है ॥ १३६ ॥ राम मुझे समरमें अवश्य मारेंगे। तुमलोग जाकर शीघ्र कुम्भकर्णको जगाकर यहाँ ले आओ॥ १३७॥ बादमें वे सब जब उस गुफामें गये, जहाँपर कुम्भकर्णका सोया था। तब तो उसके लम्बे तथा बलवान् श्वाससे आकर्षित होकर वे सब बार-बार उसके पेटमें आने-जाने लगे ॥ १३८ ॥ यह देखकर वे बड़े चकराये और एक साथ मिल तथा बाहुबलका आश्रय लेकर किसी प्रकार उसके शरीरके पास पहुँचे। वहाँ जाकर डरते हुए वे लातों तथा पेड़ोंसे पीटकर उसे जगाने लगे ॥ १३९ ॥ उसपर बहुतेरे पत्थर फेंके, घोड़ों तथा ऊँटोंसे कुचलवाया, पर उसकी नींद नहीं टूटी। तब राजाकी आज्ञासे उसपर बहुतसे लकड़ीके ढेर डालकर जलाये गये ॥ १४० ॥ तब वह किसी प्रकार उठा और करोड़ों सूअर तथा मोटे-मोटे भैंसोंको खा तथा जलपान करके उसने एक बावलीको सुखा दिया ॥ १४१ ॥ तत्पश्चात् वह राक्षसेन्द्र रावणके पास गया और समझाकर कहने लगा कि एक बार मैं वनमें गया था। मैंने वहाँ नारद मुनिको देखकर पूछा–॥ १४२ ॥ हे महामुने ! आप कहाँसे आये और कहाँ जा रहे हैं ? उन्होंने कहा कि मैं देवलोकसे अयोध्या जा रहा हूँ ॥ १४३ ॥ वहाँ रावणादिको मारनेके लिए साक्षात् नारायण अवतरे हैं। उन भगवान् रामको देवताओंके कथनानुसार जल्दी करनेका स्मरण करानेके लिए मैं वेगसे जा रहा हूँ॥ १४४ ॥ इतना कहकर वे चले गये। उन्होंने ही रामको भेजा है। इस प्रकार जो मैंने सुना था, सो कह सुनाया ॥ १४५ ॥ इसलिए तुम सीता रामको समर्पण करके उनसे मित्रता कर लो। यह सुनकर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जवाद्ययौ स युद्धायोल्लंघ्य प्रासादमुन्नतम् । कुम्भकर्णं ततो दृष्ट्वा कृपणा भयविह्वलाः ॥१४८॥
चक्रुः पलायनं सर्वे रामपार्श्वमुपागताः । कुम्भकर्णं तत्र दृष्ट्वा प्रणनाम विभीषणः ॥१४९॥
उवाच प्रणतो भूत्वा मया राजाऽतिबोधितः । सीतां रामाय देहीति तेन धिग्धिकृतस्त्वहम् ॥१५०॥
तच्छ्रुत्वाऽहं राघवस्य सेवां कर्तुमुपागतः । तच्छ्रुत्वा बंधुवचनं कुम्भकर्णस्तमब्रवीत् ॥१५१॥
सम्यक्कृतं त्वया वत्स मदग्रे मा स्थिरो भव । युद्धे स्वीयः परो वाऽत्र ज्ञायते न मयाऽद्य हि ॥१५२॥
ततो बंधुं नमस्कृत्य रामपार्श्वमुपाययौ । कुम्भकर्णोऽपि हस्ताभ्यां पादाभ्यां पेषयन्हरान् ॥१५३॥
चचार वानरीं सेनां तत्र दृष्ट्वा कपीश्वरम् । त्रिशूलेनाथ तं भित्त्वाऽऽनयामास पुरीं तु सः ॥१५४॥
मार्गे स्वस्थः स सुग्रीवः कर्णौ घ्राणं रिपोर्नखैः । छित्वा ययौ राघवेंद्रं सोऽपि पौरैर्विलज्जितः ॥१५५॥
पुनर्ययौ रणभुवं तं दृष्ट्वा रघुनंदनः । विव्याध निशितैर्बाणैः सोऽपि रामं द्रुमैर्नगैः ॥१५६॥
ताडयामास तान् बाणैर्निवार्य रघुनन्दनः । वायव्यास्त्रेण चिच्छेद तद्बाहू सायुधौ क्षणात् ॥१५७॥
छिन्नबाहुमथायांतं नदत वीक्ष्य राघवः । द्वावर्द्धचंद्रौ निशितावादायास्य पदद्वयम् ॥१५८॥
चिच्छेद पतितौ पादौ लङ्काद्वारि महास्वनौ । निकृत्तहस्तपादोऽपि कुम्भकर्णोऽतिभीषणः ॥१५९॥
वडवामुखवद्वक्त्रं व्यादाय रघुनंदनम् । अभिदुद्राव विनदन् राहुश्चन्द्रमसं यथा ॥१६०॥
अपूरयच्छिताग्रैश्च सायकैस्तद्रघूत्तमः । शरपूरितवक्त्रोऽसौ चुक्रोशातिभयंकरः ॥१६१॥
अथ सूर्यप्रतीकाशमैंद्रं शरमनुत्तमम् । मुमोच तेन चिच्छेद कुम्भकर्णशिरो महत् ॥१६२॥
तथा खे देववाद्यानि नेदुः कुसुमवृष्टिभिः । ववर्षुरमरा रामं तुष्टुवुर्विविधैः स्तवैः ॥१६३॥
पितृव्यं निहतं श्रुत्वा पितरं चातिविह्वलम् । रावणिः सांत्वयामास त्वं मे पश्याद्य वै बलम् ॥१६४॥

रावणने कहा—॥ १४६ ॥ अभी तुम्हारी आँखोंमें निद्रा भरी है, जाकर सो जाओ। मैंने तुमको उपदेश देनेके लिये नहीं बुलाया है। बन्धुके ऐसे कठोर वचन सुनकर उसने रावणको नमस्कार किया ॥ १४७ ॥ तदनन्तर बड़े वेगसे वह मकानों तथा गढ़को लाँघकर लड़नेके लिए गया। उस भयानक कुम्भकर्णको देखते ही सब वानर दौड़कर रामके पास चले गये। विभीषणने कुम्भकर्णको आया देखकर नमस्कार किया ॥ १४८ ॥ १४९ ॥ फिर कहा कि मैंने राजा रावणको बहुत नम्रतापूर्वक समझाया कि तुम सीता रामको दे दो। इसपर उसने मुझे बहुत धिक्कारा। तब मैं उसके धिक्कारसे दुःखी होकर यहाँ रामकी सेवामें चला आया। यह सुनकर कुम्भकर्णने कहा—॥ १५० ॥ १५१ ॥ हे वत्स ! तुमने बहुत अच्छा किया, पर इस समय तुम मेरे सामनेसे हट जाओ। मुझे इस समय युद्धमें अपना-पराया नहीं सूझ रहा है ॥१५२॥ तब विभीषण भाईको नमस्कार करके रामके पास चले गये। कुम्भकर्ण भी हाथों तथा पाँवोंसे वानरोंको पीसता हुआ वानरी सेनामें यथेच्छ विचरने लगा। अन्तमें कपीश्वर सुग्रीवको देखते ही उन्हें त्रिशूलमें पोहकर वह सहर्ष लंका पुरीकी ओर ले चला ॥१५३॥१५४॥ रास्तेमें सुग्रीवको जब होश आया तो नखोंसे कुम्भकर्णके नाक-कान काटकर वे राघवेन्द्र रामके पास लौट आये। कुम्भकर्ण भी पुरवासियोंसे लज्जित होकर पुनः रणस्थलीमें लड़ने चला गया। उसे देखकर रघुनन्दन रामने अपने तीक्ष्ण बाणोंसे बींधना आरम्भ किया। उन्होंने हथियार समेत उसके हाथ काट गिराये ॥ १५५–१५७ ॥ रामने जब देखा कि भुजा कट जानेपर भी वह गर्जन करता हुआ सामने चला आ रहा है, तब उन्होंने दो अर्धचन्द्राकार बाणोंसे उसके दोनों पैर काट दिये। वे कटे पाँव जाकर लंकाके दरवाजेपर गिरे। हाथ-पाँवसे रहित होकर भी कुम्भकर्ण अति भीषण बडवानलके समान मुख फाड़कर घोर नाद करता हुआ चन्द्रमापर राहुके समान रामपर झपटा ॥ १५८-१६० ॥ तब रामने तीक्ष्ण बाणोंसे उसका मुँह भर दिया। मुखमें बाण भर जानेसे वह और भी भयानक तथा क्रुद्ध हो उठा ॥ १६१ ॥ तब रामने उसपर सूर्यके समान प्रदीप्त ऐन्द्र बाण छोड़ा। उससे कुम्भकर्णका महान् सिर कटकर गिर पड़ा ॥ १६२ ॥ उस समय आकाशमें देवताओंने दिव्य बाजे बजाये और पुष्पोंकी वर्षा करके रामकी विविध स्तोत्रोंसे स्तुति की ॥ १६३ ॥ चाचा कुम्भकर्णको मारा गया तथा पिताको विह्वल सुनकर रावणपुत्र मेघनाद पिताको सांत्वना देकर बोला-हे पिताजी ! आप आज

CC0. In Public Domain. Kulkant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युक्त्वा त्वरितं गत्वा मेघनादो निकुम्भिलाम् । रक्तमाल्यांबरधरो हननायोपचक्रमे ॥१६५॥
रक्षार्थं दिव्यशस्त्रार्थं जयार्थमभिचारकैः । योगिनीवटाधोभूम्यां गुहायां संस्थितो रहः ॥१६६॥
तोयानिलानलव्याघ्रसर्पराक्षसकंटकैः । आत्मनः परितः कृत्वा परिधान् सप्त दुर्गमान् ॥१६७॥
होमकुण्डोर्ध्वतः सर्पं बद्ध्वा कृष्णमधोमुखम् । रक्तपुष्पांबरधरो रक्तचंदनलेपितः ॥१६८॥
रक्तपुष्पाक्षता गुञ्जा सर्षपश्चंदनेक्षुभिः । खदिराम्रपलाशोदुम्बरभल्लातकास्थिभिः ॥१६९॥
समिद्भिर्माषमांसादिभल्लातकफलैरपि । अर्कनिंबबीजपूरकृष्णधत्तूररोचनैः ॥१७०॥
अपामार्गबदरिकानलदालकबंधुकैः । नरमुंडैः समांसैश्च बिभीतकफलादिभिः ॥१७१॥
सर्पषडैश्च मण्डूकैस्त्वग्दंतस्नायुलोमभिः । नानावनचराणां च मांसैरपि समन्त्रकम् ॥१७२॥
इत्थं चकार होमं स निमील्य नयने रहः । विभीषणोऽपि तं दृष्ट्वा होमधूम्रं भयावहम् ॥१७३॥
प्राह रामाय सकलं होमारंभं दुरात्मनः । समाप्यते चेद्धोमोऽयं मेघनादस्य दुर्मतेः ॥१७४॥
स चाजय्यो भवेद्राम मेघनादः सुरासुरैः । अतः शीघ्रं लक्ष्मणेन घातयिष्यामि रावणिम् ॥१७५॥
यस्तु द्वादश वर्षाणि निद्राहारविवर्जितः । तेनैव मृत्युर्निर्दिष्टो ब्रह्मणाऽस्य दुरात्मनः ॥१७६॥
लक्ष्मणोऽयं यदाऽयोध्यापुर्यास्त्वामनुनिर्गतः । तदादि निद्राहारादीन्न प्राप्तः स रघूत्तम ॥१७७॥
सेवार्थं तव राजेन्द्र ज्ञातं सर्वमिदं मया । ततो रामाज्ञया गत्वा लक्ष्मणेन विभीषणः ॥१७८॥
हनुमत्प्रमुखैर्वीरैर्यूथपैः सर्वतो वृतः । लक्ष्मणं दर्शयामास होमस्थानं निकुम्भिलाम् ॥१७९॥
अङ्गदस्कंधमारुह्य वह्न्यस्त्रेणाथ कंटकान् । ज्वालयामास सौमित्रिर्जघान राक्षसाञ्छरैः ॥१८०॥
गारुडास्त्रेण सर्पांश्च पर्वतास्त्रेण दंष्ट्रिणः । अनलं शांतमकरोत्पर्जन्यास्त्रेण लक्ष्मणः ॥१८१॥
प्राशयामास हनुमाननिलं क्षणमात्रतः । जलं संशोषयामास वायव्यास्त्रेण लक्ष्मणः ॥१८२॥

मेरा बल देखें ॥ १६४ ॥ इतना कहकर मेघनाद तुरन्त निकुम्भिला नामकी पश्चिमी गुफामें गया। वहाँ लाल फूलोंकी माला तथा लाल वस्त्र धारण करके वह हवनकी तैयारी करने लगा ॥ १६५ ॥ दिव्य रथ, दिव्य अस्त्र तथा जयलाभके लिए अभिचारक्रिया करनेका निश्चय करके वह गुफाके भीतर योगिनीवटके पास एकान्तमें जा बैठा ॥ १६६ ॥ उसने वहाँ अपनी सुरक्षाके लिये अग्नि जल वायु सिंह सर्प राक्षस तथा काँटोंसे अपने चारों ओर सात दुर्ग बना लिये ॥ १६७ ॥ होमकुण्डके ऊपरी भागमें अधोमुख करके एक काला साँप बाँध दिया। तदनन्तर रक्त पुष्प तथा रक्तांबर धारण करके शरीरमें रक्त चन्दन लगाया ॥ १६८ ॥ लाल फूल, अक्षत, गुंजा, सरसों, चन्दन, ईख, बेर, आम, पलाश तथा भेलावेकी लकड़ियें, समिधा, उर्द, मांस, भल्लातककी गुठली, आक, नीम, बीजपूर, कृष्ण धतूरा, नीबू, चिचिड़ा, बेर, चित्रक, दालक, बंधूक, नरमुण्ड, चरबी, बिभीतकफल, सर्पखण्ड, मण्डूक, चर्म, दाँत, स्नायु, आंत, मोम तथा नाना वनचरोंके मास आदिसे उसने मन्त्रोच्चारपूर्वक एकान्तमें हवन प्रारम्भ कर दिया। सहसा विभीषणने होमके भयानक धुएँको उठते देखा ॥ १६९-१७३ ॥ तब उन्होंने रामसे कहा—देखिये, उस दुरात्माने होम आरम्भ कर दिया है। यदि उस दुर्बुद्धि मेघनादका होम निर्विघ्न समाप्त हो गया तो फिर हे राम! वह दैत्यों तथा देवताओंसे भी अजेय हो जायगा। इसलिए शीघ्र लक्ष्मणके द्वारा मैं उसको मरवा दूँगा ॥ १७४ ॥ १७५ ॥ जो मनुष्य बारह वर्षतक निद्रा तथा आहारसे रहित रहा हो, उसीसे ब्रह्माने मेघनादकी मृत्यु कही है ॥ १७६ ॥ लक्ष्मण जब अयोध्यासे निकले हैं, तबसे निद्रा तथा आहार त्यागकर इन्होंने आपकी सेवा की है। यह मैं भली भाँति जानता हूँ। पश्चात् रामकी आज्ञासे लक्ष्मण तथा हनुमान आदि वीर सेनापतियोंको साथ लेकर विभीषण वहाँ गये और लक्ष्मणको निकुम्भिला-का होमस्थान बताया ॥ १७७-१७९ ॥ वहाँ जाकर लक्ष्मणने अङ्गदके कन्धेपर सवार होकर अग्निबाणसे काँटोंको जलाकर राक्षसोंको मार डाला ॥ १८० ॥ उन्होंने गारुडास्त्रसे सर्पों तथा पर्वतास्त्रसे दाँतवाले सिंह आदि जन्तुओंको समाप्त कर दिया। उन्होंने मेघास्त्रसे अग्निको शान्त किया। हनुमान्ने क्षणभरमें

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिघेष्वपि नष्टेषु तत्रादृष्ट्वा रिपोः स्थलम् । यथावुत्पाटितुं क्रोधाद्धनुमान्योगिनीवटम् ॥१८३॥
तदा तां दर्शयामास वटस्थां योगिनीगुहाम् । गुहापिधानपाषाणं हनुमान्पादघट्टनैः ॥१८४॥
चूर्णीकृत्य गुहासंस्थं मेघनादं व्यतर्जयत् । तदा स मेघनादोऽपि त्यक्त्वा होमं त्वरान्वितः ॥१८५॥
क्रोधाविष्टो रथे स्थित्वा ययौ लक्ष्मणसंमुखम् । शस्त्रैरस्त्रैः पर्वताद्यैर्मर्मभिद्भिर्निजोक्तिभिः ॥१८६॥
चकार लक्ष्मणेनैव युद्धं तत्तारकामयम् । सौमित्रिरपि बाणौघै रथमश्वान्धनुर्ध्वजम् ॥१८७॥
तद्दृढं कवचं सूतं बिभेद क्षणमात्रतः । ततः सोऽन्येन धनुषा मुक्त्वा बाणान्सहस्रशः ॥१८८॥
पद्भ्यामेवास्थितो भूम्यां चिच्छेद कवचं रिपोः । तदा क्रुद्धः स सौमित्रिर्बाणेनेंद्रजितश्च हि ॥१८९॥
सशरं दक्षिणभुजं पातयामास तद्गृहे । तदा स वामहस्तेन मेघनादोऽतिविह्वलः ॥१९०॥
दुद्राव लक्ष्मणं हंतुं धृत्वा शूलमनुत्तमम् । तं चापि मार्गणेनैव सशूलं वामसत्करम् ॥१९१॥
मेघनादस्य सौमित्रिश्छित्त्वा रावणसन्निधौ । पातयामास लंकायां तदद्भुतमिवाभवत् ॥१९२॥
तदा व्यादाय स्वमुखं रावणिर्लक्ष्मणं ययौ । लक्ष्मणोऽपि शरं दिव्यं रामनामांकितं शुभम् ॥१९३॥
मुमोच रघुवीरस्य कृत्वा चिंतनमादरात् । स शरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् ॥१९४॥
प्रमथ्येंद्रजितः कायात्पातयामास तच्छिरः । ततः प्रमुदिता देवाः सौमित्रिं परितुष्टुवुः ॥१९५॥
पुष्पाणि विकिरंतो वै चक्रुर्नीराजनं मुहुः । गतश्रमः स सौमित्रिः शंखमापूरयद्रणे ॥१९६॥
श्रुत्वा सीता शंखनादं त्रिजटां प्रेष्य सादरम् । शुश्राव सकलं वृत्तं तद्वाक्यात्प्रतुतोष सा ॥१९७॥
ततस्तन्मेघनादस्य शिरः संगृह्य मारुतिः । राघवाय दर्शयितुं त्वरयामास लक्ष्मणम् ॥१९८॥
तदा स वानरैर्युक्तोऽङ्गदस्थः सविभीषणः । नानावाद्यनिनादैश्च सौमित्री राघवं ययौ ॥१९९॥
नत्वा तं दर्शयामास मेघनादस्य तच्छिरः । तद्दृष्ट्वाऽऽलिंग्य सौमित्रिं रामस्तुष्टोऽभवत्तदा ॥२००॥

वायु पी लिया और लक्ष्मणने वायव्यास्त्रसे जलको सुखा दिया ॥ १८१ ॥ १८२ ॥ उन सब घेरोंके नष्ट हो जानेपर भी जब शत्रुका स्थान नहीं दिखायी दिया तो हनुमान् क्रुद्ध होकर योगिनीवटकी ओर गये। वहाँ उन्हें योगिनीवटवाली गुफा दीख पड़ी, तुरन्त गुफाके द्वारपर लगे हुए पत्थरको हनुमान्‌ने लात मारकर चूर्ण कर डाला और भीतर जाकर मेघनादको ललकारा। तब मेघनादने भी तुरन्त होम छोड़ दिया ॥ १८३–१८५ ॥ तदनन्तर क्रोधके साथ रथपर सवार होकर वह लक्ष्मणके समक्ष गया और अस्त्र शस्त्र, पर्वत तथा मर्मभेदी वाक्योंसे उनको जीतनेकी इच्छासे भयानक युद्ध करने लगा। लक्ष्मणने भी अनवरत बाण छोड़कर उसके अश्व, रथ, धनुष, ध्वजा, दृढ़ कवच तथा सारथीको क्षणभरमें छिन्न-भिन्न कर दिया। तब मेघनाद भी दूसरा धनुष ले तथा नीचे ही खड़े हो हजारों बाण छोड़कर शत्रुके कवचको काटने लगा। उस समय लक्ष्मणने क्रुद्ध होकर अपने बाणसे इन्द्रजित्‌का बाणके सहित दाहिना हाथ काटकर उसीके घरमें गिराया। तब विह्वल होकर मेघनादने बायें हाथमें त्रिशूल सम्हाला ॥ १८६–१९० ॥ वह उत्तम त्रिशूल लेकर लक्ष्मणको मारनेके लिए दौड़ा। तब मेघनादके त्रिशूल सहित बायें हाथको भी सुमित्रापुत्र लक्ष्मणने बाणसे ही काटकर रावणके पास गिराया। यह देखकर लंकामें सबको बड़ा आश्चर्य हुआ ॥ १९१ ॥ १९२ ॥ तब मेघनाद मुँह फाड़कर लक्ष्मणकी ओर झपटा। तब लक्ष्मणने भी रामका ध्यान करके रामनामसे अंकित दिव्य बाण छोड़ा। उस बाणने जाकर पगड़ी सहित, शोभायुक्त तथा प्रदीप्त कुण्डलवाले मेघनादके सिरको धड़से अलग करके धरतीपर गिरा दिया। यह देखकर देवतागण अतीव प्रसन्न हुए और लक्ष्मणकी स्तुति करने लगे ॥ १९३–१९५ ॥ वे उनपर कुसुमोंकी वृष्टि करके आरती उतारने लगे। तब लक्ष्मणने शान्त होकर विजयशंख बजाया ॥ १९६ ॥ वह शंखनाद सुनकर सीताने त्रिजटाको भेजा और उसके मुँहसे युद्धका समस्त समाचार सुनकर वे बहुत ही प्रसन्न हुईं ॥ १९७ ॥ इधर हनुमान्‌जीने मेघनादका सिर लेकर रामको दिखलानेके लिये लक्ष्मणसे शीघ्र चलनेको कहा ॥ १९८ ॥ तब लक्ष्मण विभीषण और वानरोंको साथ ले तथा अङ्गदके कंधेपर सवार होकर अनेक बाजे-गाजेके साथ रामके पास गये ॥ १९९ ॥ वहाँ जाकर लक्ष्मणने रामको प्रणाम किया और

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रावणोऽपि भुजं दृष्ट्वा श्रुत्वा पुत्रवधं तथा । पपात पुत्रदुःखेन सभायां मूर्छितो भुवि ॥२०१॥
क्रोधात्स खड्गमुद्यम्य ययौ हंतुं विदेहजाम् । सुपार्श्वो नाम मेधावी मंत्री तं संन्यवारयत् ॥२०२॥
सखड्गं तत्करं धृत्वा स्वहस्ते स त्वरान्वितः । उवाच नीतिसंयुक्तं वचनं रावणं तदा ॥२०३॥
कथं नाम दशग्रीव कोपात्स्त्रीवधमिच्छसि । अस्माभिः सहितो युद्धे हत्वा रामं सलक्ष्मणम् ॥२०४॥
प्राप्स्यसे जानकीं शीघ्रमित्युक्तः स न्यवर्तत । सुलोचनाऽपि कांतस्य भुजं केयूरभूषितम् ॥२०५॥
दृष्ट्वा समार्गणं स्वीयपुरतः पतितं भुवि । तदा विलापमकरोत्स्मृत्वा तत्पौरुषाणि सा ॥२०६॥
भुजोऽपि सांत्वयन् तां स लेख्य भूम्यां शरेण हि । स्वलोहिताक्षरैः प्राह मा खेदं भज भामिनि ॥२०७॥
साक्षाच्छेषशराघातैर्हतोऽहं मुक्तिमागतः । त्वं चापि गत्वा श्रीरामं नत्वा याचस्व मच्छिरः ॥२०८॥
तत्त्वां दास्यति रामोपि तेनाग्निं विश्य याहि माम् । सुलोचना पठित्वा सा लिखितान्यक्षराणि हि ॥२०९॥
तुष्टा पृष्ट्वा रावणाय मंदोदर्यै विभूषिता । ययौ रामं शिबिकया तां दृष्ट्वा वानरोत्तमाः ॥२१०॥
सीतेयं रावणेनाद्य भयाद्रामं विसर्जिता । इति मत्वाद्रुद्रुवुस्ते सीताया दर्शनेच्छया ॥२११॥
शिबिकां वेष्टयामासुर्ज्ञात्वा तां तु सुलोचनाम् । शिबिकावाहकास्येनाययुः श्रीराघवं पुनः ॥२१२॥
सुलोचनाऽपि श्रीरामं ननाम शिरसा मुहुः । भर्तुः शिरः कांक्षमाणां तां रामो वाक्यमब्रवीत् ॥२१३॥
कृपया तव भर्तारं करोम्यद्य सजीवितम् । मा विशस्वाद्य वह्निं त्वं रोचते चेद्वदस्व माम् ॥२१४॥
तदा सा प्राह श्रीरामं पुनः सौमित्रिहस्ततः । कुतो भवेत्तन्मरणं मोक्षदं जीवयस्व मा ॥२१५॥
इत्युक्त्वा राघवं दत्त्वा सस्मितं कपिवाक्यतः । कृत्वा शिरः पतेस्तत्र लब्ध्वा सा भर्तृसच्छिरः ॥२१६॥
लङ्कायास्तौ समानीय भुजौ गत्वा निकुम्भिलाम् । भर्तृदेहेन संयोज्य विवेशाग्निं यथाविधि ॥२१७॥

मेघनादका कटा सिर दिखाया । उसे देखकर रामने लक्ष्मणको छातीसे लगा लिया और बहुत आनन्दित हुए ॥ २०० ॥ रावणने पहले पुत्रका कटा हुआ हाथ देखा । पश्चात् उसकी मृत्यु सुनी तो मूर्छित होकर सभामें ही जमीनपर गिर पड़ा ॥ २०१ ॥ बादमें वह क्रोधपूर्वक खड्ग लेकर सीताको मारनेके लिए चला । उस समय सुपार्श्व नामके बुद्धिमान् मंत्रीने उसको रोका और उसका तलवारवाला हाथ अपने हाथसे पकड़कर नीतियुक्त उपदेश देते हुए कहा—॥ २०२ ॥ २०३ ॥ हे दशग्रीव ! क्रोधावेशमें आकर स्त्रीहत्या करना पाप है । हमारे साथ चलकर युद्ध करो । रणमें राम-लक्ष्मणको मारकर जानकीको अपनी स्त्री बनाओ । इस तरह समझानेपर रावण शान्त हो गया । उधर सुलोचना अपने पति मेघनादका केयूरविभूषित तथा वाणयुक्त हाथ अपने सामने पृथ्वीपर पड़ा देखकर उसके पुरुषार्थका स्मरण करके विलाप करने लगी ॥ २०४ ॥ २०५ ॥ तब उस कटी भुजाने वाण द्वारा अपने खूनसे जमीनपर 'हे भामिनी ! तुम दुःखिनी मत होओ' ऐसा लिखकर सुलोचनाको आश्वासन दिया ॥ २०६ ॥ २०७ ॥ उसने यह भी लिखा कि 'मैं साक्षात् शेषावतार लक्ष्मणके वाणसे मरकर मुक्तिको प्राप्त हुआ हूँ । अब तुम रामके पास जाकर मेरा सिर माँगो । वे तुमको अवश्य मेरा सिर दे देंगे । उस सिरको ले तथा अग्निमें प्रवेश करके मेरी अनुगामिनी बनो' । सुलोचना उन रक्त-लिखित अक्षरोंको पढ़कर प्रसन्न हुई । तदनन्तर रावण और मन्दोदरीसे आज्ञा ले तथा आभूषण धारण करके वह पालकीमें बैठकर श्रीरामके पास चली । वानरगणने उसको देखकर यह समझा कि रावणने डरकर सीता रामके पास भेज दी है । ऐसा समझकर वे उनके दर्शनकी इच्छासे दौड़ पड़े ॥ २०८-२११ ॥ पास जाकर पालकीको घेर लिया, पर जब पालकी ढोनेवालोंसे पता लगा कि यह सुलोचना है तो वे सब वानर रामके पास दौड़ गये ॥ २१२ ॥ सुलोचना श्रीरामके पास पहुँची तो सिर नवाकर प्रणाम किया और पतिके सिरकी प्राप्तिके लिये प्रार्थना की । तब रामने कहा—॥ २१३ ॥ मैं तुमपर कृपा करके तुम्हारे पतिको जीवित कर देता हूँ । तुम अग्निमें प्रवेश करनेका विचार छोड़ दो । बोलो, यह पसन्द है ? ॥ २१४ ॥ उसने कहा—हे महाराज ! फिर ऐसे मोक्षप्रद लक्ष्मणके हाथसे मृत्यु इन्हें कहाँ प्राप्त होगी ? इसलिये अब आप इन्हें न जिलाएँ ॥ २१५ ॥ इतना कहकर उसने फिर रामको प्रणाम किया और कपिराज सुग्रीवके आज्ञानुसार पतिके सिरको पाकर हँसती हुई वह भर्ताके

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुलोचना दिव्यदेहा वैकुण्ठं पतिना ययौ । रावणोऽपि सुहृन्मित्रैः पुनर्योद्धुं ययौ रणम् ॥२१८॥
ततो रामेण निहताः सर्वे ते राक्षसा युधि । लङ्कायां रावणः क्षिप्तः शरेण राघवेण सः ॥२१९॥
ततः कृत्वा रामशिरः कृत्रिमं मयहस्ततः । ययौ सीतां दर्शयितुं रावणोऽशोककाननम् ॥२२०॥
एतस्मिन्नन्तरे ब्रह्मा बोधयामास जानकीम् । कृतमस्ति रावणेन कृत्रिमं रामसच्छिरः ॥२२१॥
तद्दृष्ट्वा मा भजस्त्राद्य खेदं त्वमधुनाऽबले । इति सबोध्य तां सीतां ब्रह्माऽन्तर्धानमाययौ ॥२२२॥
रावणोऽपि समागत्य दर्शयामास तच्छिरः । सीतां प्राह हतो रामस्त्वधुना त्वं भजस्व माम् ॥२२३॥
तदा साऽधोमुखी प्राह तवैवाहं शिरांसि हि । रामबाणैश्च पश्यामि पतितानि रणांगणे ॥२२४॥
इति तद्वाक्यशराघातताडितः स दशाननः । ययौ तूष्णीं स्वयं गेहं लज्जयाऽवनतस्तदा ॥२२५॥
अथ रामाज्ञया सर्वे लङ्कां प्रासादमंडिताम् । ईषिकाचूडहस्तास्ते वानराः कोटिशः क्षणात् ॥२२६॥
ज्वालयामासुः सर्वत्र दत्वा वह्निं मुहुर्मुहुः । तदा कोलाहलश्चासील्लङ्कादाहे पुरा यथा ॥२२७॥
दग्धां स्वनगरीं दृष्ट्वा स्वगृहाण्यपि रावणः । दृष्ट्वा दग्धानि कपिभिर्मेघास्त्रं ससृजे जवात् ॥२२८॥
तेनासीदनलः शांतस्तद्दृष्ट्वा कपयो ययुः । ततः स रावणः शुक्रवचनाद्रहसि स्थिताम् ॥२२९॥
गुहां प्रविश्य चैकांते मौनी होमं प्रचक्रमे । लङ्काद्वारकपाटादि बद्ध्वा सर्वत्र यत्नतः ॥२३०॥
होमद्रव्याणि संगृह्य यान्युक्तानि मया पुरा । रक्तावगाहितो मुण्डमाली प्रेतासनस्थितः ॥२३१॥
परिस्तीर्याथ शस्त्राणि होमकुण्डसमंततः । आदशाहबालकानां शिरोभिर्मांसलोहितैः ॥१३२॥
एवं स रिपुघातार्थं चकार हवनं रहः । उत्थितं धूम्रमालोक्य रामं प्राह विभीषणः ॥२३३॥
यदि होमसमाप्तिः स्यात्तदाऽजेयो भवेदयम् । ततो रामो हरीन्सर्वान्प्रेषयामास सादरम् ॥२३४॥

गलेपर रखकर जोड़ दिया ॥ २१६ ॥ पश्चात् लंकामें पतिकी देहसे उसे मिलाकर यथाविधि पतिके शरीरके साथ अग्निमें जलकर सती हो गयी ॥ २१७ ॥ तदनन्तर सुलोचना दिव्य देह धारण करके पतिके साथ वैकुण्ठ चली गयी। उधर रावण पुनः बन्धुओं तथा मित्रोंको साथ लेकर रणभूमिमें युद्ध करने गया ॥ २१८ ॥ वहाँ रामने सब राक्षसोंको मारकर रावणको बाणसे उठाकर लंकामें फेंक दिया ॥ २१९ ॥ तदनन्तर रावण मयदानवके हाथसे रामका नकली मस्तक बनवाकर सीताको दिखलानेके लिए अशोकवनमें गया ॥ २२० ॥ वहाँ इसी बीच ब्रह्माने सीताको पहले ही बता दिया था कि रावण रामका नकली सिर तुम्हें दिखायेगा। यह कहकर वे अन्तर्धान हो गये। इसके बाद रावण उनके पास पहुँचा और रामका मस्तक दिखलाते हुए कहा—हे सीते ! देखो, मैंने रामको मार डाला है। अब तुम मेरी सेवा करनेके लिये तैयार हो जाओ ॥ २२१–२२३ ॥ यह सुनकर सीताने नीचे मुख करके कहा—मैं तो रामके बाणसे कटकर रणस्थलीमें गिरे हुए तेरा ही सिरोंको देखना चाहती हूँ ॥ २२४ ॥ सीताके इस वाक्यरूपी बाणसे ताडित होकर दशानन लज्जित हो और मुँह नीचा करके चुपचाप अपने महलमें चला गया ॥ २२५ ॥ तभी रामकी आज्ञासे करोड़ों वानर हाथमें घासके पूले ले-लेकर प्रासादों (हवेलियों) से भूषित लंका नगरीमें घुस पड़े ॥ २२६ ॥ उन्होंने क्षणभरमें चारों ओरसे आग लगा दी। उस समय लंकामें प्रथम लंकादहनकी ही तरह महान् कोलाहल तथा हाहाकार मचने लगा ॥ २२७ ॥ रावणने नगर तथा अपने मकानोंको जलते देखकर मेघास्त्र छोड़ा ॥ २२८ ॥ उससे आगको शान्त देखकर कपिसमूह भाग गया। पश्चात् रावण दैत्यगुरु शुक्राचार्यके कथनानुसार एकान्तकी एक गुफामें गया और मौन धारण करके होम करने लगा। उसने चौतरफासे लंकाके दरवाजे अच्छी तरह बंद कर लिये ॥ २२९ ॥ २३० ॥ पहले मैंने जो-जो हवनके द्रव्य कहे हैं, वे सब इकट्ठे कर लिये। उसने अपने सब शरीरमें लोहू लपेट लिया। गलेमें मुण्डोंकी माला पहिन ली। मृत पुरुषके शरीरको आसन बनाया ॥२३१॥ होमकुण्डके चारों ओर शस्त्र रख लिये और दस दिनसे प्रथम उत्पन्न बालकोंके सिर तथा मांस और रुधिर-से एकान्तमें शत्रुओंके नाशके लिये हवन आरम्भ कर दिया। ऊपर उठते होमके धुएँको देखकर विभीषणने रामसे कहा—॥ २३२ ॥ २३३ ॥ हे राम ! यदि होम निर्विघ्न समाप्त हो गया तो रावण सर्वथा अजेय हो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राकारं लङ्घयित्वा ते गत्वा रावणमंदिरम् । हत्वा राक्षसवृन्दं तद्गुहारक्षणतत्परम् ॥२३५॥
न ददृशुर्गुहाद्वारं यत्र होमं चकार सः । ततश्च सरमानाम प्रभाते करसंज्ञया ॥२३६॥
विभीषणस्य भार्या तान् होमस्थानमसूचयत् । गुहापिधानपाषाणानंगदः पदघट्टनैः ॥२३७॥
चूर्णयित्वा रावणश्च ताडयामास मुष्टिना । वानरास्तेऽपि तं वृक्षैस्ताडयामासुरादरात् ॥२३८॥
तद्वृत्ते वानरा दृष्ट्वा तूष्णीमेव स्थितं रिपुम् । समानयन्केशपाशे धृत्वा मंदोदरीं शुभाम् ॥२३९॥
विलपंतीं मुक्तनीवीं विह्वलां हृतकंचुकीम् । दृष्ट्वा त्यक्त्वा तदा होममुदतिष्ठत्त्वरान्वितः ॥२४०॥
ततस्ते वानराः सर्वे ययुः श्रीराघवांतिकम् । ततो मंदोदरी प्राह कुरु त्वं वचनं मम ॥२४१॥
दत्त्वा सीतां राघवाय राज्ये कृत्वा विभीषणम् । तपश्चर्यां मयारऽण्ये कर्तुमर्हसि वै सुखम् ॥२४२॥
तत्तस्या वचनं श्रुत्वा तां स प्राह दशाननः । रामो विष्णुश्च मा सीता जानामि प्राणवल्लभे ॥२४३॥
रामहस्ताद्वधं लब्धुं हृता सीता पुरा मया । रामहस्तात्त्यक्तदेहो गच्छामि परमं पदम् ॥२४४॥
त्वया कार्या क्रिया मे हि प्रविशस्वानलं ततः । ततः सुखं मया मुक्ता गमिष्यसि परं पदम् ॥२४५॥
इत्युक्त्वा प्रययौ योद्धुं रथे स्थित्वा त्वरान्वितः। राजद्वाराद्विनिर्गच्छन्नग्रे मुण्डी विलोकितः ॥२४६॥
मुकुटः पतितश्चित्रः संविग्नो रावणो हृदि । ततो ययौ रणभुवं ववर्ष निशितैः शरैः ॥२४७॥
विधाय कृत्रिमां सीतां मयेन स दशाननः । पश्यतां वानराणां च स्वरथे तां जघान वै ॥२४८॥
दिव्येन शितखड्गेन दृष्ट्वा ते तु प्लवंगमाः । हाहेत्युक्त्वा दुःखितास्ते ययू रामं निवेदितुम्॥२४९॥
तावद्वेधाः समागत्य रामादीन् प्राह सादरम् । कृत्रिमेयं हता सीता मा खेदं भजताद्य हि ॥२५०॥
ततोऽन्तर्धानमगमद्विधिस्तेऽपि प्लवंगमाः । रामाद्या ब्रह्मवाक्येन तुष्टा युद्धाय निर्ययुः ॥२५१॥

जायगा। तब रामने सब वानरोंको सादर बुलाकर युद्धके लिये भेजा ॥ २३४ ॥ वे सब परकोटेको लाँघकर रावणके मन्दिरमें घुस गये। उन्होंने वहाँ उस गुफाकी रक्षा करनेवाले राक्षसोंको मार डाला ॥ २३५ ॥ परन्तु जहाँ रावण हवन करता था, उस गुफाका दरवाजा किसीको नहीं मालूम था। तब प्रातःकालके समय विभीषणकी स्त्री सरमाने हाथके संकेतसे उन सबको होमस्थानका दरवाजा बता दिया। द्वारपर लगे हुए पाषाणको लात मारकर अंगदने तोड़ दिया और भीतर जाकर रावणको मुक्कोंसे मारने लगे। अन्यान्य वानर भी उसे वृक्षोंसे पीटने लगे ॥ २३६-२३८ ॥ फिर भी रावणको चुपचाप बैठा देखकर वानर उसकी स्त्री मन्दोदरीको केश पकड़कर वहाँ खींच लाये॥ २३९ ॥ अपनी सुन्दरी स्त्रीको रोती हुई, मुक्तकच्छ, चोलीरहित तथा विह्वल देखकर रावण होमको अधूरा छोड़कर उठ खड़ा हुआ ॥ २४० ॥ इस प्रकार उसके होमको भङ्ग करके सब वानर रामके पास भाग गये। तब मन्दोदरीने कहा–हे नाथ! तुम अब भी मेरी बात मान लो ॥ २४१ ॥ सीता रामको देकर विभीषणको लंकाका राज्य दे दो और मेरे साथ चलकर वनमें तप करो। तुमको इसीमें सुख प्राप्त होगा। स्त्रीकी बात सुनकर दशाननने कहा–हे प्राणवल्लभे ! मैं जानता हूँ कि राम साक्षात् विष्णु तथा सीता साक्षात् लक्ष्मी हैं ॥ २४२ ॥ २४३ ॥ यह जानकर ही मैं रामके हाथसे मरनेके लिए सीताको यहाँ ले आया हूँ। रामके हाथसे मरकर मैं परम पद प्राप्त करूँगा ॥ २४४ ॥ बादमें तुम भी मेरी क्रिया करके तथा अग्निमें सती होकर सुखपूर्वक मेरे साथ परम धाम प्राप्त करोगी ॥ २४५ ॥ इतना कह तथा रथपर सवार होकर वह लड़ाईके लिए चल पड़ा। राजमहलसे निकलते ही उसको सिर मुड़ाये हुए एक मुण्डी दिखायी दिया ॥ २४६ ॥ उसका चित्र-विचित्र मुकुट भी गिर पड़ा। यह देखकर रावण मनमें घबराया। फिर भी उसने समरभूमिमें जाकर बहुत तेजीसे बाणोंकी वर्षा की ॥ २४७ ॥ तदनन्तर मयदानवसे एक नकली सीता बनवाकर उसने वहीं वानरोंके सामने अपने रथपर रखकर काट डाला ॥ २४८ ॥ तेज धारवाली तलवारसे सीताको कटती देख हाहाकार करते हुए सब वानर यह समाचार रामके पास निवेदन करने गये ॥ २४९ ॥ इतनेमें ब्रह्माने आकर राम आदिको बड़े आदरसे समझाकर कहा कि यह कृत्रिम सीता मारी गयी है। तुम लोग दुखी मत होओ ॥ २५० ॥ इतना कहकर ब्रह्माजी अन्तर्धान हो गये और वे सब वानर और राम आदि वीर ब्रह्मवाक्य-

CC0. In Public Domain. Kirtibhai Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदा स मातलिः शीघ्रं देवेन्द्रवचनाद्रथम् । शस्त्रास्त्रवाजिसहितमशनिध्वजशोभितम् ॥२५२॥
वरच्छत्रसमायुक्तं राघवाग्रे न्यवेदयत् । तमारुह्य तदा रामश्चकार कदनं महत् ॥२५३॥
आग्नेयेन तदाग्नेयं दैवं दैवेन राघवः । अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥२५४॥
ततस्तु ससृजे घोरं राक्षसः सार्पमस्त्रवित् । रामः सर्पांस्ततो दृष्ट्वा सौपर्णास्त्रं मुमोच सः ॥२५५॥
अस्त्रैः प्रतिहते युद्धे रामेण दशकंधरः । पार्जन्यं ससृजे घोरं वायव्यास्त्रेण राघवः ॥२५६॥
तदस्त्रं विनिवार्यासो वह्न्यस्त्रं ससृजे पुनः । पर्जन्यास्त्रेण पौलस्त्यश्चकार विफलं तदा ॥२५७॥
नागानामयुतं तुरंगनियुतं सार्द्धं रथानां शतं पत्तीनां शतकोटिनाशसमये त्वेका कबधा नृतिः ।
एवं कोटिकबंधनर्तनविधावेका ध्वनिः किंकिणेर्विंशत्ताः प्रहरार्धतो रघुपतेः कोदंडघंटारणे ॥२५८॥
तदा खे कौतुकं द्रष्टुं समाजग्मुः सुरा मुदा । गंधर्वाः किन्नरा यक्षा विमानशतसंस्थिताः ॥२५९॥
तदाऽशनिध्वजं रम्यं बाणैश्चिच्छेद रावणः । तं दृष्ट्वा रामचंद्रोऽपि ध्वजहीनं रथं निजम् ॥२६०॥
मारुतिं प्राह वेगेन क्षणं तिष्ठ ध्वजोपरि । तथेत्युक्त्वा मारुतिः स तालमुत्पाट्य वेगतः ॥२६१॥
गत्वा रामरथे दिव्ये तस्मिंस्तस्थौ स्वयं मुदा । तं मारुतिध्वजं दृष्ट्वा रावणः समरांगणे ॥२६२॥
तालं छत्रं मातलिन तुरगान्वायुनंदनम् । ऐन्द्रं धनुस्तच्चिच्छेद नवबाणैस्त्वरान्वितः ॥२६३॥
वातात्मजमातलिनौ मूर्च्छितौ पतितौ भुवि । क्षणमात्रेण स्वस्थोऽभूत्तदा स वायुनन्दनः ॥२६४॥
तदा रामो वायुपुत्रस्कन्धे स्थित्वा रणाजिरे । चकार तुमुलं युद्धं रावणेन भयावहम् ॥२६५॥
रावणः परिघेणैव संताड्य मारुतिं हृदि । चकार मूर्च्छित वेगात्पपात स पुनर्भुवि ॥२६६॥
तदा सस्मार रामोऽपि स्वरथं समरांगणे । तावद्रथः क्षणादेवाययौ खादग्रतः स्थितः ॥२६७॥

से संतुष्ट होकर युद्ध करनेको निकल पड़े ॥ २५१ ॥ इसी समय इन्द्रके आज्ञानुसार उनका सारथी मातलि अस्त्र-शस्त्रोंसे भरे तथा घोड़ोंसे जुते हुए रथको लेकर रामके पास आया और उनसे रथपर सवार होकर युद्ध करनेके लिए कहा। तब रामने उस रथपर सवार होकर महान् युद्ध किया ॥ २५२ ॥ २५३ ॥ अस्त्रोंको जानने-वालोंमें परमश्रेष्ठ रामने राक्षसोंके राजा रावणका आग्नेय अस्त्र अपने आग्नेय अस्त्रसे तथा देवास्त्र देवास्त्रसे शान्त किया ॥ २५४ ॥ तब अस्त्रवित् रावणने घोर सर्पास्त्र छोड़ा। रामने सर्पोंको देखकर गारुडास्त्र छोड़ा ॥ २५५ ॥ इस प्रकार जब रामने युद्धको अपने अस्त्रोंसे प्रतिहत कर दिया, तब रावणने एक दूसरा भयानक मेघास्त्र फेंका। रामने उनका उत्तर वायुअस्त्रसे कर दिया ॥ २५६ ॥ उस अस्त्रका निवारण करके रामने उसपर आग्नेयास्त्र चलाया। तब रावणने उसे वर्षा-अस्त्रसे विफल कर दिया ॥२५७॥ दस हजार हाथी, दस लाख घोड़े, डेढ़ सौ रथ तथा एक करोड़ पैदल सैनिकोंके नष्ट होनेपर एक कबन्धका नृत्य होता है। इस प्रकारके करोड़ कबन्धनृत्य होनेपर एक किंकणियों (घंटियों) की ध्वनि होती है, परन्तु रघुपति रामके केवल आधे प्रहरतक धनुषका घंटारव करनेसे ही बीसों किंकिणियोंकी ध्वनि हुई ॥ २५८ ॥ उस समय इस कौतुकको देखनेके लिए आकाशमें सैकड़ों विमानोंपर आरूढ़ देवता, गन्धर्व, किन्नर तथा यक्षलोग इकट्ठे हो गये ॥ २५९ ॥ तभी रावणने अपने बाणोंसे रामके वज्र तथा ध्वजाको काट दिया। रामचन्द्र अपने रथको ध्वजासे हीन देखकर मारुतिसे बोले कि तुम क्षणभरके लिये जल्दीसे मेरे रथका ध्वजाके पास बैठ जाओ। 'तथास्तु' कहकर मारुति झट एक ताड़का वृक्ष उखाड़कर रामके दिव्य रथपर रख दिया और आनन्दसे उसीपर जा बैठे। मारुतिकी ध्वजाको देखकर रावणने रणांगणमें बड़ी फुरतीके साथ तालवृक्षको, छत्रको, मातलि सारथीको, अश्वोंको, वायुनन्दन हनुमान्को तथा ऐन्द्र धनुषको नौ बाणोंसे काट डाला ॥ २६०–२६३ ॥ तब वातात्मज हनुमान् तथा मातलि मूर्छित होकर जमीनपर गिर पड़े। परन्तु क्षण ही भरमें वायुनन्दन सचेत हो गये ॥ २६४ ॥ तब राम हनुमान्के कन्धेपर सवार होकर रावणके साथ रणांगणमें भयानक युद्ध करने लगे ॥ २६५ ॥ एकाएक रावणने मारुतिकी छातापर गदा मारकर मूर्छित कर दिया और हनुमान् उसी समय फिर पृथ्वीपर गिर पड़े ॥२६६॥ तब श्रीरामने अपने रथका स्मरण किया। क्षणभरमें आकाशसे आकर वह रथ युद्धभूमिमें उनके सामने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दारुकः सारथिर्यत्र यत्र शस्त्राण्यनेकशः । गदा पद्मं तु यत्रास्ति सर्वदा गरुडो ध्वजे ॥२६८॥
यस्मिञ्छैब्यश्च सुग्रीवस्तथा चैव बलाहकः । मेघपुष्पश्च चत्वारो वायुवेगा हयोत्तमाः ॥२६९॥
यत्र छत्रं वरं दिव्यं हेमदण्डं विराजते । चामरे द्वे शुभे यत्र शार्ङ्गं स्वं धनुराददे ॥२७०॥
ततो रामः शरैस्तीक्ष्णैर्दशास्यस्य रथं क्षणात् । चकार चूर्णं साश्वं तं रावणं चाप्यतर्जयत् ॥२७१॥
तदाऽन्यरथमारूढो रावणो राघवं ययौ । ततो रामः शरैस्तीक्ष्णर्दशाननशिरांसि सः ॥२७२॥
चिच्छेद तानि गगने गत्वा तोषयुतानि हि । रामहस्तान्मृतिर्जाताऽस्माकं चेति विचिंत्य च ॥२७३॥
वन्दनं कर्तुकामानि गगनाच्च रणाजिरे । सस्मितानि पतन्ति स्म राघवस्य पदोपरि ॥२७४॥
रामःशिरांसि दृष्ट्वाऽथ विदीर्णास्यानि खात्पुनः । मां हन्तुं प्रदवंतीति मत्वा भीत्या व्यताडयत् ॥२७५॥
शरौघैः शतशः शीघ्रं तदद्भुतमिवाभवत् । शतमेकोत्तरं छिन्नं शिरसां चैकवर्चसाम् ॥२७६॥
शतमूर्ध्नो रावणस्य चैकोत्तरसहस्रकम् । छिन्नं तत्कल्पभेदेन वदंतीत्यपि केचन ॥२७७॥
दृष्ट्वा तु रावणस्यान्तं विभीषणमतेन सः । नाभिदेशेऽमृतं तस्य कुण्डलाकारसंस्थितम् ॥२७८॥
पावकास्त्रेण तच्छीघ्रं शोषयामास राघवः । ततः शिरांसि बाहूँश्चिच्छेद रावणस्य सः ॥२७९॥
एकेन मुख्यशिरसा बाहुभ्यां रावणो बभौ । तयोर्युद्धमभूद्धोरं तुमुलं रोमहर्षणम् ॥२८०॥
ततो दारुकवाक्येन मर्मदेशे व्यताडयत् । ब्रह्मास्त्रेण रघुश्रेष्ठः समरे दशकन्धरम् ॥२८१॥
स शरो हृदयं भित्त्वा हत्वा तं तु दशाननम् । रामतूणीरमाविश्य मेने स कृतकृत्यताम् ॥२८२॥
रावणस्य च देहोत्थं ज्योतिरादित्यवत्स्फुरत् । प्रविवेश रघुश्रेष्ठं देवानां पश्यतां सताम् ॥२८३॥
तदा देवास्तुष्टुवुस्तं ववर्षुः पुष्पवृष्टिभिः । नेदुः खे देववाद्यानि ननृतुश्चाप्सरोगणाः ॥२८४॥
तदा मंदोदरी भर्त्रा सह देहं विसृज्य सा । ययौ वैकुण्ठभवनं रावणेन मुदान्विता ॥२८५॥

खड़ा हो गया ॥ २६७ ॥ जिस रथका दारुक सारथी था, जिसपर अनेक शस्त्र थे, जिसपर गदा-पद्म तथा ध्वजापर गरुड़ विराजमान थे ॥ २६८ ॥ जिस रथमें उत्तम वायुवेगवाले शैब्य, सुग्रीव, बलाहक तथा मेघपुष्प ये चार घोड़े जुते थे ॥ २६९ ॥ जिसमें दिव्य तथा सुन्दर सुवर्णदण्डवाला छत्र विराजमान था। जिसमें दो मनोहर चमर तथा रमणीय शार्ङ्ग नामका धनुष रक्खा हुआ था। तब रघुनन्दन राम उस रथको देख तथा परिक्रमा करके सानन्द उसपर सवार हो गये और अपने शार्ङ्ग धनुषको हाथमें ले लिया। अब राम अपने तीक्ष्ण बाणोंसे क्षणभरमें शत्रुके अश्व सहित रथको चूर्ण करके रावणको ललकारने लगे। तब रावण दूसरे रथपर सवार होकर रामके सामने गया। रामने पुनः तीक्ष्ण बाणोंसे रावणके दसों सिरोंको काट दिया। वे सिर गगनमंडलमें जाकर 'हमारी मृत्यु रामके हाथोंसे हुई है' यह सोचकर हँसते हुए आकाशसे रणक्षेत्रमें रामके पाँवोंपर आ गिरे ॥ २७०–२७४ ॥ रामने आकाशसे मुख फाड़े हुए उन सिरोंको अपनी ओर आते देखकर यह समझा कि ये मुझे खा जानेको आ रहे हैं। इस प्रकार रामने डरकर झट सैकड़ों बाण उनपर चला दिये। यह दृश्य बड़ा ही अद्भुत था। इस प्रकार एक सौ एक बार उसके सिरको रामने काटा ॥ २७५ ॥ २७६ ॥ कोई-कोई विद्वान् कल्पभेदसे यह भी कहते हैं कि सौ सिरवाले रावणके सिर रामने एक हजार एक बार काटे थे ॥ २७७ ॥ परन्तु तिसपर भी जब रावणकी मृत्यु नहीं हुई, तब विभीषणके कहनेके अनुसार रामने उसके नाभिदेशमें स्थित अमृतकुण्डको अपने अग्निअस्त्रसे सुखा डाला और बादमें उन्होंने रावणके सिरों तथा बाहुओंको काटा ॥ २७८ ॥ २७९ ॥ इस प्रकार जब रावणके एक सिर तथा दो हाथ बाकी रह गये, तब पुनः राम-रावणका रोमांचकारी तुमुल युद्ध हुआ ॥ २८० ॥ तदनन्तर रामने दारुक सारथीके कहनेपर ब्रह्मास्त्रसे समरमें दशकंधरकी नाभिमें मारा ॥ २८१ ॥ उस बाणने उसके हृदयको छेद तथा रामके तरकसमें आकर अपने आपको कृतकृत्य समझा ॥ २८२ ॥ उस समय रावणके मृत शरीरसे सूर्यके समान प्रदीप्त तेज निकलकर देवताओंके सामने ही रघुनन्दन रामके देहमें प्रवेश कर गया ॥ २८३ ॥ तब देवताओंने स्तुति करके

CC-0. In Public Domain. Vrindavan Research Institute / Sharma Collection Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततो विभीषणेनैव रामो रावणसत्क्रियाम् । कारयित्वा लक्ष्मणेन लङ्कायां तं विभीषणम् ॥ २८६ ॥
नीत्वाऽभिषेचयित्वाऽथ न्यासभूतां तदंतिके । वायुपुत्रकृतां लङ्कां मोचयामास राक्षसात् ॥ २८७ ॥
विभीषणादिभिः शीघ्रमशोकं प्रेष्य मारुतिम् । सीतायै सकलं वृत्तं श्रावयामास राघवः ॥ २८८ ॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानंदरामायणे वाल्मीकीये सारकांडे युद्धचरित्रे रावणवधो नामैकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः

(रामका राज्याभिषेक)

श्रीशिव उवाच

अथ तां दिव्यवस्त्रैश्च भूषयित्वा विदेहजाम् । सुस्नातां शिबिकासंस्थां वेष्टितां वेत्रपाणिभिः ॥ १ ॥
निन्युः श्रीरामसान्निध्यं सुग्रीवाद्यास्त्वरान्विताः । नानावाद्यसमुत्साहैर्नर्तनैर्वारयोषिताम् ॥ २ ॥
ततोऽवरुह्य यानात्सा पद्भ्यां गत्वा शनैः पतिम् । ननाम सीता श्रीरामं लज्जिताऽऽसीत्पतेः पुरः ॥ ३ ॥
रामोऽपि दृष्ट्वा तां सीतां शुद्धां ज्ञात्वापि तां पुनः । सर्वेषां प्रत्ययार्थं हि तदा वचनमब्रवीत् ॥ ४ ॥
यथेच्छं गच्छ वैदेहि रिपुगेहनिवासिनी । न त्वामगीकरोम्यद्य ब्रह्मणा प्रार्थितोऽप्यहम् ॥ ५ ॥
तद्रामवचनं श्रुत्वा कारयित्वा चितां शुभाम् । लक्ष्मणेनाथ सुस्नाता सीता वचनमब्रवीत् ॥ ६ ॥
रामादन्यं चेतसाऽपि नाहं जानामि पावक । यदिदं मे वचः सत्यं तर्हि त्वं शीतलो भव ॥ ७ ॥
इति सा शपथं कृत्वा विवेशानलमुत्तमम् । ततः स देववाक्यैश्च तथा दशरथस्य च ॥ ८ ॥
वचनाज्जानकीं शुद्धां ज्ञात्वा तामग्रहीत्प्रभुः । सुभूषितां पावकेन स्वांके संस्थापितां शुभाम् ॥ ९ ॥
पञ्चवट्यां स्वयं तत्र पुरा न्यस्तां च पावके । आलिंग्य जानकीं रामो निजांके संन्यवेशयत् ॥ १० ॥

पुष्प बरसाये, गगनमण्डलमें दिव्य बाजे बजने लगे तथा अप्सराएँ नृत्य करने लगीं ॥ २८४ ॥ उधर मन्दोदरी आनन्दसे पतिके साथ अपना पाञ्चभौतिक देह छोड़कर वैकुण्ठधामका प्रस्थान कर गयी ॥ २८५ ॥ पश्चात् रामने लक्ष्मणको भेजा और विभीषणसे रावणकी क्रिया करवायी और लङ्कामें विभीषणका अभिषेक करवाकर उसके पास वायुपुत्रकी न्यास (धरोहर) रक्खी हुई लङ्काको राक्षसोंसे छुड़वा दिया ॥ २८६ ॥ २८७ ॥ तदनन्तर रामने विभीषणादिके साथ हनुमान्को सीताके पास भेजकर सब समाचार कहलाया ॥ २८८ ॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकांडे युद्धचरित्रे 'ज्योत्स्ना' भाषाटीकायां रावणवधो नामैकादशः सर्गः ॥ ११ ॥

श्रीशिवजी बोले—हे प्रिये ! तदनन्तर सुग्रीव आदि वानर सुमनोहर वस्त्रों तथा भूषणोंसे भूषित, स्नान करके पालकीपर सवार, बेंत हाथमें लिये हुए सिपाहियोंसे घिरी हुई वैदेहीको अनेक बाजोंके सुन्दर शब्दोंके सहित तथा वेश्याओंके नृत्यके साथ शीघ्र रामके पास ले आये ॥ १ ॥ २ ॥ सीता कुछ दूर ही सवारीपरसे उतरकर धीरे-धीरे अपने पति रामके पास गयीं तथा उन्हें प्रणाम करके कुछ लज्जित होती हुई उनके सामने खड़ी हो गयीं ॥ ३ ॥ राम सीताको शुद्ध चरित्रवाली समझकर भी सर्वसाधारणको विश्वास दिलानेके लिए कहने लगे—॥ ४ ॥ हे शत्रुके घरमें निवास करनेवाली वैदेही ! तुम जहाँ चाहो, वहाँ चली जाओ । साक्षात् ब्रह्मा कहें तो भी मैं तुम्हें अपने पास नहीं रख सकता ॥ ५ ॥ रामका ऐसा वाक्य सुनकर सीताने स्नान किया और लक्ष्मणसे सुन्दर चिता रचवाकर अग्निदेवकी प्रार्थना करती हुई बोलीं—॥ ६ ॥ हे पावक ! यदि मैंने रामके सिवाय अन्य पुरुषका चित्तसे भी चिन्तन न किया हो तो तू शीतल हो जा ॥ ७ ॥ सीता ऐसा कहकर अग्निमें प्रवेश कर गयीं । तब प्रभु रामने अग्निदेव तथा राजा दशरथके कहनेसे जानकीको पवित्र तथा पतिव्रता समझकर स्वीकार कर लिया । यह वह जानकी थीं, जिनको कि पंचवटीमें स्वयं अग्निको सौंप

CC-0. In Public Domain. Vinit Sharma Nagaur Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तामसी राजसी चैव सात्त्विकी या त्रिधा पुरा । जाता रावणघातार्थं सा जातैकत्र वै तदा ॥११॥
ततो देवैः स्तुतो रामश्चेन्द्रेण समरे मृतान् । वानरादीन् सुधावृष्ट्या जीवयामास सादरम् ॥१२॥
तत्रैकं वानरं रामोऽदृष्ट्वा पप्रच्छ मारुतिम् । राघवं मारुतिः प्राह कुम्भकर्णेन भक्षितः ॥१३॥
यदि किंचित्तस्य कपेर्नखकेशास्थिलोहितम् । रणेऽभविष्यत्पतितं तर्ह्यद्यामृतवृष्टितः ॥१४॥
अभविष्यज्जीवितः स सत्यं विद्धि रघूत्तम । सुधावृष्ट्या राक्षसास्ते जीवयिष्यंति वै पुनः ॥१५॥
इति भीत्या पुराऽस्माभिः सर्वे त्यक्ता महोदधौ । तन्मारुतेर्वचः श्रुत्वा यमराजं व्यलोकयत् ॥१६॥
यमोऽपि भीत्या रामाग्रेऽर्पयत्तं प्लवगोत्तमम् । तं दृष्ट्वा राघवस्तुष्टस्तदाऽऽज्ञां नाकमुत्तमम् ॥१७॥
गंतुं ददौ मातलिने सोऽपि नत्वा रघूत्तमम् । रथेन वाजियुक्तेन ययौ मघवतः पुरीम् ॥१८॥
रामस्तु मंगलस्नानं कर्तुं संप्रार्थितोऽपि हि । विभीषणेन भरतं स्मृत्वा नांगीचकार सः ॥१९॥
ततः सर्वैर्वानरैश्च पुष्पकं चारुरोह सः । रथेन दारुकश्चापि गरुडो मकरध्वजः ॥२०॥
विभीषणश्चारुरोह पुष्पकं राघवाज्ञया । ततस्ते निर्जराः सर्वे राममामंत्र्य खं ययुः ॥२१॥
दृष्ट्वा रामं दशरथो विमानेन ययौ दिवम् । अथ तं राघवं प्राह पुष्पकस्थं विभीषणः ॥२२॥
राम ते प्रष्टुमिच्छामि तत्त्वं मां वक्तुमर्हसि । ऐरावणगृहे राम यदा पातालमुत्तमम् ॥२३॥
पुरा गतस्तदा तूर्ष्णीं किमर्थं त्वं स्थितः प्रभो । कथं तौ न हतौ दुष्टौ तदैव क्षणमात्रतः ॥२४॥
तत्तस्य वचन श्रुत्वा विहस्य राघवोऽब्रवीत् । भ्रमराणां वधः पूर्वं विधिना मारुतेः करात् ॥२५॥
प्रोक्तस्तस्मान्मया तूर्ष्णीं प्रतीक्षा मारुतेः कृता । अन्यच्चापि जगत्यां हि मारुतेः पौरुषं जनाः ॥२६॥

दिया था। इस समय भगवान रामचन्द्रने उन्हीं जानकीको आलिंगन करके अपनी गोदमें बैठा लिया ॥ ८-१० ॥ जिस सीताने पूर्वकालमें रावणवधके लिए तामसी, राजसी तथा सात्त्विकी ये तीन मूर्तियें धारण की थीं, वह उस समय पुनः एक हो गयीं ॥ ११ ॥ पश्चात् सब देवताओंने मिलकर रामकी स्तुति की। रामने इन्द्रसे कहकर समरमें मरे हुए वानरोंको सुधावृष्टिसे जीवित करवाया ॥ १२ ॥ उनमें एक वानरको न देखकर रामने मारुतिसे पूछा। मारुतिने उत्तर दिया कि मालूम होता है, उसे कुम्भकर्ण खा गया ॥ १३ ॥ हे रघूत्तम ! यदि उस वानरका नख, केश अथवा लोहित आदि कुछ भी रणभूमिमें शेष होता तो वह अवश्य इस अमृतवर्षासे जीवित हो जाता। यदि कहें कि अमृतवर्षासे राक्षस क्यों नहीं जी गये तो इसका उत्तर यह है कि उनका तो जीवित हो जानेके डरसे हम लोगोंने पहले ही समुद्रमें फेंक दिया था। मारुतिके इस वचनको सुनकर रामने यमराजकी ओर देखा। उनके देखनेसे ही यमराज डर गये और उस बन्दरको रामके आगे लाकर खड़ा कर दिया। यह देखकर राम प्रसन्न हो गये। बादमें रामने मातलिको स्वर्ग जानेकी आज्ञा दे दी। वह भी रामको प्रणामकर तथा अश्वयुक्त रथ लेकर इन्द्रपुरीको चला गया ॥ १४-१८ ॥ तदनन्तर विभीषणने रामको विघ्नशांतिकारक मङ्गलस्नान करनेके लिये कहा। जो किसी विघ्न, आपत्ति तथा रोग आदिके बाद किया जाता है। पर रामने भरतका स्मरण करके उसे अंगीकार नहीं किया ॥ १९ ॥ बादमें समस्त बन्दरोंके साथ रामजी पुष्पक विमानपर सवार हो गये। रथसहित दारुक, गरुड़ और मकरध्वज भी उसपर चढ़ गये ॥ २० ॥ रामका आज्ञा पाकर विभीषण भी विमानारूढ़ हो गये। तभी सब देवता रामका आदेश पाकर स्वर्गको चले गये ॥ २१ ॥ राजा दशरथ [जो कि जनकनन्दिनीके अग्निप्रवेशके समय विमानपर बैठकर आये थे] भी रामसे पूछकर स्वर्गको चल दिये। इसके उपरान्त पुष्पक विमानपर स्थित विभीषणने रामसे कहा—॥ २२ ॥ हे राम ! मैं आपसे कुछ पूछना चाहता हूँ। कृपा करके आप उसका उत्तर दें। हे राम ! जब आप पातालमें ऐरावणके यहाँ गये थे ॥ २३ ॥ उस समय हे प्रभो ! आप चुप क्यों हो गये थे। उसी क्षण आपने उन दुष्टोंको मार क्यों नहीं डाला ? ॥ २४ ॥ यह प्रश्न सुना तो राम कुछ मुस्कराकर बोले कि पूर्वकालमें किसी समय ब्रह्माने 'उन भँवरोंका वध हनुमान्के हाथसे होगा' ऐसा कह दिया था ॥ २५ ॥ इसी कारण मैंने चुप होकर वह काम मारुतिपर छोड़ दिया था और इसीलिये मैंने मारुतिकी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वदंतु येन श्रीरामलक्ष्मणौ मोचितौ पुरा । असुराभ्यां हि पाताले सोऽयं श्रीरामसेवकः ॥२७॥
इति पौरुषवृद्ध्यर्थं मारुतेर्जगतीतले । मम दासस्य बलिनस्तथा तूष्णीं स्थितं मया ॥२८॥
नोचेद्धुंकारमात्रेण पथि हंतुं न किं क्षमः । ईषिकास्त्रेण काकस्य येन नेत्रं विदारितम् ॥२९॥
शतयोजनपर्यन्तं मारीचोऽब्धौ पतत्रिणा । पुरा येन मया त्यक्तः सोऽहं किं कुण्ठितस्तदा ॥३०॥
तयोर्वधे तु पाताले न शस्त्रार्थं प्रतीक्षितम् । मारुतेः पौरुषार्थं हि सत्यं वेद विभीषण ॥३१॥
इति रामवचः श्रुत्वा मारुतिः स विभीषणम् । तदा प्राह विहस्याथ किं त्वं तद्विस्मृतोऽसि हि ॥३२॥
सेतुकाले राघवेण गर्वं दृष्ट्वा मयि स्थितम् । लांगूलं खंडितं पूर्वं लिंगोत्पाटनहेतुना ॥३३॥
तस्य मे राघवाग्रे हि किं बलं मन्यसेऽत्र हि । किं विलम्बो राघवाय तयोरसुरयोर्वधे ॥३४॥
वर्धिता निजदासस्य कीर्तिरत्र विभीषण । इति तन्मारुतेर्वाक्यं श्रुत्वा रामं विभीषणः ॥३५॥
ननाम परया भक्त्या ततः सम्यगपूजयत् । अथ रामः पुष्पकस्थः सीतया प्रार्थितो मुहुः ॥३६॥
तद्वाक्यगौरवात्तुष्टस्त्रिजटायै वरान्ददौ । वस्त्रालङ्कारभूषाभिः पूर्वं तुष्टां विधाय च ॥३७॥
त्रिजटे वचनं मेऽद्य शृणु मंगलदायकम् । कार्तिके माधवे माघे चैत्रे मासचतुष्टये ॥३८॥
स्नात्वाऽग्रे त्रिदिनं स्नानं त्वत्प्रीत्यर्थं नरोत्तमाः । करिष्यंति हि तेनैव कृतकृत्या भविष्यसि ॥३९॥
यैर्नस्त्रिदिनं स्नानं न कृतं पूर्णिमोर्ध्वतः । तेषां मासकृतं पुण्यं हर त्वं वचनान्मम ॥४०॥
अन्यच्चापि शृणुष्व त्वं दीयते यो वरो मया । अशुचीनि गृहाण्येव तथा श्राद्धहवींषि च ॥४१॥
क्रोधाविष्टेन दत्तानि विधिवत्तत्कृतान्यपि । त्रिजटे तानि तुभ्यं हि शृण्वन्यत्त्वं मयोच्यते ॥४२॥
पादशौचमनभ्यंगं तिलहीनं च तर्पणम् । सर्वं तत्त्रिजटे तुभ्यं तथा श्राद्धमदक्षिणम् ॥४३॥

यहाँ प्रतीक्षा की। दूसरी इच्छा यह थी कि संसारमें लोग मारुतिके बलको भी जान जायँ कि मारुतिने पातालमें राक्षसोंके हाथसे राम-लक्ष्मणको छुड़ाया था, वही यह रामका सेवक हनुमान् है ॥ २६ ॥ २७ ॥ इस प्रकार जगत्में अपने बलवान् सेवक हनुमान्के पुरुषार्थकी प्रसिद्धि करनेके लिए ही मैं वहाँ चुप हो गया था ॥ २८ ॥ नहीं तो क्या मैं उनको रास्तेमें ही हुंकारमात्रसे नष्ट नहीं कर सकता था ? जिसने सींकके अस्त्रसे ही काक जयन्तका नेत्र फोड़ डाला ॥ २९ ॥ जिसने बाणसे मारीचको सौ योजनकी दूरीपर समुद्रमें फेंक दिया। वह मैं तब क्या कुण्ठितशक्ति हो गया था, कभी नहीं। मैंने पातालमें उनको मारनेके लिये किसी शस्त्रकी राह नहीं देखी थी। हे विभीषण ! तुम सच मानो कि मैं उस समय केवल हनुमान्के बलकी ख्याति करनेके लिए ही चुप हो गया था ॥ ३० ॥ ३१ ॥ रामका यह कथन सुनकर हँसते हुए मारुतिने विभीषणसे कहा–क्या तुम उस बातको भूल गये, जब सेतु बाँधनेके समय रामने मुझको कुछ गर्वयुक्त देखकर स्थापित शिवलिंग उखाड़नेके बहाने मेरी पूँछ तोड़वा डाली थी ॥ ३२ ॥ ३३ ॥ ऐसे मुझ निर्बलका बल रामचन्द्रके सम्मुख किसी गिनतीमें नहीं है। रामचन्द्रको उन दोनों असुरोंको मारनेमें क्या देर लगती ? कदापि नहीं। हे विभीषण ! रामने केवल अपने दासकी (मेरी) कीर्ति बढ़ानेके लिए ही वैसा किया था। मारुतिकी बात सुनकर विभीषणने रामकी परम भक्तिसे प्रणाम करके प्रेमसे अच्छी तरह पूजन किया। पश्चात् रामने विमान-पर बैठी हुई सीताके कहनेसे उनके वाक्यका आदर करते हुए प्रसन्न होकर त्रिजटाको वरदान दिया। पहले उसको वस्त्र-अलंकार आदिसे संतुष्ट करके कहा–हे त्रिजटे ! तुम मेरी मङ्गलमयी वाणी सुनो। कार्तिक, वैशाख, माघ और चैत्र इन चार महीनोंमें पहलेके तीन दिन सभी नरश्रेष्ठ तुमको प्रसन्न करनेके लिए ही स्नान करेंगे। इससे तुम कृतकृत्य हो जाओगी ॥ ३४-३९ ॥ जो मनुष्य इन चार महीनोंमें पूर्णिमासे लेकर तीन दिन स्नान न करे, उसका सारे महीनेका किया हुआ पुण्य मेरे कहनेसे तुम हरण कर लेना ॥ ४० ॥ और यह भी वर देता हूँ कि अपवित्र स्थानमें विधिपूर्वक किये हुए श्राद्ध तथा हवन आदि भी यदि क्रोधसे किये गये हों तो वे भी तुम्हारे ही होंगे। और भी सुनो, बिना तेल मले पाँव धोने तथा बिना तिलके तर्पण करनेसे पुण्य भी तुम्हारे होंगे। हे त्रिजटे ! दक्षिणासे

CC0. In Public Domain. Kirtikant Sharma Nalagarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति दत्त्वा वरान् रामस्त्रिजटासरमान्वितः । स विभीषणसुग्रीवमकरध्वजवानरैः ॥४४॥
ययौ विहायसा सीतां दर्शयन् कौतुकानि सः । पश्य सीते पुरीं लङ्कां तथा रणभुवं शुभाम् ॥४५॥
पश्य सेतुं मया बद्धं शिलाभिर्लवणार्णवे । एतच्च दृश्यते तीर्थं सेतुबंधमिति स्मृतम् ॥४६॥
इत्युक्त्वा रघुवीरस्तु राक्षसेंद्रस्य वाक्यतः । पुष्पकाद्भुवि चोत्तीर्य धृत्वा कोदंडमुत्तमम् ॥४७॥
बभंज सेतुं तत्कोट्या धनुष्कोटिरितीर्यते । अतएव हि तत्तीर्थं स्नानात्कैवल्यदायकम् ॥४८॥
कोदंडपाणिर्नाम्नाऽऽसीद्राममूर्तिश्च तत्र हि । एतस्मिन्नंतरे तत्र संपातिः स ययौ तदा ॥४९॥
तमालिंग्य रामचंद्रस्तं प्राह स्मितपूर्वकम् । बंधोर्नाम्नाऽत्र तीर्थं त्वं कुरु सेतौ महत्तमम् ॥५०॥
तथेति रामवचनाद्भ्रातुः संतोषकाम्यया । तीर्थं चकार सम्पातिर्जटायुमिति विश्रुतम् ॥५१॥
ततो रामाज्ञया यानं संपातिश्चारुरोह सः । ततो यानेन तां सीतां दर्शयन् कौतुकानि हि ॥५२॥
ययौ रामेश्वरं पूज्य तथा श्रीरघुनंदनः । सीतेऽत्र पश्य मंत्रार्थमेकांते संस्थितं पुरा ॥५३॥
अत्र दर्भेषु शयनं कृतं पश्य विदेहजे । नवग्रहार्थं प्रक्षिप्तान्पाषाणान्पश्य सागरे ॥५४॥
तूष्णीमेव स्थितं पश्य सागरं मम वाक्यतः । एवं तां दर्शयन् रामः किष्किंधां प्रययौ क्षणात् ॥५५॥
वानराणां स्त्रियः सर्वा विमाने स्थाप्य राघवः । ययौ तां दर्शयन् सीतां कौतुकानि समंततः ॥५६॥
प्रवर्षणगिरिं पश्य ऋष्यमूकाचलं तथा । पंपासरोवरं पश्य कृष्णां भीमरथीं शुभाम् ॥५७॥
पश्य पंचवटीं रम्यां गोदातीरविराजिताम् । अगस्तेराश्रमं पश्य सुतीक्ष्णस्याश्रमं तथा ॥५८॥
पश्यात्रेराश्रमं सीते चित्रकूटं समीक्षय । कालिंदीं जाह्नवीं पश्य भारद्वाजाश्रमं तथा ॥५९॥
इत्युक्त्वा जानकीं रामो भारद्वाजार्थितस्तदा । तस्थौ तस्याश्रमे यानादवरुह्य यथासुखम् ॥६०॥

शून्य सब श्राद्ध भी तुम्हींको प्राप्त होंगे ॥ ४१ ॥ ४२ ॥ इस तरह बहुतेरे वर देकर राम त्रिजटा, सरमा, विभीषण, सुग्रीव, मकरध्वज तथा वानरोंके साथ आकाशमार्गसे सीताको मार्गके कौतुक दिखाते हुए चल दिये। राहमें राम बोले-हे सीते ! इस लंका नगरीको तथा इस सुन्दर रणभूमिको देखो ॥ ४३-४५ ॥ यह क्षारसमुद्रमें मेरा बाँधा हुआ शिलाओंका विशाल सेतु है। यह सामने सेतुबन्ध नामका प्रसिद्ध तीर्थ दिखाई दे रहा है ॥ ४६ ॥ इतना कहनेके बाद रामचन्द्रजी राक्षसेन्द्र विभीषणके कथनानुसार विमानसे नीचे उतरे और अपना उत्तम धनुष लेकर उसकी नोकसे सेतुको तोड़ दिया। वहाँपर स्नान करनेसे मोक्षपद देनेवाला धनुषकोटि नामका तीर्थ बन गया ॥ ४७ ॥ ४८ ॥ दण्डपाणि नामकी रामकी मूर्ति भी वहाँ स्थापित हो गयी। इतनेमें वहाँ संपाती आ पहुँचा ॥ ४९ ॥ रामने उसका आलिंगन करके प्रसन्न मनसे कहा कि तुम यहाँ सेतुपर अपने भाईके नामका एक महान् तीर्थ स्थापित करो ॥ ५० ॥ 'तथास्तु' कहकर रामकी आज्ञाके अनुसार संपातीने अपने भाईकी आत्माको संतुष्ट करनेकी इच्छासे वहाँ 'जटायु' नामका प्रसिद्ध तीर्थ बनाया ॥ ५१ ॥ बादमें रामकी आज्ञासे संपातीको भी पुष्पक विमानपर चढ़ा लिया गया। श्रीरघुनन्दन राम सीताके साथ रामेश्वरकी पूजा करके विमानपर सवार होकर सीताको सब दृश्य दिखाते हुए बोले—देखो सीते ! इस एकान्त जगहपर मैं मंत्रणा करनेके लिए बैठता था ॥ ५२ ॥ ५३ ॥ हे विदेहजे ! इन कुशाओंपर मैं सोता था। देखो, ये नौ पाषाण मैंने समुद्रमें नवग्रहोंकी पूजाके लिए डाले थे ॥ ५४ ॥ देखो, मेरे कहनेसे यह समुद्र अब भी चुप है। इस प्रकार वर्णन करते हुए रघुनन्दन राम क्षणभरमें किष्किंधा आ पहुँचे ॥ ५५ ॥ वहाँसे सुग्रीव आदि वानरोंकी स्त्रियोंको विमानपर बैठाकर पुनः सब स्थल सीताको दिखाते हुए वे आगे बढ़े ॥ ५६ ॥ रामने सीतासे कहा—देखो, यह प्रवर्षण गिरि है, यह ऋष्यमूक पर्वत है, यह पंपासरोवर है, यह पवित्र कृष्णा तथा भीमरथी नदी है ॥ ५७ ॥ गोदावरीके तटपर विराजमान यह रमणीक पंचवटी है। उधर अगस्त्य तथा सुतीक्ष्ण मुनिके आश्रमको देखो ॥ ५८ ॥ हे सीते ! अत्रि मुनिके इस आश्रमको तथा चित्रकूट पर्वतकी शोभाको देखो। यमुना, गंगा तथा भारद्वाज ऋषिके आश्रमको देखो ॥ ५९ ॥ जानकीसे यह कहकर राम विमानसे नीचे उतरे और भारद्वाज ऋषिके प्रार्थना करनेपर उनके आश्रममें सुखसे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माघशुक्लचतुर्थ्यां हि पूर्णे वर्षे चतुर्दशे । भारद्वाजोऽपि तपसा स्वर्गं निर्माय भूतले ॥६१॥
पूजयामास श्रीरामं सीतावानरसंयुतम् । रामोऽपि हृदि संमन्त्र्य मारुतिं वाक्यमब्रवीत् ॥६२॥
अयोध्यां गच्छ भरतं मद्वृत्तं कथयस्व तम् । सखायं शृङ्गवेरे मे वृत्तं कथय केवटम् ॥६३॥
तथेति गुहकं गत्वा कपिर्वृत्तं न्यवेदयत् । गुहकोऽपि मुदा युक्तस्तदा रामांतिकं ययौ ॥६४॥
ततोऽयोध्यां ययौ वेगान्मारुतिः स विहायसा । नंदिग्रामेऽपि भरतः पूर्णे वर्षे चतुर्दशे ॥६५॥
नागते राघवे वह्निं सन्नद्धोऽभूत्प्रवेशितुम् । शत्रुघ्नं भरतः प्राह रावणेन रणांगणे ॥६६॥
श्रीरामलक्ष्मणौ वीरौ हतौ मन्येऽद्य नागतौ । आकारिता मया सर्वे नृपा एते बलैर्युताः ॥६७॥
लंकां गत्वा राघवस्य साहाय्यं कर्तुमिच्छता । सोऽहमग्निं विशाम्यद्य रवावस्ताचलं गते ॥६८॥
त्वं गच्छ पार्थिवैर्लंकां हत्वा युद्धे दशाननम् । मोचयित्वा जनकजां ततो नः पारलौकिकम् ॥६९॥
रामादीनां त्रिबंधूनां कर्तुमर्हसि सादरम् । इति तद्वाक्यमाकर्ण्य पौरा जानपदा नृपाः ॥७०॥
शत्रुघ्नो मातरः सर्वा उर्मिलाद्याः स्त्रियश्च ताः । सुमंत्राद्या मंत्रिणश्च पौरनार्यश्च सेवकाः ॥७१॥
भरतं वेष्टयामासुः खेदाद्विह्वलमानसाः । भरतः सांत्वयन् सर्वान्ययौ तां सरयूं नदीम् ॥७२॥
चितां कृत्वा ततः स्नात्वा ददौ दानान्यनेकशः । सप्त प्रदक्षिणाः कृत्वा वह्निं ध्यात्वा रघूत्तमम् ॥७३॥
सीतां तां लक्ष्मणं वीरं नत्वा मातृगुरुं मुनीन् । आराध्यदेवतां ध्यात्वा ह्युत्तराभिमुखः स्थितः ॥७४॥
रवौ न्यस्तेक्षणः सायं प्रतीक्षन् संस्थितः क्षणम् । महान्कोलाहलश्चासीत्तदा स्त्रीपुरुषैः कृतः ॥७५॥
एतस्मिन्नंतरे खस्थस्तं दृष्ट्वा वायुनंदनः । प्रवेष्टुमुद्यतं वेगाद्भरतं गद्गदस्वनः ॥७६॥
अब्रवीन्मधुरं वाक्यं सुधया सेचयन्निव । मा विशस्वानलं वीर राघवोऽद्य समागतः ॥७७॥

ठहर गये ॥ ६० ॥ उस रोज चौदहवें वर्षकी माघ शुक्ल चतुर्दशी थी। भारद्वाजने अपने तपोबलसे पृथ्वीपर ही स्वर्गकी रचना कर दी ॥ ६१ ॥ समस्त स्वर्गीय पदार्थोंसे उन्होंने सीता तथा वानरों समेत श्रीरामका भली भाँति पूजन तथा सत्कार किया। तदनन्तर रामने विचार करके मारुतिसे कहा—॥ ६२ ॥ अयोध्या जाकर भरतको तथा श्रृंगवेरपुर जाकर मेरे प्रिय मित्र निषादराजको मेरा सब समाचार सुना दो ॥ ६३ ॥ 'बहुत अच्छा' कहकर हनुमान्ने निषादराजके पास जाकर सब वृत्तान्त निवेदन कर दिया। वह प्रसन्न होकर रामके पास गया ॥ ६४ ॥ वहाँसे मारुति आकाशमार्गसे शीघ्र अयोध्या गये। वहाँ जाकर देखा कि नंदीगाँव-में भरत चौदह वर्ष बीत जानेपर भी रामके न लौटनेके कारण अग्नि जलाकर उसमें प्रवेश करनेकी तैयारी करके शत्रुघ्नसे कह रहे थे—मेरी समझमें तो ऐसा आ रहा है कि रावणने युद्धमें राम-लक्ष्मणको मार डाला है। इसी कारण वे अबतक नहीं लौटे। इसीलिए मैंने सब राजाओंको अपनी-अपनी सेनाके सहित बुलवा भेजा है कि वे सब लंका जाकर रामकी सहायता करें। मैं तो आज सूर्यास्तके समय अग्निमें प्रवेश कर जाऊँगा ॥ ६५–६८ ॥ परन्तु तुम राजाओंके साथ लंका जा तथा युद्धमें रावणको मारकर जनकनन्दिनीको छुड़ा लाना। पश्चात् राम आदि हम तीनों भाइयोंका तुम आदरपूर्वक पारलौकिकी क्रिया करना। भरतकी यह बात सुनकर देशके और नगरके लोग, राजालोग, शत्रुघ्न, सब माताएँ, उर्मिला आदि समस्त स्त्रियाँ, सुमंत्र आदि मंत्रिगण, पुरकी स्त्रियें तथा सेवकवर्गने आकर चारों ओरसे भरतको घेर लिया और दुःखी होकर रुदन करने लगे। तब भरत सबको समझा-बुझाकर सरयू नदीके किनारे गये ॥ ६९–७२ ॥ वहाँ जा तथा स्नान करके चिता रचवायी और अनेक दान दिये। पश्चात् अग्निकी सात प्रदक्षिणा करके उन्होंने रघूत्तम रामका ध्यान किया ॥ ७३ ॥ तदनन्तर सीता तथा वीर लक्ष्मणको नमस्कार करके माताओं, गुरुजनों तथा मुनियोंको प्रणाम किया और आराध्य देवताका स्मरण करके उत्तराभिमुख होकर खड़े हो गये ॥ ७४ ॥ भरत सूर्यपर दृष्टि गड़ाये हुए सूर्यास्तकी प्रतीक्षा करने लगे। उस समय सभी स्त्री-पुरुषोंमें महान् हाहाकार मच गया ॥ ७५ ॥ तभी वायुनन्दन हनुमान्ने आकर अग्निप्रवेश करनेको उद्युक्त भरतसे शांतिपूर्ण गद्गदस्वर होकर अमृतके तुल्य यह मधुर वचन कहा—हे वीर ! अग्निमें प्रवेश मत करिए। श्रीराम सीता तथा लक्ष्मणके साथ

CC-0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सीतया लक्ष्मणेनापि भारद्वाजाश्रमं प्रति। वानरैः सहितं रामं श्वस्त्वं पश्यसि निश्चयात् ।७८।।
रामोऽप्युत्कंठितस्त्वां हि द्रष्टुमस्ति जटाधर । इति तद्वाक्सुधावृष्टिसेचितो भरतो मुदा ।।७९।।
वह्निं नत्वा परावृत्त्य ननाम वायुनंदनम् । भरतं मारुतिश्चापि नत्वाऽऽलिंग्य सविस्तरम् ।८०।।
श्रावयामास श्रीरामवृत्तं संतोषकारकम् । तच्छ्रुत्वा भरतस्तुष्टः शोभयामास तां पुरीम् ।।८१।।
अयोध्यां तोरणाद्यैश्च पौरैः प्रत्युज्जगाम तम् । मस्तके पादुके बद्ध्वा पुरस्कृत्याथ वारणम् ।।८२।।
माघस्य सितपंचम्यां प्राप्ते पंचदशेऽब्दके। प्रभाते भरतो याम्ये ददर्श पुष्पकं खगम् ।।८३।।
ननाम राघवं दृष्ट्वा साष्टांगं भरतस्तदा। रामोऽप्यालिंग्य भरतं कृत्वा रूपाण्यनेकशः ।।८४।।
एककाले जनान् सर्वान्पृथक् स परिषस्वजे। आदौ पश्चान्न रामेण कृतमालिंगनं तदा ।८५।।
रामान् दृष्ट्वा ह्यसंख्यातान् जनाश्चासन्सुविस्मिताः । समाश्वास्याथ भरतं राघवः साश्रुलोचनः ।।८६।।
ननाम शिरसा मातॄर्वसिष्ठं चाप्यरुन्धतीम् । ततो वाद्यनर्तनाद्यैर्नन्दिग्रामं ययौ शनैः ।।८७।।
श्मश्रुकर्मोद्वर्तनं च तैलाभ्यंगं तु बंधुभिः । नंदिग्रामेऽकरोद्रामो नानामांगल्यवस्तुभिः ।।८८।
नववाद्यसुघोषाश्च नेदुः सर्वत्र सुस्वराः । नार्यो नीराजयामासू रत्नदीपै रघूत्तमम् ।।८९।।
ततः सीता नमस्कृत्य कौसल्याद्याश्च मातरः । वसिष्ठं ब्राह्मणान्वृद्धान्वंदनीयान्यथाक्रमम् ।।९०।।
ततः सीतां समालिंग्य कौसल्याद्याश्च मातरः । स्नापयामासुर्मांगल्यद्रव्यैर्वाद्यपुरःसरम् ।।९१।।
वस्त्रालंकारभूषाभिः शुशुभे जानकी तदा। भरतः पादुके ते तु राघवस्य सुपूजिते ।।९२।।
योजयामास रामस्य पादयोर्भक्तिसंयुतः । ततोऽतिविनयात्प्राह भरतो रघुनंदनम् ।।९३।।
राज्यमेतन्न्यासभूतं मया निर्यापितं तव। कोष्ठागारं बलं कोशं कृतं दशगुणं मया ।।९४।।

आज आ गये हैं। आप वानरों समेत उन्हें कल अवश्य देखेंगे ।। ७६-७८ ।। हे जटाधर ! राम भी आपको देखनेके लिए बड़े ही उत्कंठित हो रहे हैं। इस प्रकार हनुमान्‌की वाक्यरूपिणी सुधावृष्टिसे सिंचित होकर भरत सहर्ष अग्निके पाससे लौट आये और वायुनन्दनको प्रणाम किया। मारुतिने भी भरतको नमस्कार तथा आलिङ्गन करके श्रीरामका संतोषकारक तथा सविस्तार सब समाचार सुना दिया। यह सुना तो भरतने प्रसन्न होकर अयोध्या नगरीको तोरण-पताका आदिसे सुसज्जितकर तथा पुरवासियोंको साथ ले और हाथीको आगे करके रामकी खड़ाऊँको मस्तकपर बाँधकर रामकी अगवानी करने गये ।। ७९-८२ ।। पन्द्रहवें वर्षकी माघ शुक्ल पञ्चमीको प्रातःकाल ब्राह्म मुहूर्तमें भरतने पुष्पकविमानको आकाशमें देखा ।। ८३ ।। भरतने रामके दर्शन करनेके साथ ही उनको साष्टांग प्रणाम किया। रामने भरतको आलिंगन करनेके बाद एक साथ अनेक रूप धारण करके एक ही समय सब लोगोंके साथ अलग-अलग मिले। किसीके साथ आलिंगन आगे या पीछे नहीं होने पाया ।। ८४ ।। ८५ ।। बहुतसे रामोंको देखकर लोगोंको बड़ा भारी विस्मय हुआ। रामने भरतको ढाढ़स बँधाया और उनके नेत्रोंमें जल भर आया ।। ८६ ।। पश्चात् उन्होंने माताओंको मस्तक झुकाकर प्रणाम करके गुरुपत्नी अरुन्धतीको प्रणाम किया। बादमें नाच-गाना तथा बाजोंके साथ धीरे-धीरे राम नन्दीग्राममें पधारे ।। ८७ ।। वहाँ जाकर रामने क्षौर कराया और शरीरमें चन्दनादि सुगन्धित द्रव्य मल तथा तेल लगाकर अनेक मंगलकारी वस्तुओंसे सब बन्धुओंके साथ मंगलस्नान किया ।। ८८ ।। चारों तरफ नये-नये बाजोंके सुन्दर घोष होने लगे। स्त्रियें रत्नमय दीपकोंसे कौसल्यानन्दन रामकी आरती उतारने लगीं ।। ८९ ।। सीताने भी अपनी सासोंको, अरुन्धतीको, वसिष्ठको, ब्राह्मणोंको तथा और-और वन्दनीय जनोंको यथाक्रम प्रणाम किया ।। ९० ।। इसके अनन्तर कौसल्या आदिने सीताको छातीसे लगाकर मांगलिक द्रव्योंसे स्नान कराया ।। ९१ ।। उस समय जनकनन्दिनी नये-नये अलङ्कारोंसे सजकर बड़ी सुन्दर लगने लगीं। भरतने रामकी पादुकाका पूजन करके रामके पाँवोंमें भक्तिपूर्वक पहिना दी। तदनन्तर अति विनीत भावसे भरत रघुनाथजीसे कहने लगे-।। ९२।। ९३ ।। हे प्रभो ! आपका धरोहरस्वरूप राज्य मैंने आजतक चलाया। हे जगन्नाथ ! आपके पुण्य-प्रतापसे मैंने यहाँके कोठार, कोश तथा सेनाको बढ़ाकर दसगुना कर दिया है। अब आप अपने इस नगरका, देशका तथा

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

त्वत्तेजसा जगन्नाथ पालयस्व पुरं स्वकम् । तथेति राघवश्चोक्त्वा भरतं संन्यवेशयत् ॥९५॥
ततः स दिव्यवस्त्राणि परिधाय रघूत्तमः । सीतया रथमारुह्य वाद्यघोषैर्जनस्वनैः ॥९६॥
वारांगनानृत्यगीतैर्ययौ निजपुरीं प्रति । पौरनार्यश्च सौधस्था ववर्षुः पुष्पवृष्टिभिः ॥९७॥
चक्रुर्नीराजनं मार्गे नानाबलिपुरःसरम् । रामो रथात्तदोत्तीर्य सीतां संप्रेष्य वै गृहम् ॥९८॥
पुष्पकं प्राह गच्छ त्वं कुबेरं वह सर्वदा । तथेति रामवचनाज्जगाम पुष्पकं तु तत् ॥९९॥
अथ रामः सभामध्ये विवेश कपिभिः सह । ददौ कपिभ्यो गेहानि वस्तुं रम्याणि सादरम् ॥१००॥
अथ रामस्य राज्यार्थमभिषेकं गुरुस्तदा । चकार सुमुहूर्ते वै महामंगलपूर्वकम् १०१॥
हनुमत्प्रमुखाद्यैश्च चतुःसिंधुजलं शुभम् । समानीय नृपैः सर्वैर्महावाद्यपुरःसरम् ॥१०२॥
छत्रं च तस्य जग्राह पृष्ठसंस्थः स लक्ष्मणः । दधार सव्यपार्श्वस्थश्चामरं भरतस्तदा ॥१०३॥
शत्रुघ्नो वामपार्श्वस्थो दधार व्यजनं शुभम् । हनुमान्पादुके दिव्ये दधार पुरतः स्थितः ॥१०४॥
वायव्यादिचतुष्कोणसंस्थितास्ते महौजसः । सुग्रीवाद्यास्तदा चासंश्चत्वारो राघवेक्षणाः ॥१०५॥
सुग्रीवो जलपात्रं च वरादर्शं विभीषणः । दधार हस्ते तांबूलपात्रं स बालिनन्दनः ॥१०६॥
वस्त्रकोशं जांबवांश्च दधार वेगवत्तरः । तस्थौ सिंहासने रामः सपृष्ठांकोपबर्हणः ॥१०७॥
सौमित्रिवामपार्श्वेऽथ संपातिः संस्थितोऽभवत् । वामपार्श्वे भरतस्य गुहकः संस्थितोऽभवत् । १०८॥
शत्रुघ्नवामपार्श्वेऽथ संस्थितो मकरध्वजः । हनुमद्वामपार्श्वे च गरुडः संस्थितोऽभवत् ॥१०९॥
सुग्रीवादिचतुर्णां ते वामपार्श्वेषु संस्थिताः । श्रीचित्ररथविजयसुमंत्रदारुकास्तथा ॥११०॥
नानाराजोपकरणधृतहस्ता महौजसः । ययुर्देवासुराः सर्वे यक्षगंधर्वकिन्नराः ॥१११॥
ओषध्यः पर्वता वृक्षाः सागराश्चाथ निम्नगाः । मालाञ्च कांचनीं वायुर्ददौ वासवचोदितः ॥११२॥

राज्यका पालन स्वयं करें। यह सुन और 'तथास्तु' कहकर रामने भरतको अपने पास बैठा लिया ॥ ९४ ॥ ९५ ॥ तदनन्तर राम और सीता दिव्य वस्त्र धारण करके रथपर सवार होकर जय-जयकार तथा बाजे गानेके साथ वारांगनाओंका नाच-गान देखते-सुनते हुए अपनी प्रिय अयोध्यापुरीको चले। नगरमें प्रवेश करनेपर नगरकी नारियोंने छतों तथा कोठोंपर चढ़कर अनेक प्रकारके पुष्पोंकी वर्षा की ॥ ९६ ॥ ९७॥ वे रास्तेमें विविध पूजाकी सामग्रीसे रामकी आरती उतारने लगीं। रामने विमानसे उतरकर सीताको महलमें भेज दिया और पुष्पक विमानसे कहा कि 'तुम कुबेरके पास जाकर सदा उन्हींकी सेवा करो।' रामकी आज्ञाको स्वीकार करके पुष्पक विमान कुबेरके पास चला गया ॥ ९८ ॥ ९९ ॥ अब राम सब कपियोंको साथ लेकर सभाभवनमें गये। पश्चात् कपियोंको निवास करनेके लिए उत्तम-उत्तम मकान दिये गये ॥ १०० ॥ तदनन्तर गुरु वसिष्ठने शुभ मुहूर्तमें बड़े धूम-धामसे रामका राज्याभिषेक ठाना ॥ १०१ ॥ हनुमान् आदिको भेजकर चारों समुद्रोंका शुभ जल मँगवाया। देश-देशान्तरके राजे-महाराजे बुलाये गये। नाना प्रकारके बाजे बजे। लक्ष्मणने पीछे खड़े होकर रामके ऊपर छत्र लगाया। रामकी पादुका हाथमें लेकर हनुमान् उनके सामने खड़ हो गये। बायीं ओर सुन्दर पंखा लेकर शत्रुघ्न खड़े हुए और रामकी दाहिनी ओर चमर लेकर भरत खड़े हो गये ॥ १०२-१०४ ॥ रामके नेत्रसदृश प्रिय तथा ओजस्वी सुग्रीव आदि मित्र वायव्य आदि चार कोनोंमें विराजमान हो गये ॥ १०५ ॥ सुग्रीवने जलपात्र, विभीषणने सुन्दर दर्पण, वालिनन्दन अंगदने पानदान तथा वेगवान् जांबवान्ने अपने हाथमें श्रीरामके वस्त्रोंकी पिटारी ले ली। तब श्रीराम आकर गद्दी-तकिया लगे हुए बहुमूल्य सिंहासनपर विराजमान हो गये। लक्ष्मणके वामभागमें संपाती, भरतके वामभागमें निषादराज, शत्रुघ्नके वामभागमें मकरध्वज तथा हनुमान्के वामभागमें गरुड़ खड़े हुए। सुग्रीव आदि चारों मित्रोंके बायें चित्ररथ, विजय, सुमन्त्र तथा दारुक खड़े हुए ॥ १०६-११० ॥ बड़े-बड़े तेजस्वी राजे हाथोंमें अनेक प्रकारकी भेटें लेकर आये। सब देवता, असुर, यक्ष, गन्धर्व तथा किन्नरगण वहाँ आकर उपस्थित हो

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वरत्नसमायुक्तं मणिकांचनभूषितम् । ददौ हारं नरेंद्राय स्वयं शक्रस्तु भक्तितः ॥११३॥
प्रजगुर्देवगंधर्वा ननृतुर्वारयोषितः । देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात खात् ॥११४॥
ततोऽकरवं स्तुतिमहं भरतेनाभिपूजितः ॥११५॥

श्रीशिव उवाच

सुग्रीवमित्रं परमं पवित्रं सीताकलत्रं नवमेघगात्रम् ।
कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं सततं नमामि ॥११६॥
संसारसारं निगमप्रचारं धर्मावतारं हृतभूमिभारम् ।
सदाऽविकारं सुखसिंधुसारं श्रीरामचन्द्रं सततं नमामि ॥११७॥
लक्ष्मीविलासं जगतां निवासं लंकाविनाशं भुवनप्रकाशम् ।
भूदेववासं शरदिन्दुहासं श्रीरामचन्द्रं सततं नमामि ॥११८॥
मंदारमालं वचने रसालं गुणैर्विशालं हतसप्ततालम् ।
क्रव्यादकालं सुरलोकपालं श्रीरामचन्द्रं सततं नमामि ॥११९॥
वेदांतगानं सकलैः समानं हृतारिमानं त्रिदशप्रधानम् ।
गजेंद्रयानं विगतावसानं श्रीरामचन्द्रं सततं नमामि ॥१२०॥
श्यामाभिरामं नयनाभिरामं गुणाभिरामं वचनाभिरामम् ।
विश्वप्रणामं कृतभक्तकामं श्रीरामचन्द्रं सततं नमामि ॥१२१॥
लीलाशरीरं रणरङ्गधीरं विश्वैकसारं रघुवंशहारम् ।
गंभीरनादं जितसर्ववादं श्रीरामचन्द्रं सततं नमामि ॥१२२॥
खले कृतांतं स्वजने विनीतं सामोपगीतं मनसा प्रतीतम् ।

गये। औषधि, पर्वत, वृक्ष, समुद्र तथा नदियाँ भी आ पहुँचीं। इन्द्रके द्वारा भेजे हुए वायुने आकर रामको एक सुन्दर कंचनकी माला पहनायी ॥ १११ ॥ ११२ ॥ पश्चात् स्वयं इन्द्रने भी आकर सब रत्नोंसे युक्त तथा सोनेसे सुशोभित हार राजा रामको समर्पण किया ॥ ११३ ॥ देवता और गन्धर्व उनके गुण गाने लगे। सब अप्सरायें और वाराँगनायें नाचने लगीं। देवताओंके नगाड़े बजने लगे और आकाशसे फूलोंकी वर्षा होने लगी ॥ ११४ ॥ बादमें भरतके द्वारा पूजित होकर मैं (शिव) रामकी स्तुति करने लगा ॥ ११५ ॥ श्रीशिवजी बोले– सुग्रीवके मित्र, परमपावन, सीताके पति, मेघके समान श्याम शरीरवाले, करुणाके सिंधु और कमलके सदृश नेत्रोंवाले श्रीरामचन्द्रको मैं निरन्तर नमस्कार करता हूँ ॥ ११६ ॥ संसारसागरसे भक्तोंको पार करनेवाले, वेदोंका प्रचार करनेवाले, धर्मके साक्षात् अवतार, भूभारको हरण करनेवाले, अविकृत स्वरूपवाले और सुखके सर्वोत्तम सागर श्रीरामचन्द्रको मैं सदा नमस्कार करता हूँ ॥ ११७ ॥ लक्ष्मीके साथ विलास करनेवाले, जगत्के निवासस्थान, लङ्काका विनाश करनेवाले, भुवनोंको प्रकाशित करनेवाले, ब्राह्मणोंको शरण देनेवाले और शारदीय चन्द्रमाके समान शुभ्र हास्य करनेवाले श्रीरामचन्द्रको मैं सतत नमस्कार करता हूँ ॥ ११८ ॥ मन्दारकी माला धारण करनेवाले, रसीले वचन बोलनेवाले, गुणोंमें महान्, सात ताल वृक्षोंका भेदन करनेवाले, राक्षसोंके काल तथा देवलोकके पालक रामचन्द्रको मैं सदा नमस्कार करता हूँ। वेदान्तके गेय, सबके साथ समान बर्ताव करनेवाले, शत्रुके मानका मर्दन करनेवाले, गजेन्द्रकी सवारी करनेवाले तथा अन्तरहित श्रीरामचन्द्रको मैं सतत नमस्कार करता हूँ ॥ ११९ ॥ १२० ॥ श्यामरूपसे मनोहर, नयनोंसे मनोहर, गुणोंसे मनोहर, हृदयग्राही वचन बोलनेवाले, विश्ववन्दनीय और भक्तजनोंकी कामनाओंको पूरी करनेवाले श्रीरामचन्द्रको मैं निरन्तर प्रणाम करता हूँ ॥ १२१ ॥ लीलामात्रके लिए शरीर धारण करनेवाले, रणस्थलीमें धीर, विश्वभरके एकमात्र सारभूत, रघुवंशमें श्रेष्ठ, गंभीर वाणी बोलनेवाले और समस्त वादोंको जीतनेवाले श्रीरामचन्द्रको मैं प्रतिक्षण प्रणाम करता हूँ ॥ १२२ ॥ दुष्टोंके लिए कठोर हृदयवाले, अपने भक्तोंके प्रति

CC0. In Public Domain. Kartikeya Sharma Nagpur/Delhi Collection.

 Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रागेण गीतं वचनादतीतं श्रीरामचन्द्रं सततं नमामि ॥१२३॥
श्रीरामचन्द्रस्य वराष्टकं त्वां मयेरितं देवि मनोहरं ये ।
पठन्ति शृण्वन्ति गृणंति भक्त्या ते स्वीयकामान्प्रलभन्ति नित्यम् ॥१२४॥
इति स्तुत्वा रामचन्द्रं सभायां संस्थितस्त्वहम् । एतस्मिन्नन्तरे तत्र राजा दशरथो महान् ॥१२५॥
दृष्ट्वा रामं ससीतं च विमानस्थोऽर्कसन्निभः । स्तुत्वा रामं परात्मानं राज्यस्थं बंधुवेष्टितम् ॥१२६॥
उवाच रामं संतुष्टः सुरानीकविराजितः ।

दशरथ उवाच

धन्योऽहं कृतकृत्योऽहं धन्यौ तौ पितरौ मम ॥१२७॥
धन्यो देशः कुलं धन्यं यस्त्वां राज्याभिषेचितम्। पश्याम्यद्य महाबाहो धन्या सा जननी तव ॥१२८॥
या कौसल्या समुत्साहं नेत्राभ्यां तेऽद्य पश्यति । इत्युक्तवन्तं राजानं ननाम स रघूत्तमः ॥१२९॥
कौसल्याद्या राजदाराः सर्वे ते पौरवासिनः । लक्ष्मणो भरतश्चैव शत्रुघ्नस्तेऽथ मंत्रिणः ॥१३०॥
नमस्कारान्नृपं चक्रुर्विमानस्थं मुदान्विताः । तान् राजाऽपि पृथक् पृष्ट्वा सर्वैर्देवगणैर्युतः ॥१३१॥
पूजितो रामचंद्रेण मया सह न्यवर्तत । ययुः स्वं स्वं पदं सर्वे मया राज्ञा सुरास्तदा ॥१३२॥
रामेऽभिषिक्ते राजेन्द्र सर्वलोकसुखावहे । वसुधा सस्यसंपन्ना फलवंतो महीरुहाः ॥१३३॥
गधहीनानि पुष्पाणि गंधवन्ति चकाशिरे । सहस्रं शतमश्वानां धेनूनां रघुनंदनः ॥१३४॥
ददौ शतं वृषाणां च द्विजेभ्यो वसु कोटिशः । सूर्यकांतिसमप्रख्यां सर्वरत्नमयीं स्रजम् ॥१३५॥
सुग्रीवाय ददौ प्रीत्या राघवो हर्षसंयुतः । अवतंसं ददौ श्रेष्ठं राक्षसेंद्राय राघवः ॥१३६॥
अंगदाय ददौ दिव्ये राघवो बाहुभूषणे । चंद्रकोटिप्रतीकाशं मणिरत्नविभूषितम् ॥१३७॥
सीतायै प्रददौ हारं प्रीत्या रघुकुलोत्तमः । सा तं हारं ददौ वायुपुत्राय सा मनस्विनी ॥१३८॥

विनम्रभाववाले, सामवेद जिनका गुण-गान करता है, मनमात्रके विषय, प्रेमसे गान करने योग्य तथा वचनोंसे ग्रहण करने लायक श्रीरामचन्द्रको मैं सर्वदा नमस्कार करता हूँ ॥ १२३ ॥ हे देवि ! तुम्हारे प्रति कहे हुए श्रीरामके इस सुन्दर अष्टकको जो मनुष्य भक्तिसे पढ़ेगा अथवा सुने-सुनायेगा, वह अपनी अभिलषित कामनाओंको नित्य प्राप्त करेगा ॥ १२४ ॥ रामचन्द्रकी इतनी स्तुति करके ज्यों ही मैं उस सभामें बैठा, त्यों ही सूर्यके समान तेजस्वी राजा दशरथ विमानपर सवार होकर सुरसमुदायके साथ वहाँ आकर सीताके सहित बन्धुओंसे वेष्टित तथा राजगद्दीपर स्थित पुत्रस्वरूप राम परमात्माको देखकर स्तुति करने लगे ॥ १२५ ॥ १२६ ॥ देवताओंके समूहसे परिवेष्टित राजा दशरथ प्रसन्न होकर बोले । उन्होंने कहा—मैं धन्य हूँ, मैं कृतकृत्य हूँ, मेरे माता-पिता धन्य हैं ॥ १२७ ॥ मेरा देश तथा कुल भी धन्य है कि जो मैं आज तुम्हें राजगद्दीपर अभिषिञ्चित देख रहा हूँ । हे महाबाहो ! तुम्हारी माता कौसल्या भी धन्य हैं, जो तुम्हें उत्साहपूर्वक अपने नेत्रोंसे देख रही हैं । तदनन्तर रामने उन राजा दशरथको प्रणाम किया ॥ १२८ ॥ १२९ ॥ तब कौसल्या आदि राजाकी स्त्रियोंने, पुरवासियोंने, भरत-शत्रुघ्नने तथा मन्त्रियोंने प्रमुदित होकर विमानमें स्थित राजा दशरथको प्रणाम किया । राजाने भी एक-एक करके उन सबसे कुशल पूछा । फिर देवताओं तथा मुझे साथ ले और रामचन्द्रसे पूजित होकर उन्होंने वहाँसे प्रस्थान कर दिया । मेरे तथा राजाके सहित वे सब देवता अपने-अपने धाम सिधारे ॥ १३०–१३२ ॥ सब लोगोंको सुख देनेवाले राजाओंमें श्रेष्ठ राजा रामका अभिषेक हो जानेपर पृथ्वी धन-धान्यपूर्ण हो गयी और नहीं फलनेवाले भी वृक्ष फलने लगे ॥ १३३ ॥ सुगन्धरहित पुष्प भी सुगंधित होकर सुशोभित होने लगे । रघुनन्दन रामने सैकड़ों बैल, हजारो घोड़े तथा करोड़ों रत्न ब्राह्मणोंको दान दिये । उन रामने प्रसन्न होकर सूर्यके समान चमकनेवाली तथा अनेक प्रकारके रत्नोंसे निर्मित एक माला प्रीतिपूर्वक सुग्रीवको दी और एक सिरपेंच राक्षसेन्द्र विभीषणको दिया ॥ १३४–१३६ ॥ उन्होंने अंगदको दिव्य बाजूबन्द दिये । रघुकुलमणि रामने सीताको करोड़ों चन्द्रमाके समान चमकीले मणियों तथा

CC-0. In Public Domain. KirtiKant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेन हारेण शुशुभे मारुतिर्गौरवेण च । तदा दृष्ट्वा हनूमन्तं रामो वचनमब्रवीत् ॥१३९॥
मारुते त्वां प्रसन्नोऽस्मि वर वरय कांक्षितम् । हनूमानपि तं प्राह नत्वा रामं प्रहृष्टधीः ॥१४०॥
त्वन्नाम स्मरतो राम मनस्तृप्यति नो मम । अतस्त्वन्नाम सततं स्मरन्स्थास्यामि भूतले ॥१४१॥
यावत्स्थास्यति ते नाम लोके तावत्कलेवरम् । मम तिष्ठतु राजेंद्र वरोऽयं मेऽभिकांक्षितः ॥१४२॥
यत्र यत्र कथा लोके प्रचरिष्यति ते शुभा । तत्र तत्र गतिर्मेऽस्तु श्रवणार्थं सदैव हि ॥१४३॥
देवालयान्नदीतीरात्तीर्थाद्वापि जलाशयात् । विनाऽन्यत्र स्थले तेस्तु कथा षड्घटिकोर्ध्वतः॥१४४॥
रामस्तथेति तं प्राह मुक्तस्तिष्ठ यथासुखम् । कल्पांते मम सायुज्यं प्राप्स्यसे नात्र संशयः ॥१४५॥
तमाह जानकी प्रीता यत्र कुत्रापि मारुते । स्थितं त्वामनुयास्यंति भोगाः सर्वे ममाज्ञया ॥१४६॥
ग्रामारामपत्तनेषु व्रजखेटकसद्मसु । वनदुर्गपर्वतेषु सर्वदेवालयेषु च ॥१४७॥
नदीषु क्षेत्रतीर्थेषु जलाशयपुरेषु च । वाटिकोपवनाश्वत्थवटवृंदावनादिषु ॥१४८॥
त्वन्मूर्तिं पूजयिष्यंति मायया विघ्नशांतये । भूतप्रेतपिशाचाद्या नश्यंति स्मरणात्तव ॥१४९॥
ये चान्ये वानराद्याश्च ह्ययोध्यां समुपागताः । अमूल्याभरणैर्वस्त्रैः पूजिता राघवेण ते ॥१५०॥
सुग्रीवप्रमुखाः सर्वे वानराः सविभीषणाः ।
मकरध्वजसंपातिगुहकाः पार्थिवादयः । यथार्हं पूजितास्तेन रामेण वसनादिभिः ॥१५१॥
ततः सर्वैर्भोजनार्थं राघवः संस्थितोऽभवत् । रामेण प्राणाहुतयो गृहीताश्चेति मारुतिः ॥१५२॥
निरीक्ष्योड्डीय वेगेन रामाग्रे भोजनस्य च । त्रिपदायां स्थितं पात्रं हैमं पक्वान्नपूरितम् ॥१५३॥
निनाय वामहस्तेन धृत्वा च विहसन्मुदा । स्वयं भुक्त्वा रामशेषं प्राक्षिपद्वानरानपि ॥१५४॥

रत्नोंसे विभूषित हार सप्रेम समर्पण किया। मनस्विनी सीताने भी रामका दिया हुआ वह हार वायुपुत्र हनुमानको दे दिया ॥ १३७ ॥ १३८ ॥ उस हारके गौरवसे हनुमान् बड़े ही सुशोभित होने लगे। यह देखकर रामने हनुमान्से कहा– ॥ १३९ ॥ हे मारुते ! मैं तुम्हारे ऊपर प्रसन्न हूँ। जो चाहो सो वर माँगो। तब प्रसन्न हनुमान्ने रामको नमस्कार करके कहा– ॥ १४० ॥ हे प्रभो ! आपके नामस्मरणसे मेरा मन अब भी तृप्त नहीं हुआ है। अतएव जबतक आपका नाम भूतलमें विद्यमान रहे, तबतक मैं आपके नामका स्मरण करता हुआ इस लोकमें जीवित रहूँ। हे राजेन्द्र ! यही मेरा अभिलषित वर आप मुझे दे दें ॥ १४१ ॥ १४२ ॥ लोकमें जहाँ कहीं भी आपकी पवित्र कथा होती हो, वहाँ वह कथा सुननेके लिये जानेमें मेरी अप्रतिहत गति हो ॥ १४३ ॥ देवालय, नदीतीर, तीर्थस्थान तथा बावली आदि जलाशयको छोड़कर अन्य स्थानोंमें छः घड़ीके बाद नित्य आपकी कथा हुआ करे ॥ १४४ ॥ रामने कहा—अच्छा, तुम मुक्त होकर सुखसे भूमण्डलपर निवास करो । कल्पान्तके समय तुम मेरी सायुज्य मुक्तिको प्राप्त होओगे, इसमें संदेह नहीं है ॥ १४५ ॥ इसके पश्चात् जानकीजी प्रसन्न होकर बोलीं—हे मारुते ! तुम जहाँ कहीं रहोगे, वहींपर मेरे आशीर्वादसे तुमको सब भोग्य पदार्थ प्राप्त हो जाया करेंगे ॥ १४६ ॥ ग्राम, बाग, नगर, गोशाला, रास्ता, छोटा गाँव, घर, वन, जिला, पर्वत, सब देवालय, नदी, तीर्थक्षेत्र, जलाशय, पुर, वाटिका, उपवन, पीपल, वट तथा वृन्दावन आदि स्थानोंमें मनुष्य अपने विघ्नोंको शान्त करनेके लिये तुम्हारी मूर्तिकी पूजा करेंगे। तुम्हारा नाम स्मरण करनेसे ही भूत-प्रेत तथा पिशाच आदि दूर भाग जायँगे ॥ १४७-१४९ ॥ इसके बाद रामने अयोध्यामें जो अन्य वानर आये थे, उन सबका भी बहुमूल्य भूषण तथा वस्त्रोंसे सत्कार किया ॥ १५० ॥ श्रीरामने वस्त्रादिसे सुग्रीव आदि वानरों, विभीषण, मकरध्वज, संपाती तथा निषादराज आदि राजाओंकी भी यथायोग्य पूजा की ॥ १५१ ॥ उसके पश्चात् सबको साथ लेकर रामचन्द्रजी भोजन करने बैठे। रामके पाँच ग्रास ग्रहण करके तृप्त हो जानेके साथ ही हनुमान् झट उठकर रामके पास आ पहुँचे और उनके सामने पीढ़ेपर रखखा हुआ पकवानोंसे परिपूर्ण सुवर्णका थाल बाएँ हाथसे उठाकर आकाशमें उड़ चले गये और रामके उस भोजनशेषका स्वयं आनन्दसे

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदा विभीषणाद्याश्च स्वीयपात्राणि वेगतः। विसृज्य मारुतिं स्तुत्वा त्वया सम्यक्कृतं त्विति। १५५॥
तत्क्षिप्तं राघवोच्छिष्टं बुभुजुः संभ्रमान्विताः। महान् कोलाहलश्चासीद्रामोच्छिष्टार्थमादरात्॥१५६॥
सीतारामौ तन्निरीक्ष्य मुदा जहसतुस्तदा। एवं नानाकौतुकानि कुर्वन्तौ राघवांतिके॥१५७॥
सुग्रीवाद्याः सुखं तस्थुस्तोषयंतः कियद्दिनम्। एतस्मिन्नन्तरे तत्र पुष्पकं चागमत्पुनः॥१५८॥
प्राह देव कुबेरेण प्रेषितं त्वामहं पुनः। मामाह यत्कुबेरस्तच्छृणुष्व त्वं रघूत्तम॥१५९॥
जितस्त्वं रावणेनादौ पश्चाद्रामेण निर्जितः। अतस्त्वं राघवं नित्यं वह यावद्वसेद्भुवि॥१६०॥
यदा गच्छेद्रघुश्रेष्ठो वैकुण्ठं याहि मां तदा। तच्छ्रुत्वा राघवः प्राह सुग्रीवादीन्यथास्थले॥१६१॥
स्थाप्य शीघ्रमयोध्यायां राजद्वाराद्बहिर्वस। तथेति रामवचनाद्वानराद्यान्यथास्थले॥१६२॥
स्थाप्य शीघ्रमयोध्यायां राजद्वाराद्बहिः स्थितम्। चकार राज्यं धर्मेण लङ्कायां स विभीषणः॥१६३॥
शशास राज्यं पाताले धर्मेण मकरध्वजः। चकार तार्क्ष्यः संपातिं यौवराज्यपदे निजे॥१६४॥
शशास राज्यं कपिभिः किष्किन्धायां कपीश्वरः। शृङ्गबेरपुरे राज्यं गुहकश्चाकरोन्मुदा॥१६५॥
नत्वा रामं वायुपुत्रो ययौ तप्तुं हिमालयम्। सर्वे विभीषणाद्याश्च पंचमे सप्तमेऽहनि॥१६६॥
दर्शनार्थं राघवस्य साकेतं प्रययुः सदा। पंच सप्त दिनान्यत्र स्थित्वा श्रीराघवांतिकम्॥१६७॥
यातायातं सदा चक्रुः स्वस्वराज्याद्रघूत्तमम्। रामोऽपि राज्यमखिल शशासाखिलवत्सलः॥१६८॥
अनिच्छंतं हि सौमित्रिं यौवराज्येऽभ्यषेचयत्। लक्ष्मणः परया भक्त्या रामसेवापरोऽभवत्॥१६९॥
विश्वामित्राध्वरे पूर्वं रणयागस्य पूर्णता।
न कृता या राघवेण सा कृता स्वपदे तदा। रणयागः सविस्ताराद्वर्ण्यते शृणु पार्वति॥१७०॥

खाने तथा नीचे वानरोंके आगे फेंकने लगे॥ १५२–१५४॥ यह देखकर विभीषण आदि भक्त भी शीघ्र अपने-अपने थालोंको छोड़कर हनुमान्‌की प्रशंसा करके कहने लगे कि तुमने बहुत उत्तम काम किया॥ १५५॥ यह कहकर वे स्वयं भी बड़े आदरसे मारुतिका फेंका हुआ रामका उच्छिष्ट प्रसाद पाने लगे। उस समय रामकी जूठनके लिये बड़ा भारी कोलाहल मच गया॥ १५६॥ राम और सीताने यह देखा तो प्रसन्न होकर हँसने लगे। इस प्रकार विविध क्रीडायें करके सीता और रामको प्रसन्न करते हुए सुग्रीव आदि मित्र कुछ दिन वहाँ रहे। इतनेमें पुष्पक विमान पुनः वहाँ आया॥ १५७॥ १५८॥ वह रामसे कहने लगा—हे देव! कुबेरने मुझको आपके पास वापस भेज दिया है। हे रघुनन्दन! कुबेरने जो कुछ मुझसे कहा है, वह सुनिये॥ १५९॥ उन्होंने कहा है कि पहले तो रावणने तुमको मुझसे जीता था और बादमें रामने तुमको रावणसे जीता है। इस कारण तुम जाकर तबतक राम ही को सवारी देनेका काम करो, जबतक कि भूमण्डलमें रहें॥ १६०॥ जब रघुश्रेष्ठ राम वैकुण्ठ धाम चले जायँ, तब तुम मेरे पास चले आना। यह सुनकर रामने विमानको आज्ञा दी कि सुग्रीव आदि मेरे मित्रोंको उनके स्थानपर पहुँचाकर शीघ्र ही अयोध्या लौट आओ और राजमहलके दरवाजेके बाहर खड़े रहो। तदनन्तर विभीषण जाकर लङ्कामें धर्मपूर्वक राज्य करने लगे॥ १६१–१६३॥ मकरध्वज पातालमें धर्मपूर्वक राज्य-शासन करने लगे। गरुड़ने युवराजपदपर संपातीका अभिषेक किया॥ १६४॥ किष्किन्धामें कपीश्वर सुग्रीव राज्य करने लगे। शृङ्गबेरपुरमें निषादराज आनन्दसे राज्य करने लगा॥ १६५॥ वायुपुत्र हनुमान् रामको नमस्कार करके तप करनेको हिमालय चले गये। फिर भी विभीषण-सुग्रीव आदि मित्र पाँचवें अथवा सातवें दिन अयोध्यामें श्रीरामका दर्शन करनेके लिए आया करते थे और वे श्रीरामके पास पाँच-सात दिन निवास करके चले जाते थे। इस प्रकार उन लोगोंका अपने-अपने राज्यसे श्रीरामके पास आना-जाना लगा रहता था। सभी लोगोंके प्रिय राम भी सम्पूर्ण राज्यका पालन करने लगे॥ १६६–१६८॥ न चाहनेपर भी रामने लक्ष्मणका युवराजके पदपर अभिषेक कर दिया और वे भी रामकी सेवामें तत्पर हो गये॥ १६९॥ रामने पूर्व समयमें विश्वामित्रके यज्ञके समय जिस युद्धरूपी यज्ञकी समाप्ति नहीं की थी, उस रणयज्ञकी इस समय अपने राज्यपदपर स्थित हो जानेपर पूर्णाहुति की। हे पार्वती!

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणांगणं यज्ञकुण्डं तत्र वै ह्यपलायनम् । तच्च वेदविधानं हि ब्रह्मसत्त्वं प्रकीर्तितम् ॥१७१॥
कर्मणश्च घटाटोपो ज्ञेयः शस्त्रखणस्वनः । संमार्जनं स्रुक्स्रुवयोर्ज्ञेयं पाषाणघर्षणम् ॥१७२॥
शस्त्राणां मलशोधार्थं क्रियते यद्रणांगणे । भूमौ शराणां विस्तारः परिस्तरणमुत्तमम् ॥१७३॥
परिसमूहनं धैर्यं वह्निकालानलो महान् । स्रुवेण बाणरूपेण मांसाहुतिसमर्पणम् ॥१७४॥
रक्तधारा वसोर्धारा हाहाकारो भयानकः । स ॐकारवषट्कारघोषो ज्ञेयो रणाध्वरे ॥१७५॥
अग्नेर्ज्वाला शस्त्रतेजोधूम्रः स्वेदस्रुतो रणे । ज्वालानिचयशांत्यर्थं पृषदाज्यस्य सेचनम् ॥१७६॥
यत्तदत्र तु वीराणामस्त्रमोचनमुत्तमम् । ज्ञानेन सह जीवस्य बलिर्दीपबलिः स्मृतः ॥१७७॥
ये देहलोभिनो जीवा बलिदीपहराः स्मृताः । रामहस्तान्मृतिं त्यक्त्वा ये कुर्वन्ति पलायनम् ॥१७८॥
देहबन्धान्न मुक्तास्ते बलिभक्षणदोषतः । पूर्णाहुतिः शिरोभिर्हि ज्ञेयास्तत्र प्रदक्षिणाः ॥१७९॥
उच्चाटनं हि सव्येन वीराणां जयहेतवे । नैजं पदप्रदानं च ज्ञेया सा दक्षिणाऽध्वरे ॥१८०॥
सुरैर्या पुष्पवृष्टिस्तज्ज्ञेयं विप्राभिषेचनम् । जयसम्पादनं युद्धे श्रेयःसंपादनं हि तत् ॥१८१॥
चराचराणामानन्दो ज्ञेयः स निजगोत्रिणाम् । भूतानां तर्पणं विप्रभोजनं सम्प्रकीर्तितम् ॥१८२॥
एवं सुबाहुना युद्धे राघवस्य रणाध्वरः । तथा गाधिजयज्ञेऽपि द्वौ तौ ज्ञेयौ सहैव हि ॥१८३॥
कृताऽध्वरसमाप्तिस्तु विश्वामित्रेण वै पुरा । विसर्जितो न रामेण दृष्ट्वाऽतृप्तं रणाध्वरे ॥१८४॥
कालानलं पुनस्तस्य तृप्त्यर्थं वाऽकरोन्मतिम् । कृत्वा भूमेर्महत्पात्रं विराधरुधिरेण हि ॥१८५॥
पात्रस्य प्रोक्षणं कृत्वा चित्राहुत्यर्थमादरात् । रामः शूर्पणखायाश्च घ्राणं कर्णौ बिभेद यत् ॥१८६॥
प्राणाहुतिभ्यो रामेण त्रिशिराः खरदूषणौ । मारीचश्च कबन्धश्च पंच ते निहताः क्षणात् ॥१८७॥

उस रणरूपी यज्ञका मैं विस्तारसे वर्णन करता हूँ, सुनो ॥ १७० ॥ उस रणयागमें युद्ध कुण्ड था। उसमेंसे न भागना ही वेदविहित ब्रह्मसत्त्व था ॥ १७१ ॥ शस्त्रोंकी खनकार ही कर्मकी सामग्री थी। रणांगणमें शस्त्रोंका मैल छुड़ानेके लिये उनपर जो पत्थर घिसे जाते थे, वही स्रुक्-स्रुवाका माँजना था। भूमिमें बाणोंको फैला-फैलाकर रखना ही उत्तम कुश आदिका आस्तरण था। धीरता ही उनका परिसमूहन (बटोरना) था। महान् कालरूपी अग्नि ही यज्ञकुण्डकी आग थी। उसमें बाणरूपी स्रुवासे मांसकी आहुतियें समर्पण की जाती थीं ॥ १७२–१७४ ॥ रुधिरकी धारा ही वसुधारा थी। भयानक हाहाकार ही ओंकार तथा वषट्कारका नाद था ॥ १७५ ॥ शस्त्रोंकी चमक ही आगकी लपटें थी। पसीनेका बहना ही धुआँ था। वीर पुरुषोंका उत्तम अस्त्रमोचन ही अधिक ज्वालाकी शांतिका पृषदाज्य सींचनारूपी उपाय था। ज्ञानपूर्वक जीवोंका शरीर-त्याग ही दीपदान था ॥ १७६ ॥ १७७ ॥ जो शरीरमें ममता रखनेवाले थे, वे ही पूजाकी सामग्री तथा दीपको ले भागनेवाले माने जाते थे। जो रामके हाथसे न मरकर वहाँसे भाग जाते थे, वे बलिभक्षण करनेके दोषसे देहरूपी बन्धनमें ही पड़े रह जाते थे-मुक्त नहीं होते थे। उस युद्धरूपी यज्ञमें सिरोंका कट कटकर गिरना ही नारियलके द्वारा दी जानेवाली पूर्णाहुति थी। विजयलाभके लिये अपनी दाहिनी ओरसे वीरोंको दूर करना हो प्रदक्षिणा थी। उस यज्ञमें मृत पुरुषोंका विजयपद (ब्रह्मपदकी प्राप्ति) ही दक्षिणा थी ॥१७८–१८०॥ देवताओंके द्वारा जो पुष्पवृष्टि की जाती थी, वह ब्राह्मणोंका अभिषेचन था। युद्धमें विजय प्राप्त करना ही यज्ञका फल था ॥ १८१ ॥ चर-अचरका आनन्दलाभ ही अपने गोत्रवालोंका आनन्द समझा जाता था। पशु-पक्षी आदि जीवोंकी तृप्ति ही विप्रभोजन कहा जाता था ॥ १८२ ॥ इस प्रकार रामका जो सुबाहुसे युद्धरूपी यज्ञ राक्षसोंके साथ आरम्भ हुआ, वह और गाधिपुत्र विश्वामित्रका यज्ञ दोनों साथ ही प्रारम्भ हुए ॥ १८३ ॥ उनमेसे विश्वामित्रजीने तो अपना यज्ञ समाप्त कर लिया था, परन्तु रामने अपने यज्ञमें कालानलको अतृप्त देखकर अपना युद्धयज्ञ समाप्त नहीं किया था। अतएव उसको तृप्त करनेकी इच्छा करके रामने विराधके रुधिरसे पृथ्वीरूपी पात्रका प्रोक्षण (शुद्धि) करके सूर्पणखाके नाक-कान काटकर प्रेमसे चित्र-विचित्र आहुतियें दीं ॥ १८४–१८६ ॥ रामने त्रिशिरा, खर, दूषण, मारीच तथा कबन्धको क्षणभरमें मारकर पंचप्राणा-

CC0. In Public Domain Kirtiprant Sharma Rajasthan Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिखाबंधविमोक्षार्थं शबरी भवबंधनात् । कृता मुक्ता तु रामेण जलस्पर्शनहेतवे ॥१८८॥
नेत्रयोर्निहतो बाली दत्तं तद्रुधिरं तदा । क्वाथिलंकापुरी दग्धा कुंभकर्णस्तथौदनः ॥ १८९॥
पक्वान्नमिंद्रजिद् ज्ञेयः शाकार्थं राक्षसा हताः । वरान्नं सारणो ज्ञेयः प्रहस्तो वटकः स्मृतः ॥१९०॥
निकुंभः पर्पटो ज्ञेयः कुंभस्तु लवणं स्मृतः । पायसार्थं कालनेमिस्त्वतिकायः स शर्करः ॥१९१॥
क्षीरमैरावणो ज्ञेयो घृतं मैरावणः स्मृतः । दध्योदनः समाप्तौ तु आहवे च स रावणः ॥१९२॥
हत्वा निवेदितः पात्रे तस्य कालानलस्य च । उच्छिष्टबलिसंत्यागः केशत्वकीकसादिनाम् ॥१९३॥
संत्यागोऽत्र रणे ज्ञेयस्तदा तृप्तो बभूव सः । ततो रणाध्वरस्यात्र राघवेण विसर्जनम् ॥१९४॥
अयोध्यायां प्रवेशो हि कृतस्तत्ते वदाम्यहम् । अध्वरावभृथस्नानं ज्ञेयं राज्याभिषेचनम् ॥१९५॥
मंगलानि समस्तानि यज्ञांगविहितानि हि । ज्ञातव्यानीति रामेण रणयागो विसर्जितः ॥१९६॥
एवं प्रोक्तो मया देवि रणयागः सविस्तरः । रामोऽथ परमात्मापि कार्याध्यक्षोऽतिनिर्मलः॥१९७॥
कर्तृत्वादिविहीनोऽपि निर्विकारोऽपि सर्वदा । स्वानन्देनापि संतुष्टो लोकानामुपदेशकृत् ॥१९८॥
चकार विविधान् धर्मान् गार्हस्थ्यमनुलंब्य च । न पर्यदेवन् विधवा न च व्यालकृतं भयम् ॥१९९॥
न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति । औरसानिव रामोऽपि जुगोप पितृवत् प्रजाः ॥२००॥
सीतया बन्धुभिः सार्द्धं साकेते सुखमाप सः । इदं युद्धचरित्रं ते प्रोक्तं देवि मया तव ॥२०१॥

इति शतकोटिरामचरितांतर्गते श्रीमदानंदरामायणे वाल्मीकीये सारकाण्डे
युद्धचरिते रामराज्याभिषेकवर्णनं नाम द्वादशः सर्गः ॥ १२ ॥

हुतियें दीं ॥ १८७ ॥ शिखाकी गाँठ खोलनेकी जगह रामने शबरीको संसारबन्धनसे छुड़ाकर मुक्त कर दिया। रामने बालीको मारकर उसके रुधिररूपी जलसे नेत्रोंमें स्पर्श किया। लंकाको जलाकर कालानलके लिये दाल तथा कढ़ी बनायी। अर्थात् लंका दाल-कढ़ीके स्थानमें गिनी गयी। कुम्भकर्णरूपी भात, मेघनादरूपी पकवान और सब राक्षसोंका शाक बना। अन्य उत्तम पदार्थोंके स्थानपर सारण मारा गया। प्रहस्त बड़ा, निकुम्भ पापड़, कुम्भ नमक, कालनेमि खीर, अतिकाय शक्कर, ऐरावणरूपी दूधमें मैरावणरूपी घी तथा दधिभक्तके स्थानपर रावणको मारकर रामने कालानलके थालमें परोस दिया। कालानलने इन सबका भोजन करके केश, चर्म तथा अस्थियोंका जूठन रणमें छोड़ दिया। तब वह तृप्त हुआ। उसके पश्चात् रामका अयोध्यामें प्रवेश करना ही रणरूपी यज्ञकी समाप्ति अर्थात् रणयज्ञका विसर्जन हुआ। वहाँ रामका राज्याभिषेक ही यज्ञके अन्तका अवभृथस्थान था ॥ १८८-१९५ ॥ अन्यान्य मांगलिक कार्य उस यज्ञके अंग थे। इस प्रकार रामने सांगोपांग रणयज्ञ पूरा किया ॥ १९६ ॥ हे देवि ! मैंने तुमको उपर्युक्त प्रकारसे समस्त रणयाग कह सुनाया। तदनंतर साक्षात् परमात्मा, कार्यसमुदायके अधिष्ठाता, कर्तृत्वादि अभिमानसे रहित, सदा निर्विकार स्वरूप, निज आनन्दसे ही संतुष्ट तथा सब प्राणियोंको सदुपदेश देनेवाले राम भी गृहस्थधर्मका पालन करते हुए अनेक धर्मोंका आचरण करने लगे। उनके राज्यकालमें कोई भी स्त्री विधवा होकर रोती नहीं थी। किसीको साँप तथा व्याघ्र आदिका भय नहीं था और न किसीको रोगका ही भय था। रामने भी समस्त प्रजाको, पिता जिस प्रकार अपने सगे लड़कोंका पालन करता है, उसी प्रकार पालन किया। हे देवि ! यह मैंने तुमको रामका युद्धचरित्र कह सुनाया ॥ १९७-२०१ ॥ इति श्रीशतकोटिराचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीये सारकांडे युद्धचरित्रे रामतेजपांडेयकृत 'ज्योत्स्ना' भाषाटीकायां रामराज्याभिषेकवर्णनं नाम द्वादशः सर्गः ॥ १२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रयोदशः सर्गः

(अगस्त्य-रामसंवाद)

श्रीशिव उवाच

एकदा राघवं द्रष्टुं मुनिभिः कुंभसंभवः । ययौ रामेण संमानमानितः स उपाविशत् ॥ १ ॥
उपविष्टाः प्रहृष्टाश्च मुनयो रामपूजिताः । संपृष्टकुशलाः सर्वे रामं कुशलमब्रुवन् ॥ २ ॥
कुशलं ते महाबाहो सर्वत्र रघुनंदन । दिष्टयेदानीं प्रपश्यामो हतशत्रुमरिंदम ॥ ३ ॥
दिष्टया त्वया हताः सर्वे मेघनादादयोऽसुराः । हत्वा रक्षोगणान्सर्वान् कृतकृत्योऽद्य जीवसि ॥ ४ ॥
इति तेषां वचः श्रुत्वा रामस्तान्प्राह सुस्मितः । किमर्थमादौ युष्माभिर्मेघनादोऽद्य कीर्तितः ॥ ५ ॥
इति रामवचः श्रुत्वाऽगस्तिस्तैरवलोकितः । कुंभयोनिस्तदा रामं प्रीत्या वचनमब्रवीत् ॥ ६ ॥
शृणु राम यथा वृत्तं मेघनादस्य चेष्टितम् । जन्मकर्मवरप्राप्तिं संक्षेपाद्वदतो मम ॥ ७ ॥
पुरा कृतयुगे राम पुलस्त्यो ब्रह्मणः सुतः । तृणविंदुसुतायां स पुत्रं त्रैलोक्यविश्रुतम् ॥ ८ ॥
निर्ममे विश्रवा नामधेयं वेदनिधिं शुभम् । भरद्वाजसुतायां च विश्रवा निर्ममे सुतम् ॥ ९ ॥
श्रेष्ठं वैश्रवणं तस्मै प्रसन्नोऽभूद्विधिश्चिरात् । विधिर्वैश्रवणायाथ तुष्टस्तत्तपसा ददौ ॥१०॥
मनोऽभिलषितं यानं धनेशत्वमखंडितम् । पुष्पकं चाप्येकदाऽसौ द्रष्टुं विश्रवसं ययौ ॥११॥
पुष्पकेण धनाध्यक्षो ब्रह्मदत्तेन भास्वता । नत्वा तातं तदा प्राह न स्थानं ब्रह्मणा मम ॥१२॥
दत्तं स्थेयं मया कुत्र तद्विचार्य वदस्व माम् । विश्रवा ह्यपि तं प्राह विश्वकर्मविनिर्मिता ॥१३॥
लंकानाम्नी पुरी श्रेष्ठा सागरेऽस्ति सुमंडिता । त्यक्त्वा विष्णुभयाद्दैत्या विविशुस्तं रसातलम् ॥१४॥
सुखं त्वं वस तस्यां हि तथेत्युक्त्वा धनेश्वरः । गत्वा तस्यां चिरं कालमुवास पितृसंमतः ॥१५॥

श्रीशिवजी बोले—हे प्रिये ! एकदिन बहुतसे मुनियोंके साथ अगस्त्यमुनि श्रीरामका दर्शन करने आये। रामसे सम्मानित होकर वे सब बैठे ॥ १ ॥ अन्यान्य मुनि भी रामसे पूजित होकर प्रसन्नतापूर्वक बैठ गये। रामके पूछनेपर सबने अपना कुशल-क्षेम सुनाया ॥ २ ॥ और कहा—हे रघुनन्दन ! बड़े हर्षकी बात है कि शत्रुको मारकर सकुशल आपको हम लोग राज्यसिंहासनपर विराजमान देख रहे हैं। हे अरिन्दम (शत्रुओं-को नीचा दिखलानेवाले) ! आपने बड़े भाग्यसे मेघनाद आदि सब असुरोंको मार गिराया है। उन्हें मार तथा कृतकार्य होकर आप विराजमान हैं ॥ ३ ॥ ४ ॥ उनका ऐसा वचन सुनकर राम कुछ मुसकराते हुए बोले—आप लोगोंने सब राक्षसोंमेंसे मेघनादका नाम पहले क्यों लिया ? रामका यह प्रश्न सुनकर वे सब मुनि अगस्त्य मुनिका मुख देखने लगे। यह देखकर अगस्त्य बहुत प्रेमपूर्वक रामसे बोले—॥ ५ ॥ ६ ॥ हे राम ! मैं आपसे मेघनादका चरित्र, जन्म, कर्म तथा वरप्राप्तिका वृत्तान्त संक्षेपमें कहता हूँ, आप सुनें ॥ ७ ॥ हे राम ! सत्ययुगमें पुलस्त्य नामके ब्रह्मपुत्रने तृणबिन्दुकी पुत्रीसे तीनों लोकोंमें प्रसिद्ध वेदवेत्ता विश्रवा नामका पुत्र उत्पन्न किया। विश्रवाने भारद्वाजकी पुत्रीसे वैश्रवण नामक श्रेष्ठ पुत्र उत्पन्न किया। कुछ दिनोंके बाद वैश्रवणकी तपस्यासे प्रसन्न होकर ब्रह्माने उसको उसका मनोवांछित पुष्पक विमान, अखंड धनेशत्व तथा कुबेरकी पदवी प्रदान की। एक दिन ब्रह्माके दिये हुए उस सुन्दर पुष्पक विमानपर सवार होकर धनाधिप कुबेर अपने पिता विश्रवाका दर्शन करने गये। वहाँ जाकर कुबेरने पिताको नमस्कार करके कहा—हे पिताजी ! ब्रह्माने मुझे निवासके लिये कोई स्थान नहीं दिया है। अतः आप विचार करके कोई मेरे रहने योग्य स्थान बताइए। विश्रवाने कहा–विश्वकर्माकी बनायी हुई एक सुन्दर और श्रेष्ठ लंका नामकी नगरी समुद्रके बीचमें विद्यमान है। विष्णुके डरसे दैत्य लोग उसे छोड़कर पातालमें चले गये हैं ॥ ८–१४ ॥ तुम जाकर उसमें सुखपूर्वक निवास करो। 'तथास्तु' कहकर कुबेर पिताके कथनानुसार जाकर बहुत काल

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कस्मिंश्चित्त्वथ काले हि सुमालीनाम राक्षसः । दुहित्रा व्यवचरद्भूमौ पुष्पकेतुं ददर्श सः ॥१६॥
हिताय चिंतयामास राक्षसानां महामनाः । कैकसीं तनयामाह गच्छ विश्रवसं मुनिम् ॥१७॥
वरयस्व मुनेस्तेजःप्रतापात्ते सुताः शुभाः । भविष्यन्ति धनाध्यक्षतुल्या नो हितकारिणः ॥१८॥
सा संध्यायां ययौ शीघ्रं मुनेरग्रे व्यवस्थिता । लिखन्ती भुवि पादांगुष्ठेन चाधोमुखी स्थिता ॥१९॥
तामपृच्छन्मुनिः का त्वं साऽऽह त्वं वेत्तुमर्हसि । ततो ध्यात्वा मुनिः सर्वं ज्ञात्वा तां प्रत्यभाषत ॥२०॥
ज्ञातं तवाभिलषितं मत्तः पुत्रानभीप्ससि । दारुणायां तु वेलायामागताऽसि सुमध्यमे ॥२१॥
अतस्ते दारुणौ पुत्रौ राक्षसौ संभविष्यतः । साऽब्रवीन्मुनिशार्दूलं त्वत्तोऽप्येवंविधौ सुतौ ॥२२॥
तामाहान्तिमजो यस्ते भविष्यति महामतिः । ततः सा सुषुवे पुत्रान् यथाकाले सुमध्यमा ॥२३॥
रावणं कुम्भकर्णं च क्रौंचीं शूर्पणखां शुभाम् । कुंभीनसीं कनीयांसं तृतीयं तं विभीषणम् ॥२४॥
रावणः कुंभकर्णश्च त्रयो दुहितरस्तथा । दुर्वृत्ताः प्राणिभक्षाश्च बभूवुर्मुनिहिंसकाः ॥२५॥
एकदा रावणो मात्रा लिंगार्थं प्रेषितः शिवम् । कर्तुं प्रसन्नमकरोत् कैलासे कर्म दुष्करम् ॥२६॥
किंचित्स्वीयं शिरश्छित्त्वा वीणां षड्जस्वरैर्मुहुः । कृत्वा पीठं हि देहस्य तन्मूलं शिरसस्तथा ॥२७॥
तदग्रं पादयोः कृत्वा शंकूनंगुलिभिस्तथा । तंत्रीः कृत्वाऽन्त्रमालाभिः शतशोऽथ सहस्रशः ॥२८॥
एवं कृत्वा स्वदेहस्य वीणां षड्जस्वरैर्मुहुः । चकार स्वमुखेनैव गांधर्वं गायनं शुभम् ॥२९॥
तदा नंदीश्वरं प्राह शंकरो लोकशंकरः । शिरः संधाय हस्तेन त्वया वाच्योऽद्य रावणः ॥३०॥
आत्मलिंगं राक्षसं त्वां शंकरो न प्रदास्यति । हृद्गतं हि मया ज्ञातं शंभोस्त्वं याहि स्वस्थलम् ॥३१॥
इत्युक्त्वा प्रेषणीयः स रावणः स्वस्थलं त्वया । इति शंभोर्वचः श्रुत्वा ययौ नंदी स रावणम् ॥३२॥

तक वहाँ रहे ॥ १५ ॥ पश्चात् किसी समय सुमाली राक्षसने अपनी पुत्रीको साथ लेकर पृथ्वीपर भ्रमण करते समय पुष्पकेतुको देखा ॥ १६ ॥ तब महात्मा सुमालीने राक्षसोंका हित सोचकर अपनी लड़की कैकसीसे कहा कि तुम विश्रवा मुनिके पास जाकर मुनिके तेज-प्रतापसे सुन्दर पुत्रोंकी प्राप्तिके लिये वर माँगो । वे पुत्र कुबेरके समान प्रतापी तथा हमलोगोंके हितकारी होंगे ॥ १७ ॥ १८ ॥ तदनुसार सायंकालके समय मुनिके पास जाकर पाँवके अंगूठेसे धरतीको कुरेदती हुई वह नीचा मुख करके खड़ी हो गयी ॥ १९ ॥ मुनिने उससे पूछा—तुम कौन हो ? उसने कहा कि आप स्वयं इस बातको समझ सकते हैं। तब मुनिने ध्यान करके सब कुछ जान लिया और उससे बोले—॥ २० ॥ मुझे मालूम हो गया कि मुझसे तू पुत्र पाना चाहती है, परन्तु हे सुमध्यमे ! तू इस भयानक समयमें यहाँ आयी है। इसलिये तुझसे दो भयानक राक्षस पुत्र उत्पन्न होंगे। तब वह मुनिशार्दूलसे बोली—हे महाराज ! क्या आपसे भी मुझे ऐसे ही पुत्र प्राप्त होंगे ? ॥ २१ ॥ २२ ॥ तब मुनि बोले—अच्छा जा, तेरा आखिरी पुत्र बड़ा बुद्धिमान् होगा। पश्चात् उस सुन्दर कमरवाली कैकसीने यथासमय तीन पुत्र उत्पन्न किये ॥ २३ ॥ रावण, कुम्भकर्ण, क्रौंची, सूर्पणखा, कुम्भीनसी और सबसे छोटा तीसरा पुत्र विभीषण उससे उत्पन्न हुआ ॥ २४ ॥ उनमेंसे रावण, कुम्भकर्ण और तीन लड़कियें बड़ी दुराचारिणी, जीवभक्षिणी तथा मुनिहिंसक हुईं ॥ २५ ॥ एक दिन रावणकी माता कैकसीने रावणको शिवजीके पास लिंग लेने भेजा। कैलासपर जाकर रावणने शिवजीको प्रसन्न करनेके लिये बड़ा दुष्कर काम किया ॥ २६ ॥ उसने अपने सिरका कुछ भाग काटकर वीणा बनायी। सिरसे वीणाका मूलभाग बनाकर अपनी देहसे उसका पृष्ठभाग तैयार किया। पाँवोंसे उस वीणाका अग्रभाग बनाया और अँगुलियोंसे वीणाकी खूँटियें तैयार कीं। अपने पेटके भीतरकी आँतोंसे सैकड़ों एवं हजारों तार बनाकर अपने शरीरसे ही वीणा रची। पश्चात् षड्ष आदि स्वरोंसे रावणने अपने मुखसे ही गंधर्वके समान सुन्दर गायन आरम्भ किया ॥२७-२९॥ तब लोगोंका कल्याण करनेवाले भगवान् शंकर नन्दीश्वरसे बोले :कि तुम अपने हाथसे रावणका सिर संधान करके उससे कहो कि शंकरजी तुम जैसे राक्षसको आत्मलिंग कभी न देंगे । मैं शिवजीके हृदयकी बात जानता हूँ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिरः संयोज्य हस्तेन शिवोक्तं तं न्यवेदयत् । तच्छ्रुत्वा रावणश्चापि समतिक्रम्य तां निशाम् ॥३३॥
चकार पूर्ववद्गानं द्वितीयदिवसे पुनः । नन्दिना शंकरश्चापि पूर्ववत्तं न्यवेदयत् ॥३४॥
इत्थं दश दिनान्येव गतानि रावणस्य च । अथ तत्कर्मणा तुष्टः शंकरो गायनेन च ॥३५॥
भूत्वा प्रसन्नस्तं प्राह वरं वरय चेति वै । दृष्ट्वा शंभुं रावणोऽपि शिरसा तेन संधितः ॥३६॥
वरयामास मन्मात्रे ह्यात्मलिंगं तथा मम । पत्न्यर्थं पार्वतीं देहि तथेत्युक्त्वा ददौ शिवः ॥३७॥
गृहीत्वा गंतुकामं तं पुनः प्राह हरस्तदा । मत्तोषार्थं त्वया वीर दशवारं निजं शिरः ॥३८॥
खड्गेन छेदितं यस्मात्तस्मात्तेऽद्य शिरांसि हि । दश विंशद्भुजाश्चापि भविष्यन्ति गिरा मम ॥३९॥
ततः स रावणस्तुष्टो गिरिजालिंगसंयुतः । विंशद्भुजो दशग्रीवः स्वस्थलं गन्तुमुद्यतः ॥४०॥
कल्पभेदाच्छतशिराः शतवारं प्रखंडितैः । स प्रोक्तः स्वशिरोभिर्हि शतद्वयभुजः क्वचित् ॥४१॥
तस्माद्धि हृतवान् विष्णुस्त्वं तं मार्गे प्रतार्य च । तथैवाब्धेस्तटे लिंगं गोकर्णं रावणात्त्वया ॥४२॥
गृहीत्वा स्थापितं पूर्वं रावणोऽपि गृहं ययौ । मंदोदरीं हरेर्वाक्याल्लब्ध्वा मयसुतां शुभाम् ॥४३॥
मातुः कार्यमसंपाद्य तूष्णीमेवातिलज्जितः । मन्दोदर्याऽकरोत्स्वीयं विवाहं तोषपूरितः ॥४४॥
दृष्ट्वैकदा धनाध्यक्षं पुष्पकस्थं तु कैकसी । पुत्रान् धिक्कारयामास यूयं षढा मृतोपमाः ॥४५॥
सापत्न्यबंधुं ये दृष्ट्वा जायंते नात्र लज्जिताः । ते मातृवचनं श्रुत्वा ययुर्गोकर्णमुत्तमम् ॥४६॥
दशवर्षसहस्राणि कुंभकर्णोऽकरोत्तपः । विभीषणोऽपि धर्मात्मा सत्यधर्मपरायणः ॥४७॥

इसलिए तुम अपने स्थानेको वापस चले जाओ' ॥ ३० ॥ ३१ ॥ ऐसा कहकर उसको उसके स्थानपर भेज दो। नन्दीश्वर शिवका यह वचन सुनकर रावणके पास गये ॥ ३२ ॥ उन्होंने अपने हाथसे उसका सिर धड़से जोड़कर शिवका वचन उसको कह सुनाया। रावण यह सुनकर भी उस रातको वहीं रहा और दूसरे दिन फिर उसी विधिसे शिवजीका गुणगान करने लगा। शिवजीने उस दिन भी अपना संदेश नन्दीके द्वारा रावणको कहला भेजा। परन्तु रावणने फिर भी अपना गायन उसी प्रकार दस दिनतक जारी रक्खा। तब शंकरजी उसके उस भयानक कर्म तथा मनोहर गायनसे प्रसन्न हो गये और उससे कहा—वर माँगो। ऐसा कहकर शिवजीने उसका वह सिर भी धड़से जोड़ दिया। तब उसने शंभुसे वर माँगा कि आप मेरी माताके लिए आत्मलिंग तथा पत्नी बनानेके लिए मुझे पार्वतीजीको दे दीजिये। 'तथाऽस्तु' कहकर शिवजीने उसको वे दोनों चीजें दे दीं ॥ ३३–३७ ॥ जब उनको लेकर रावण चलने लगा, उस समय शिवजी कहने लगे—हे वीर ! तुमने मुझको प्रसन्न करनेके लिये अपना सिर दस बार तलवारसे काटा है। इसलिये मेरे कथनानुसार तुम्हारे दस सिर तथा बीस भुजायें हो जायँगी ॥ ३८ ॥ ३९ ॥ तब रावण प्रसन्नतापूर्वक दस सिर और बीस हाथवाला बनकर पार्वती तथा शिवलिंग लेकर अपने स्थानकी ओर चला ॥ ४० ॥ कहीं-कहीं कल्पभेदसे रावण सौ बार मस्तक काटनेसे सौ सिर तथा दो सौ हाथोंवाला भी कहा गया है ॥ ४१ ॥ बादमें रास्तेसे ही विष्णुभगवान् रावणके हाथसे तुमको (पार्वतीको) छीन ले गये। तब तुम (पार्वती) भी श्रीहरिको धोखा देकर उनसे अलग हो गयीं। विष्णुकी तरह तुमने रावणके हाथसे शिवलिंग भी छीन लिया और उस लिंगको समुद्रके किनारेपर ही गोकर्ण नामसे स्थापित कर दिया। तब रावण खाली हाथ लौट गया और विष्णुके कथनानुसार मय राक्षसकी सुन्दरी पुत्री मन्दोदरी उसको प्राप्त हुई ॥४२॥४३॥ माताके कार्यका सम्पादन न कर सकनेके कारण वह बहुत लज्जित हुआ और कुछ भी नहीं कह सका। पश्चात् मन्दोदरीके साथ विवाह करके वह सन्तुष्ट हुआ ॥ ४४ ॥ एक समय उसकी माता कैकसी धनपति कुबेरको पुष्पक विमानपर बैठा देखकर अपने पुत्रोंको धिक्कारकर कहने लगी कि तुम लोग नपुंसक तथा मृतक सरीखे हो ॥ ४५ ॥ अपने सौतेले भाईका उत्कर्ष देखकर तुम लोगोंको लज्जा नहीं आती ? माताके इस कटु वचनको सुनकर वे तीनों भाई पूजनीय गोकर्ण महादेवके पास गये ॥ ४६ ॥ वहाँ कुम्भकर्णने दस हजार वर्ष तपस्या की। धर्मात्मा विभीषणने भी सत्यधर्मपरायण होकर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पंचवर्षसहस्राणि पादांगुष्ठेन तस्थिवान् । दिव्यवर्षसहस्रं तु धूमाहारो दशाननः ॥४८॥
पूर्णे वर्षसहस्रे स्वं शीर्षमग्नौ जुहाव सः । एवं वर्षसहस्राणि नव तस्यातिचक्रमुः ॥४९॥
अथ वर्षसहस्रे तु दशमे दशमं शिरः । छेत्तुकामस्य धर्मात्मा प्रसन्नोऽभूत्प्रजापतिः ॥५०॥
उवाच वचनं ब्रह्मा वरं वरय कांक्षितम् । तदोवाच दशास्यस्तमवध्यत्वं वृणोम्यहम् ॥५१॥
सुपर्णनागयक्षेभ्यो देवेभ्यश्चासुरैरपि । त्वत्तः शंभोर्महाविष्णोर्मानुषा मे तृणोपमाः ॥५२॥
तथेत्युक्त्वा विधिस्तस्मै दश शीर्षाणि संददौ । विभीषणाय सद्बुद्धिममरत्वं ददौ मुदा ॥५३॥
विमोहितं सरस्वत्या देवेंद्रपदकांक्षिणम् । कुंभकर्णं विधिः प्राह वरं वरय वांछितम् ॥५४॥
सोऽपि तं वरयामास निद्रांमषाणसिकीं शुभाम् । षाण्मासीये चैकदिनेऽशनं ब्रह्माऽपि दत्तवान् ॥५५॥
ततोऽन्तर्द्धानमगमद्विधिस्तेऽपि गृहं ययुः । सुमाली वरलब्धांस्तान् ज्ञात्वा दौहित्रसत्तमान् ॥५६॥
पातालान्निर्भयः प्रायात्प्रहस्ताद्यैर्भुवं सुखम् । मंत्रिवाक्याद्दशास्योऽपि निष्कास्य धनदं बलात्॥५७॥
लंकापुर्यां राक्षसैस्तु लंकाराज्यं चकार सः । धनदः पितरं पृष्ट्वा त्यक्त्वा लङ्कां महायशाः ॥५८॥
गत्वा कैलासशिखरं तपसाऽतोषयच्छिवम् । तेन सख्यमनुप्राप्य तेनैव परिनंदितः ॥५९॥
अलका नगरीं तत्र निर्ममे विश्वकर्मणा । दिक्पालत्वमनुप्राप्य शिवस्य वरदानतः ॥६०॥
रावणो विद्युज्जिह्वाय ददौ शूर्पणखां तदा । पारिबर्हं ददौ तस्मै दंडकारण्यमुत्तमम् ॥६१॥
मातृस्वसुः सुतान् बंधूं स्त्रिशिरःखरदूषणान् । साहाय्यार्थं ददौ तस्मै तत्कांते तु मृतेऽचिरात् ॥६२॥
कुंभीनसीं ददौ हर्षान्मधुदैत्याय रावणः । ददौ मधुवनं तस्मै पारिबर्हमनुत्तमम् ॥६३॥
खड्गजिह्वाय तां क्रौंचीं ददौ प्रेम्णा दशाननः । परलङ्कां पारिबर्हं ददौ तस्यै मनोरमम् ॥६४॥

पावँके अंगूठेपर पाँच हजार वर्षतक खड़ा रहकर तप किया और दस हजार वर्षतक केवल धूम्र पीकर दशाननने तपस्या की ॥ ४७ ॥ ४८ ॥ हजार वर्ष पूरे हो जानेपर वह अपना एक सिर काटकर अग्निमें होम देता था, ऐसा करते-करते नौ हजार वर्ष बीत गये ॥ ४९ ॥ जब दस हजार वर्ष पूरे हुए और रावण अपना दसवाँ सिर काटकर आगमें हवन करनेके लिए तैयार हुआ, तब प्रजापति ब्रह्मा उसपर प्रसन्न हुए ॥ ५० ॥ ब्रह्माने कहा—हे वत्स ! तू अपना इच्छित वर माँग । तब रावणने कहा कि मैं गरुड़से, सर्पोंसे, यक्षोंसे, देवताओंसे, असुरोंसे, आप (ब्रह्मा) से, शंभुसे तथा विष्णुसे भी अवध्यत्वका वर माँगता हूँ और मनुष्य तो मेरे लिए तिनकेके बराबर हैं ॥ ५१ ॥ ५२ ॥ 'तथास्तु' कहकर ब्रह्माने रावणको दस सिर दिये और विभीषणको सुबुद्धि तथा अमरत्व दिया ॥ ५३ ॥ इन्द्रपदकी इच्छा रखनेवाले कुम्भकर्णसे ब्रह्माने कहा कि अपना अभिलषित वर माँगो ॥ ५४ ॥ तब सरस्वतीके द्वारा मोहमें पड़कर कुम्भकर्णने छः महीने तककी नींद माँगी। तदनन्तर ब्रह्माने उसको छः महीनेतक सोना और फिर भोजन करना तथा छः महीनेतक फिर शयनका वर दिया ॥ ५५ ॥ तदनन्तर ब्रह्माजी अन्तर्धान हो गये और वे लोग भी अपने घर चले गये । सुमाली अपने दौहित्रोंको वर प्राप्त किये हुए जानकर प्रहस्त आदिके साथ पातालसे निकलकर निर्भय भावसे पृथ्वीपर विचरने लगा। मन्त्रीके कथनानुसार रावणने लंकासे कुबेरको निकलवा दिया और वहाँ स्वयं राक्षसोंको लेकर लंकाका राज्य करने लगा। तब महान् यशस्वी कुबेरने अपने पितासे पूछकर लङ्काको छोड़ दिया और कैलासके शिखरपर जाकर तपश्चर्यासे शिवको प्रसन्न किया । उन्होंने उनसे मित्रता जोड़ी और उन्हींके कहनेसे वहाँ विश्वकर्मा द्वारा अलका पुरी बनवायी और शिवजीके वरदानसे दिक्पालकी पदवी प्राप्त की ॥ ५६–६० ॥ बादमें रावणने अपनी सूर्पणखा नामकी बहिन विद्युज्जिह्वको ब्याह दी और उत्तम दडकारण्य उसको दहेजमें दे दिया ॥ ६१ ॥ थोड़े ही दिनों बाद जब उसका पति मर गया । तब रावणने अपनी मौसीके लड़के त्रिशिरा-खरदूषण आदिको उसकी सहायताके लिए भेजा ॥ ६२ ॥ रावणने कुम्भीनसी नामकी बहिन मधु दैत्यको ब्याही तथा श्रेष्ठ मधुवन उसको दहेजमें दिया ॥ ६३ ॥ रावणने अपनी क्रौंची नामकी बहिन खड्गजिह्व राक्षसको

CC-0. In Public Domain. Kirti Kant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैरोचनस्य दौहित्रीं वृत्रज्वालेति विश्रुताम् । स्वयंदत्तां मुदोवाह कुम्भकर्णाय रावणः ॥६५॥
गन्धर्वराजस्य सुतां शैलूषस्य महात्मनः । विभीषणस्य भार्यार्थे सरमां स मुदाऽऽहरत् ॥६६॥
ततो मन्दोदरी पुत्रं मेघनादमजीजनत् । जातमात्रस्तु यो नादं मेघवत्प्रचकार ह ॥६७॥
ततः सर्वेऽब्रुवन्मेघनादोऽयमिति वै जनाः । गुहायां कुम्भकर्णोऽपि निद्राव्याप्तो विनिद्रितः ॥६८॥
ततः स रावणश्चापि देवगन्धर्वकिन्नरान् । हत्वा ऋषीश्वरान्नागान् स्त्रियस्तेषामपाहरत् ॥६९॥
धनदोऽपि च तच्छ्रुत्वा रावणस्याक्रमं तदा । अधर्मं मा कुरुष्वेति दूतवाक्यैर्न्यवारयत् ॥७०॥
ततः क्रुद्धो दशग्रीवो जगाम धनदालयम् । विनिर्जित्य धनाध्यक्षं जहार तस्य पुष्पकम् ॥७१॥
अलकायां यदाऽऽसीत्स सेनया रावणस्तदा । निशायामेकदा भ्रातुः कुबेरस्य सुतेन हि ॥७२॥
प्रार्थिता सा पुरा रम्भा चकार नियतं दिनम् । अज्ञातवृत्ता वेगेन ययौ खान्नूपुरस्वना ॥७३॥
रावणोऽपि च तां दृष्ट्वा बलादेव प्रभुक्तवान् । चिरान्मुक्ताऽथ वृत्तं सा कौबेरं संन्यवेदयत् ॥७४॥
क्रुद्धः सोऽपि ददौ शापं रावणाय महात्मने । अद्यारभ्य दशास्यश्चेद्विरक्तां स्त्रियमुत्तमाम् ॥७५॥
हठाद्भोक्ष्यति चेत्तर्हि क्षणमात्रान्मरिष्यति । इति शापं रावणोऽपि शुश्राव चरवाक्यतः ॥७६॥
तदारभ्य स्त्रियं काममनिच्छन्तीं न धर्षयन् । ततो यमं च वरुणं निर्जित्य समरेऽसुरः ॥७७॥
स्वर्गलोकमगात्तूर्णं देवराजजिघांसया । ततो रावणमभ्येत्य बबंध त्रिदशेश्वरः ॥७८॥
तच्छ्रुत्वा सहसाऽऽगत्य मेघनादः प्रतापवान् । कृत्वा युद्धं महाघोरं जित्वा त्रिदशपुङ्गवम् ॥७९॥
इन्द्रं धृत्वा दृढं बद्ध्वा मेघनादो महाबलः । मोचयित्वा स्वपितरं गृहीत्वेन्द्रं ययौ पुरीम् ॥८०॥
ब्रह्मा तं मोचयामास देवेन्द्रं मेघनादतः । दत्त्वा वरान्राक्षसाय ब्रह्मा स्वभवनं ययौ ॥८१॥

दी तथा उसको दहेजमें अतिशय मनोहर परलंका पुरी दे दी ॥ ६४ ॥ वैरोचनकी दौहित्री (नतिनी) प्रसिद्ध वृत्रज्वालाको उसके पिताने कुम्भकर्णके लिये रावणको दी ॥ ६५ ॥ महात्मा गन्धर्वराज शैलूषकी सुता सरमाको रावण विभीषणके लिये ले आया ॥ ६६ ॥ तदनन्तर मन्दोदरीसे मेघनाद पुत्र उत्पन्न हुआ । जो कि पैदा होनेके साथ ही मेघकी तरह गर्जन करने लगा था ॥ ६७ ॥ इसीलिए सब लोग उसको मेघनाद कहने लगे । कुंभकर्ण गुफामें जाकर सो गया ॥ ६८ ॥ उधर रावण देव, गन्धर्व, किन्नर, ऋषीश्वर और नागोंको मार-मारकर उनकी स्त्रियोंका अपहरण करने लगा ॥ ६९ ॥ जब कुबेरने रावणका इस प्रकार दुराचार सुना, तब उन्होंने अपने दूतों द्वारा कहला भेजा कि हे रावण ! तू ऐसा अधर्म करना छ ड़ दे ॥ ७० ॥ यह सुना तो रावण और भी क्रुद्ध होकर कुबेरके यहाँ गया तथा उनको जीतकर पुष्पक विमान छीन लाया ॥ ७१ ॥ जब रावण अपनी सेनाके साथ अलकापुरीमें था । उसी समय रावणके भाई कुबेरके पुत्र नलकूबरकी प्रार्थना स्वीकार करके रम्भा अप्सरा युद्धके वातावरणको न जाननेके कारण एकाएक नियत दिनपर आकाशसे वहाँ आ पहुँची । उसके पाँवोंमें सुन्दर एवं मनोहर नूपुरकी ध्वनि हो रही थी ॥ ७२ ॥ रावणने उसको सहसा देखकर उसके साथ हठात् भोग किया । बहुत देरके बाद उससे मुक्त हो रम्भाने जाकर वह सब हाल कुबेरके पुत्रको कह सुनाया ॥ ७३ ॥ तब क्रुद्ध नलकूबरने रावणको शाप देते हुए कहा--"हे दशास्य ! आजसे यदि तुम किसी भी तुमको न चाहनेवाली भली स्त्रीसे हठात् भोग करोगे तो उसी क्षण मर जाओगे ।" इस शापको दूतके मुखसे रावणने भी सुन लिया ॥ ७४ ॥ ७५ ॥ तबसे रावणने अपनेसे विमुख स्त्रीका अपमान करना छोड़ दिया । तदनन्तर युद्धमें यमराज तथा वरुणको जीतकर वह देवराज इन्द्रको मारनेकी इच्छासे शीघ्र ही स्वर्ग गया । त्रिदशेश्वर इन्द्रने रावणके सामने जाकर उसको कैद कर लिया ॥ ७६–७८ ॥ पिताको कैद किया हुआ सुनकर प्रतापी मेघनाद शीघ्र वहाँ जा पहुँचा तथा भयानक युद्ध करके इन्द्रको जीत लिया ॥ ७९ ॥ तब महाबलवान् मेघनादने अपने पिता-को छुड़ा लिया और इन्द्रको पकड़ तथा बाँधकर अपने नगरमें ले लाया ॥ ८० ॥ पश्चात् ब्रह्माने इन्द्रको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इन्द्रजिन्नाम तस्याभूत्तदारभ्य रघूत्तम । रावणादपि यश्चासीद्बलिष्ठः समरप्रियः ॥८२॥
मेघनादादयश्चेति तस्मात्प्रोक्तं तवाग्रतः । एतैर्मुनीश्वरैः पूर्वं तन्निमित्तं मयेरितम् ॥८३॥
रावणो विजयी लोकान्सर्वान् जित्वा क्रमेण तु । जित्वा वह्निं निर्ऋतिं च वायुमीशं ययौ मुदा ॥८४॥
कैलासं तोलयामास बाहुभिः परिघोपमैः । तदा भीता शिवं देवी दोर्भ्यां सा परिषस्वजे ॥८५॥
शिवोऽपि वामपादाङ्गुष्ठेन कैलासमूर्द्धनि । भारं दत्त्वा गिरिं खर्वं चकाराथ शनैः शनैः ॥८६॥
तदा तद्गिरिसम्भूतवल्लिसंधिषु दोर्लताः । विंशच्चापि रावणस्य ता आसन्मर्दिताः क्षणात् ॥८७॥
स तेनाक्रन्दयामास स्तम्भसम्बद्धचोरवत् । तदा नन्दीश्वरेणापि शप्तोऽयं रावणेश्वरः ॥८८॥
चञ्चलं कर्म यस्मात्ते कपितुल्यमतोऽसुर । वानरैर्मानुषैश्चैव नाशं गच्छसि कोपितैः ॥८९॥
ततः कालान्तरेणायं शम्भुनैव विमोचितः । शप्तोऽप्यगणयन्वाक्यं ययौ हैहयपत्तनम् ॥९०॥
बहिर्गतं नृपं श्रुत्वा सहस्रार्जुननामकम् । मध्याह्ने रावणश्चक्रे रेवायां शिवपूजनम् ॥९१॥
अधस्तस्मान्नर्मदाया भुजपाशैश्च सेतुवत् । स्तम्भयामास नीरौघं जलक्रीडां गतोऽर्जुनः ॥९२॥
वेष्टितोऽयुतनारीभिस्तत्तोयं रावणं तदा । प्लावयामास ध्यानस्थं ज्ञातस्तत्कर्मणाऽर्जुनः ॥९३॥
मुक्त्वा ध्यानादिकं सर्वं युद्धं चक्रेऽर्जुनेन सः । तेन बद्धो दशग्रीवः कण्ठे रन्तुं सुताय तम् ॥९४॥
ददौ दशाननं प्रीत्या काष्ठनिर्मितहस्तिवत् । कियत्कालान्तरेणैव पुलस्त्येन स मोचितः ॥९५॥
ततोऽतिबलमासाद्य जिघांसुर्हरिपुङ्गवम् । सागरे ध्यानमासीनं पश्चाद्भागे शनैर्ययौ ॥९६॥
धृतस्तेनैव कक्षेण वालिना दशकन्धरः । भ्रामयित्वा तु चतुरः समुद्रान् रावणं हरिः ॥९७॥

मेघनादसे छुड़ाया और राक्षसोंको वर देकर ब्रह्मा अपने भवनको चले गये ॥ ८१ ॥ हे रघूत्तम ! तबसे मेघनादका इन्द्रजित् नाम पड़ा। जो कि रावणसे भी अधिक बलवान् तथा युद्धलोलुप था ॥ ८२ ॥ इसीलिए मैंने आपके सामने मेघनादका पहले नाम लिया। इन ऋषियोंने इसका कारण पहले ही बता दिया था ॥ ८३ ॥ विजयशील रावणने क्रमशः सब लोकोंको जीतकर वह्नि, निर्ऋति, वायु तथा ईशानको जीत लिया और बादमें अपनी अर्गलाके समान भुजाओंसे कैलास पर्वतको उठाने गया। उस समय डरकर पार्वती देवी शिवजीसे लिपट गयीं ॥ ८४ ॥ ८५ ॥ पश्चात् शिवने अपने बायें पाँवके अंगूठेसे उस पर्वतको दबा दिया। जिससे कैलास धीरे-धीरे नीचे धँसने लगा ॥ ८६ ॥ उस समय पर्वतके नीचे आ जानेसे रावणकी बीसों भुजायें दब गयीं और वह खम्भेसे बंधे हुए चोरकी तरह चिल्लाने लगा। उस समय नन्दीश्वरने भी रावणको शाप देते हुए कहा—॥ ८७ ॥ ८८ ॥ हे असुर ! तुम्हारेमें वानरके समान चंचलता होनेके कारण क्रुद्धवानरों तथा मनुष्योंसे ही तुम्हारी मृत्यु होगी ॥ ८९ ॥ बहुत कालके बाद शिवजीने उसे छुड़ा दिया। छूटनेके साथ ही वह शापको भूल गया और शिवजीके वचनका तिरस्कार करके युद्ध करनेके लिए हैहयराजके नगरको गया ॥ ९० ॥ वहाँ जाकर पूछा तो ज्ञात हुआ कि सहस्रार्जुन नामवाला वहाँका राजा वहाँ उपस्थित नहीं हैं। तब रावण नर्मदा नदीके किनारे जाकर उसके बीचमें एक टापूपर बैठकर मध्याह्न समयमें शिवजीका पूजन करने लगा ॥ ९१ ॥ उससे नीचेकी ओर राजा सहस्रार्जुन जलक्रीडा कर रहा था। उसने अपनी भुजारूपी सेतुसे खेल-खेलमें उस नदीके जलप्रवाहको रोक दिया। उस समय हजारों स्त्रियें उसे घेरकर जलक्रीडा कर रही थीं। परन्तु उस जलप्रवाहके रुक जानेसे शिवके ध्यानमें स्थित रावण जलमें बहने लगा। इस घटनाको देखकर उसने जान लिया कि यह काम सहस्रार्जुनका है। यह जानते ही वह तुरन्त ध्यान छोड़कर सहस्रार्जुनके पास गया और उसको युद्धके लिए ललकारने लगा। तब उसने रावणके गलेमें रस्सी डालकर बाँध लिया और अपने पुत्रको खेलनेके लिए लकड़ीके बने हुए हाथीकी तरह दे दिया। कुछ दिनोंके बाद पुलस्त्य मुनिने जाकर उसको वहाँसे छुड़ाया ॥ ९२–९५ ॥ बादमें रावण बल संचय करके वानरश्रेष्ठ बालीको मारनेकी इच्छासे समुद्रके किनारे ध्यान धरकर बैठे हुए वानरराजके पास जाकर धीरेसे पीछे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किष्किंधां स्वां ययौ वेगादग्रे दृष्ट्वांगदं शिशुम् । प्रीत्या तं चुंबनं दातुं दोर्भ्यां कट्यां न्यवेशयत् ॥९८॥
तदा बाहोश्चंचलत्वात्कक्षात्स पतितो भुवि । तं दृष्ट्वा स्वजनान् स्त्रीश्च दर्शयामास वै मुदा ॥९९॥
प्रेंखस्योपरि पुत्रस्य बबन्धाधोमुखं चिरम् । आसीत्सोऽङ्गदमूत्रस्य धाराधौताननोऽसुरः ॥१००॥
स्वयमेव ततो वाली बहुकाले गते सति । ददावाज्ञां दशास्याय तेन सख्यं चकार सः ॥१०१॥
रावणः स पुनः स्थित्वा पुष्पके व्यचरत्सुखम् । पश्यन्नानाविधान्वीरान् ययौ पातालमुत्तमम् ॥१०२॥
तत्र दृष्ट्वा पुरं रम्यं बलेः कोटिरविप्रभम् । तत्तेजोहततेजस्तत्पुष्पकं न चचाल वै ॥१०३॥
ततः स्वयं ययौ तूष्णीमेक एव दशाननः । पुरं प्रविश्य तद्द्वारि त्वां ददर्श च वामनम् ॥१०४॥
कोटिसूर्यप्रतीकाशं पीतकौशेयवाससम् । चतुर्भुजं सपत्नीकं द्वाररक्षणतत्परम् ॥१०५॥
त्वां प्राह स दशग्रीवः कोऽत्र राजाऽस्ति मां वद । तूष्णीं स्थितो वामनस्त्वमर्पितं नोत्तरं रिपोः ॥१०६॥
तदा त्वां बधिरं मत्वा स विवेश बलेर्गृहम् । तत्र दृष्ट्वा बलिं पत्न्या सारिक्रीडनतत्परम् ॥१०७॥
तस्थौ तत्र क्षणं तूष्णीं बलेर्लक्ष्मीं व्यलोकयत् । तावद्दूरे बलेर्हस्तात्क्रीडापासोऽपतद्भुवि ॥१०८॥
तमानेतुं रावणाय बलिराज्ञापयत्तदा । रावणोऽपि तमानेतुं ययौ पासांतिकं जवात् ॥१०९॥
प्रोच्चचाल भुवः पासं करेण न चचाल सः । विंशद्दोर्भिः क्रमेणासौ यावत्पासं प्रचालयत् ॥११०॥
तावदंगुलयः सर्वाः पासभारेण पीडिताः । न निष्क्रमुः पासतलाच्चूर्णिता रुधिराप्लुताः ॥१११॥
तदा चुक्रोश दीर्घं स चिरकालं दशाननः । ततो विहस्य दास्या तं पासमानीय वै बलिः ॥११२॥
धिग्धिक् कृत्वा रावणं तं गृहान्निष्कासयद्बहिः । ततो धृतो राजदूतैस्तदुच्छिष्टैस्तु पोषितः ॥११३॥

की ओर जा खड़ा हुआ ॥ ९६ ॥ तब वालीने उसको काँखमें उलटा दबाकर चारों समुद्रोंके चौतरफा घुमाया ॥ ९७ ॥ पश्चात् अपनी किष्किन्धा पुरीमें ले गया । वहाँ जाकर उसने अपने पुत्र अङ्गदको देखा । ज्यों ही वह अङ्गदको प्रेमसे चूमनेके लिये अपनी भुजाओंसे उसे कमरपर बैठाने लगा ॥ ९८ ॥ त्यों ही हाथोंके हिलनेसे रावण काँखसे नीचे जमीनपर गिर पड़ा । उसको देखकर स्त्रियें प्रसन्नतापूर्वक स्वजनोंको दिखलाने लगीं ॥ ९९ ॥ उसके ऊपर पुत्र अङ्गदका पालना बाँधकर नीचे रावणका मुख करके उन्होंने बहुत दिनोंतक बाँधकर रक्खा । जिससे रावणका मुख अङ्गदकी मूत्रधारासे धुलता रहा ॥ १०० ॥ तदनन्तर स्वयं वालीने ही रावणको जानेकी आज्ञा दे दी और उससे मित्रता कर ली ॥ १०१ ॥ रावण पुनः पुष्पक विमानपर सवार होकर आनंदके साथ विचरने लगा । अनेक वीरोंको देखता हुआ वह पातालमें जा पहुँचा ॥ १०२ ॥ वहाँ कोटिसूर्यके सदृश प्रकाशमयी उस नगरीके तेजसे प्रतिहत होकर पुष्पक विमानकी गति रुक गयी ॥ १०३ ॥ तब उससे उतरकर दशानन चुपचाप अकेला ही पुरीकी ओर चल पड़ा । उसने पुरीमें प्रवेश करनेके बाद वामनरूपधारी आपको देखा ॥ १०४ ॥ करोड़ों सूर्योंके समान तेजस्वी आपने पीताम्बर धारण कर रक्खा था । आप चतुर्भुज होकर लक्ष्मीके साथ वहाँ रहते हुए राजा बलिके द्वारकी रक्षा कर रहे थे ॥ १०५ ॥ उस दशग्रीवने आपसे पूछा कि इस नगरका राजा कौन है, बताओ । रावण कुछ देर चुपचाप खड़ा रहा, पर आपने उसे अपना शत्रु समझकर कुछ उत्तर नहीं दिया ॥ १०६ ॥ तब आपको बहरा समझकर वह बलिके भवनमें घुसा । वहाँ उसने राजा बलिको अपनी स्त्रीके साथ चौसर खेलते देखा ॥ १०७ ॥ वहाँ चुपकेसे खड़ा होकर वह बलिकी राज्यलक्ष्मीको क्षणभर देखता रहा । इतनेमें राजा बलिके हाथसे छटककर पाँसा दूर जा गिरा ॥ १०८ ॥ उसी समय बलिने रावणको उस पाँसेको उठा लानेके लिए कहा । रावण भी उसे उठानेके लिये शीघ्र ही उसके पास जा पहुँचा ॥ १०९ ॥ वह उसे एक हाथसे उठाने लगा । पर वह पाँसा हिला तक नहीं । तब रावणने दो, तीन, चार करके बोसों हाथोंसे उस पाँसेको उठानेकी चेष्टा की, परन्तु तो भी वह नहीं हिला ॥ ११० ॥ प्रत्युत उसके सब हाथोंकी अँगुलियें पाँसेके बोझसे दब गयीं और कुचल जानेसे खून निकलने लगा, परंतु वे निकलीं नहीं ॥ १११ ॥ अतएव दशानन बहुत जोरसे चिल्लाने लगा । तब

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अश्वानां शकृतं नीत्वा प्राक्षिपत्प्रत्यहं बहिः । एकदा द्वापरे गत्वा प्रार्थयामास त्वां मुहुः ॥११४॥
त्वया स्वपादलग्नः स्वपदांगुष्ठेन खेऽर्पितः । तदाऽतिमुदितो लंकां चिरकालेन रावणः ॥११५॥
ययौ मेने निजं जन्म द्वितीयं जातमद्य वै । रावणः परमप्रीत एवं लोकान्महाबलः ॥११६॥

कर्तुं तान्स्ववशान्नित्यं बभ्राम पुष्पकस्थितः ।
दृष्ट्वैकदाऽत्र साकेते पूर्वजं तव दीक्षितम् ॥११७॥
अनरण्यं संगरेण चकार पतितं रणे ।
तदा शप्तोऽनरण्येन मद्वंशे रघुनन्दनः ॥११८॥

भूत्वा त्वां संगरेणैव सकुटुम्बं वधिष्यति । इत्युक्त्वा स गतो नाकं रावणोऽपि पुरीं ययौ ॥११९॥
सनत्कुमारमेकांते सन्निरीक्ष्यैकदाऽसुरः । नत्वा पप्रच्छ देवेषु को वरश्चेति सादरम् ॥१२०॥

मुनिः प्राह महाविष्णुं तच्छ्रुत्वा प्राह तं पुनः ।
विष्णुना ये हता युद्धे राक्षसाद्या लभंति काम् ॥१२१॥
गतिं चेति मुनिः प्राह ते मुक्तिं यांति दुर्लभाम् ।
पुनः पप्रच्छ तं नत्वा केनोपायेन वै हरेः ॥१२२॥

भविष्यत्यत्र मे मृत्युस्तदा तं मुनिरब्रवीत् । त्रेतायां नररूपेण रामो विष्णुर्भविष्यति ॥१२३॥
अयोध्यायां तदा तेन कृत्वा वैरं सुदारुणम् । तस्माद्वधं कुरुष्व त्वमात्मनः परमात्मनः ॥१२४॥

तेन गच्छसि मुक्तिं त्वं तच्छ्रुत्वा स दशाननः ।
विरोधार्थं जनकजामहरद्धौतमीतटात् ॥१२५॥
अशोके रक्षिता तेन मातृवत्स्ववधेच्छया ।

राजा बलिकी एक दासीने शीघ्र पाँसेको उठाकर राजाको दे दिया ॥ ११२ ॥ बलिने उसी समय रावणको धिक्कार-कर अपने महलसे निकाल दिया । बाहर राजा बलिके दूतोंने उसको फिर पकड़ लिया और अपने जूठनसे उसका पोषण करने लगे ॥ ११३ ॥ रावणको घोड़ोंकी लीद उठा-उठाकर बाहर फेंक आनेका काम सौंपा गया । कुछ दिनों बाद एक दिन रावण द्वारपर स्थित आप विष्णुके पास आकर नगरके बाहर जाने देनेकी प्रार्थना करने लगा और आपके चरणोंपर गिर पड़ा । तब आपने अपने पाँवके अंगूठेसे उसको आकाशकी ओर उछाल दिया । जिससे रावण बहुत कालके बाद प्रसन्नतापूर्वक अपनी लङ्कामें जा पहुँचा ॥ ११४ ॥ ११५ ॥ वह आज मेरा दूसरा जन्म हुआ है, ऐसा मानने लगा । तब बली रावण पुनः प्रसन्न होकर पूर्ववत् सब लोकोंको अपने वशमें करनेकी इच्छासे पुष्पकपर चढ़कर नित्यप्रति इधर-उधर भ्रमण करने लगा । उसने एक दिन अयोध्यामें आपके पूर्वज दीक्षित (सोमयागकी दीक्षा लिये हुए) राजा अनरण्यको देखा । उनके साथ युद्ध करके रावणने रणमें उन्हें हरा दिया । तब अनरण्यने उसको शाप दिया कि मेरे वंशमें जन्म लेकर रघुनन्दन राम सकुटुम्ब तुमको मारेंगे ॥ ११६–११८ ॥ इतना कहकर वे स्वर्ग सिधार गये तथा रावण अपने नगरको चला गया ॥ ११९ ॥ उस राक्षसने एक दिन सनत्कुमारको नमस्कार करके एकान्तमें पूछा—हे मुने ! कृपा करके मुझे यह बताइए कि देवताओंमें सबसे श्रेष्ठ देवता कौन है ? ॥ १२० ॥ मुनिने विष्णुको श्रेष्ठ बताया । यह सुनकर वह असुर रावण फिर बोला कि विष्णुने आजतक जिन राक्षसोंको मारा है, वे किस गतिको प्राप्त हुए हैं ? ॥ १२१ ॥ मुनिने कहा—वे सब उत्तम तथा दुर्लभ मुक्तिको प्राप्त हुए हैं । उस राक्षसने फिर प्रश्न किया कि किस उपायसे मेरी मृत्यु श्रीहरिके हाथों हो सकती है ? मुनिने उसके प्रश्नका उत्तर देते हुए कहा कि त्रेतायुगमें विष्णु अयोध्यामें मनुष्यका रूप धारण करेंगे ॥ १२२ ॥ १२३ ॥ उस समय उनसे घोर वैर करके उन परमात्मा रामके हाथों तुम अपना वध करवा लेना ॥ १२४ ॥ उससे तुम मुक्तिपदको प्राप्त हो जाओगे । यह बात मनमें रखकर रावणने रामके साथ विरोध करनेके लिए ही गौतमी नदीके तटसे जनकनन्दिनी सीताका

CC-0. In Public Domain Pandit Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकदा नारदं दृष्ट्वा नत्वा पप्रच्छ रावणः ॥१२६॥
भगवन् ब्रूहि मे योद्धुं कुत्र सन्ति महाबलाः ।
योद्धुमिच्छामि बलिभिस्त्वं जानासि जगत्त्रयम् ॥१२७॥
मुनिर्ध्यात्वा चिरात्प्राह श्वेतद्वीपनिवासिनः । महाबला महाकायास्तत्र याहि महामते ॥१२८॥
विष्णुपूजारता ये वै विष्णुना निहताश्च ये । त एव तत्र संजाता ह्यजेयाश्च सुरासुरैः ॥१२९॥
तच्छ्रुत्वा रावणो वेगान्मंत्रिभिः पुष्पकेण तैः ।
योद्धुकामो ययौ गर्वाच्छ्वेतद्वीपांतिकं मुदा ॥१३०॥
तत्प्रभाहततेजस्कं पुष्पकं नाचलत्पुरः ।
त्यक्त्वा विमानं प्रययौ स्वयमेव दशाननः ॥१३१॥
प्रविशन्नेव तद्द्वीपं धृतो हस्तेन योषिता ।
गच्छंत्या कस्यचिद्दास्या पुष्पाण्यानयितुं वनम् ॥१३२॥
तया पृष्टः कुतः कोऽसि प्रेषितः केन वा वद । इत्युक्त्वा लीलया स्त्रीभिर्हसंतीभिर्मुहुर्मुहुः ॥१३३॥
मुखेषु ताडितो हस्तैर्भ्रामितोऽधोमुखं चिरम् । धृत्वैकं तत्पदं ताभिः क्षिप्तः कंदुकवन्मुहुः ॥१३४॥
परस्परं हि क्रीडद्भिः कया त्यक्तस्तु लीलया । पपात परलंकायां क्रौंचायाः शौचकूपके ॥१३५॥
कृच्छ्राद्धस्ताद्विनिर्मुक्तस्तासां स्त्रीणां दशाननः ।
आश्चर्यमतुलं लब्ध्वा चिन्तयामास दुर्मतिः ॥१३६॥
विष्णुना ये हता युद्धे तेषामेतादृशं बलम् । तर्ह्यत्र निहतस्तेन श्वेतद्वीपं व्रजाम्यहम् ॥१३७॥
मयि विष्णुर्यथा कुप्येत्तथा कार्यं करोम्यहम् ।
इति निश्चित्य वैदेहीं जहार रावणो वनात् ॥१३८॥

हरण कर लिया था ॥ १२५ ॥ अपने वधकी इच्छासे ही उसने सीताको अशोकवनमें रखकर माताके समान रक्षा की थी। एक बार रावणने नारद मुनिको देखकर नमस्कार किया और पूछा—॥ १२६ ॥ हे भगवन् ! आप कृपा करके यह बताइये कि मुझसे लड़नेवाले बलवान् लोग कहाँ हैं ? मैं बलवानोंसे युद्ध करना चाहता हूँ। आप तीनों लोकके लोगोंका जानते हैं ॥ १२७ ॥ मुनिने तनिक देर ध्यान धरके कहा कि श्वेतद्वीपके लोग बड़े भारी शरीरवाले होते हैं और वे नित्य भगवान्‌की पूजामें लगे रहते हैं। जो लोग विष्णुके हाथों मारे जाते हैं, वे ही सुरों तथा असुरोंसे अजेय होकर वहाँ जन्म लेते हैं ॥ १२८ ॥ १२९ ॥ यह सुनकर प्रसन्न रावण अपने मन्त्रियोंके साथ पुष्पक विमानपर सवार होकर गर्व तथा वेगके साथ उन लोगोंसे युद्ध करनेकी इच्छासे श्वेतद्वीपकी ओर चल पड़ा ॥ १३० ॥ परन्तु उस द्वीपकी कान्तिसे चौंधियाकर उसका विमान रुक गया। तब रावण विमान छोड़कर पैदल चलने लगा ॥ १३१ ॥ द्वीपमें घुसते ही एक स्त्रीने उसको एक हाथसे पकड़ लिया। वह किसीकी दासी थी और वनमें पुष्प लेने जा रही थी ॥ १३२ ॥ उस स्त्रीने रावणसे पूछा कि तू कौन है और तुझे यहाँ किसने भेजा है ? बता। इतना कहकर कुछ स्त्रियाँ बारम्बार हँसकर लीलापूर्वक उसके मुखपर तमाचे लगाने लगीं। बादमें उसका पाँव पकड़ तथा उसको औंधे सिर घुमाकर गेंदकी भाँति दूर फेंक दिया ॥ १३३ ॥ १३४ ॥ आपसमें एक दूसरेके साथ खेलती हुई किसी एक स्त्रीने ही यह काम किया था। इस प्रकार फेंकनेपर रावण परलङ्कामें क्रौंचाके शौचालयमें जा गिरा ॥ १३५ ॥ इस प्रकार रावण उन स्त्रियोंके हाथोंसे बड़ी कठिनाईसे छूटा और आश्चर्यचकित होकर वह दुष्ट विचारने लगा—॥ १३६ ॥ ओहो ! विष्णु जिनको मारते हैं, वे लोग कितने बलवान् हो जाते हैं। इसलिए मैं भी उनसे मारा जाकर श्वेतद्वीपमें जाऊँगा ॥ १३७ ॥ अब मैं वही काम करूँगा कि जिससे विष्णु मेरे ऊपर क्रुद्ध हों। यही सोचकर वनमें रावणने

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जानन्नेवं महालक्ष्मीं स जहारावनीसुताम् ।
मातृवत्पालयामास त्वत्तः कांक्षन्वधं निजम् ॥१३९॥

श्रीरामचन्द्र उवाच

वालिसुग्रीवयोर्जन्म श्रोतुमिच्छामि त्वन्मुखात् । रवींद्रौ वानराकारौ जज्ञातं इति तच्छ्रुतम् ॥१४०॥

अगस्त्य उवाच

मेरौ स्वर्णमये पूर्वं सभायां ब्रह्मणः कदा । नेत्राभ्यां पतितं दिव्यमानंदाश्रुजलं तदा ॥१४१॥

तद्गृहीत्वा करे ब्रह्मा ध्यात्वा किंचित्तदत्यजत् ।
भूमौ पतितमात्रेण तस्माज्जातो महाकपिः ॥१४२॥
तमाह द्रुहिणो वत्स त्वमत्र वस सर्वदा ।
एवं बहुतिथे काले गतेऽर्क्षविरजः सुधीः ॥१४३॥

कदाचित्पर्यटन्मेरौ फलमूलार्थमुद्यतः । अपश्यद्दिव्यसलिलां वापीं मणिशिलाचिताम् ॥१४४॥
पानीयं पातुमगमत्तत्र छायामयं कपिम् । दृष्ट्वा प्रतिकपिं मत्वा निपपात जलांतरे ॥१४५॥
तत्रादृष्ट्वा हरिं शीघ्रं बहिरुत्प्लुत्य संययौ । अपश्यत्सुन्दरीं नारीमात्मानं विस्मयं गतः ॥१४६॥
ततो ददर्श मघवा सोऽत्यजद्वीर्यमुत्तमम् । तामप्राप्यैव तद्वीर्यं बालदेशेऽपतद्भुवि ॥१४७॥

वाली समभवत्तत्र शक्रतुल्यपराक्रमः ।
भानुरप्यागमत्तत्र तदानीमेव भामिनीम् ॥१४८॥

दृष्ट्वा कामवशो भूत्वा ग्रीवादेशेऽसृजन्महत् । बीजं तस्यास्ततः सद्यो सुग्रीवो बलवानभूत् ॥१४९॥
तद्द्वयं समादाय गत्वा सा निद्रिता क्वचित् । प्रभातेऽपश्यदात्मानं पूर्ववद्वानराकृतिम् ॥१५०॥

तद्वृत्तं तु विधिः श्रुत्वा किष्किंधाराज्यमुत्तमम् ।
ददौ स वानरेन्द्राय पुत्राभ्यां तत्र संस्थितः ॥१५१॥

वैदेहीका हरण कर लिया ॥ १३८ ॥ उसने यह भी जान लिया था कि ये साक्षात् अवनिसुता लक्ष्मी हैं। इसीलिए उसने अपने वधकी इच्छा करके सीताको माताके समान पाला था ॥ १३९ ॥ श्रीरामचन्द्र बोले—हे मुने! मैं आपके मुखसे वालि और सुग्रीवके जन्मकी कथा सुनना चाहता हूँ। मैंने सुना है कि स्वयं सूर्य तथा इन्द्र वानराकार वालि-सुग्रीवके रूपमें उत्पन्न हुए थे ॥ १४० ॥ अगस्त्य मुनि बोले—मेरु पर्वतके स्वर्णशिखरपर एक बार भरी सभामें सहसा ब्रह्माके नेत्रसे दिव्य आनन्दाश्रु निकल पड़ा ॥ १४१ ॥ ब्रह्माजीने उसको हाथमें ले तथा कुछ ध्यान धरनेके पश्चात् जमीनपर डाल दिया। गिरनेके साथ ही उससे एक महान् कपि उत्पन्न हो गया ॥ १४२ ॥ तब ब्रह्माने उससे कहा—हे वत्स! तुम सदा यहीं रहो। वहीं रहते हुए कुछ दिन बीतनेपर वह ऋक्षविरजा कपि किसी समय मेरु पर्वतपर घूमता-फिरता फल-मूल आदिके लिए एक वनमें जा पहुँचा। उसने वहाँ मणिकी शिलाओंमें बनी हुई स्वच्छ जलवाली एक बावली देखी ॥ १४३ ॥ १४४ ॥ जब वह पानी पीने लगा तो उसे अपनी छाया दिखाई दी। उसे अपना प्रतिपक्षी समझकर वह जलमें कूद पड़ा ॥ १४५ ॥ किन्तु उसमें जब उसको दूसरा वानर नहीं दिखाई पड़ा, तब वह उछलकर बाहर निकल आया। बाहर निकलनेके साथ ही वह एक सुन्दरी स्त्रीके रूपमें परिणत हो गया। यह देखकर उसको बड़ा आश्चर्य हुआ ॥ १४६ ॥ बादमें जब इन्द्रने उसको देखा तो कामवश उनका वीर्य निकलकर उस स्त्रीके बालोंरर जा गिरा ॥ १४७ ॥ उससे इन्द्रतुल्य पराक्रमी वानर बालि पैदा हुआ। उसी समय सूर्यदेव भी वहाँ आ पहुँचे ॥ १४८ ॥ उस सुन्दरी कामिनीको देखकर वे भी कामातुर हो उठे और उस स्त्रीकी गर्दनपर उनका महान् वीर्य गिर पड़ा। जिससे उसी समय बलवान् वानर सुग्रीव उत्पन्न हुआ ॥ १४९ ॥ उन दोनों पुत्रोंको कहीं ले जाकर वह स्त्री सो गयी। प्रातःकाल होनेपर उसने फिर अपने आपको वानररूपमें पाया ॥ १५० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मृतेर्क्षविरजस्याभूद्वाली पुर्यां कपीश्वरः । एवं ते कथितं राम यथा पृष्टं त्वया मम ॥१५२॥

श्रीरामचन्द्र उवाच

यदाऽसौ बालिना बंधुः किष्किन्धाया बहिष्कृतः ।
तदा तस्यैव सचिवः श्रीमान्पवननंदनः ॥१५३॥
न वेद किं बलं नैजं वालितुल्यपराक्रमः । इति रामवचः श्रुत्वा पुनस्तं मुनिरब्रवीत् ॥१५४॥

अगस्तिरुवाच

केसरीनाम विख्यातः कपिरंजनपर्वते ।
तस्यास्तां च शुभे पत्न्यौ वानर्यावेकदा गिरौ ॥१५५॥
प्लवंगस्याञ्जनीनाम्नी स्थिता तावच्च खात्तदा ।
पपात पायसमयः पिंडो गृध्रीमुखाद्भुवि ॥१५६॥
यदा नीतस्तु कैकेय्या कराद्गृध्र्या शुभः पुरा । तं पिंडं भक्षयामास वानरी ह्यमृतोपमम् ॥१५७॥
एतस्मिन्नंतरे तत्र मार्जारास्या समागता । पतिना रहिते ते द्वे क्रीडंत्यौ वसनं तयोः ॥१५८॥
अहरत्पवनो वेगाद्दृष्ट्वा वायुस्तदूरवः ।
अंजनीं प्रार्थयामास तया भोगं चकार सः ॥१५९॥
तथैव प्रार्थयामास मार्जारास्यां स निर्ऋतिः । तयाऽकरोद्रतिं तत्र सोऽपि पर्वतमूर्द्धनि ॥१६०॥
तयोस्ताभ्यां समुत्पन्नो वानर्यां मारुतात्मजः ।
मार्जार्याः समभूद्घोरः पिशाचो घर्घरस्वनः ॥१६१॥
चैत्रे मासि सिते पक्षे हरिदिन्यां मघाऽभिधे । नक्षत्रे स समुत्पन्नो हनुमान् रिपुसूदनः ॥१६२॥
महाचैत्रीपूर्णिमायां समुत्पन्नोऽञ्जनीसुतः । वदन्ति कल्पभेदेन बुधा इत्यादि केचन ॥१६३॥
बालभावेऽपि यः पूर्वं दृष्ट्वोद्यंतं विभावसुम् ।
मत्वा पक्वफलं चेति जिघृक्षुर्लीलयोत्प्लुतः ॥१६४॥

वह वृत्तान्त सुनकर ब्रह्माजीने वानरेन्द्र ऋक्षविरजाको किष्किधा नगरीका उत्तम राज्य दे दिया। जहाँपर वह अपने दोनों पुत्रोंके साथ रहने लगा ॥ १५१ ॥ उस ऋक्षराजके मर जानेपर किष्किन्धापुरीका राजा कपीश्वर बाली हुआ। हे राम! जो आपने पूछा, मैंने वह सब कह दिया ॥ १५२ ॥ श्रीरामचन्द्र बोले—जब सुग्रीवको बालीने किष्किन्धासे बाहर निकाल दिया था, उस समय इनके मन्त्री ये वायुनन्दन हनुमान् भी साथ थे ॥ १५३ ॥ पर इनको बालीके समान अपना बल क्यों नहीं याद आया? रामके इस वचनको सुनकर मुनि अगस्त्य फिर कहने लगे— ॥ १५४ ॥ अंजन पर्वतनिवासी केसरी नामसे विख्यात कपिकी दो वानरी स्त्रियें थीं ॥ १५५ ॥ किसी समय उस कपिकी अंजनी नामकी स्त्री वहाँ बैठी थी। इतनेमें आकाशसे किसी गृध्रीके मुखसे छूटकर पायसका एक पिण्ड आ गिरा ॥ १५६ ॥ यह पिंड वही था जो कि पहले कैकेयी-के हाथसे एक गृध्री छीन ले गयी थी। उस अमृततुल्य पिण्डको वानरीने खा लिया ॥ १५७ ॥ इतनेमें वहाँ वह दूसरी मार्जारास्या वानरी भी आ पहुँची। पतिकी अनुपस्थितिमें वे दोनों क्रीड़ा कर रही थीं। तभी उन दोनोंके वस्त्रोंको पवनने उड़ाकर ऊँचे उठाया तथा उनकी जाँघोंको देख लिया। पश्चात् अंजनीसे प्रार्थना करके उसके साथ वायुने भोग किया ॥ १५८ ॥ १५९ ॥ उसी प्रकार निर्ऋतिने मार्जारास्यासे प्रार्थना करके पर्वतके शिखरपर उसके साथ रति की ॥ १६० ॥ उन दोनोंसे उन दोनोंमें—वानरीसे मारुतात्मज हनुमान् तथा मार्जारीसे घोर घर्घरस्वन पिशाच उत्पन्न हुआ ॥ १६१ ॥ चैत्र शुक्ल एकादशीके दिन मघानक्षत्रमें रिपुदमन हनुमान्-का जन्म हुआ था ॥ १६२ ॥ कुछ पण्डित कल्पभेदसे चैत्रकी पूर्णिमाके दिन हनुमान्का शुभ जन्म हुआ, ऐसा कहते हैं ॥ १६३ ॥ वे हनुमान् बाल्यकालमें ही सूर्यको देख तथा उसे पका फल समझकर उसको लेनेकी

CC0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योजनानां पंचशतं वायुवेगेन मारुतिः। राहुस्तस्मिन्दिने दर्शे ययौ सूर्यं रघूत्तम ॥१६५॥
तावद्दृष्ट्वा धर्तुकामं रवेरग्रे कपिं स्थितम्। तदा राहुर्भयादेव रविं मुक्त्वेंद्रमाययौ ॥१६६॥
राहुः प्राह शचीनाथं तव पीडां करोम्यहम्।
दत्तः पूर्वं त्वया सूर्यः पीडां कर्तुं सुरेश्वर ॥१६७॥
तत्र विघ्नं समुत्पन्नं तत्त्वं शीघ्रं निवारय। तद्राहुवचनादिंद्रः समारुह्य गजोपरि ॥१६८॥
देवैर्युतो ययौ वेगाद्ददर्श प्लवगं पुरः। तदा मुमोच तं वज्रं मघवा मारुतिं प्रति ॥१६९॥
वज्रपातान्मारुतिः खात् पपात गिरिकन्दरे।
तदा भग्ना हनुस्त्वस्य हनुमानिति वै यतः ॥१७०॥
ख्यातिं गतोऽयं सर्वत्र तदा वायुश्चुकोप ह।
सांत्वयित्वा हनूमंतं स्वयं स्तब्धोऽभवत्तदा ॥१७१॥
वायुस्तम्भाज्जनाः सर्वे निपेतुर्धरणीतले। त्रैलोक्यं शववज्जातं हाहाकारोऽभवद्दिवि ॥१७२॥
तदा धिक्कृत्य देवेंद्रं वेधा वायुं ययौ जवात्।
प्रार्थयामास तं नत्वा पुनर्वायु वचोऽब्रवीत् ॥१७३॥
देवेन्द्रस्यापराधं त्वं क्षन्तुमर्हसि कंपन। तव पुत्राय दास्यामि वरानद्य हनूमते ॥१७४॥
तदा तुष्टोऽभवद्वायुश्चचाल पूर्ववत्पुनः। अभूत्संजीवितं सर्वं त्रैलोक्यं क्षणमात्रतः ॥१७५॥
तदा ददौ वरान् ब्रह्मा मारुतिं पुरतः स्थितम्।
भविष्यसि त्वममरो वज्रदेहो वरान्मम ॥१७६॥
ते कुंठिता गतिर्माऽस्तु कुत्राप्यंजनिसंभव। भविष्यति हरौ भक्तिस्तव नित्यमनुत्तमा ॥१७७॥
त्वं विष्णोरपि साहाय्यं करिष्यसि वरान्मम।
इत्युक्त्वाऽन्तर्दधे वेधा राहुः सूर्यं ययौ पुनः ॥१७८॥

इच्छासे लीलापूर्वक ऊपरको उछले॥ १६४॥ उस समय मारुति बायुवेगसे पाँच सौ योजन ऊपर उठ गये थे। हे रघूत्तम! उसी दर्श (अमावस्या) के दिन राहु भी ग्रसनेके लिए सूर्यके पास गया, किन्तु उन्हें पकड़नेकी इच्छासे खड़े हनुमान्‌को देखा। तब राहु डरा और सूर्यको छोड़कर इन्द्रके पास जा पहुँचा ॥१६५॥१६६॥ शचीपति इन्द्रसे राहु बोला—अब मैं आपको ही सताऊँगा। क्योंकि पूर्वकालमें आपने मुझे सतानेके लिये सूर्यको दिया था॥ १६७॥ परन्तु उसमें इस समय विघ्न उपस्थित हो गया है। अतः उसका आप निवारण करें, नहीं तो मैं आपहीको दुःख दूँगा। इस प्रकार राहुके कथनानुसार इन्द्र गजपर सवार होकर देवताओंके साथ सूर्यके पास गये तो वहाँ उनके सामने हनुमान्‌को खड़ा देखा। तत्काल इन्द्रने उनके ऊपर वज्रप्रहार किया ॥ १६८॥ १६९॥ वज्रके आघातसे हनुमान् नीचे गिरिकन्दरामें जा गिरे और उनकी ठुड्ढी टेढ़ी हो गयी। जिससे कि उनका हनुमान् नाम पड़ा॥ १७०॥ उनका यह नाम सर्वत्र प्रसिद्ध हो गया। यह देखकर उनके पिता वायुदेवने कुपित होकर अपनी गति बन्द कर दी॥ १७१॥ वायुके बन्द हो जानेसे सब लोग मर-मरकर धरतीपर गिरने लगे। तीनों लोक मृतक जैसे हो गये और देवलोकमें भी हाहाकार मच गया॥ १७२॥ तब ब्रह्मा इन्द्रको धिक्कारकर शीघ्र वायुके पास गये और नमस्कार करके प्रार्थनापूर्वक कहा—॥ १७३॥ हे कंपन! तुम देवेन्द्रके अपराधको क्षमा कर दो। मैं तुम्हारे पुत्र हनुमान्‌को वर देता हूँ॥ १७४॥ तब प्रसन्न होकर वायु पुनः पूर्ववत् बहने लगा। अतः क्षणमात्रमें तीनों लोक फिर जीवित हो गये॥ १७५॥ पश्चात् ब्रह्माने सामने खड़े मारुतिको वर दिया कि तुम मेरे वचनसे वज्रदेह होकर अमर हो जाओगे॥ १७६॥ हे अंजनीपुत्र! तुम्हारी गति कहीं भी प्रतिहत न होगी और नित्य श्रीहरिमें तुम्हारी उत्तम भक्ति बनी रहेगी ॥१७७॥ मेरे वरदानसे तुम विष्णुकी सहायता करनेमें भी समर्थ होओगे। इतना कहकर ब्रह्मा अन्तर्धान हो गये और राहु पुनः

CC-0. In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

श्रीराम उवाच

देवेंद्रेण कथं दत्तो रविस्तस्मै स राहवे । तत्सर्वं विस्तरेणैव कथयस्व ममाग्रतः ॥१७९॥

अगस्तिरुवाच

सुधापानादयं राहुर्दैत्योऽभूदमरः स्वयम् । ग्रहोऽष्टमोऽभवत्सोऽपि यदाऽत्राछदयं सुरान् ॥१८०॥
पीडां कर्तुं तदा देवाः सूर्यं सोमं ददुस्तु वै । ज्ञात्वा धर्मैर्जनाः सर्वे निजकर्मादिहेतवे ॥१८१॥
मोचयिष्यन्ति राहोश्च शशिनं भास्करं प्रति । यदा यदा भवत्यत्रोपरागो जगतीतले ॥१८२॥
तदा तदा जना धर्मैर्निजमत्यर्थमादरात् ।
तोषयित्वा सदा राहुं तौ तस्मान्मोचयंति हि ॥१८३॥
एतत्सर्वं मया प्रोक्तमुपरागस्य कारणम् । जन्म कर्म वरादानं मारुतेश्चापि विस्तरात् ॥१८४॥
अतस्तद्बलमाहात्म्यं को वा शक्नोति वर्णितुम् । स एकदा मुनीनां हि चाश्रमेषु कुशादिकान् ॥१८५॥
चकारेतस्ततः सर्वान्धर्षयन्मुनिबालकान् । तस्य तत्कर्म मुनिभिर्दृष्ट्वा शप्तोऽञ्जनीसुतः ॥१८६॥
अद्यारभय कपिश्रेष्ठ न ज्ञास्यसि स्वपौरुषम् ।
यदाऽन्यस्य मुखात्स्वीयं बलं श्रोष्यसि विस्तरात् ॥१८७॥
भविष्यति तदा पूर्वस्मृतिस्ते पौरुषं पुनः । अतः सुग्रीवसान्निध्ये विस्मृतः स्वपराक्रमः ॥१८८॥
यदा स्तुतो जांबवता पुरा प्रायोपवेशने । तदा स्मृतिस्तस्य जाता स्वबलस्य हनूमतः ॥१८९॥
एतत्ते सर्वमाख्यातं त्वया पृष्टं मया तव । यथा तथा सविस्तारं कपिरावणचेष्टितम् ॥१९०॥
राम त्वं परमेश्वरोऽसि सकलं जानासि विज्ञानदृक्
भूतं भव्यमिदं त्रिकालकलनासाक्षी विकल्पोज्झितः ।
भक्तानामनुवर्त्तनाय सकलां कुर्वन् क्रियासंहतिं
चाश्रृण्वन् मनुजाकृतिर्मम वचो भासीश लोकार्चितः ॥१९१॥

सूर्यके पास गया ॥ १७८ ॥ श्रीरामजीने पूछा कि देवेन्द्रने सूर्य राहुको क्यों दे दिया था ? हे मुनीन्द्र ! यह कथा आप विस्तारसे कहें ॥ १७९ ॥ अगस्त्य ऋषि बोले—हे राम ! दैत्य राहु पूर्वकालमें सुधापान करके अमरत्वको प्राप्त हो गया था । बादमें जब वह अष्टम ग्रह हो गया, तब उसने देवताओंको दुःख देना चाहा । यह देखकर देवताओंने सूर्य तथा चन्द्रमा राहुको दे दिया और यह सोचा कि संसारके लोग अपने कामके लिए धर्मके द्वारा राहुसे सूर्य तथा चन्द्रमाको छुड़ा लेंगे । उसीके अनुसार सूर्य-चन्द्रको जब-जब ग्रहण लगता है, तब-तब मनुष्य अपने कार्यसाधनके लिये आदरपूर्वक दान-धर्मसे राहुको संतुष्ट करके उससे सूर्य-चन्द्रको छुड़ा लेते हैं ॥ १८०–१८३ ॥ इस प्रकार मैंने ग्रहणका कारण तथा मारुतिका जन्म-कर्म आदि वृत्तान्त सविस्तार आपको कह सुनाया ॥ १८४ ॥ पूरी तरह हनुमान्‌के बल-प्रतापका वर्णन कौन कर सकता है । उन्होंने एक दिन मुनियोंके आश्रममें जाकर उनके बालकोंको डराया-धमकाया और कुशा आदि सब सामग्री इधर-उधर बिखेर दी । उनके इस कामको देखकर मुनियोंने अंजनीसुत हनुमान्‌को शाप देते हुए कहा—॥ १८५ ॥ हे कपिश्रेष्ठ ! आजसे तुम अपने पुरुषार्थको भूल जाओगे और जब कभी दूसरेके मुखसे अपना बल विस्तारसे सुनोगे ॥ १८६ ॥ १८७ ॥ तब स्मरण होगा । वे सुग्रीवके पास रहते समय इसी कारण अपना पुरुषार्थ भूल गये थे । बादमें समुद्रतटपर उपवासके समय जब जांबवान्‌ने उनकी स्तुति करके उनके बलका स्मरण दिलाया, तब हनुमान्‌को तुरन्त अपना बल याद आगया था ॥ १८८ ॥ १८९ ॥ यह सब मैंने आपके पूछनेके अनुसार सविस्तार कपि हनुमान् तथा रावणका कार्यकलाप कह सुनाया ॥ १९० ॥ हे राम ! आप परमेश्वर हैं, ज्ञानदृष्टिसे सब कुछ देखते हैं, विकल्परहित आप भूत-भविष्य-वर्तमान तीनों कालकी क्रियाके विज्ञ और सबके साक्षी हैं । भक्तोंके अनुरोधसे आप समस्त क्रियाकलाप करते हुए मनुष्य बनकर मेरे वचनको

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीशिव उवाच

स्तुत्वैवं राघवं तेन पूजितः कुंभसंभवः। स्वाश्रमं मुनिभिः सार्धं प्रययौ गुप्तविग्रहः ॥१९२॥
विन्ध्याचलं निजं रूपं स मुनिर्नैव दर्शयत्। पुनरुत्थास्यति गिरिश्चेति मत्वा तु तद्भयात् ॥१९३॥

रामस्तु सीतया सार्द्धं भ्रातृभिः सह मंत्रिभिः।
संसारीव रमानाथो रममाणोऽवसद्गृहे ॥१९४॥

अनासक्तोऽपि विषयान् बुभुजे प्रियया सह। हनुमत्प्रमुखैः सद्भिर्वानरैः परिसेवितः ॥१९५॥
राघवे शासति भुवं लोकनाथे रमापतौ। वसुधा सस्यसंपन्ना फलवंतश्च भूरुहाः ॥१९६॥
जनाः स्वधर्मनिरताः पतिभक्तिपराः स्त्रियः। नापश्यत्पुत्रमरणं कश्चिद्राजनि राघवे ॥१९७॥
समारुह्य विमानाग्र्यं राघवः सीतया सह। वानरैर्भ्रातृभिः सार्द्धं संचचारावनिं प्रभुः ॥१९८॥
अमानुषाणि कर्माणि चकार बहुशो भुवि। लोकानामुपदेशार्थं परमात्मा रघूत्तमः ॥१९९॥

कोटिशः शिवलिंगानि स्थापयामास सर्वतः।
अश्वमेधादिविविधान् यज्ञान् विपुलदक्षिणान् ॥२००॥

चकार परमानन्दो मानुषं वपुरास्थितः। सीतां तां रमयामास सर्वभोगैरमानुषैः ॥२०१॥
शशास रामो धर्मेण राज्यं परमधर्मवित्। कथाः संस्थापयामास सर्वलोकमलापहाः ॥२०२॥
एकादशसहस्राणि सैकादशसमानि च। त्रेतायुगभवान्येव वर्षाणि रघुनन्दनः ॥२०३॥
चकार राज्यं धर्मेण लोकवन्द्यपदांबुजः। कलेर्मानेन ज्ञेयानि लक्षाण्येकादशैव हि ॥३०४॥
सैकादशशतान्यत्र रामो राज्यं चकार सः। एकपत्नीव्रतो रामो राजर्षिः सर्वदा शुचिः ॥२०५॥
यस्यैकमेव तच्चासीत् पत्नीवाक्यं शरस्तथा। गृहमेधीयमखिलमाचरन् शिक्षितुं नरान् ॥२०६॥
सीता प्रेम्णाऽनुवृत्त्या च प्रश्रयेण दमेन च। भर्तुर्मनोहरा साध्वी भावज्ञा सा ह्रिया भिया ॥२०७॥

सुनते हैं। हे ईश! सब लोगोंसे पूजित होकर आप बड़ी ही शोभाको प्राप्त हो रहे हैं॥ १९१॥ श्रीशिवजी बोले-इस प्रकार रामकी स्तुतिकर तथा उनसे पूजा-सत्कार प्राप्त करके गुप्तविग्रह अगस्त्य मुनि सब मुनियोंको साथ लेकर अपने आश्रमको चले गये॥ १९२॥ जाते समय मुनिने अपना रूप विन्ध्याचलको इस डरसे नहीं दिखलाया कि वह कहीं फिर उठकर न खड़ा हो जाय॥ १९३॥ उधर रामचन्द्रजी सीता, मन्त्रिगण तथा भ्राताओंके साथ संसारी जीवोंके समान क्रीड़ा करते हुए अपने घरमें रहने लगे॥ १९४॥ आसक्त न होते हुए भी अपनी प्रिया सीताके साथ ऐहिक विषयोंका आनन्द लेते रहे। हनुमान् आदि अच्छे वानर श्रीहरि-की सेवामें लग गये॥ १९५॥ रमापति तथा लोकनाथ रामके शासनकालमें घरा धन-धान्यपूर्ण हो गयी, वृक्ष खूब फलने लगे॥ १९६॥ मानवगण अपने-अपने धर्मपथपर चलने लगे और स्त्रियें पतिभक्तिपरायणा होकर रहने लगीं। रामके राज्यमें माता-पिताके जीते जी कहींपर पुत्रमरण नहीं होता था॥ १९७॥ वे प्रभु राम-सीता, लक्ष्मण आदि भाइयों तथा वानरोंके साथ विमानपर सवार होकर अवनीतलपर विचरते थे॥ १९८॥ पृथ्वीपर उन्होंने अनेक लोकोत्तर कार्य किये। परमात्मा रामने लोगोंको उपदेश देनेके लिए सर्वत्र करोड़ों शिव-लिंग स्थापित किये। परमानन्दस्वरूप परमेश्वर रामने मनुष्यका रूप धारण करके बहुतेरी दक्षिणावाले विविध अश्वमेध यज्ञ किये। मनुष्योंको दुर्लभ अनेक भोगसाधनोंसे रामने सीताको सन्तुष्ट किया॥१९९॥२००॥ ॥ २०१॥ परम धर्मज्ञ रामने न्यायपूर्वक राज्यका शासन करके लोगोंके पापोंको दूर करनेवाली अनेक कथाएँ स्थापित कीं॥ २०२॥ त्रेतायुगके ग्यारह हजार वर्ष पर्यन्त लोगों द्वारा वन्दनीय चरणकमलवाले रघुनन्दनने धर्मपूर्वक राज्य किया। कलियुगके हिसाबसे रामने यहाँ ग्यारह लाख ग्यारह वर्षतक राज्य किया। राजर्षि राम सर्वदा पवित्र रहकर एकपत्नीव्रतमें स्थिर रहे॥ २०३-२०५॥ जिनके लिए पत्नीका वाक्य और बाण एक समान था। उन्होंने समस्त गृहस्थाश्रमका कार्य एकमात्र लोगोंको शिक्षा देनेके लिए किया था

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युक्त्वा तं रंजयामास राजानं राघवं मुदा । एवं गिरींद्रजे प्रोक्तं रामराज्योत्तरोद्भवम् ॥२०८॥
चरितं रघुनाथस्य यथा पृष्टं त्वया मम । श्रवणात्सर्वपापघ्नं महामंगलकारकम् ॥२०९॥

सारकांडमिदं देवि ये शृण्वन्ति नरोत्तमाः ।
तेषां मनोरथाः सर्वे परिपूर्णा भवन्ति हि ॥ २१० ॥

इति श्रीशतकोटिरामचरितांतर्गते श्रीमदानन्दरामायणे वाल्मीकीयें सारकाण्डे
अगस्तिरामशिवपार्वतीसंवादे त्रयोदशः सर्गः ॥ १० ॥

प्रथमसर्गे श्लोकाः ॥ १०९ ॥ द्वितीये ॥ ३१ ॥ तृतीये ॥ ३९४ ॥ चतुर्थे १७० ॥ पंचमे ॥ १४० ॥ षष्ठे ॥ १३० ॥ सप्तमे ॥ १६६ ॥ अष्टमे ॥ १२५ ॥ नवमे ॥ ३१० ॥ दशमे ॥ २७३ ॥ एकादशे ॥ २८८ ॥ द्वादशे ॥ २०२ ॥ त्रयोदशे ॥ २१० ॥ एवं सारकाण्डस्य पूर्णश्लोकसंख्या ॥ २५५८ ॥

॥ २०६ ॥ सीता प्रेमके अनुकूल बर्तावसे, नम्रतासे, लज्जासे, डरसे, पातिव्रत धर्मसे, मनोहरभावसे तथा पतिके मनोभावको जानकर उसके अनुसार व्यवहारसे राजा रामको प्रेमपूर्वक आनन्दित करने लगीं। हे गिरीन्द्रजे ! इस प्रकार मैंने तुमको रामके राज्यकालके बादका सब वृत्तान्त कह सुनाया, जैसा कि तुमने पूछा था। यह रामचरित्र श्रवणमात्रसे सब पापोंका नाशक तथा महामंगलकारी है ॥ २०७–२०९ ॥ हे देवि ! जो लोग इस सारकांडको श्रद्धासे सुनते हैं, उन नरश्रेष्ठोंके सब मनोरथ पूर्ण होते हैं। इसमें तनिक भी सन्देह नहीं है ॥ २१० ॥ इति श्रीमच्छतकोटिरामचरितांतर्गते श्रीमदानंदरामायणे वाल्मीकीये सारकांडे अगस्तिरामशिवपार्वतीसंवादे पं० रामतेजपाण्डेयकृत 'ज्योत्स्ना' भाषाटीकायां त्रयोदशः सर्गः ॥ १३ ॥

इस सारकाकाण्डके पहिले सर्गमें १०९ श्लोक, दूसरेमें ३१, तीसरेमें ३९४, चौथेमें १७०, पाँचवेंमें १४०, छठेंमें १३०, सातवेंमें १६६, आठवेंमें १२५, नवेंमें ३१०, दसवेंमें २७३, ग्यारहवेंमें २८८, बारहवेंमें २०२ तथा तेरहवेंमें २१० श्लोक हैं। इस प्रकार इस सारकाण्डमें कुल २५५८ श्लोक हैं।

*** इति श्रीमदानन्दरामायणे सारकाण्डं समाप्तम् ***

श्रीरामचन्द्रार्पणमस्तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection